* अथ *

श्रीपशुपतिदेवपत्तनं वास्तव्यः लोकनाथात्मज दिवाकरनाथः आचार्यः ।

वार्षिक व्रतरत्नावली

(ठूलो व्रतराज)

(नेपाली भाषा-टीका सहित)

टीकाकार—पं० एकदेव उपाध्याय

प्रकाशक—

तृतीय संस्करण
२०३६ साल

जय नेपाल प्रकाशन, कचौड़ीगली, वाराणसी ।

मूल्य : ४५/-

वार्षिक व्रतरत्नावलीस्थ व्रत-पूजा:कथा-अनुक्रमणिका—

श्रीरामनवमी पूजाविधिः	१
श्रीरामनवमी व्रतकथा	६
एकादशी नियमविशेष पूजाप्रकारः	२१
एकादशी पूजा विधिः	२५
पूर्णिमायां चन्द्रपूजाविधिः	३८
अक्षतृतीया पूजाविधिः	४६
कण्डारक पूजाविधिः	५९
श्रीकृष्णाष्टमी पूजाविधिः	५१
श्रीकृष्णाष्टमी व्रतकथा	५७
हरितालिका पूजाविधिः	७१
हरितालिका व्रतकथा	७७
अगस्त्यर्घविधिः	९१
ऋषिपञ्चमी पूजाविधिः	९३
ऋषिपञ्चमी व्रतकथा	९७
अनन्तपूजाविधिः	१०९
अनन्त व्रतकथा	१२७
शरत्कालीय नवरात्र पूजाविधिः	१५१
महानवमी विजयादशमी पूजाविधिः	१८४
कोजागार लक्ष्मीपूजाविधिः	१८९
कोजागार लक्ष्मीव्रतकथा	१९३
कार्तिककृत्य व्रतपूजोद्यापनविधिः	२०५
लक्ष्मीपूजाविधिः	२१०
यमद्वितीयायां भ्रातृपूजाविधिः	२२५
तुलसीपूजाविधिः	२३२
पौष-रविवार व्रतपूजाविधिः	२४०
गणेशचतुर्थी पूजाविधिः	२४४
गणेशचतुर्थी व्रतकथा	२५०
बसन्तपञ्चमी पूजाविधिः	२५७

श्रीस्वस्थानी व्रत-पूजाविधिः २८०
शिवरात्रि पूजाविधिः २९०
शिवरात्रि व्रतकथा ३०१
सूर्यपूजाविधिः ३४५
भौमव्रत पूजाविधिः ३५३
सत्यदुर्गा पूजाविधिः ३६३
शीतला पूजाविधिः ३७२
महादीपादि दीपपूजाविधिः ३७५
लक्षवर्तिका दीपदानविधिः ३७८
जन्मोत्सव पूजाविधिः ३८२
मंत्रीकरणविधिः ३९०
पुरुषोत्तममास अपूपदान पूजाविधिः ३९३
उद्यापनविधिः ३९५
रामनवमी व्रतोद्यापनविधिः ४०१
एकादश्युद्यापन विधिः ४०३
पौर्णमासी व्रतप्रतिष्ठाविधिः ४११
कृष्णष्टमी व्रतोद्यापनविधिः ४१३
हरितालिका व्रतोद्यापनविधिः ४१४
ऋषिपञ्चमी व्रतोद्यापनविधिः ४१६
अनन्तचतुर्दशी व्रतोद्यापनविधिः ४१८
कोजाग्रत व्रतप्रतिष्ठाविधिः ४१९
कार्तिक व्रतप्रतिष्ठाविधिः ४२०
पौषार्क व्रतप्रतिष्ठाविधिः ४२२
स्वस्थानी व्रतप्रतिष्ठाविधिः ४२३
शिवरात्रि व्रतप्रतिष्ठाविधिः ४२३
सोमवती व्रतप्रतिष्ठाविधिः ४२४
सामान्याष्टमी चैत्राष्टमी-महाष्टमी व्रतप्रतिष्ठाविधि ४२५
मंगलचतुर्थी व्रतप्रतिष्ठाविधिः ४२७
शनिप्रदोष व्रतप्रतिष्ठाविधिः ४२८
सामान्यचतुर्दशी व्रतप्रतिष्ठाविधिः ४२८
पक्षप्रदोष व्रतप्रतिष्ठाविधिः ४३०
सर्वव्रतप्रतिष्ठान्यविधिः ४३१

आफ्नू प्रकाशनका केही पुस्तकहरू

एकोद्दिष्ट श्राद्ध	५/-	महाभारत	८०/-
चूड़ोपनयन	३/-	ऐग्लो नेपाली टीचर	१४/-
कार्तिक माहात्म्य	१०/-	सत्यनारायण व्रतकथा	३/-
हरितालिका	१/-	तासको जादू	१/-
ऋषिपंचमी	२/५०	विवाहपद्धति	४/-
बूढीषडङ्गरुद्री	१०/-	वैशाख माहात्म्य	२४/-
अकबर-बीरबल	७/-	प्रेमलहरी चारै भाग	४/-
गरुड़पुराण	१२/-	इन्द्रजाल	८/-
चण्डी नेपाली टीका	१६/-	नित्यकर्मविधि	४/-
रुद्री	६/-	वार्षिक व्रतरत्नावली	२५/-
स्वस्थानी सानू अक्षरमा	१५/-	चण्डी यन्त्र	१/-
स्वस्थानी ठूलो अक्षरमा	१५/-	रायायण आठ काण्ड	३५/-
ग्रहशान्ति	४/-	गौरी शिवशङ्कर गुटिका	१०/-
अन्त्यपद्धति	६/-	गीता नेपाली	१२/-
पुरुषोत्तम मास माहात्म्य	२४/-		

जय नेपाल प्रकाशन, कचौड़ीगली, वाराणसी-२२१००१

* १—श्रीराम-नवमी-पूजाविधिः प्रारम्भः *

ॐ अद्येहाऽमुकगोत्रस्याऽमुकशर्मणो ममाऽभीष्टसिद्ध्यर्थमादौ दीप-कलश-गणेश-पूजनपूर्वकं श्रीराम-पूजनमहङ्करिष्ये, इति संकल्पं कुर्यात् । तथा नाममन्त्रेण षडङ्गन्यासं च कुर्यात् । फलपुष्पाऽक्षतसहितं जलपूर्णताम्रपात्रं गृहीत्वा—'उपोष्य नवमी त्वद्य यामेष्वष्टसु राघव ॥ तेन प्रीतो भव त्वं मे संसारात्त्राहि मां हरे ॥' इति मन्त्रेण पात्रस्थं जलं क्षिपेत् । ततः शक्तितो हैमीं रामप्रतिमाम् अष्टदलोपरि संस्थाप्य, ॐ मनोजूतिरिति० अस्यै प्राणाः प्रतिष्ठन्तु इति प्राणप्रतिष्ठां कुर्यात् । अथ ध्यानम् । कोमलाक्षं विशालाक्षमिन्द्रनीलसमप्रभम् ॥ दक्षिणाङ्गं दशरथं पुत्रावेक्षणतत्परम् ॥ पृष्ठतो लक्ष्मणं देवं सच्छत्रं कनकप्रभम् ॥ पार्श्वे भरतशत्रुघ्नौ ताल-वृन्तकरावुभौ ॥ अग्रे व्यग्रं हनूमन्तं रामाऽऽनुग्राहकांक्षिणम् ॥ इति ध्यायेत् ॥ ॐ विष्णोरराटम-सीति० आवाहनम् ॥ आवाहयामि विश्वेशं जानकीवल्लभं प्रभुम् ॥ कौसल्यातनयं विष्णुं श्रीराम प्रकृतेः परम् । ॐ सहस्रशीर्षेति० ॥ श्रीरामाऽऽगच्छ भगवान् रघुवीर नृपोत्तम ॥ जानक्या सह राजेन्द्र सुस्थिरो भव सर्वदा ॥ रामचन्द्र महेष्वास रावणान्तक राघव । यावत्पूजां

समाप्येऽहं तावत्त्वं सन्निधौ भव ॥ इति सन्निधानम् ॥ रघुनायक राजर्षे नमो राजीवलोचन ॥ रघुनन्दन मे देव श्रीरामाऽभिमुखो भव ॥ इति सम्मुखीकरणम् ॥ अथ आसनम् ॥ राजाऽधिराज राजेन्द्र रामचन्द्र महीपते । रत्नसिंहासनं तुभ्यं दास्यामि स्वीकुरु प्रभो ॥ ॐ पुरुषऽएवेद० इति पाद्यम् ॥ त्रैलोक्यपावनानन्त नमस्ते रघुनायक ॥ पाद्यं गृहाण राजर्षे नमो राजीवलोचन ॥ ॐ एतावानस्येति० अर्घ्यम् ॥ परिपूर्ण परानन्द नमो रामाय वेधसे । गृहाणार्घ्यं मया दत्तं कृष्ण विष्णो जनार्दन । ॐ त्रिपाद्दूर्ध्वेति० आचमनीयम् ॥ नमः सत्याय शुद्धाय नित्याय ज्ञानरूपिणे ॥ गृहाणाऽऽचमनं नाथ सर्वलोकैकनायक ॥ ॐ ततो विराडेति स्नानाम् । रामाय रामभद्राय नमः कारुण्यरूपिणे । गङ्गोदकं मयाऽऽनीतं स्नानार्थं प्रतिगृह्यताम् ॥ ॐ तस्माद्यज्ञेति० मधुपर्कम् ॥ नमः श्रीवासुदेवाय तत्त्वज्ञानस्वरूपिणे ॥ मधुपर्कं गृहाणेदं जानकीपतते नमः ॥ अथ पञ्चामृतम्—कामधेनुसद्भूतं सर्वेषां जीवनं परम् ॥ पावनं सर्वभूतानां पयःस्नानार्थमर्पितम् ॥ ॐ पयः पृथिव्यामिति० पयःस्नानम् ॥ पयसस्तु समुद्भूतं मधुराम्लं शशिप्रभम् ॥ दध्यानीतं मया राम स्नानार्थं प्रतिगृह्यताम् ॥ दधिक्राब्णो० इति दधिस्नानम् । नवनीतसमुत्पन्नं वर्षसन्तोषकारकम् । घृतं तुभ्यं प्रयच्छामि स्नानार्थं प्रतिगृह्यताम् ॥ ॐ घृतम्मिमिक्षेति०

घृतस्नानम् ॥ तरुपुष्पसमुद्भुतं सुस्वादु मधुरं मधु ॥ तेजःपुष्टिकरं दिव्यं स्नानार्थं प्रतिगृह्यताम् ॐ मधुव्वातेति मधुस्नानम् ॥ इक्षुसारसमुद्भुता शर्करा पुष्टिकारिका ॥ मलापहारिका दिव्या स्नानार्थं प्रतिगृह्यताम् ॥ ॐ अपाꣳ रसेति० शर्करास्नानम् ॥ शुद्धोदकस्नानम् ॥ ब्रह्माण्डोदरमध्यस्थैस्तीर्थैश्च रघुनन्दन ॥ स्नापयिष्याम्यहं भक्त्या त्वं गृहाण जनार्दन ॥ गन्धोदकस्नानम् ॥ मलयाचलसंभूतं कर्पूरादिसुवासितम् ॥ चन्दनं देवदेवेश स्नानार्थं प्रतिगृह्यताम् ॥ ॐ गन्धद्वारा० इति गन्धम् ॥ अथोद्वर्तनम् ॥ नानासुगन्धिद्रव्यञ्च चन्दनं रजनीयुतम् ॥ उद्वर्तनं मयाऽऽनीतं स्नानार्थं प्रतिगृह्यताम् । अथ शुद्धोदकेन ॥ सहस्रशीर्षेति० षोडशऋग्भिः स्नायात् ॥ अथ वस्त्रम—तप्तकाञ्चनसंकाशं पीताम्बरमिदं हरे ॥ संगृहाण जगन्नाथ रामचन्द्र नमोऽस्तु ते ॥ ॐ तस्माद्यज्ञात्सर्व्वहुतऽऋचः० इति यज्ञोपवीतम् । श्रीरामाऽच्युत यज्ञेश श्रीधरानन्त राघव ॥ ब्रह्मसूत्रं सोत्तरीयं गृहाण रघुनन्दन ॥ ॐ तस्मादश्वेति० चन्दनम् ॥ कुङ्कुमागरुकस्तूरी कर्पूरं चन्दनं तथा ॥ तुभ्यं दास्यामि राजेन्द्र श्रीराम स्वीकुरु प्रभो ॥ अक्षन्नमीमदन्तेति अक्षताः—अक्षताः परमा दिव्याः कुङ्कुमाक्ताः सुशोभनाः ॥ भवदुःखविनाशार्थं गृहाण रघुनन्दन । ॐ श्रीश्चतेति पुष्पम् ॥ तुलसीकुन्दमन्दारजातिपुन्नागचम्पकैः ॥ कदम्बकरवीरैश्च

कुसुमैः शतपत्रकैः ॥ नीलाम्बुजैर्बिल्वपत्रैरर्चयेद्राघवं विभुम् ॥ पूजयिष्याम्यहं भक्त्या संगृहाण जनार्दन ॥ ॐ यत्पुरुषमिति० तुलसीपत्रम् ॥ तुलसीं हेमरूपां च रत्नरूपां च मञ्जरीम् ॥ भव मोक्षप्रदां तुभ्यमर्चयामि हरिप्रियाम् ॥ अथाङ्गपूजा—श्रीरामचन्द्राय नमः, पादौ पूजयामि ॥ राजीवलोचनाय नमः, गुल्फौ पू० ॥ रावणान्तकाय नमः, जानुनी पू० ॥ वनस्पतये० ऊरू पू० ॥ विश्वरूपाय० जंघे पू० ॥ लक्ष्मणाग्रजाय० कटिं पू० ॥ विश्वमूर्तये० मेढ्रं पू० ॥ विश्वामित्रप्रियाय० नाभिं पू० ॥ परमात्मने० हृदयं पू० ॥ श्रीकण्ठाय० कण्ठं पू० ॥ सर्वास्त्रधारिणे नमः, बाहू पू० ॥ रघुनाथाय० मुखं पू० । पद्मनाभाय नमः, जिह्वां पू० ॥ दामोदराय० दन्तान् पू० ॥ सीतापतये० ललाटं पू० ॥ ज्ञानगम्याय० शिरः पू० ॥ सर्वात्मने० सर्वाङ्गं पूजयामि ॥ अथ धूपम्—वनस्पतिरसोद्भूतो गन्धाढ्यो गन्ध उत्तमः ॥ रामचन्द्र महीपाल धूपोऽयं प्रतिगृह्यताम् ॥ ॐ ब्राह्मणोस्येति ॥ ज्योतिषां पतये तुभ्यं नमो रामाय वेधसे ॥ गृहाण दीपकं चैव त्रैलोक्यतिमिरापहम् । चन्द्रमा मनसेति ॥ इदं दिव्यान्नममृतं रसैः षड्भिः समन्वितम् ॥ रामचन्द्रेषु नैवेद्यं सीतेश प्रतिगृह्यताम् ॥ नाभ्या० ॥ जलं च शीतलं स्वच्छं नित्यं शुद्धं मनोहरम् ॥ पानीयं ते प्रयच्छामि गृहाण रघुनायक ॥ आचमनीयम् ॥ इदं फलं मया देव स्थापितं पुरतस्तव ॥ तेन मे सफलावाप्तिर्भवे-

ज्जन्मनि जन्मनि ॥ इति फलम् ॥ नागवल्लीदलैर्युक्तं पूगीफलसमन्वितम् । ताम्बूलं गृह्यतां राम कर्पूरादिसमन्वितम् ॐ यत्पुरुषम्० इति ताम्बूलम् ॥ दर्पणम्—दर्शनेन त्वमादर्श नूनं मङ्गलदायक । पुत्रसौभाग्यसत्कीर्तिर्निर्मलज्ञानदो भव ॥ चामरम्—शशाङ्ककर-संकाशं हेमदण्डसुपाडुरम । प्रोत्सारयाशु दुरितं चामरं रामवल्लभ ॥ दक्षिणा—हिरण्यगर्भगर्भस्थं हेमबीजं विभावसोः । अनन्तपुण्यफलदमतः शान्तिं प्रयच्छ मे ॥ ॐ हिरण्यगर्भ० इति दक्षिणा ॥ नमो देवाधिदेवाय रघुनाथाय शार्ङ्गिणे ॥ चिन्मयानन्तरूपाय सीतायाः पतये नमः ॥ ॐ यज्ञेन यज्ञम० इति मन्त्रेण पुष्पाञ्जलिः ॥ मङ्गलार्थं महीपाल नीराजनमिदं हरे ॥ संगृहाण जगन्नाथ रामचन्द्र नमोऽस्तु ते ॥ अग्निर्ज्योतिरिति नीराजनम् ॥ यानि कानि च पापानि ब्रह्महत्यासमानि च ॥ तानि तानि विनश्यन्ति प्रदक्षिणपदे पदे ॥ ॐ सप्तास्या० इति प्रदक्षिणा ॥ अशोककुसुमैरर्घ्यं प्रदापयेत् ॥ दशाननवधार्याय धर्मसंस्थापनाय च ॥ राक्षसाणां वधार्थाय दैत्यानां निधनाय च ॥ परित्राणाय साधूनां जातो रामः स्वयं हरिः । गृहाणार्घ्यं मया दत्तं भ्रातृभिः सहितोऽनघ । इत्यर्घ्यम् ॥ ततः ब्राह्मणाय दक्षिणां दत्त्वा भोजयेत् । कायेनवाचेति समर्पयेत् ।

इति श्रीरामनवमी—पूजाविधिः समाप्तः

* २—अथ श्रीरामनवमी-कथा-प्रारम्भः *

अगस्त्य उवाच ॥ रहस्यं कथयिष्यामि सुतीक्ष्ण मुनिसत्तम ॥ चैत्रे मासि नवम्यां तु शुक्लपक्षे रघूत्तमः ॥ १ ॥ प्रादुरासीत्ततो ब्रह्मन् तत्र ब्रह्मैव केवलम् ॥ तत्र जागरणं कुर्याद्रामस्य पुरतो बुधः ॥ २ ॥ प्रतिमायां यथाशक्ति पूजा कार्य्या यथाविधि ॥ प्रातर्दशम्यां स्नात्वैव कृत्वा सन्ध्यादिकाः क्रियाः ॥ ३ ॥ सम्पूज्य विधिवद्रामं भक्तिवित्तानुसारतः ॥ ब्राह्मणान् भोजयेत्सम्यक्

धेरै वर्षमा सकिने यज्ञ गर्न नैमिषारण्य क्षेत्रमा भेला भएका अठासी हजार मुनिहरूका बीचमा—तीर्थाटन गर्दै टुप्लुक्क उहीं आइपुगेका अनि ती ऋषिहरूले स्वागत गर्दै व्यासासानमा बसाइएर पुण्य कथा कहन कहिएका अतएव आकाशमा ताराहरूका बीच पूर्णचन्द्र झैं शोभिएर विराजमान सूतजीले उहिल्यै अगस्त्यले सुतीक्ष्णलाई सुनाउनुभएको रामनवमीको महिमा बेलीबिस्तार लाउन लाग्नुभयो—'हे शौनकादि ऋषीश्वरहो ! एकासमयमा सुतीक्ष्ण मुनिले 'धेरै कथा तपाईंबाट सुनिसकें, अझै तृप्ति छैन, अरू सुन्न पाऊँ, भन्दा अगस्त्यले भन्नुभयो—हे मुनिहरूमा सज्जन सुतीक्ष्ण ! अब अति गुप्त रहस्य भएको कथा तिमीलाई सुनाउँछु, ध्यान लाएर सुन ! चैत महीनामा शुक्लपक्षको नवमीमा रघुकुलमा उत्तम राम ॥१॥ प्रकट हुनुभयो । त्यतिखेर त्यस प्रसूतिगृहमा केवल 'ब्रह्म' स्वरूप नै प्रकट भएको थियो । हे सुतीक्ष्ण ! त्यसकारण त्यस रात जाग्ने मानिसले रामचन्द्रको अगाडि जाग्राम गर्नुपर्छ ॥ २ ॥ साबगासअनुसार रामको प्रतिमामा विधिपूर्वक पूजा गर्नुपर्छ र भोलिपल्ट बिहान दशमीमा न्वाही ध्वाई सधैं गरिने सन्ध्या आदि क्रिया गरेर मात्रै ॥३॥ भक्ति र विभव-अनुसार

दक्षिणाभिस्तु तोषयेत् ॥ ४ ॥ गो-भू-तिलहिरण्याद्यैर्वस्त्रालंकारभूषणैः । रामं भक्त्या प्रयत्नेन प्रणमेत्परया मुदा ॥ ५ ॥ एवं यः कुरुते भक्त्या श्रीरामनवमीव्रतम् । अनेकजन्मराशीनि पापानि सुबहून्यपि ॥ ६ ॥ भस्मीभवन्त्यशेषेण याति विष्णोः परम्पदम् ॥ सर्वेषामप्ययम् धर्मो भुक्तिमुक्त्यैक-साधनम् ॥ ७ ॥ अशुचिर्वापि पापिष्ठः कृत्वेदम्व्रतमुत्तमम् ॥ पूज्यः स्यात्सर्वभूतानां यथारामस्तथैव सः ॥ ८ ॥ यस्तु रामनवम्यां तु भुंक्ते स तु नराधमः ॥ कुम्भीपाकेषु घोरेषु पतत्येव न संशयः ॥ ९ ॥ अकृत्वा रामनवमीव्रतं सर्वोत्तमोत्तमम् । व्रतान्यन्यानि कुरुते न तेषाम्फलभाग्भवेत् ॥ १० ॥

विधिपूर्वक रामको पूजा गरेर राम्रोसित ब्राह्मणहरूलाई भोजन गराएर, दक्षिणाहरूले सन्तुष्ट पार्नुपर्छ ॥ ४ ॥ र गाई भूमि तिल सुन आदि र वस्त्र अलंकार भूषणहरू रामलाई तनमनले अपार भक्तिपूर्वक प्रशस्त प्रसन्नताले प्रणाम गर्नुपर्छ ॥ ५ ॥ यस्ता प्रकारले भक्तिपूर्वक जो जन श्री रामनवमीको व्रत गर्छ त्यसका अनेक जन्मदेखि थुप्रेका धेरै-धेरै पापहरू पनि ॥ ६ ॥ कत्ति बाँकी नरही खरानी हुन्छन् र त्यो पुण्यात्मा जन विष्णुको परमपदमा प्राप्त नुन्छ । यो धर्म सबै वर्णका लागि भुक्ति र मुक्तिको यौटे साधन हो ॥ ७ ॥ अपवित्र जनले अथवा महापापीले पनि यो उत्तम व्रत गरयो भने जस्तो राम सबै प्राणीहरूका लागि पूज्य हुनुहुन्छ त्यस्तै नै त्यो जन सबैको पुज्य हुन्छ ॥ ८ ॥ जो जन रामनवमीका दिनमा पनि खान्छ, त्यो अधम मनुष्य निश्चय नै घोर कुम्भीपाक नरकहरूमा जाकिन्छ नै, यसमा कुनै संशय छैन ॥ ९ ॥ सबै व्रतहरूमा

महान्त्यपि प्रणश्यन्ति पापानि नवमीव्रतात् ॥ एकमप्यततो भक्त्या श्रीरामनवमीव्रतम् ॥ ११ ॥ उपोष्य कृतकृत्यः स्यात् सर्वपापैः प्रमुच्यते ॥ नरो रामनवम्यां तु श्रीरामप्रतिमापरः ॥ विधानेन प्रदानेन स्यात् श्रेष्ठो नात्र संशयः ॥ १२ ॥ सुतीक्ष्ण उवाच ॥ श्रीरामप्रतिमादानं विधानं वा कथं मुने ॥ कथयस्व यथा रामभक्तस्य मम विस्तरात् ॥ १३ ॥ अगस्त्य उवाच ॥ कथयिष्यामि ते भक्त्या प्रतिमादानमुत्तमम् ॥ विधानं वाऽपि यत्नेन यतस्त्वं वैष्णवोत्तमः ॥ १४ ॥ अष्टम्यां चैत्रमासे तु शुक्लपक्षे जितेन्द्रियः ॥ दन्तधावनपूर्वन्तु प्रातः स्नात्वा यथाविधि ॥ १५ ॥ नद्यां

अतिउत्तम रामनवमीको व्रत नगरेर अरू-अरू व्रत मात्रै गऱ्यो भने त्यो जन ती व्रतहरूको फलभोगी हुँदैन ॥ १० ॥ रामनवमीको व्रत गर्नाले ठुला-ठुला पापहरू पनि नाश हुन्छन् । भक्तिले प्रयत्नपूर्वक यौटै पनि श्रीरामनवमीको व्रत ॥११॥ लिएर मानिस कृतकृत्य (गर्नुपर्ने काम गरेको) हुन्छ र सारा पापबाट छुट्तछ । रामनवमीको दिनमा त श्रीरामको प्रतिमामा लीन भै विधिपुर्वकको त्यो दान गर्नाले दाता मनुष्यहरूमा श्रेष्ठ हुन्छ, यसमा कुनै संशय छैन ॥१२॥ तब सुतीक्ष्णले भन्नुभयो–हे मुनि ! श्रीरामको प्रतिमा दान अथवा त्यसको विधान कस्तरी गरिन्छ ? रामभक्त मलाई विस्तारपुर्वक यथार्थ तरहले कहनुहोस् ॥ १३ ॥ अनि अगस्त्यले भन्नुभयो–भक्तिपूर्वक गरिने रामको उत्तम प्रतिमादान र प्रयासपुर्वक गरिने उसको विधान पनि तिमीलाई म कहन्छु, किनकि तिमी भगवान्का भक्तहरूमा उत्तम छौ ॥ १४ ॥ चैत महीनाको शुक्लपक्षको अष्टमीमा इन्द्रियहरूको चञ्चलतालाई जितेर बिहान गर्नुपर्ने दतिउन लगायत शौचादि कर्म सकेर नदीमा पोखरीमा पनेरामा अथवा दहमा या

तडागे कूपे वा ह्रदे प्रस्रवणेऽपि वा ॥ सन्ध्यादिकाः क्रियाः कुर्य्यात्संस्मरन् राघवं हृदि ॥ १६ ॥
गृहमागत्य विपेन्द्र कुर्य्यादौपासनादिकम् ॥ दान्तं कुटुम्बिनं विप्रं वेदशास्त्रविदं सदा ॥ १७ ॥
श्रीरामपूजानिरतं शुचिं दम्भविवर्जितम् ॥ सर्वज्ञं राममंत्राणां सर्वमन्त्रैकसाधकम् ॥ १८ ॥ आहूय
भक्त्या सम्पूज्य वृणुयात्प्रार्थयेच्च तम् ॥ श्रीरामप्रतिमादानं करिष्येऽहं द्विजोत्तम ॥ १९ ॥
तत्राऽऽचार्य्यो भव प्रीतः श्रीरामोऽसि त्वमेव च ॥ इत्युक्त्वा भोक्तुमायान्तं स्नापयित्वा
ततः स्वयम् ॥ २० ॥ तदैवाभ्यङ्ग्य तु स्नायाच्चिन्तयन् माधवं हृदि ॥ श्वेताम्बरधरं देवं गन्ध-

---

खहरेमा नै भए पनि विधिपूर्वक न्वाहेर हृदयमा रामलाई संझँदै सन्ध्या आदि क्रिया गर्नू र ॥१५-१६॥ हे उत्तम ब्राह्मण ! घरमा आएर उपासना आदि गर्नू अनि इन्द्रियको अधीन नभएको, लालाबाला भएको, वेदशास्त्र जान्ने, सधैं श्रीरामको पूजामा लागिरहने, पवित्र, कत्ति पनि घमण्ड नगर्ने, सबै कुरा जान्ने, सबै मन्त्रहरूमध्ये 'राम' भन्ने मन्त्रलाई नै मुख्य ठान्ने बाहुन-लाई ॥१७-१८॥ बोलाएर उनलाई नै भक्तिपूर्वक पूजा गरेर वरण गर्नू र प्रार्थना पनि गर्नू—हे उत्तम ब्राह्मण ज्यौता ! म श्रीरामको प्रतिमा दान गर्दछु ॥ १९ ॥ यस कर्ममा प्रसन्न मनले तपाईं आचार्य हुनुहोस्, तपाईं नै श्रीराम हुनुहुन्छ । यति निवेदन गरी खान आएका ती बाहुनलाई त्यसपछि आफैले न्वाइदिएर ॥२०॥ त्यसै बेला तेल मालिश पनि गरिदिएर

माल्यादिभिस्तदा ॥ २१ ॥ अर्चितो भूषितश्चैव कृत्वा माध्याह्निकीं क्रियाम् ॥ आचार्य्यम्भोज-
येत्पश्चात्सात्त्विकान्नैः सुविस्तरम् ॥ २२ ॥ भुञ्जीयात्स्वयमप्येवं हृदि राममनुस्मरन् । एकभक्तं व्रतं
तत्र सहाचार्य्योऽजितेन्द्रियः ॥ २३ ॥ शयीत भूतले सम्यक् श्रीरामार्पितमानसः ॥ ततः प्रातः
समुत्थाय स्नात्वा सन्ध्यां यथाविधि ॥ २४ ॥ प्रातः सर्वाणि कर्म्माणि शीघ्रमेव समापयेत् ।
ततः स्वच्छमना भूत्वा विद्वद्भिः सहितोऽनघ ॥ २५ ॥ स्वगृहस्योत्तरे भागे मण्डलद्वयमुज्ज्वलम् ॥
मण्डपस्य चतुर्द्वारि ध्वजाः कार्याः सुविस्तरैः ॥ २६ ॥ फलैर्नानाविधैर्युक्तं पुष्पमालासुशोभनम् ॥

हृदयमा रामलाइ संझदै न्वाहिदेओस् र तब सेतो वस्त्र पैहिरे भगवान् रामलाई चन्दन मालाहरूले ॥२१॥ पूजा र शृङ्गार
गरेर मध्याह्नमा गर्नुपर्ने क्रियाहरू पनि गरिसकेर त्यसपछि आचार्यलाई सात्त्विक अन्नहरूले बुझाई-बुझाई भोजन गराउर
॥२२॥ आफूले पनि हृदयमा रामलाई संझदै त्यसै गरी भोजन गर्नू । त्यस दिन आचार्यका साथै जितेन्द्रिय भएर एकछाक
मात्रै खाने व्रत गर्नू ॥२३॥ श्रीराममै मन अर्पण गरेर राम्रोसित भूइँमै सुत्नू । त्यसका बाद बिहान उठेर न्वाहेर विधिपूर्वक
सन्ध्या गरेर ॥२४॥ बिहान गर्नुपर्ने सबै कर्महरू चाँडै नै सक्नू । हे निष्पाप सुतीक्ष्ण ! तब पवित्र मनबाला भएर विद्वान्हरू
का साथ ॥२५॥ आफ्नो घरको उत्तम भागमा उज्जवल दुइटा मण्डप बनाउनू । मण्डपको चारै ढोकामा विस्तारपूर्वक ध्वजाहरू
सज्नू ॥२६॥ नाना प्रकारका फलहरूले युक्त, फूलका मालाहरूले सुशोभित, केराका खम्बसाथबरूले सहित, सुपारीहरूले सजि-

कदलीस्तम्भसंयुक्तं पुङ्गीभिः समलङ्कृतम् ॥ २७ ॥ सुतोरणैर्मनोरम्यं पुष्पाद्यैः समलङ्कृतम् ॥
शंखचक्रहनूमद्भिः प्राग्द्वारसमलङ्कृतम् ॥ २८ ॥ गरुत्मत्-शार्ङ्गबाणैश्च दक्षिणेषु विभूषितम् ॥
गदया खेटकैश्चैव पश्चिमे तु विभूषितम् ॥ २९ ॥ पद्मस्वस्तिकनीलैश्च कौबेर्य्यां समलङ्कृतम्
मध्ये हस्तचतुः कार्य्या वेदिका हस्तमायता ॥ ३० ॥ विप्रैश्च गीतनृत्यैश्च वाद्यैश्चापि समन्वितम् ॥
पुण्याहं वाचयेत् तत्र विधिवत् प्रीतमानसः ॥ ३१ ॥ ततः संकल्पयेत् देवं राममेवमनुस्मरन् ॥ ३२ ॥
अस्यां रामनवम्यान्तु रामाराधनतत्परः । उपोष्याष्टसु यामेषु पूजयित्वा यथाविधि ॥ ३३ ॥ इमां
स्वर्णमयीं रामप्रतिमां तु प्रयत्नतः ॥ श्रीरामप्रीतये दास्ये रामभक्ताय धीमते ॥ ३४ ॥ प्रीतो

एको ॥२७॥ राम्रा तोरणहरूले राम्रा फूलहरूले सिगारिएको होस् र शंख-चक्र-हनुमान्ले पूर्वपट्टिको द्वार सजिएको, ॥२८॥ गरुड, शार्गधनु बाणले दक्षिणपट्टि सिंगारिएको, गदा खेटकहरूले पश्चिम द्वारमा शोभिएको ॥२९॥ पद्म-स्वस्तिक नीलहरूले उत्तरद्वारमा सजाइएको होस्, बीचमा चार हात लामू चार हात चौडा वेदि बनाउनू र ॥३०॥ बाहुनहरूले तथा बाजा-गाजा, नाच-गानले पनि भरिभराउ गराउ ई प्रसन्न मनको भएर त्यहाँ विधिपूर्वक पुण्याहबाचन गराउनु ॥३१॥ त्यसपछि भगवान् रामलाई संझदै कर्मपात्रको कुश-जल लिएर यस्तो संकल्प गर्नू ॥३२॥ यस रामनवमीमा रामको आराधनामा तत्पर भएको छँदो आठ प्रहरसम्म उपवास गरेर विधिपूर्वक पूजा गरेर ॥३३॥ उत्तम सुवर्णले बनाएको यो रामको प्रतिमा रामको प्रीतिको लागि बुद्धिमान् रामभक्तलाई दिन्छु ॥३४॥ प्रसन्न भएका राम मेरा अनेक जन्मदेखि लागेका पानी परिसकेका

रामो हरेदाशु पापानि सुबहूनि मे ॥ अनेकजन्मलग्नानि अभ्यस्तानि महान्ति च ॥ ३५ ॥
विलिखेत्सर्वतोभद्रं वेदिकोपरि सुन्दरम् ॥ मध्ये तीर्थादिकैर्युक्तं पात्रं संस्थाप्य चर्चितम् ॥ ३६ ॥
सौवर्णे राजते ताम्रे पात्रे षट्कोणमालिखत् ॥ ३७ ॥ ततः स्वर्णमयीं राम-प्रतिमां पलमात्रतः ॥
निर्मिता द्विभुजां रम्यां वामाङ्कस्थितजानकीम् ॥ ३८ ॥ बिभ्रतीं दक्षिणे हस्ते ज्ञानमुद्रां
महामुने । वामे नाथकरेणैनां देहमालिंग्य संस्थिताम् ॥ ३९ ॥ सिंहासनं राजतश्च पलद्वयविनि-
र्मितम् ॥ पञ्चामृतस्नानपूर्वं सम्पूज्य विधिवत्ततः ॥ ४० ॥ मूलमन्त्रेण नियतो दद्याच्चैव

ठूला-ठूला पनि धेरै-धेरै पापहरू चाँडै नै नाश गरून् ॥३५॥ यस्तो संकल्प गरिसकेर वेदिको माथि राम्रो सर्वतोभद्र लेखाई त्यस सर्वतोभद्रको बीचमा तीर्थहरूका जलले भरिएको विधिपूर्वक पूजा गरिएको कलश राखेर ॥३६॥ सूनको या चाँदीको अथवा तामाको थालीमा षट्कोण यन्त्र लेख्नू र रामका प्रतिमाको पूजाका लागि त्यस थालीलाई कलशमाथि थाप्नू ॥३७॥ अनि चार तोला मात्रै सूनैसूनको रामप्रतिमा बनाउनू, त्यो प्रतिमा दुई हात भएको, राम्रो बायाँ काखमा जानकीलाई राखेको ॥३८॥ हे सुतीक्ष्ण महामुनि ! दाहिने हातमा ज्ञानमुद्रा शोभिएको, अनि बाँया हातले जानकीलाई शरीरमा आलिंगन गरेर रहेको होस् ॥३९॥ र प्रतिमा बसाइने चाँदीको सिंहासन पनि आठ तोलाले बनाइएको होस् ॥ त्यसपछि पञ्चामृत-स्नानपूर्वकको षोडशोपचारले विधिसाथ पूजा गरेर ॥ ४० ॥ यस्ता प्रकारले तन्द्राहीन भै नियमपूर्वक रामको मूल

मतन्द्रितः ॥ एवं सम्पूज्य विधिवद्रात्रौ जागरणं तथा ॥ ४१ ॥ दिव्यां रामकथां शृण्वन् राम-
भक्तिसमन्वितः । नृत्यगीतादिभिश्चैव रामस्तोत्रैरनेकधा ॥४२॥ रामाष्टकेन संस्तुत्य गन्धपुष्पा-
क्षतादिभिः ॥ कर्पूरागरुकस्तूरी कह्लाराद्यैरलङ्कृताम् ॥ ४३ ॥ सम्पूज्य विधिवद्भक्त्या दिवारात्रं
नयेद् बुधः ॥ ततः प्रातः समुत्थाय स्नानसन्ध्यादिकाः क्रियाः ॥ ४४ ॥ संस्नाप्य विधिवद्रामं
पूजयेद्विधिवन्मुने ॥ ततः होमं प्रकुर्वीत मूलमन्त्रेण मन्त्रवित् ॥ ४५ ॥ पूर्वोक्तकुण्डे गृह्योक्ते
रथण्डिले वा समाहितः ॥ लौकिकाग्नौ विधानेन शतमष्टोत्तरं नरः ॥ ४६ ॥ आज्येन पायसेनैव

मन्त्रले त्यो प्रतिमा दान दिनुपर्छ । त्यस किसिमले विधिविधानसाथ प्रतिमालाई पूजेर राति जागरण गर्नू ॥ ४१ ॥
त्यतिखेर राममा भक्तिभाव लगाएर रामको दिव्य कथा सुन्दै,नाच-कीर्तन आदिले र अनेक किसिमका रामका स्तोत्रहरूले।४२
र रामाष्टक स्तोत्रले पनि स्तुति गरेर चन्दन फूल अक्षता आदिले अनि कपूर,अगरबत्ती,कश्तूरी,कमल इत्यादिले शोभा
गराएर ॥४३॥ भक्तिले विधानसाथ पूजा गरेर विद्वन् जनले अहोरात्रले बिताउन् । तब बिहान भएपछि उठेर स्नान-संध्या
आदि क्रिया सकेर ॥४४॥ रामलाई विधिपूर्वक न्वाहेर विधिपूर्वक पूजा गर्नू र त्यसपछि हे सुतीक्ष्ण ! मन्त्रद्वारा रामको
मूल मन्त्रले होम गर्नू होम ॥४५॥ गृह (घरमा गर्नुपर्ने काम) को प्रकरणमा यो अध्यायभन्दा पहिले नै बताइसकेको
कुण्डमा अथवा कुनै शुद्ध भूमिमा सावधान मनुष्यले लौकिक अग्निमा विधिपूर्वक एक सय आठपल्ट ॥४६॥ घिउले या खीरले

स्मरन् राममतन्द्रितः ॥ ततो भक्त्या सदा तुष्टा आचार्य्यम्प्रार्थयेन्मुने ॥ ४७ ॥ कुण्डलाभ्यां सुवर्णाभ्यामङ्गुलीयैरनेकधा ॥ गन्धपुष्पाक्षतैर्वस्त्रैर्विचित्रैस्तु मनोहरैः ॥४८॥ ततो रामं स्वयं दद्यादिदमन्त्रमुदीरयेत् ॥ इमां स्वर्णमयीं रामप्रतिमां समलङ्कृताम् ॥४९॥ चित्रवस्त्रयुगच्छन्नां रामोऽहं राघवाय ते ॥ श्रीरामप्रीतये दास्ये प्रीतो भवतु राघवः ॥५०॥ इति प्रतिमादानमन्त्रः ॥ इति दत्त्वा विधानेन दद्याद्वै दक्षिणां भुवम् ॥ ५१ ॥ अन्येभ्यश्च यथान्यायं गोहिरण्यादिशक्तितः ॥ दत्त्वा वासो धनं धान्यं यथालङ्करणानि च ॥ ५२ ॥ अगस्त्य उवाच ॥ एवं यः

नै भए पनि कत्ति अल्छी नमानीकन रामलाई संझँदै गर्नुपर्छ। तब हे मुनि ! सधैं सन्तुष्ट रहने आचार्यलाई भक्तिपूर्वक प्रार्थना गर्नू ॥४७॥ अनि सुनका जोडा कुण्डल, किसिम-किसिमका औंठीहरूले र चन्दन-फूल अक्षताले चित्र-विचित्र वस्त्रहरूले पनि ती आचार्यलाई खूब पूजा गर्नू ॥४८॥ अनि रामको प्रतिमा स्वयं यो मन्त्र पढ्दै दान दिनु । सुन नै सुनको राम प्रतिमा यो अलंकृत ॥४९॥ बुट्टे लुगाका जोडाले ढाकी राम सरी तिमीलाई राम खुशी पार्न दिन्छु,राम खुशी हऊन् ॥५०॥ यो प्रतिमा दान गर्ने अमित तेजवाला राम मन्त्र हो । यस प्रकारले विधिपूर्वक प्रतिमा दान दिएर दानको दक्षिणाचाहिं जमीन दिनू ॥५१॥ बोलाइएका अरू ब्राह्मणलाई शक्ति-अनुसार भेदभाव नगरीकन गाई सुन आदि र वस्त्र धन-धान-यथायोग्य अलंकारहरू दिएर बिदा गर्न ॥५२॥ अनि फेरि अगस्त्यले भन्नुभयो-यस प्रकारले जो जन

कुरुते रामप्रतिमादानमुत्तमम् ॥ ब्रह्महत्यादिपापेभ्यो मुच्यते नाऽत्र संशयः ॥ ५३ ॥ तुलापुरुषदानेन फलमाप्नोति सुव्रत ॥ अनेक-जन्मसंसिद्धपापेभ्यो मुच्यते ध्रुवम् ॥ ५४ ॥ बहुनाऽत्र किमुक्तेन मुक्तिस्तस्य करे स्थिता ॥ तुलापुरुषदानेन समं यत् लभते फलम् ॥ ५५ ॥ तत्फलं लभते मर्त्यो दानेनाऽनेन सुव्रत ॥ सुतीक्ष्ण उवाच ॥ प्रायेण हि जना सर्वे दरिद्राः कृपणा मुने ॥ कथञ्च महतीम्पूजां करिष्यन्ति वद प्रभो ॥ ५६ ॥ अगस्त्य उवाच ॥ दरिद्रस्य महाभाग स्वस्ववित्तानुसारतः । पलार्द्धेन तदर्द्धेन तदाऽर्धार्द्धेन वा पुनः

वा० १५

वा० क० ९

रामका प्रतिमाको उत्तम दान गर्दछ, त्यो जन ब्रह्महत्या आदि गरिएका पापहरूबाट छुट्तछ, यसमा सन्देह छैन ॥५३॥ हे संयमी सुतीक्ष्ण! तुलापुरुषको दानले जो फल मिल्छ त्यो फल यस दानले मिल्छ, अनेक जन्मदेखि थुप्रिएका पापहरूदेखि निश्चयनै छुट्तछ ॥५४॥ यस दानको बारेमा धेरै भन्नाले के हुन्छ! मुक्ति त त्यसका हत्केलामा रहेको हुन्छ। तुलापुरुषको दान-समान दान गर्नाले जो फल पाइन्छ ॥५५॥ हे संयमी सुतीक्ष्ण! यो दान गर्नाले मनुष्यले त्यही फल पाउँछ। यसकारण श्रीरामनवमीको व्रत अवश्यै गर्नुपर्छ। तब सुतीक्ष्णले भन्नुभयो—हे मुनि! प्रायः सबै मानिसहरू दरिद्री या किरण्टोको हुन्छन्। हे प्रभु! कसरी यति ठूलो पूजा ती गर्लान्? यसबारेमा पनि बताइदिसयोस् ॥५६॥ अनि अगस्त्यले भन्नुभयो—हे महाशय सुतीक्ष्ण! दरिद्रीहरूले आफ्नु-आफ्नु साबगास-अनुसार दुइ तोला या एक तोला या आधा

॥५७॥ वित्तशाठ्यमकृत्वैव कुर्य्याद्देवव्रतम्मुने ॥ अपि घोरतरो पापो न स्पृशत्येव तं क्वचित्
॥५८॥ अकिञ्चनोऽपि यत्नेन उपोष्य नवमीदिनम् ॥ एकचित्तेन विधिवत्सर्वपापैः प्रमुच्यते
॥५९॥ प्रातः स्नात्वा च ह्याचम्य कृत्वा सन्ध्यादिकाः क्रियाः ॥ गोभूतिलहिरण्यादि दद्या-
द्वित्तानुसारतः ॥ ६० ॥ श्रीरामचन्द्रभक्तेभ्यो विद्वद्भ्यः श्रद्धयाऽन्वितः ॥ पारणन्त्वथ कुर्वीत
ब्राह्मणैश्च स्वभक्तितः ॥६१॥ एवं यः कुरुते भक्तः सर्वपापैः प्रमुच्यते ॥ प्राप्ते श्रीरामनवमीदिने
मर्त्यो विमूढधीः ॥६२॥ उपोषणं न कुरुते कुम्भीपाकेषु पच्यते ॥ यत्किञ्चिद्धाममुद्दिश्य क्रियते न
स्वशक्तितः ॥६३॥ रौरवे स तु मूढात्मा पच्यते नात्र संशयः ॥६४॥ सुतीक्ष्ण उवाच ॥ यामाष्ट-

तोला अथवा चौथाइ तोलाले भए पनि ॥५७॥ कृपणता नगरीकन नै हे मुनि! यस्तो व्रत गरे हुन्छ। अत्यन्तै भयंकर पाप भए पनि त्यस व्रतीलाई कहिल्यै छुँदैन ॥५८॥ केही नहुनेले पनि यत्नपूर्वक नवमीको दिन उपवास गरेर एकचित्त भएर विधिपूर्वक यो व्रत गऱ्यो भने सबै पापबाट छुटतछ ॥५९॥ भोलिपल्ट बिहानै न्वाहेर आचमन गरेर सन्ध्या आदि क्रियाहरू गरेर गाई, भूमि, तिल, सुन आदि औकात अनुसार श्रीरामचन्द्रका भक्त विद्वान्हरूलाई बडो श्रद्धालु भएर दान दिनू र ब्राह्मण-हरूका साथ लहरै रही पारण गर्नू ॥६०-६१॥ जो भक्त यस किसिमले व्रत गर्दछ त्यो सारा पापबाट छुटतछ। श्रीराम-नवमीको दिन पाएर पनि मूर्खबुद्धिवाला जो मनुष्य ॥६२॥ खाने काम गर्छ त्यो जन कुम्भीपाक नरकहरूमा पकाइन्छ। आफ्नू शक्ति-अनुसार रामको उद्देश्य गरेर जो सकेको अलिकति पनि केही गर्दैन ॥६३॥ त्यो मूर्ख आत्मा भएको मानिस ता रौरव नरकमा पमाइन्छ, यसमा केही सन्देह छैन ॥४६॥ तब सुतीक्ष्णले भन्नुभयो—हे महामुनि! आठै प्रहरमा मूल

केषु पूजा वै तत्र नोक्ता महामुने । मूलमन्त्रेण संयुक्तास्तत्कथं वद सुव्रत ॥ ६५ ॥ अगस्त्य उवाच ॥ सर्वेषां राममन्त्राणां मन्त्रराजः षडक्षरः ॥ ६६ ॥ स्कान्दे मोक्षखण्डे श्रीरामम्प्रति रुद्रगीतायां रुद्रवाक्यम् ॥ मुमूर्षोर्मणिकर्ण्यन्ते अर्द्धोदकनिवासिनः ॥ अहं दिशामि ते मन्त्रं तारकस्योपदेशतः ॥ ६७ ॥ श्रीरामरामरामेति एतत्तारकमुच्यते । अतस्त्वं जानकीनाथ परम्ब्रह्माभिधीयसे ॥६८॥ तारकम्ब्रह्म चेत्युक्तं तेन पूजा प्रशस्यते ॥ पीठाङ्गदेवतानान्तु आवृत्तीनान्तथैव च ॥ ६९ ॥ आदावेव प्रकुर्वीत देवस्य प्रीतमानसः ॥ उपचारैः षोडशभिः पूजा कार्य्या यथाविधि

मन्त्रले सहित पूजा गर्नू भनी तपाईले भन्नुभो, हे संयमी ! त्यो कसरी गर्ने ? त्यो बताइबक्सियोस ॥६५॥ अनि अगस्त्यले भन्नुभयो—रामका सबै मन्त्रहरूमध्ये मन्त्रराज हो 'षडक्षर' मन्त्र भनी यसै स्कन्दपुराणको मोक्ष-खण्डमा शिवले नै श्रीरामलाई भन्नुभएको छ॥ ६६॥काशीको मणिकर्णिकाको बीचमा मर्ने इच्छाले आधा धड गंगाप्रवाहमा रहेको जनलाई तारक मन्त्रको उपदेश गर्ने भएको म तपाईकै षडक्षरी नामरूप मन्त्र दीक्षा दिन्छु ॥६७॥'राम राम राम'यति यही नै तारक मन्त्र कहिन्छ । हे जानकीकापति ! यसैकारण तपाई 'परब्रह्म' कहिनुहुन्छ ॥६८॥ यो षडक्षर ब्रह्म 'तारकब्रह्म' कहिएको छ । त्यसकारण यसैले पूजा गर्नु श्रेष्ठ छ । पीठ (भगवान्को सिंहासनका वरिपरि बस्ने अङ्गदेवताहरूको र पाठलाई घेरेर बसेका देवताहरूको पनि अष्टदलका वरिपरि पूजा गर्नु प्रशंसनीय छ॥६९॥प्रसन्न मन भएर पहिले नै श्रीराम भगवानको षोडशोपचारले

॥७०॥ आवाहनं स्थापनञ्च सम्मुखीकरणं तथा ॥ एवं मुद्रा प्रार्थना च पूजामुद्राप्रयत्नतः ॥७१॥
शंखपूजाम्प्रकुर्वीत पूर्वोक्तविधिना ततः ॥ कलशं वामभागे च पूजाद्रव्याणि चादरात् ॥ ७२ ॥
अपि सम्पूज्य यत्नेन आत्मना मन्त्रमुच्चरन् ॥ पात्रासादनमप्येवं कुर्य्याद्यामेष्वतन्द्रितः ॥७३॥
पीताम्बराय देवाय प्रार्थयेन्नर्चयेत्सुधीः ॥ स्वर्णयज्ञोपवीतानि दद्याद्देवाय भक्तितः ॥७४॥ नाना
रत्नविचित्राणि दद्यादाभरणानि च ॥ हिमाम्बुघृष्टरुचिरं घनसारसमन्वितम् ॥ ७५ ॥ क्रमात्तु
मूलमन्त्रेण उपचारान्प्रकल्पयेत् ॥ कल्हारैः केतकैर्जात्यैः पुन्नागाद्यैः प्रपूजयेत् ॥७६॥ चंपकैश-

---

विधिपूर्वक पूजा गर्नू ॥७०॥ आवाहन गर्न,प्रतिष्ठा गर्नू,अनि संमुखीकरण गर्नू,यसरी नै ध्यानमुद्रा प्रार्थना अनि यत्न पूर्वक पूजा ॥७१॥ शंखपूजा गर्नू त्यसपछि पहिले बताएको विजिबमोजिम बायाँपट्टि कलश अनि पूजाका सामानहरू राम्रोसित राखेर ।७२।यत्नपूर्वक आफैले मन्त्र उच्चारण गर्दै पूजा पनि गर्नू र यसै गरी सावधानीसाथ बखत-बखततमा पात्रासादन पनि गर्दै गर्नू॥७३॥ पीताम्बर पहिरेका भगवान्लाई प्रार्थना गर्दै पूजा गरेर बुद्धिमान् भक्तले भक्तिपूर्वक भगवान्लाई सुनको जनै पहिराउनु ॥७४॥ नानारत्नले चित्र-विचित्र गहनाहरू पनि चढाई । ठण्डा जलमा घोटेको रहरलाग्दो कस्तूरी मिलाएको चन्दन ॥७५॥ मूल मन्त्र पढ्दै क्रमैले यी आचारहरू ठीक गनरी कल्हार,केतकी, जाई,पुन्नाग आदिले पूजा गर्नु॥७६॥र चाँप,सयपत्री अनि राम्रा-राम्रा सुगन्धहरूले अनि पाद्य-चन्दन-धूपहरूले तिनै-तिनैका मन्त्राले पुजा गरी

तपत्रैश्च सुगन्धैः सुमनोहरैः ॥ पाद्यचन्दनधूपैश्च तत्तमन्त्रैः प्रपूजयेत् ॥७७॥ भक्ष्यभोज्यादिकं भक्त्या देवाय विधिनाऽर्पयेत ॥ येन सोपस्करं देवं दत्त्वा पापैः प्रमुच्यते ॥७८॥ जन्म-कोटिकृतैर्घोरैर्नानारूपैश्च दारुणैः ॥ वियुक्तस्तु क्षणादेव राम एव भवन्मुने ॥ ७९ ॥ श्रद्दधानस्य दातव्यं श्रीरामनवमीव्रतम् ॥ सर्वलोकहितायेदम्पवित्रम्पापनाशनम ॥ ८० ॥ लौहेन निर्मितं वापि शिलया दारुणापि वा ॥ एकेनैव प्रकारेण यस्मै कस्मै च वा मुने ॥ ८१ ॥ कृतं सर्वं प्रयत्नेन यत्किञ्चिदपि शक्तितः। जपेदेकान्तवासीनो यावत्सदशमीदिनम् ॥८२॥ अनेन स्यात्पुनः पूजां दशम्याम्भोजयेद्द्विजम् ॥ भक्ष्यभोज्यैर्बहुविधैर्दद्याद् शक्त्या सदक्षिणाम् ॥ ८३ ॥

॥७७॥ भक्ष्य-भोज्य आदि नैवेद्य भक्तिले विधिपूर्वक भगवान्लाई भोग लगाउनू। परिकार-परिकारले परिपूर्ण जुन भोग लाउनाले भक्त सबै पापबाट छुट्तछ ॥७८॥ हें मुनि सुतीक्ष्ण ! कडोरन जन्मदेखि गरिएका नाना प्रकारमा घोर कठोर पापहरूबाट छुटेको त्यो भक्त तुरुन्त नै राम नै भइजान्छ ॥७९॥ सबै लोकको हितका लागि यो पवित्र पाप नाश गर्ने-श्रीरामनवमीको व्रत श्रद्धा गर्नेलाई मात्र दिन ठीक छ ॥८०॥ फलामले, ढुङ्गाले अथवा काठले जेले भए पनि एकै प्रकारले बनाइएको मूर्ति हे मुनि सुतीक्ष्ण ! जस-कसैलाई देओस् ॥८१॥ जो कुछ गरिन्छ, भक्तिले प्रयासपूर्वक सम्पूर्ण गरिएको होस्। जबसम्म दशमीको दिन हुँदैन एकान्तवासी भै 'राम राम राम' जपिरहनू ॥८२॥ यस प्रकारले दशमीमा फेरि पूजा हुनुपर्छ र ब्राह्मणलाई नाना प्रकारले खाइने र पिइने पदार्थले भोजन गराउनू र शक्ति-अनुसार दक्षिणा दिनू ॥८३॥ त्यस

कृतकृत्यो भवेत्तेन सद्यो रामः प्रसीदति ॥ तुष्णीं तिष्ठन्नरो याति पुरावृत्तिविवर्जितः ॥ ८४ ॥
द्वादशाब्दकृतेनापि पापेनापि विमुच्यते ॥ विलयं यान्ति तत्सर्वं श्रीरामनवमीदिने ॥ ८५ ॥
जपञ्च राममन्त्राणां यो न जानाति तस्य वै ॥ उपोष्य संस्मरेत् रामो न्यासपूर्वमनन्यधीः ॥ ८६ ॥
गुरुलब्धमथो मन्त्रं न्यसेन्न्यासपुरस्सरः ॥ यामे यामे च विधिना कुर्य्यात् पूजां समाहितः ॥ ८७ ॥
मुमुक्षुश्च सदा कुर्य्याच्छ्रीरामनवमीव्रतम् ॥ तस्मात् सर्वात्मना सर्वैः कर्तव्यं नवमीव्रतम् ॥ ८८ ॥

॥ इति श्रीस्कन्दपुराणे अगस्त्यसुतीक्ष्णसंवादे श्रीरामनवमीकथा समाप्ता ॥

कर्मले मानिस कृतकृत्य हुन्छ, भगवान् राम तुरुन्तै प्रसन्न हुनुहुन्छ । यस्तो पुण्यकर्म गरेर आफ्नो बडाइँ नगरी चुपचाप रहने मानिस फेरि फर्कनु नपर्नै गरी परमधाम जान्छ ॥८४॥ बाह्र वर्षसम्म गरेको पापदेखि पनि छुट्छ । श्रीरामनवमीको दिनमा व्रत गर्नाले ती सब पापहरू बिलाइजान्छन् ॥८५॥ रामका मन्त्रहरूको जप जो जान्दैन, उसले अन्त कतै मन नडुलाएर केवल 'राम' भन्ने नाम संझैदै उपवास गर्नू ॥८६॥ यदि गुरुबाट प्राप्त मन्त्र छ भने न्यासपूर्वक जप गरी, प्रत्येक प्रहरमा सावधान भएर विधिपूर्वक पूजा गर्नू ॥८७॥ मुक्त हुन चाहनेले सधैं श्री रामनवमीको व्रत गरोस् । त्यसकारण हर हरतरहले सबैले रामनवमीको व्रत गर्नुपर्छ ॥८८॥

॥ इति श्री स्कन्दपुराणे अगस्त्य-सुतीक्ष्णसंवादे श्रीरामनवमी-कथा समाप्ता ॥

* ३–अथ एकादशी-नियमविशेषपूजाप्रकारः *

मार्गकृष्णे, उत्पत्तिर्नाम्नी कृष्णदामोदरदेवता शक्त्या शक्तिः ॥ सुगन्धपुष्पं अद्भुत-फलार्घ्यम् ॥ मोदकानि नैवेद्यम् ॥ धान्यदानम् ॥ १ ॥ मार्गशुक्ले मुक्तिदा नाम्नी एकादशीर केशवो देवता ॥ विशालाक्षी शक्तिः ॥ मालतीपुष्पं, मुद्गललड्डुकं नैवेद्यम् ॥ नारंगी-फलार्घ्यम् ॥ सप्तधान्यदानम् ॥२॥ पौषकृष्णे सफला नाम्नी ॥ संकर्षणो देवता, सुनन्दा शक्तिः ॥ अगस्तिपुष्पं, रंभाफलार्घ्यम् ॥ पक्वान्न-नैवेद्यदानम् ॥ ३ ॥ पौशशुक्ले पुत्रदा नाम्नी ॥ नारायणो देवता, लक्ष्मी शक्तिः कुंदपुष्प-दाडिम-फलार्घ्यम् ॥ चूर्ण नैवेद्यम्, घृतरौप्यदानम् ॥ ४ ॥ माघकृष्णे षट्तिला नाम्नी ॥ हरिर्देवता, श्रीशक्तिः कह्लारपुष्पम् ॥ द्राक्षाफलार्घ्यम् ॥ घृतपुरनैवेद्यम् ॥ दुग्धदानम् ॥ तिलहोमः ॥ ५ ॥ माघशुक्ले जया नाम्नी, माधवो देवता, रुक्मिणी शक्तिः, कुन्दपुष्पम् ॥ बीजपुरफलार्घ्यम् ॥ तिललड्डुकनैवेद्यम् ॥ तिलधेनुदानं, वा ताम्रखण्डदानं च ॥६॥ फाल्गुणकृष्णे ॥ विजया नाम्नी, अच्युतो देवता ॥ धात्री शक्तिः ॥ तुलसी-पत्राणि जंबीरफलार्घ्यम् ॥ मूखादिरनैवेद्य ॥ पक्वान्नादि होमः ॥७॥ फाल्गुण-

शुक्ले, आमलकी नाम्नी, गोविन्दो देवता, चण्डिका शक्तिः, अक्रोडफलार्घ्यम् ॥ चम्पक-पुष्पम् ॥ पूरिकानैवेद्यम् ॥८॥ चैत्रकृष्णे पापमोचनी नाम्नी ॥ अनिरुद्धो नामा देवता ॥ मित्रवृन्दा शक्तिः ॥ कुन्दपुष्पफलैरर्घ्यम् । वटकनैवेद्यम् ॥ फलादिदानम् ॥ ९ ॥ चैत्रशुक्ले कामदा नाम्नी ॥ विष्णुर्देवता, आम्रमञ्जरीपुष्पम् ॥ धात्रीपुष्पपत्रं च । एलाफलार्घ्यम् ॥ इक्षुरसनै-वेद्यम् ॥ इक्षुखण्डानि सुगन्धि पुष्पदानम् ॥१०॥ वैशाखकृष्णे वरूथिनी नाम्नी, वायुर्देवो देवता ॥ शची शक्तिः ॥ जाइफलार्घ्यमरुद्रपुष्पम् ॥ शक्तुनैवेद्यम् ॥ धौतोत्तरीयदानम् ॥ ११ ॥ वैशाख-शुक्ले मोहिनी नाम्नी ॥ मधुसूदनो देवता ॥ माधवी शक्तिः, दमनापुष्पम् ॥ राजनिक-फलार्घ्यम् ॥ गुलाबसकरीनैवेद्यम् ॥ दुग्धदानम् ॥ १२ ॥ ज्येष्ठकृष्णे अपरा नाम्नी ॥ प्रद्युम्नो देवता ॥ कालिन्दी शक्तिः, बकुलपुष्पम् ॥ कर्कटीफलेनार्घ्यम् ॥ दुग्धनैवेद्यम् ॥ श्वेतछत्रो-पानहदानम् ॥ १३ ॥ ज्येष्ठशुक्ले निर्जला नाम्नी ॥ त्रिविक्रमो देवता ॥ पद्मा शक्तिः ॥ भृङ्गराजपुष्पम् ॥ आम्रफलार्घ्यम् ॥ दधिभक्तनैवेद्यम् ॥ जलधेनुदानम् ॥ १४ ॥ आषाढकृष्णे योगिनी नाम्नी ॥ नृसिंहो देवता ॥ क्षेमकरा शक्तिः ॥ जपापुष्पम् ॥ करणाफलार्घ्यम् ॥ पायस

नैवेद्यम् ॥ ज्येष्ठिकाचन्दनम् ॥ तालव्यजनदानम् ॥ १५ ॥ आशाढशुक्ले पद्मा नाम्नी ॥ वामनो देवता ॥ मधुमती शक्तिः ॥ अपामार्गपुष्पम् ॥ नारिकेलफलार्घ्यम् ॥ पक्वान्ननैवेद्यम् ॥ आम्रफलदानम् ॥ तिलाज्यादिना होमः ॥ १६ ॥ श्रावणकृष्णे कामिका नाम्नी, पुरुषोत्तमो देवता ॥ विजया शक्तिः ॥ मल्लिकापुष्पम् ॥ विल्वफलार्घ्यम् ॥ पूपनैवेद्यम् ॥ कांस्यपात्रस्थितनवनीतदानम् । मिष्टान्नभोजनम् ॥ १७ ॥ श्रावणशुक्ले पुत्रदा नाम्नी ॥ श्रीधरो देवता ॥ मतिकातिं शक्तिः ॥ पनसपुष्पं पत्रं वा ॥ पनसफलार्घ्यम् ॥ मधुरं नैवेद्यम् ॥ ताम्बूलपूंगिगलादि-दानम्॥१८॥ भाद्रकृष्णे अजा नाम्नी ॥ अधोक्षजो देवता ॥ रुक्मिणी शक्तिः ॥ कुशपुष्पं ॥ कूष्मांडफलार्घ्यम् । खाजानैवेद्यम् ॥१९॥ भाद्रशक्ले पद्मा नाम्नी ॥ हृषीकेशो देवता ॥ रतिकरी शक्तिः ॥ कटलपुष्पम् ॥ शष्कुलिनैवेद्यम् ॥ कांस्यपात्रस्थितघृतपात्रदानम् ॥ २० ॥ आश्विनकृष्णे इन्दिरा-नाम्नी ॥ जवार्दनो देवता ॥ सुप्रभा शक्तिः ॥ दूर्वाकुरपुष्पम् ॥ धात्रीफलार्घ्यम् ॥ मिष्टफलादिनैवेद्यम् ॥ शक्तुदानम् ॥ गौदानं च ॥ २१ ॥ आश्विनशुक्ले पापांकुशा नाम्नी ॥ पद्मनाभ देवता, पद्मा शक्तिः ॥ शमीपत्रपुष्पम् कमलपुष्पम् वा फलार्घ्यम् कदलीफलनैवेद्यम् ॥

पीतलड्डुकनैवेद्यम् ॥ वस्त्रदानं च ॥२२॥ कार्तिककृष्णे रमा नाम्नी ॥ श्रीकृष्ण-देवता, सत्य-
भामा शक्तिः, नागकेशरपुष्पम् ॥ अमृतफलार्घ्यम् ॥ मुद्गललड्डुकनैवेद्यम् ॥ गुडधेनुदानम् ॥
॥२३॥ कार्तिकशुक्ले हरिबोधिनी नाम्नी ॥ दामोदरो देवता ॥ राधा शक्तिः ॥ शतपत्रपुष्पम् ॥
बदरिनैवेद्यम् ॥ दारिफाफलार्घ्यम् ॥ दीपा-होम-तिलपायसैः ॥ सोपस्करणशय्यादानादि ॥
द्विजदम्पतीपूजनम् ॥ गोदानम् ॥ चतुर्विंशत्येकादशीषु-अखण्डैकादश्यामुक्तवत् सर्वः पूजा-
नियमादिविधिः कर्तव्यः ॥ १४ ॥

इति सामान्य एकादशी-नियमप्रकारः समाप्तः ॥ श्रीकृष्णार्पणमस्तु ॥

* अथ एकादशी-पूजाविधिः *

प्रयोगः ॥ कांश्यं मांसञ्च मसुराञ्चणकं कोद्रवं तथा ॥ शाकं मधु परान्नञ्च मैथुनं परदूषणम् ॥ एकादशी-विदधतो दशम्यां दश वर्जयेत् ॥ प्रातःस्नाने पितुः श्राद्धे दशमी - द्वादशी - दिने ॥ तैलाभ्यंगेषु यत्तैलं तत्तैलं सुरया समम् ॥ इति नियमः ॥ अथाखण्डैकादशी व्रतपूजाविधिर्लिख्यते ॥ कर्त्ताऽऽचम्य प्राणायामं कृत्वा मङ्गलोच्चारणं हृदि स्पर्शनम् ॥ दीपं प्रज्वाल्य ॥ कर्मपात्रं कुर्यात् ॥ पवित्रेस्थ० इति पवित्रं क्षिपेत् ॥ शन्नोदेवीति जलम् ॥ तिलोसीति तिलान् ॥ यवोसीति यवान् ॥ गंधद्वारेति गन्धम् ॥ अक्षन्नमिति अक्षतान् ॥ श्रीश्चतेति पुष्पम् ॥ यद्देवादेवहेडनमिति कण्डिकात्रयेण कर्मपात्रं स्पृशेत् ॥ अपवित्रः पवित्रो वा० इति अर्घ्यस्थापनम् । त्रिकोणवृत्तभूमौ त्रिविधात्मकमंडले चंदनादिना विलिख्य ॥ स्वाग्नेयक्रमेण त्रिकोणे—ॐ कूर्माय नमः । ॐ पृथ्वीव्यै नमः । ॐ अनन्ताय नमः ॥ मध्ये आधारशक्तये नमः इति सम्पूज्य संस्थाप्य च ॥ साधारोपरि ॥ शंखाद्यर्घ्यपात्रम् प्रक्षाल्य फडिति नमः ॥ इति सम्पूज्य ॥ संस्थाप्य चार्घ्यौ ॥ ॐ ब्राह्माण्डोदरतीर्थानि करैः स्पृष्टानि ते रवे ॥ तेन सत्तेन देवेश तीर्थं देहि दिवाकर ॥ इति

सूर्यमण्डलात् तीर्थमानीय ॥ गंगे च यमुने चैव गोदावरि सरस्वति ॥ नर्मदे सिन्धु-कावेर्यौ जलेऽस्मिन्सन्निधिं कुरु । इति तीर्थमावाह्य दुग्ध-यव-तिल-कुश-दूर्वा-सर्षप - फलतुलसीदला-
वा० दीन् अर्घ्यपात्रे निक्षिप्य गन्धपुष्पाक्षतादिभिः समभ्यर्च्य । धेनुमुद्रां प्रदर्श्य । मत्स्यमुद्रया आदौ ५० पू.
११ प्रणवाष्टधा जप्त्वा । अर्घ्योदकेनाऽऽसनस्थानभूमौ संप्रोक्ष्य ॥ ॐ पृथ्वी त्वया धृता लोका देवि त्वं विष्णुना धृता ॥ त्वं च धारय मां नित्यं पवित्रं कुरु चासनम् ॥ इति संप्रोक्ष्य ॥ ॐ आधार-शक्तये कमलाशनाय नमः ॥ ॐ पृथिव्यै नमः । इति सम्पूज्य—आसनस्य चतुष्कोणे गणेशं च सरस्वतीम् ॥ दुर्गाक्षेत्रपते मध्ये ब्रह्मादिषु समर्चयेत् ॥ तत्रोपरि स्वस्तिकाद्यासनम् । ततो भूत-शुद्धिं कुर्यात् ॥ वामहस्तेन घंटां वादयेत् ॥ दक्षिणहस्तेन—सर्षप-तिलादि-विकारानादाय-अपसर्पन्तु ये भूता ये भूता भूमिसंस्थिताः ॥ ये भूता विघ्नकर्ताहस्ते नश्यन्तु शिवाज्ञया ॥ भूमिता-डनम् ॥ भूतोत्सादनं कुर्यात् ॥ वामहस्तेन घंटां वादयेत् । दक्षिणहस्तेन सर्षपतिलान् विकिरेत् ॥ अपक्रामन्तु भूतानि पिशाचाः प्रेतगुह्यकाः ॥ ये चात्र निवशन्त्यन्ये देवता भुवि संस्थिताः ॥ सङ्कल्पं कुर्यात् ॥ अद्य हेत्यादि देशकालादीन् संकीर्त्य अमुकगोत्रस्यामुकप्रवस्यामुकशर्मणः

सदारापत्यस्य ममेह समस्त-जन्मोपार्जित-पापक्षयपूर्वक-मनसेप्सितकामानवाप्तये अखण्डैका-
दशीव्रताङ्गत्वेन दीप-कलश-गणेश-पूजन-पूर्वक-सुदर्शनाङ्गदेवतासहित श्रीलक्ष्मीनारायण
पूजनमहं करिष्ये ॥ नमोस्त्वनंतायेति दीपं सम्पूज्य ॥ गणनान्त्वेति गणपतिं पूजयेत् ॥ ततः
सुमुखश्चेति वक्रतुंडेति प्रार्थयेत् ॥ अथ कलशस्थापनम् ॥ भूरसीति भूमिशोधनम् ॥ धान्य-
मसीति धान्यस्थापनम् ॥ आजिघ्रकलशमिति कलशस्थापनम् ॥ वरुणस्योत्तम्भननसीति कलशे
तीर्थादिजलं प्रक्षिप्य—या ओषधीरिति० सर्वौषधिः ॥ हिरण्यगर्भेति पञ्चरत्नानि ॥ या फलिनीति
पूगीफलम् ॥ ओषधयः समीति यवान् ॥ गन्धद्वारामिति चन्दनम् ॥ श्रीश्चतेति पुष्पाणि ॥
काण्डात् काण्डादिति दूर्वा ॥ स्योनापृथिवीति सप्तमृदः ॥ अश्वत्थेवेति पञ्चपल्लवैस्तन्मुख-
माच्छाद्य ॥ बृहस्पतेति वस्त्रयुग्मेन वेष्टयेत् । ततः कलशमुखे गंगादीनावाहयेत् ॥ सर्वे समुद्राः
सरितस्तीर्थानि जलदा नदाः ॥ आयान्तु यजमानस्य दुरितक्षयकारकाः ॥ ततः कलशे तत्त्वा-
यामीति मन्त्रेण आवाह्य पूजयेत् ॥ कलशस्य मुखे विष्णुः कंठे रुद्रः समाश्रितः ॥ मूले त्वस्य
स्थितो ब्रह्मा मध्ये मातृगणाः स्मृताः ॥ कुक्षौ तु सागराः सर्वे सप्तद्वीपा वसुन्धराः ॥ ऋग्वेदोऽथ

यजुर्वेदः सामवेदोऽप्यथर्वणः ॥ अंगैश्च सहिताः सर्वे कलशन्तु समाश्रिताः ॥ इति संपूज्य ॥ ततः
कलशस्य स्कन्धप्रदेशे गणपत्यादिवनस्पत्यन्तदेवेभ्यो नमः ॥ इति संपूज्य ॥ धर्मादिसर्व-
वा० देवेभ्योऽन्तपीडस्य देवताभ्यो नमः ॥ तत्रैव विमलादिपीठशक्तिभ्यो नमः। तदुपरि अन्यकलशो- ए० पु०
१८ परि रौप्यपात्रं ताम्रपात्रं वा संस्थाप्य ॥ अष्टदलं लिखित्वा पूर्वाभिमुखो भूत्वाऽऽचम्य ॥ प्रतिमां
गृहीत्वा हिमस्यत्वेति मन्त्रेण पञ्चगव्येन प्रक्षाल्य ॥ आपोऽअस्मानिति मन्त्रेण प्रतिमां स्थाप-
यित्वा कलशोपरि स्थाल्यां पूजयेत् ॥ मनोजूतिरिति मन्त्रेण प्राणप्रतिष्ठां कुर्यात् ॥ यँ रँ लँ वँ
शँ ॐ आपोऽअस्मान्मातरः शुन्धयन्तु घृतेन नो घृतप्वः पुनन्तु ॥ विश्व ँ हिरिप्रम्प्रवहन्ति देवी-
रुदिदाभ्यः शुचिरापूतऽएमि ॥ खँ सँ हँ सः लक्ष्मीनारायणस्य प्राणाः इह प्राणाः ॥ सर्वेन्द्रियाणि
वाङ्मनश्चक्षु-श्रोत्र-घ्राण-प्राणः इहागत्य सुखं चिरं तिष्ठन्तु स्वाहा इति प्राणप्रतिष्ठां कृत्वा ॥
केशवं मनसा ध्यात्वा पुष्पं गृहीत्वाञ्जलिं बध्वा ॥ एकाग्रमानसं कृत्वा मन्त्रमेतदुदीरयेत् ॥
एतद्गृहीतं गोविन्द मया त्वत्पुरतो व्रतम् ॥ सिद्धिं गच्छन्तु निर्विघ्नाँस्तवपादानुकम्पया ॥
यथा चंचलचित्तोऽहं लोभमोहमयो नरः ॥ शक्तो ह्येतद् व्रतं कर्तुंत्वं वाचानुगृह्णातु मे ॥ एकादश्यां

निराहारः स्थित्वा चैव परेऽहनि ॥ भोक्ष्यामि पुण्डरीकाक्ष शरणं मे भवाव्यय ॥ ततः ॐ ह्रीँ क्राँ लक्ष्मी-सहितविष्णो इहागच्छेत्यावाह्य पाद्यादिना सम्पूज्य शिरसि मूलमंत्रेण पुष्पाञ्जलिं दद्यात् ॥ इमौ मन्त्रौ पठित्वा तु तमेव कुसुमाञ्जलिम् ॥ दत्त्वा नारायणायाऽथ दण्डवत् प्रणमेद् भुवि ॥ ततोऽष्टदलमध्ये पूर्वादिक्रमेण पीठाङ्गदेवपूजां कुर्यात् ॥ ॐ विमलायै नमः ॥ ॐ ऊर्ध्वषीर्ण्यै नमः ॥ ॐ क्रियायै नमः ॥ ततः पूर्वदले ॐ सुदर्शनाय नमः ॥ इति मंत्रेण पाद्यादि नमस्कारान्तैः सुदर्शनम् पूजयेत् ॥ आग्नेयदले ॐ पाञ्चजन्याय नमः ॥ दक्षिणे ॐ कौमोदक्यै नमः ॥ नैर्ऋते ॐ पद्मायै नमः ॥ पश्चिमे ॐ जयायै नमः ॥ वायव्ये ॐ विजयाय नमः ॥ उत्तरे ॐ नंदाय नमः ॥ ईशाने ॐ सुनन्दाय नमः ॥ ॐ यज्ञाय नमः ॐ योगाय नमः ॥ ॐ प्रद्धयै नमः ॥ ॐ सत्यायै नमः ॥ ॐ ईशान्यै नमः ॥ ततो मध्ये ॐ अणुग्रहायै नमः ॥ ॐ नमो भगवते विष्णुदेवाय सर्वात्मने योगपद्मपीठात्मने नमः ॥ पुनः अष्टदले पूर्वादिक्रमेण ॐ नन्दाय नमः ॥ ॐ सुनन्दाय नमः ॥ ॐ अबलाय नमः ॥ ॐ प्रबलाय नमः ॥ ॐ जयाय नमः ॥ ॐ विजयाय नमः ॥ ॐ पुण्यशीलाय नमः ॥ ॐ

सुशीलाय नमः ॥ अथाऽङ्गपूजा ॥ कृष्णाय नमः पादौ पूजयामि ॥ नारायणाय नमः गुल्फौ पूजयामि ॥ केशवाय नमः जानुनी पूजयामि ॥ ॐ गोविन्दाय नमः ॥ गुह्यं पूजयामि ॥ ब्रह्मणे नमः नाभिं पूजयामि ॥ दामोदराय नमः उदरं पूजयामि ॥ परमात्मने नमः हृदयं पूजयामि ॥ परिपूर्णाय नमः कण्ठं पूजयामि ॥ नरकान्तकाय नमः बाहू पूजयामि ॥ सर्वान्तर्यामिने नमः मुखं पूजयामि ॥ त्रैलोक्यदीपदाय नमः नेत्रे पूजयामि ॥ सार्वजनपरिपालकाय नमः ललाटं पूजयामि ॥ मुकुन्दाय नमः शिरः पूजयामि ॥ हरये नमः सर्वाङ्गं पूजयामि ॥ वासुदेवाय नमः ॥ गोविन्दाय नमः ॥ मुकुन्दाय नमः ॥ वामनाय नमः ॥ रामाय नमः ॥ त्रिविक्रमाय नमः ॥ नृसिंहाय नमः ॥ नारायणाय नमः ॥ पुनः पूर्वादिक्रमेण ॥ ॐ शंखाय नमः ॥ ॐ चक्राय नमः ॥ ॐ चर्मणे नमः ॥ ॐ खड्गाय नमः ॥ ॐ गदायै नमः । ॐ वाणाय नमः । ॐ शार्ङ्गधनुषे नमः । ॐ पाशाय नमः । पूर्वे ॐ लक्ष्म्यै नमः । दक्षिणे—ॐ विश्वक्सेनाय नमः । पश्चिमे—ॐ गरुडाय नमः । उत्तरे—ॐ पद्माय नमः ॥ ततो मध्ये । ॐ इन्द्रादिदशदिक्पालेभ्यो नमः । ॐ वज्रादिदशायुधेभ्यो

नमः । मध्यैकदेशे प्रतिमा–समीपे अमुकनाम्न्यै एकादश्यै नमः । पाद्यादि नमस्कारान्तरेका-
दशीम्पूजयेत् । ततः सप्रणवपूर्वां गायत्रीम् श्रावयित्वा लक्ष्मीसहितनारायणाय नमः । इत्युच्चार्य
ध्यायेत् । आसीनं हेमपीठे जलनिचिततयाऽलंकृतं क्रोडदेशे विद्युल्लेखोज्ज्वलाभ्रद्युतिरुचिर-
तनुं दीर्घदोर्भिश्चतुर्भिः । नित्यं विभ्राजमानं सकलमुनिगणैः सायुधैः पद्मनेत्रं पश्यन्तं श्रीसर-
सिजमनिशं तं भजेऽपाङ्गदृष्ट्या । सहस्रशीर्षेत्यावाहनम् । आगच्छ भगवन्देव सहितः श्रीपते
श्रिया । पूजां गृहाण देवेश मम भक्त्या प्रयच्छतः ॥ पुरुष एवेत्यासनम् ॥ सर्वलक्षणसम्पन्नं
लक्ष्म्या सह जगद्गुरोः । अस्मिन् वरासने तिष्ठ यावत्पूजां करोमि ते । कल्पशप्रार्थनां कृत्वा ।
समस्तलोकविख्यातं कीर्तेर्नारायण प्रभो । ब्रूहि ते कुशलं सर्वं सर्वज्ञोऽसि सुरार्चित । एतावा-
निति० पाद्यम् ॥ पाद्यं गृहाण देवेश नारायण सुवासितम् । पापौघवाऽ संहारि पवित्रमति-
शीतलम् । त्रिपादूर्द्धेत्यर्घ्यम् । अर्घ्यं दमामि ते विष्णो दूर्वापल्लवसंयुतम् । अखण्डं तंडुलोपेतं
पुण्डरीकनिभेक्षणे । ततो विराडजाययति पाद्यम् । इदमाचमनीयं तु सुपवित्रं ददामिते । गृहाण
परमानन्द परमानन्दवर्द्धनम् । तस्माद्यज्ञादिति मधुपर्कस्नानम् ॥ मधुपर्कमिमं देव दध्याज्यमधु-

साधितम् ॥ कांश्यपात्रस्थितं विष्णौ कल्पयामि प्रसीद मे । पुनराचमनीयम् ॥ उच्छिष्टोऽपि शुचि-
र्वापि यस्य स्मरणमात्रतः॥ शुचिमाप्नोति तस्मै ते पुनराचमनीयकम्॥ पञ्चामृतस्नानम्॥ देवाद्यै-
निर्मिता धेनुः सर्वपापप्रणाशिनी ॥ त्वत्क्षीरस्नापितो देव नित्यं मे वरदो भव ॥ आपोऽअस्मानिति
शुद्धोदकेन ॥ दधिना दधिक्राब्णो इति ॥ कामतो कामतोवापि यन्मयादुष्कृतं कृतम् ॥ तत्सर्वं विलयं
यान्तु दधिस्नानेन कामद ॥ अपोऽअस्मानिति ॥ ततो घृतेन-घृतंमिमिक्षेति ॥ रसानामुत्तमं
त्वाज्यं देवानां च सदा प्रियम् ॥ येन त्वं स्नापितो देव निधिकान्तिप्रदो भव ॥ आपोऽअस्मा-
निति ॥ ततो मधुना ॥ मधुवातेति ॥ यस्य स्मरणमात्रेण तृप्तिं यान्ति पितामहाः ॥ मधुना
स्नापितो देव नित्यं शोकहरो भव ॥ ततः शर्करया ॥ अपाꣳरसेति ॥ यमलोकभयात्त्रस्तः शरणं
त्वां गतः प्रभो ॥ खण्डस्नानेन देवेश मां कुरुष्व सुखान्वितम्॥ आपोऽअस्मानिति स्नानम्॥ गंगा
च यमुना चैव नर्मदा च सरस्वती ॥ तापी पयोष्णी रेवा च ताभ्यः स्नानार्थमाहृतम् । तस्माद्यज्ञादिति
वस्त्रम् ॥ सोत्तरीयमिदं वस्त्रं वस्त्रश्रेण्यां सुशोभनम्॥ लक्ष्मीनारायणो देवः प्रीयतां पीतवाससः ॥
तस्मादश्वेति यज्ञोपवीतम् । सौवर्णतन्तुग्रथितं ब्रह्मसूत्रं सुशोभनम् ॥ त्रयीमयं गृहाणेदं

त्रिगुणात्मकमीश्वर ॥ तं यज्ञमिति चन्दनम् ॥ मया दत्तेन गन्धेन जरागन्धविनाशनम् ॥ तवास्तु भूषितं गात्रं लक्ष्मीनाथ सुगन्धिना ॥ अक्षतान् ॥ अक्षतान्धवलान्देव गृहाण वरदर्षभ ! सर्वदेवोत्तमस्त्वं हि चाक्षयम् कुरु मे फलम् ॥ यत्पुरुषमिति पुष्पाणि ॥ गृहाण कुसुमं देव सामोदम्विकचं हरे ! कालदेशोद्भवं दिव्यं पुष्पाणि प्रतिगृह्यताम् ॥ अथाऽङ्गपूजा ॥ पादौ पूजायामि दामोदराय नमः । जानुनी पूजयामि, माधवाय नमः ॥ गुह्यं पूजयामि, कामपतये नमः ॥ कटीं पूजयामि, वामनाय नमः । उदरं पूजयामि, नारायणाय नमः ॥ हृदयं पूजयामि, ज्ञानगम्याय नमः ॥ कण्ठं पूजयामि, श्रीकण्ठाय नमः ॥ बाहू पूजयामि सहस्रबाहवे नमः ॥ मुखं पूजयामि सहस्राक्षाय नमः ॥ चक्षुषी पूजयामि, योगयोगिने नमः ॥ ललाटं पूजयामि, मुरलीधराय नमः ॥ नाभिं पूजयामि सुरेश्वराय नमः ॥ श्रोत्रे पूजयामि सर्वेशाय नमः ॥ शिरः पूजयामि, सर्वकामदाय नमः ॥ सहस्रशिरसे नमः सर्वाङ्गं पूजयामि ॥ सर्वरूपिणे नमः ॥ सर्वाङ्गं पू० ॥ ब्राह्मणोस्येति धूपम् ॥ सृष्टोऽयं विधिना पूर्वं देवानां तुष्टिवृद्धये ॥ अतस्तुभ्यं सुरश्रेष्ठ धूपोऽयं दीयते मया ॥ चन्द्रमामनसेति दीपम् ॥ तमसस्तमसं हर्ता घृतपूर्णो जनार्दन ॥ तवास्तु

प्रीतये दीप एष शेषभुजंगम ॥ नाभ्याऽआशीदिति नैवेद्यम् ॥ नैवेद्यं ते मया दत्तं देवेश प्रतिगृह्यताम् ॥ अन्नं चतुर्विधं स्वादु भूतानां जीवनं परम् ॥ पुनराचमनीयम् ॥ यत्पुरुषेति ॥ कर्पूरवासितं तोयं गङ्गायास्तु समाहृतम् ॥ आचम्यतां जगन्नाथ प्रणतार्तिहर प्रभो ॥ ससांस्यासन्निति० ॥ ताम्बूलम् ॥ नारिकेलपूगीफलादीन् दद्यात् ॥ मुखदुर्गन्धहरणं कर्पूरैश्च समन्वितम ॥ गृहाण विष्णो ताम्बूलं कैवल्यद सह श्रिया ॥ अथ फलम् ॥ इदं फलं मया देव स्थापितं भवदग्रतः ॥ येन मे सफलावाप्तिर्भवेज्जन्मनि जन्मनि ॥ चन्दनेन करोद्वर्तनम् ॥ इदं विष्णुरिति ॥ विष्णोरराटमसीति द्वाभ्याम् ॥ नारिकेल–लवङ्ग–जातीफलादीनि समर्पयेत् ॥ उपायनद्रव्यम् ॥ यज्ञेन यज्ञमयजन्तेति दक्षिणा ॥ हिरण्यगर्भगर्भस्थं हेमबीजं विभावसोः ॥ अनन्तपुण्यफलदमतः शान्तिं प्रयच्छ मे ॥ आदर्शनम् ॥ अनेन मन्त्रेण । दूतश्चैवोपचारेषु जलाद्याधानिकेषु च ॥ गृह्ण गात्रावलोकार्थं दर्पणम् च सुरेश्वर ॥ व्यजनम् ॥ आभूषणानि छत्रम् च ॥ इदं विष्णुरिति ॥ अथ चामरम् ॥ शशांककरसंकाशं हिमडिंडिमपांडुरम् ॥ प्रोत्सारयाशु दुरितं चामरामरवल्लभ ॥ अथ नमस्कारः ॥ नमः सर्वहितार्थाय जगदाधारहेतवे ॥ साष्टांगोऽयं प्रणामस्तु प्रयत्नेन मया कृतः ॥

अथ प्रदक्षिणा ॥ अनेकजन्मस्वपि तत्कृतानि पापानि सर्वाण्यपि यानि कानि ॥ नाशं प्रया-
न्त्वद्य हि तानि देव प्रदक्षिणाभिस्तु भवत्कृताभिः । यानि कानि च पापानि ब्रह्महत्याशतानि च ।
वा० तानि सर्वाणि नश्यन्ति प्रदक्षिणपदे पदे । नाभिर्मेति । सौभाग्यद्रव्यम् । अथ नीराजनम् । दीपा- ए० पू०
१२ वलीं मया दत्तां गृहाण परमेश्वर । आरार्तिकप्रदानेन मम तेजप्रदो भव । अथ मूलमन्त्रस्तोत्र-
स्तवादिपाठः । गृह्यतामिति । अथ पुष्पाञ्जलिः । नमो नमस्ते गोविन्द नमस्ते अमरप्रिय । पुष्पा-
ञ्जलिर्मया दत्तः गृहाण परमेश्वर । ततः क्षमापनम् । मन्त्रहीनं क्रियाहीनं विधिहीनं च यद्भवेत्
तत्सर्वं क्षम्यतां विष्णो प्रसीद करुणानिधे । अज्ञानात् विस्मृतो भ्रांत्या यन्न्यूनमधिकं कृतम् ।
विपरीतन्तु तत्सर्वं क्षमस्व परमेश्वर । अथ विशेषार्घ्यदानम् । शंखे रौप्यपात्रे वा फलं चंदनम् पुष्पं
दधि दूर्वाक्षतादिकं क्षिप्त्वा । फलान्नं चैव शुभ्रं च भक्तियुक्तेन चेतसा । गृहाणार्घ्यमिमं देव
लक्ष्म्या सह जगद्गुरो । इदमर्घ्यं समर्पयामि लक्ष्मीसहिताय नारायणाय नमः । अमुकनाम्न्यै
एकादश्यै नमः । अनेनैव विधिना चन्द्रार्घ्यदानम् । अत्रिनेत्रसमुद्भूत क्षीरोदार्णवसम्भव ।
गृहाणार्घ्यं मया दत्तं रोहिणीसहित प्रभो । रात्रौ जागरणं कृत्वा प्रभाते विसर्जयेत् । अथ

विसर्जनम् । आवाहनं न जानामि न जानामि विसर्जनम् । मन्त्रं पूजां न जानामि क्षमस्व परमेश्वर । क्षमस्व देवदेवेश नारायण सुरोत्तम । वरं देहि सुरश्रेष्ठ दासोऽहं सर्वदा तव । धेनुमुद्रां प्रदर्श्य संहारमुद्रया पुष्पमीशाने प्रक्षिपेत् । नैवेद्यं किंचिदीशाने देयमनेन मन्त्रेण—ॐ निर्माल्यभोजिविष्वक्सेनाय नमः । अथ पूर्णपात्रदानम् । पूर्वोक्तसंकल्पमुच्चार्य । अमुकगोत्रस्य अमुकप्रवरस्य अमुकशर्मणो मम श्रुतिस्मृतिपुराणोक्तफलावाप्तये कृतैतत् दीपकलशगणेश—पूजनपूर्वकं यथालाभोपचारैः साङ्ग—सवाहन—सायुध—सपरिवारयुताय एकादशीदिने अस्मिन् रात्रौ अमुकनाम्नी एकादशी-पूजनकर्मणः सांगतासिद्ध्यर्थं न्यूनातिरिक्तपरिपूर्णार्थं अपूर्णस्य पूर्णार्थं पूर्णपात्रं प्रजापतिदैवताकं तत्तत् वस्तूनि तत्तत् दैवताकानि यथानाम गोत्रायेत्यादि । दानप्रार्थना-त्रैलोक्यनाथो देवेश शंख-चक्र-गदाधर ॥ दानेनानेन सुप्रीतः प्रसन्नो भव सर्वदा ॥ यान्तु देवगणास्सर्वे पूजमादाय पार्थिवीम् । इष्टकामप्रसिद्ध्यर्थं पुनरागमनाय च ॥ अथ दक्षिणादानम् ॥ अद्येत्यादि देशकालादीन् संकीर्त्य अमुकगोत्रस्यामुकशर्मणो मम सकलजन्मोपार्जितपापक्षयार्थं श्रीलक्ष्मीनारायणप्रीतये श्रीविष्णुलोकवासकामनमयाऽखण्डैकादशीकृतसोपवास-

जागरणपूर्वकं श्रीविष्णुपूजनकृतस्य यथोक्तफलावाप्तये सांगतासिध्यर्थं च अमुकद्रव्यम-
मुकदैवताकं यथानामगोत्रायेत्यादि ॥ कायेनवाचेति विसर्जयेत् ॥ ततोऽभिषेकादिकं गृहीत्वा ।
ब्राह्मणान् सन्तोषयेत् ॥

॥ इति श्रीपद्मपुराणोक्तमखण्डैकादशीव्रतपूजाविधिः समाप्तः ॥

५. अथ पूर्णिमायां चन्द्रपूजाविधिः

अत्र चन्द्रोदये शुचिराचान्तः शुक्लांबरावृतः श्वेतमाल्यानुलेपनः शुचिभूभौ आसनमास्तीर्य तदुपरि प्राङ्मुख उपविश्य संकल्पं कुर्यात् ॥ अद्येत्यादि अमुकगोत्राया मम पुत्रायुर्धनसंपत्ति-सौभाग्याऽऽरोग्यकामप्राप्तये ग्रहभय-व्याधि-विष-दोष-विनाशार्थं चन्द्रमसं पूजयिष्ये ॥ ततो दीपं प्रज्वाल्य संपूज्य गणपतिं च संपूज्य कलशस्थापनं कृत्वा तत्र वरुणं संपूज्य तत्रैव ग्रहाँल्लोक-पालाँश्च संपूज्य पूजासामग्री संपाद्यपूजामण्डलं संपादयेत् । उपलिप्तायां समभूमौ पिष्टेन-सक र्णिकमष्टपत्रं तद्बहिः षोडशपत्रं तद्बहिरष्टाविंशतिबिन्दून्तद्बहिः कान्तिमालवृतं वृत्तं लिखेत् । तत्र कर्णिकायां दुग्धपूरितां रौप्यस्थालीं रौप्यस्थालीमध्ये कांस्यं रौप्यं वा स्थापयित्वा तदुपरि चन्द्रविम्बं स्थापयेत् ।

ततः स्वाग्रे वृत्तत्रयं चन्दनादिना संलिख्य अर्घ्याधारं संपूज्याऽऽधारे अग्नेर्दशकलाः संपूज्य तत्रार्घ्यपात्रं संस्थाप्यार्घ्यपात्रे सूर्यस्य द्वादकलाः संपूज्य ॥ तत्र विलोममातृकया जलेनाऽऽपूर्य तत्र जले चन्द्रस्य षोडशकलाः संपूज्य धेनुमुद्रां प्रदर्श्य तेन जलेनात्मानं पूजासामग्रीं च संप्रोक्ष्य

भूतशुद्धिप्राणप्रतिष्ठां च कृत्वा स्वमस्तके अमृताधारं चन्द्रं ध्यात्वा मूलमंत्रेणाऽञ्जलित्रयं जलं चन्द्र-
बिम्बे दद्यात् ॥ ततो गुरुं शिवं च नत्वा पीठपूजां कुर्यात् । यथा-मूलप्रकृतये नमः । आधारशक्तये
नमः । कूर्माय नमः । अनन्ताय नमः । पृथिव्यै नमः । श्वेतदीपाय नमः । कल्पवृक्षाय नमः ।
रत्नमण्डपाय नमः । सिंहासनाय नमः । आग्नेयादि क्र० ॥ धर्माय नमः । ज्ञानाय नमः । वैरा-
ग्याय नमः । ऐश्वर्याय नमः । पूर्वादिक्रमेण ॥ अधर्माय नमः । अज्ञानायनमः । अवैराग्ययाय
नमः । अनैश्वर्याय नमः । मध्ये-आत्मने नमः । अन्तरात्मने नमः । ज्ञानात्मने नमः । परमात्मने
नमः । अग्निमण्डलाय नमः । सोममण्डलाय नमः । सूर्यमण्डलाय नमः । सं सत्त्वरूपाय नमः ।
रं रजोरूपाय नमः । तं तमोरूपाय नमः । हां सर्वशक्तिकमलासनाय नमः । पूर्वाद्यष्टदिक्षु मध्ये
च-अमृताय नमः १ तारकायै नमः २, ज्योत्स्नायै नमः ३, विमलायै नमः ४, व्यापिन्यै नमः
५, चित्रायै नमः ६, कृत्तिकायै नमः ७, कान्त्यै नमः ८, मध्ये-श्रावणायै नमः । ततः सौ अमृत-
कलात्मने संवित्पीठाय नमः । पीठे पुष्पाञ्जलिं दत्त्वा संपूजयेत् हस्ते पुष्पांजलिं गृहीत्वा ध्यायेत् ।
कुन्द-कर्पूर-संकाशं-श्वेतपद्म-करद्वयम् ॥ एकास्यं द्वीक्षणं सौम्यं श्वेतांशुं मणिभूषितम् । सप्तहस्तं

विमानस्थं रोहिण्या सहितं स्मितम् ॥ सशक्तिं सायुधं साङ्ग कलाषोडशभिर्युतम् । आत्मसंस्थ-
मजं शुद्धं त्वामहं परमेश्वर ॥ अरण्यामि वहन्यांशं मूर्तिमावाहयाम्यहम् । इत्यावाहनम् ॥ अथ
स्थापनम् । तवेयं महिमा मूर्त्तिस्तस्यां त्वां सर्वगं प्रभो ॥ भक्तिस्नेहसमाकृष्टं दीपवत्स्थापयाम्यहम् ॥
आसनम् ॥ सर्वान्तर्यामिने देव सर्वबीजमयं शुभम् ॥ स्वात्मच्छायापरं शुद्धमासनं कल्पयाम्य-
हम् ॥ अस्मिन् वरासने देव सुखासीनचरात्मकः ॥ प्रतिष्ठितो भवेशस्त्वं प्रसीद परमेश्वर ॥
अथ स्वागतम्-यस्य दर्शनमिच्छन्ति देवाः स्वाभीष्टसिद्धये ॥ तस्मै ते परमेशाय स्वागतं
स्वागतं च ते ॥ अथ सुस्वागतम् ॥ कृतार्थोऽनुगृहीतोऽस्मि सफलं जीवितं मम ॥ आगतो
देवदेवेश सुस्वागतमिदं पुनः । अथ पाद्यम् ॥ यद्भक्तिलेशसंपर्कात्परमानन्दसम्भवः ॥ तस्मै ते
चरणाब्जाय पाद्यं शुद्धाय कल्पये ॥ अर्घ्यम् । तापत्रयहरं दिव्यं परमानन्दलक्षणम् ॥ तापत्रय-
विनिर्मुक्तं तवार्घ्यं कल्पयाम्यहम् ॥ आचमनम् ॥ वेदानामपि वेदाय देवानां देवतात्मने ।
कल्पयामि सशुद्धानां तोयं ते शुद्धिहेतवे ॥ मधुपर्कम् । सर्वकालुष्यहीनाय परिपूर्णसुखात्मने ॥
मधुपर्कमिमं देव कल्पयामि प्रसीद मे ॥ पुनराचमनम् ॥ उच्छिष्टोऽप्यशुचिर्वापि यस्य स्मरणमा-

त्रतः ॥ शुद्धिमाप्नोति तस्मै ते पुनराचमनीयकम् ॥ अथ-पञ्चामृतस्ननाम् ॥ पयसा ॥ देवाद्यै-
र्निर्मिता धेनुः सर्वपापप्रणाशिनी ॥ तत्क्षीर-स्नापितो देव नित्यं मे वरदो भव ॥ दध्ना ॥ काम-
तो कामतो वापि यन्मया दुष्कृतम् कृतम् ॥ तत्सर्व विलयं यान्तु दधिस्नानेन कामद ॥ घृतेन॥
रसानामुत्तमं त्वाज्यं देवानां च सदाप्रियम् ॥ तेन त्वं स्नापितो देव निधिकान्तिप्रदो भव ॥
मधुना ॥ यस्य स्मरणमात्रेण तृप्तिं यान्ति पितमहाः ॥ मधुना स्थापितो देव नित्यं शोकहरो
भव ॥ शर्करया ॥ यमलोकभयात्त्रस्तः शरणं त्वां गतः प्रभो ॥ खण्डस्नानेन देवेश मां कुरुष्व
सुखान्वितम् ॥ शुद्धोदकेन ॥ परमानन्दबोधाब्धौ निमग्नो निजमूर्त्तये ॥ साङ्गोपाङ्गमिदं स्नानं
कल्पयाम्हयमीश ते। माया चित्रपटच्छन्ननिजगुह्यरुतेजसे॥ निवारणाय विज्ञानं वासस्ते कल्पयाम्य-
हम् ॥ उत्तरीयकम् ॥ यमाश्रित्य महामाया जगत्संमोहनी सदा ॥ तस्मै ते परमेशाय कल्पयाम्यु-
त्तरीयकम् ॥ यज्ञोपवीतम् ॥ यज्ञशक्तियेणेदं संप्रोतमखिलं जगत् ॥ यज्ञसूत्राय तस्मै ते
इदं सूत्रं प्रकल्पये ॥ आभूषणानि ॥ स्वभावसुन्दराङ्गाय पीताम्बरधराय च॥ भूषणानि विचित्राणि
कल्पयाम्यमराचित ॥ चन्दनम् ॥ परमानन्दसौभाग्यपरिपूर्णदिगन्तरम्। गृहाण परमं गन्धं

कृपया परमेश्वर ॥ पुष्पम् ॥ तुरीयवनसंभूतं नानागुणमनोहरम् ॥ अमन्दसौरभं पुष्पं गृह्यतामि-
तिमुत्तमम् ॥ अक्षताः ॥ अक्षतान् धवलान् देव गृहाण वरदर्षभ ॥ सर्वदेवोत्मतत्त्वं हि अक्षयं कुरु
मे फलम् ॥ अथवरणपूजा । पूर्वादिक्रमेण-रोहिण्यै नमः १ । कृत्तिकायै० २ । रेवत्यै० ३ ।
भरण्यै ४ । रात्र्यै ५ । आर्द्रायै० ६ । ज्योत्स्नायै० ७ । कलायै० ८ । मध्ये—हारसमप्रभायै० ।
पुनः पूर्वादिक्रमेण आदित्याय नमः १ । मंगलाय० २ । बुधाय० ३ । शनये० ४ । बृहस्पतये० ।
राहवे० ६ । शुक्राय० ७ । केतवे नमः ८ ॥ ततः षोडशपत्रेषु चन्द्रस्य षोडशकलाः पूर्वादि-
क्रमेण पूजयेत् । अमृतायै नमः १ । मानदायै० २ । पूषायै० ३ । तुष्ट्यै नमः ४ । पुष्टयै० ५ । रत्यै०
६ । धृत्यै० ७ । शशिन्यै० ८ । चन्द्रिकायै नमः ९ कान्त्यै० १० । ज्योत्स्नायै ११ । श्रियै १२ ।
प्रीत्यै० १३ । अंगदायै० १४ । पूर्णायै० १५ । पूर्णामृतायै नम० १६ । बहिरष्टाविंशतिबिन्दुषु
पर्वादिक्रमेण नक्षत्राणि पूजयेत् ॥ रोहिण्य नमः १ । मृगशीर्षे० । आर्द्रायै० ३ । पुनर्वसवे०
४ । तिष्याय ५ । अश्लेषायै० ६ । मघायै० ७ । पूर्वाफाल्गुन्यै० ८ । उत्तराफाल्गुन्यै० ९ । हस्ताय
१० । चित्राय० ११ स्वात्यै १२ । विशाखायै नमः १३ । अनुराधायै० १४ । ज्येष्ठायै० १५ ।

मूलाय० १६ । पूर्वाषाढ़ायै० १७ । उत्तराषाढ़ायै० १८ । अभिजिते० १९ । श्रवणाय० २० । धनिष्ठाय० २१ । शतभिषजे० २२ । पूर्वभाद्रायै० २३ । उत्तराभाद्रायै० २४ । रेवत्यै० २५ । अश्विन्यै० २६ । भरण्यै० २७ । कृतिकायै० नमः २८ । इत्यावरणपूजां कृत्वा देवाय पुष्पाञ्जलिं दद्यात् ॥ तत्र मन्त्रः ॥ अभीष्टसिद्धिं मे देव शरणागतवत्सल ॥ भक्त्या समर्पये तुभ्यं समस्तावरणार्चनम् ॥ धूपम् ॥ वनस्पतिरसो दिव्यो गन्धाढ्यो गन्ध उत्तमः । आघ्रेयः सर्वदेवानां धूपोऽयं प्रतिगृह्यताम् ॥ दीपम् ॥ सुप्रकाशो महान् दीपः सर्वताः स्तिमिरापहः ॥ सबाह्याभ्यंतरज्योतिदीपोऽयं प्रतिगृह्यताम् ॥ नैवेद्यम् ॥ सत्पात्रसिद्धसुहविविधानेकभक्षणम् ॥ निवेदयामि देवेश सानुगाय गृहाण तत् ॥ आचमनम् ॥ गंगा च यमुना चैव नर्मदा च सरस्वती ॥ ताभ्यो जलं मयाऽऽनीतं पुनराचमनीयकम् । ताम्बूलम् ॥ पूगीफलं सताम्बूलं खदिरादिमनोहरम् ॥ कर्पूरादिसमायुक्तं ताम्बूलं प्रतिगृह्यताम् ॥ फलम् ॥ इदं फलं मया देव स्थापितं पुरतस्तव । तेन मे सफलावाप्तिर्भवेज्जन्मनि जन्मनि ॥ सुगन्धद्रव्यम् ॥ संसारार्णवमग्नञ्च त्राहि मां रोहिणीपते ॥ सुगन्धश्च सुरश्रेष्ठ गृहाण परमेश्वर ॥ हिरण्यम् ॥ हिरण्यगर्भगर्भस्थं हेमबीजं विभावसोः ॥

अनन्तपुण्यफलदमतः शान्तिं प्रयच्छ मे ॥ नीराजनम् ॥ त्वं ज्योतिः सर्वदेवानां तेजसां तेज उत्तमम् ॥ आत्मज्योतिः परं धाम दीपोऽयं प्रतिगृह्यताम् ॥ दर्पणम् ॥ दर्शनेन त्वमादर्श नूनं मंगलदायक ॥ शौर्य-सौभाग्य-सत्कीर्तिलिर्मलज्ञानदो भव ॥ चामरम् ॥ शशाङ्ककरसंकाश हिम-डिण्डिमपाण्डुर ॥ प्रोत्सारयाशु दुरितं चामरामरवल्लभ ॥ प्रदक्षिणा ॥ यानि कानि च पापानि जन्मान्तरकृतानि च ॥ तानि तानि प्रणश्यन्तु प्रदक्षिणपदे पदे ॥ नमस्कारः ॥ नमः शुभ्रांशवे तुभ्यं द्विजराजपते नमः ॥ रोहिणीपतये तुभ्यं लक्ष्मीभ्रात्रे नमोऽस्तु ते ॥ अर्घ्यमन्त्रः ॥ ॐ विद्ये विद्यामालिनि चन्द्रिणि चन्द्रमुखि स्वाहा । पुनरर्घ्यम्-क्षीरोदार्णवसंभूत अत्रिनेत्र समुद्भव ॥ गृहाणार्घ्यं मया दत्तं पूर्णचन्द्र नमोऽस्तु ते ॥ ज्योत्स्नायाः पतये तुभ्यं नमस्ते ज्योतिषांपते ॥ नमस्ते रोहिणीकान्त अर्घ्यं मे प्रतिगृह्यताम् ॥ स्तुतिः ॥ नमोस्त्वमृतरूपाय परमामृत वर्षिणे ॥ जगतां जीवभूताय जीवादात्रे नमोऽस्तु ते ॥ जगत्स्रष्टे जगत्पात्रे जगत्संहृतिकारिणे ॥ शिवरूपाय शान्ताय मृत्युरोगविनाशिने ॥ नमस्तेऽस्तु निशानाथ रोहिणी-प्रियवल्लभ ॥ नमस्ते हररूपाय कला षोडशधारिणे ॥ त्वं व्रतं चरतामेव वरदः सर्वदेहिनाम् ॥ रोगमृत्युमहोत्पात-

गोत्राय० ॥ एष धर्मघटो दत्तो ब्रह्मविष्णु-शिवात्मकः ॥ अस्य प्रदानात्सफला मम सन्तु मनोरथाः ॥ इति पठित्वा कृतैतच्छर्कराकपूरादियुक्तोदककुम्भदानप्रतिष्ठासाङ्गतासिद्ध्यर्थं यथानामगोत्राय० ॥ वैशाखे नित्यघटदाने—अद्य मम बहुवर्षोपस्थितविविधभोगकामनया शर्कराकर्पूरयुतं जल-पूर्णघटं विष्णुदैवतं यथानामगोत्राय० ॥ अथ इत्यमेव व्यजनदानम् कृत्वा दक्षिणादिकं च दत्वा कर्म समापयेत् ॥

॥ इत्यक्षयतृतीयापूजाविधिः समाप्तः शुभः ॥

दानम् ॥ मम यमपथाधिकरणक-दुर्गभूसन्तरणार्थं तप्तवालुकासिकंटकादि भूसन्तरणार्थम् इमे उपानहौ
उत्तानांगीरो दैवते यथानाम गोत्राय ॥ उपानहौ प्रदास्यामि कण्टकादिनिवारणम् ॥
सर्वस्थानेषु सुखदम् अतः शान्तिं प्रयच्छतु ॥ कृतै तदुपानद्दानप्रतिष्ठासाङ्गतासिद्ध्यर्थं यथानाम
गोत्राय । अथ यिष्टदानम् ॥ मम नेत्रहीनपंगुत्वदुर्बलस्य सुखेन मार्गगमनार्थं दुष्टभयनिवारणा-
र्थम् इमं यष्टिं वनस्पतिदैवतं यथानामगोत्राय ॥ यतिभ्यो वैष्णवं दण्डं द्विजेभ्योऽपि खनित्रकम् ॥
प्रदाय परलोकेऽसौ यमदण्डं न गच्छति ॥ प्रददाति यथावर्णं यो दण्डं ब्रह्मचारिणे ॥ स महा-
पुरुषो लोके ब्रह्मचर्यं समश्नुते ॥ कृतैतत् यष्टिदानप्रतिष्ठासाङ्गताद्धिर्थं यथानामगोत्राय० ॥
अथ शक्तुदानम् ॥ मम आकल्पतृप्तिकामनया एतान् शक्तून् प्रजापतिदैवतान् यथानामगोत्राय ॥
वैशाख-शुक्लपक्षस्य तृतियायां च धीमता ॥ गोभूरत्नहिरण्यादि तत्र दत्त्वाऽक्षयो भवेत् ॥
कृतैतत् शक्तुदानप्रतिष्ठा-साङ्गतासिद्ध्यर्थं यथानामगोत्राय० ॥ सर्वत्र दाने दक्षिणापर्यन्तं
कर्तव्यम् ॥ देवीपुराणे—॥ वारिघटदाने विशेषः ॥ मम अत्र रोहिणी नक्षत्रयुतशुक्ल-वैशाख-
तृतीयायां युगादौ अक्षय-ब्रह्मलोक-कामनया शर्कराकर्पूरादियुक्तमुदककुम्भं वरुणदैवतं यथानाम-

वा०

म०पू०

ग्रहशान्तिं कुरुष्व नः ॥ ग्रहनक्षत्रभेदं च तथा वै सार्वकालिकम् ॥ तत्सर्वं कुरुतात् शान्तिं ताराधिप नमोऽस्तु ते ॥ क्षमापनम । न्यूनातिरिक्तकर्माणि मया यानि कृतानि च ॥ क्षमस्व तानि सर्वाणि ताराधिप नमोऽस्तुते ॥ मन्त्रहीनं क्रियाहीनं विधिहीनं सुरोत्तम ॥ यत्पूजितं मया देव परपूर्णं नमोऽस्तु ते ॥ ततो दक्षिणादानम् ॥ ॐ अद्येत्यादि कृतैतच्चन्द्रपूजाकर्मणः साङ्गतासिद्ध्यर्थं इमां दक्षिणाद्रव्यं यथानामगोत्रायेत्यादि ॥ ततोऽभिषेकः ॥ मन्त्रपाठः ॥ ततो विसर्जनम् ॥ देवाधिदेवदेवोऽसि पूजितोऽसि मया प्रभो ॥ गच्छ देव वरं स्थानं यत्र नक्षत्रसंहतिः ॥

॥ इत्यग्निपुराणोक्तपूर्णिमायां चन्द्रपूजाविधिः समाप्तः ॥

आजिघ्र कलशं मह्या त्वा विशन्त्विन्दवः। पुनरूर्जा निवर्तस्व सानः सहस्रं धुक्ष्वोरुधारा पयस्वती पुनर्मा विशतादिति॥

६. अथ अक्षयतृतीया-पूजाविधि

४६

अथ प्रयोगः ॥ सङ्कल्पः ॥ ॐ अद्येत्यादि अमुकगोत्रस्याऽमुकशर्मणो ममेह नाना भोगोत्तराऽक्षयविष्णुलोकवासकामनया एतैर्यथामिलितोपचारैर्दीपकलशगणेश-पूजनपूर्वकं विष्णुपूजनमहं करिष्ये ॥ नमोऽस्वनन्तायेति दीपं संपूज्य । गणानांत्वेति गणपतिं संपूज्य ॥ आजिघ्रकलशमिति कलशं संपूज्य ॥ विष्णो रराटमिति षोडशोपचारैर्विष्णुं संपूज्य ॥ ततः कुम्भदानम् ॥ सान्नोदककुम्भाय नमः इति कुम्भं संपूज्य ॥ देयब्राह्मणञ्च त्रिः संपूज्य ॥ वारिणा देहमभ्युक्ष्य । ममेह नानाभोगोत्तराक्षयविष्णुलोकवासकामनया इदं जलपूर्णं सान्नधर्मघटं विष्णुदैवतं यथानामगोत्रायेत्यादि ॥ एष धर्मघटो दत्तो ब्रह्म-विष्णु-शिवात्मकः ॥ अस्य प्रदानात्सफला मम सन्तु मनोरथाः॥ कृतैतत्सान्नोदककुंभदानप्रतिष्ठासाङ्गतासिद्ध्यर्थं यथानामगोत्राय ॥ अथ छत्रदानम् ॥ मम यमपथाधिकरणकतीक्ष्णाऽऽतपक्षुरधारासिवनमार्गसंतारणाघोरातपनिवारणार्थमिदं छत्रमुत्तानाङ्गिरदैवतं यथानाम गोत्राय ॥ सर्वेषामेव देवानां छत्रमातपवारणम् । सुखदं मोक्षदं यस्मादतः शान्तिं प्रतच्छ मे ॥ कृतैतच्छत्रदानप्रतिष्ठासाङ्गसिद्ध्यर्थं यथानामगोत्राय ॥ अथ उपान-

बा० ६

अ० पु०

७–अथ कर्ककसंक्रान्तौ प्रदोषसमये कण्डारक (लूतास्फालन) पूजाविधिः

वा० ४६

कृत्यसंग्रहे ॥ प्रदोषसमये राजन् कर्कसंक्रमणे रवौ ॥ प्रतिवर्षं पूजनीयः कंडारकनिशाचरः ॥ लूतादिभ्यो भयन्नास्ति तथारिष्टभयापनुत् ॥ शरलेन्धनदीपाश्च दातव्या उल्कया सह ॥ फलानि च प्रदेयानि तत्काले संभवानि च ॥ माषपिण्डमयं देयं नैवेद्यं खोचिकाविधम् ॥ शरलो ॥ देवदारुः ॥ उल्कया उज्ज्वलया ॥ पट्टवस्त्रोपरि लिखित्वा सन्ध्यायां पूजयेत् ॥ तत्र क्रमः उपलेपनादि संशोधिते गृहाङ्गणे कर्ता हस्तपादादि शुद्धं विधायाऽऽचम्य कुश-तिल-यव - जलान्यादाय देशकालौ स्मृत्वा लूतादि अरिष्टभय-निवारणार्थं कर्कटसंक्रान्तौ प्रदोषे कण्डारकपूजनमहं करिष्ये इति संकल्पः ॥ गोमयोपलिप्ते पाषाणोपरि ॐ भूर्भुवः स्वः कण्डारक निचाशर इहागच्छेत्यक्षतैरावाह्य तानि पाद्यार्घ्याचमनीयस्नानीय - पुनराचमनीयानि कण्डारकाय नमः । इदमनुलेपनं एतेऽक्षताः एतानि पुष्पाणि इदं धूपं दीपं खोचिकानैवेद्यं वस्त्रं द्रव्यं पूगीफलं तत्कालोद्भवफलं कण्डारकाय नमः ॥ ततः शरलेन्धन-दीपान्दद्यादनेन मन्त्रेण ॥ कण्डारकासुराधीश गृहाण

५

दीपमुत्तमम् ॥ शरलेन्धनसंभूतं ममारिष्टं विनाशयेति शरलेन्धनदीपान्दत्वोल्काः प्रक्षेतव्याः ॥ तत्र मन्त्रः ॥ कण्डारको रात्रिचरः लूतादि-भयनाशनः ॥ उल्कामिमां प्रक्षिपामि माऽस्तु लूताभयं मम ॥ ततः शिष्टाचारेण सप्तव्रीहीनवन्ति ॥ ततो दक्षिणान् दद्यात् ॥ अद्य कृतैतत् कण्डारक-पूजाप्रतिष्ठासाङ्गतासिद्ध्यर्थं दक्षिणां यथानामगोत्रायेत्यादि ॥

॥ इति कर्कटसंक्रान्तौ प्रदोषे कण्डारक-पूजा समाप्ता ॥

—:❀:—

* २–श्रीकृष्णाष्टमी-पूजाविधिः प्रारम्भः *

आचम्य प्राणनायम्य भूशुद्धिं भूतशुद्धिं च कृत्वा सङ्कल्पं कुर्यात् । मम सकुटुम्बस्य क्षेमस्थैर्य-
विजयाभयायुरारोग्यैश्वर्याभिवृद्ध्यर्थं धर्मार्थकाममोक्षं चतुर्विधपुरुषार्थसिद्ध्यर्थं निशीथे सपरिवारो
यथाविभवनियमेन यथामिलितोपचारैर्जन्माष्टम्यां श्रीकृष्णपूजनमहं करिष्ये ॥ तथा आदौ दीप-
कलश-पूजनञ्चाऽहं करिष्ये ॥ स्वर्णमयीं वा रौप्यमयीं कृष्णप्रतिमां कृत्वा ॥ ॐ मनोजूतिरिति
मंत्रेण प्राणप्रतिष्ठां कुर्यात् । अस्यै प्राणाःप्रतिष्ठन्तु अस्यै प्राणाःक्षरन्तु च । अथ ध्यानम् । गायद्भिः
भिन्नराद्यैः सततपरिवृता वेणुवीणानिनादैः शृङ्गारादर्शकुन्तप्रवरकृतकरैः किन्नरैस्सेव्य-
माना ॥ पर्यङ्केष्वास्तृताया मुदिततरमुखी पुत्रिणी सम्यगास्ते ॥ सा देवी देवमाता जयति
सुवदना देवकी दिव्यरूपा ॥ मञ्चके बालकं सुप्तं पर्यङ्के स्तनपायिनम् ॥ श्रीवत्सवक्षसं शान्तं
नीलोत्पलदलच्छविम् । (एवं देवक्या सह कृष्णं ध्यात्वा) देवकीसहितं वसुदेवं यशोदा-
सहितं नन्दं श्रीकृष्णसहितं वसुदेवं बलदेवं चण्डिकां च चतुर्थ्यन्तैर्नमोऽन्तैर्नाम-
मन्त्रैः पूजयेत् ॥ तत्र मन्त्रः ॥ योगेश्वराय देवाय योगिनां पतये विभो । योगोद्भवाय
नित्याय गोविन्दाय नमो नमः ॥ अथाऽऽवाहनं । ॐ सहस्रशीर्षेति० ॐ आगच्छ भग-

वन्देव स्नानं चात्र स्थिरो भव । यावत्पूजां करिष्यामि तावत्त्वं सन्निधौ भव । अथाऽऽसनं—ॐ पुरुषऽएवेदमिति ॥ नानारत्नसमायुक्तं कार्त्तस्वरविभूषितम् ॥ आसनं तव देवेश गृहाण पुरुषोत्तम ॥ अथ पाद्यं—ॐ एतावानस्येति० ॥ गंगादिसर्वतीर्थेभ्यो मयाऽऽनीतं सुशोभनं । तोयमेतत्सुखस्पर्शं पाद्यं मे प्रतिगृह्यताम् । अर्घ्यं । ॐ त्रिपादूर्ध्वमिति० ॥ गंध-पुष्पसमायुक्तं नानासौगन्ध्यशीतलम् । गृहाणार्घ्यं मया दत्तं देवकीनन्दन प्रभो ॥ आचमनीयं ॐ ततोविराडेति० ॥ गंगाजलं मयानीतं पवित्रं सुमनोहरम् ॥ आचम्यतां सुरश्रेष्ठ कृपां कुरु ममोपरि ॥ अथ स्नानं—ॐ तस्माद्यज्ञादिति ॥ गंगा सरस्वती रेवा पयोष्णी नर्मदाजलैः ॥ ताभ्यः स्नानार्थमानीतं गृहाण शिशिरं जलम् ॥ अथ मधुपर्कम् । दधि घृतं मधु चैव एकीकृत्य समर्पितम् । मधुपर्कं महादेव स्नानार्थं प्रतिगृह्यताम् ॥ सधुपर्कान्ते शुद्धोदकम् ॥ ॐ आपोऽअस्मा० ॥ अथ दुग्धं ॥ कामधेनुसमुद्भूतं सर्वेषां जीवनं परम् ॥ क्षीरेण स्नापितो देव नित्यं शोकहरो भव ॥ शुद्धोदकेन ॥ ॐ आपोऽअस्मा० ॥ अथ दध्ना ॥ ॐ दधिक्राव्णो० ॥ कामतोऽकामतो वाऽपि यन्मया पूर्वसंचितम् ॥ तत्सर्वं विलयं यान्तु दधिस्नानेन केवश ॥ पुनः शुद्धोदकेन । ॐ आपोऽअस्मा० ॥ अथ घृतेन । ॐ घृतम्मिमिक्षे० ॥ रसानामुत्तमं

वा०

कृ०पू०

त्वाज्यं देवानां च सदाप्रियम् ॥ पावनं यज्ञहेतुश्च स्नानार्थं प्रतिगृह्यताम् ॥ पुनः शुद्धोदकेन ॥ ॐ आपोऽअस्मा० ॥ अथ मधुना—ॐ मधुवाता । तरुपुष्पसमुद्भूतं सुस्वादु मधुरं मधु । स्नापितोऽसि मया तेन नित्यं शोकहरो भव ॥ पुनः शुद्धोदकेन ॥ आपोऽअस्मा० ॥ अथ शर्करया—अपाꣳरस० ॥ यमलोकभयात्त्रस्तः शरणं त्वां गतः प्रभो ॥ खण्डस्नानेन देवेश मां कुरुष्व सुखान्वितम् ॥ पुनः शुद्धोदकेन । आपोऽअस्मान्० ॥ वस्त्रं—ॐ तस्माद्यज्ञात्सर्वहुतऽऋचः० । नवभिस्तन्तुभिर्युक्तं कार्तस्वरविभूषितम् ॥ वस्त्रं गृहाण देवेश वासुदेव नमोऽस्तु ते ॥ यज्ञोपवीतम्—ॐ तं यज्ञं ॥ ब्रह्माद्यैः कल्पितं ह्येतद्ब्रह्मसूत्रं सुशोभनम् ॥ त्रिगुणीकृत्य देवेश गृहाण मम भक्तितः । गन्धम्—ॐ यत्पुरु० ॥ श्रीखण्डं चन्दनं दिव्यं गन्धाढ्यं सुमनोहरम् ॥ विलेपनं सुरश्रेष्ठ गृहाण परमेश्वर ॥ अथाऽक्षताः । ॐ अक्षन्नमीमद० ॥ यज्ञेश्वराय देवाय तथा यज्ञोद्भवाय च ॥ योगानां पतये नाथ गोविन्दाय नमो नमः ॥ तिल-यवाक्षताः—ॐ ओषधयः० ॥ धान्यराजाः स्वमांगल्या विष्णु-प्रीतिकरा यवाः ॥ तस्मादेषां प्रदानेन ममास्त्वविकलं फलम् ॥ पुष्पं—ॐ श्रीश्चते० ॥ नानाविधानि पुष्पाणि नानावृक्षोद्भवानि च ॥ तुलसीदलमिश्राणि अर्पि-

तानि रमापते ॥ धूपं—ॐ ब्राह्मणोऽस्य० ॥ वनस्पतिरसोदिव्यो गन्धाढ्यो गन्ध उत्तमः ॥ अग्नेयः सर्वदेवानां धूपोऽयं प्रतिगृह्यताम् ॥ दीपं—ॐ चन्द्रमा० ॥ पञ्चवर्तिसमायुक्तं गोघृतेन च पूरितम् ॥ दीपं गृहाण देवेश त्रैलोक्यतिमिरापहम् ॥ नैवेद्यं—ॐ नाभ्याऽआ० ॥ अन्नं चतुर्विधं स्वादु रसैः षड्भिः समन्वितम् ॥ भूतानां जीवनञ्चैव नैवेद्यं प्रतिगृह्यताम् । आचमनीयम् ॐ यत्पुरुष० ॥ कर्पूरवासितं तोयमन्दाकिन्याः समाहृतम् ॥ आचम्यतां जगन्नाथ मया दत्तं हि भक्तितः । करोद्वर्त्तनम् । हरिद्रां कुंकुमं चैव कर्पूराऽगरुमिश्रितम् ॥ करोद्वर्त्तनकं देव गृहाण परमेश्वर ॥ फलं-इदं फलं मया देव स्थापितं पुरतस्तव ॥ तेन मे सफलावाप्तिर्भवेज्जन्मनि जन्मनि ॥ ताम्बूलं-नागवल्लीदलैर्युक्तं खादिरेण समन्वितम् ॥ चूर्णया सहितं देव ताम्बूलं प्रतिगृह्यताम् ॥ अथाङ्गपूजा ॥ गोविन्दाय नमः पादौ पूजयामि ॥ माधवाय० जंघे पू० ॥ मधुसूदनाय० कटिं पू० ॥ पद्मनाभाय० नाभिं पू० ॥ हृषीकेशाय० हृदयं पू० ॥ संकर्षणाय० स्तनौ पू० ॥ वामनाय० बाहू पू० ॥ दैत्यसूदनाय० हस्तौ पू० ॥ हृषीकेशाय० कण्ठं पू० ॥ चारुमुखाय० मुखं पू० ॥ त्रिविक्रमाय० नासिकां पू० ॥ पुण्डरीक्षाय० नेत्रे पू० ॥ नृसिंहाय० श्रोत्रे पू० ॥ उपेन्द्राय ललाटं पू० ॥

हरये० शिरः पू० ॥ श्रीकृष्णाय० सर्वाङ्गं पूजयामि । अथ दक्षिणा—ॐ हिरण्यगर्भः समवर्तता-
ग्रेति० ॥ हिरण्यगर्भगर्भस्थं हेमबीजं विभावसोः ॥ अनन्तपुण्यफलदमतः शान्तिं प्रयच्छ मे ॥
चामरं—शशांककरसंकाशं हेमडिंडिमपाण्डुरम् ॥ प्रोत्सारयाशु दुरितं चामरामरवल्लभम् ॥
आदर्शम्—दर्शनेन त्वमादर्श नूनं मङ्गलदायक ॥ सौर्यसौभाग्य-सत्कीर्ति-निर्मलज्ञानदो भव ॥
दक्षिणा—ॐ सप्तास्या० यानि कानि च पापानि ब्रह्महत्या-शतानि च ॥ तानि तानि प्रणश्यन्तु
प्रदक्षिणपदे पदे ॥ नमस्कारः—ॐ यज्ञेन यज्ञ० । विश्वेश्वराय देवाय तथा विश्वोद्भवाय च ॥
विश्वानां पतये तुभ्यं गोविन्दाय नमो नमः ॥ सोमाय सोमेश्वरायेत्यादि चन्द्रपूजायां मंत्रा उक्ताः ।
ततो गोघृतेन वसोर्धारां कुर्यात् ॥ जातकर्म-नालच्छेदन—षष्ठीपूजा—नामकर्म संक्षेपेण कुर्यात् ।
ततश्चन्द्रोदये रोहिणीसहितं चन्द्रस्थण्डिले प्रतिमायां वा नाममन्त्रेण सम्पूज्य । शंखतोयं समा-
दाय सपुष्पं फलचन्दनम् ॥ जानुभ्यामवनिं गत्वा कृष्णायार्घ्यं निवेदयेत् ॥ क्षीरोदार्णव
संभूत अत्रिगोत्र-समुद्भव । गृहाणार्घ्यं शशांकेदं रोहिणीसहितो मम ॥ ज्योत्स्नायाः पतये तुभ्यं
ज्योतिषां पतये नमः ॥ नमस्ते रोहिणीकान्त सुधावास नमोऽस्तु ते ॥ नमो मंडलदीपाय शिरो-

रत्नाय धूर्जटेः ॥ कलाभिर्वर्द्धमानाय नमश्चन्द्राय चारवे ॥ इति प्रणमेत् ॥ बद्धाञ्जलिः ॥ ॐ त्राहि मां सर्वलोकेश हरे संसारसागरात् ॥ त्राहि मां सर्वपापघ्न दुःखशोकार्णवात् प्रभो ॥ सर्वलोकेश्वर त्राहि पतितं मां भवार्णवे । देवकीनन्दन श्रीश हरे संसारसागरात् । त्राहि मां सर्वपापघ्न रोगशोकार्णवाद्धरे । यद्बाल्ये यच्च कौमारे यौवने यच्च वार्धके ॥ यत्पुण्यं वृद्धिमाप्नोतु पापं हर हलायुध ॥ ततः स्तोत्रं पठन् कथाश्रवणादिना जागरणं कुर्यात् ॥ प्रातःकाले स्नानादिकं कृत्वा पूर्ववदेव पूजयित्वा ब्राह्मणान् भोजयेत् ॥ तेभ्यः सुवर्णधेनुं च दत्त्वा दक्षिणां दद्यात् ॥

॥ इति कृष्णजन्माष्टमीव्रतपूजाविधिः समाप्तः ॥

* ९–अथ श्रीकृष्णाष्टमी-व्रत-कथा *

व्यास उवाच ॥ निवृत्ते भारते युद्धे कृतकार्य्यो युधिष्ठिरः ॥ उवाच वाक्यं धर्मात्मा कृष्णं देवकिनन्दनम् ॥ १ ॥ युधिष्ठिर उवाच ॥ त्वत्प्रसादेन गोविन्द निहताश्शत्रवो रणे ॥ कर्णश्च निहतः सोऽपि त्वत्प्रसादात् किरीटिना ॥२॥ जेता को युधि भीष्मस्य यस्य मृत्युर्न विद्यते ॥ अजेयोऽपि जितस्सोऽपि त्वत्प्रसादाज्जनार्दन ॥३॥ प्राप्तं निष्कण्टकं राज्यं कृत्वा कर्म्म सुदुष्करम् ॥

युधिष्ठिरले बिन्ती गर्दा श्रीकृष्णले युधिष्ठिरलाई बताउनुभएको भनी व्यासले सूतजीलाई सुनाएको कथा सूतजी नैमिषारण्यक्षेत्रमा रहने शौनक आदि अट्ठासी हजार ऋषिहरूलाई सम्बोधन गर्दै भन्न लाग्नुभो–हे शौनकादि ऋषिहो ! मलाई कुनै दिन व्यासले भन्नुभयो–भारतको लडाइँ सकिएपछि गर्नुपर्ने सारा काम गरिसकेका धर्मात्मा युधिष्ठिर महाराजले देवकीका पुत्र श्रीकृष्ण भगवान्लाई केही कुरो भन्नुभयो ॥१॥ युधिष्ठिरले भन्नुभयो—हे गोविन्द ! तपाईंका कृपाले लडाइँमा शत्रुहरू मारिए । त्यस्तो उद्दण्ड कर्ण पनि तपाईंका कृपाले अर्जुनद्वारा मारियो ॥२॥ जसको मृत्यु नै तोकिएको छैन त्यस्ता भीष्मलाई लडाईंमा को जित्न सक्थ्यो ? हे जनार्दन ! त्यस्ता अजेय भीष्म पनि तपाईंका कृपाले जितिनुभयो ॥३॥ हे प्रभु ! अत्यन्तै दुःखले मात्र गर्न सकिने काम गरेर निष्कण्टक अर्थात् शत्रुहीन राज्य र आचार-दण्डनीति-

आचारो दण्डनीतिश्च राज्यधर्म्माः क्रियान्विताः ॥ ४ ॥ अधुना श्रोतुमिच्छामि व्रते जन्माष्टमी-
व्रतम् । जन्माष्टमी व्रतं ब्रूहि विस्तारेण ममाऽच्युत ॥ ५ ॥ कस्मिन्काले समुत्पन्नं किं पुण्यं
को विधिः स्मृतः ॥ ६ ॥ श्रीकृष्ण उवाच ॥ शृणु राजन् प्रवक्ष्यामि व्रतानामुत्तमं व्रतम् ॥ यतः
प्रभृतिविख्यातं फलेन विधिनाऽन्वितम् ॥७॥ राजवंश-समुत्पन्नैर्दैत्यैः कैश्चित्सुपीडिता ॥ धरा-
भारभराक्रान्ता ब्रह्माणं शरणं ययौ ॥ ८ ॥ ज्ञात्वा तदा प्रभुर्ब्रह्मा भूमिं भारसमाहिताम् ॥ श्वेत-
द्वीपं समागत्य सर्वदेवैस्समन्वितः ॥ ९ ॥ समाहितमतिर्ब्रह्मा मां तुष्टाव विशांपते ॥ स्तुप्या

विधिविधान पूर्वकका राज्यधर्म (कर्तव्य) हरूको उपदेश पाएँ ॥४॥ अब व्रतहरूमध्येको व्रत जन्माष्टमीको व्रत सुन्न चाहन्छु । हे अच्युत, मलाई जन्माष्टमीको व्रत विस्तारपूर्वक बताइबक्सियोस् ॥ ५ ॥ कुन कालमा त्यो व्रत उत्पन्न भयो ? त्यो व्रत गर्नाले के पुण्य मिल्छ ? त्यो व्रत गर्नें विधि के कहिएको छ ? ॥६॥ तब श्रीकृष्णले भन्नुभयो—हे राजन् ! व्रत-हरूमध्येमा अति उत्तम यो व्रत कहिलेदेखि प्रसिद्ध भयो ? यो र यसको पुण्यफल तथा यो गर्नें विधिसमेत पताउँछु, उहिले ॥७॥ राजाहरूका वंशमा उत्पन्न भएको कैयन् दैत्य (दुष्ट) हरूले सताइएकी अतएव गह्रौं भारीले थिचिएकी पृथ्वी ब्रह्माको शरणमा पुग्दी भइन् ॥८॥ तब प्रभु अन्तर्यामी ब्रह्माजीले भूमिलाई पापीहरूका पापका भारले लच्काइएकी जानेर सारा देउताहरूले युक्त भै श्वेतद्वीपमा आएर ॥९॥ हे महाराज युधिष्ठिर ! ब्रह्माजी एकाग्रबुद्धिका भै मलाई स्तुति गर्न लागे—

तथाऽहं सम्प्रीतस्तेषां दृग्गोचरोऽभवम् ॥१०॥ दृष्ट्वा मां प्रणिपत्याशु भक्तिभावसमन्वितः॥ ब्रह्मा-
णमग्रतः कृत्वा तुष्टाः सर्वे दिवौकसः ॥ ११ ॥ विजिज्ञपुर्महाभूमेस्तस्या भारापनुत्तये ॥ उपधार्य
तदा लेखावचनस्वावचिन्तयम् ॥१२॥ केनोपायेन हन्तव्या दानवाः क्षत्रियोद्भवाः ॥ स्वधर्म्मनि-
रतास्सर्वे महाबलपराक्रमाः ॥१३॥ ततो निश्चित्य मनसा ब्रह्माणञ्चाहमब्रुवम् ॥ वासुदेवो देवकी
च प्रजाकामौ पुरा नृप ॥ १४ ॥ भक्त्या मां भजमानौ तौ तप्तवन्तौ महत्तपः ॥ ततो प्रसन्नः
सुप्रीतो याचतं वरमुत्तमम् ॥ १५ ॥ अब्रूवन्तावपि ततो वरयामासतुः किल ॥ यदि देव प्रसन्नोऽसि

त्यस स्तुतिले खुशी भएको म पनि तिनीहरूका आँखाले देखिने भएँ अर्थात् उनीहरूलाई दर्शन दिएँ॥१०॥मलाई देखेपछि हतपत प्रणाम गरेर भक्तिभावले युक्त भएका सबै देवताहरू ब्रह्मालाई अगि लाएर प्रसन्न भएर ॥११॥ती ठूलो पृथ्वीको भार हटाउनका लागि विन्ती चढाए। तब मैले पनि ती देवतालाई दिएर सान्त्वना राम्रोसित कुरो विचारें—॥१२॥ क्षक्षिय कुलमा जन्मेका, आफ्ना रजोगुणी धर्ममा लागिपरेका ठूला बल र पराक्रमले युक्त भएका सबै दानव (दुष्ट-हरूलाई कुन उपायले मार्नें ! ॥१३॥ तब तिनलाई मार्नें उपाय मनले यकीन गरेर हे राजन् ! ब्रह्माजीलाई मैले भनें—उहिल्यै सन्तान चाहने वसुदेव र देवकी ॥१४॥ दुवैले मलाई भक्तिले भज्दै ठूलो तपस्या तपे अर्थात् गरे। तब प्रसन्न भएको मैले खुशी भएर 'उत्तम वर माँग' भनें ॥१५॥ यसरी भनिएका तिनले पनि तब 'हे भगहन् ! यदि प्रसन्न होइ-

त्वादृशो नो भवेत् सुतः ॥ १६ ॥ तथेति च मया ताभ्यामुक्तं प्रीतेन सेवया ॥ तत्कामपूरणार्थाय सम्भविष्यामहं तयोः ॥१७॥ दिवौकसोऽपि स्वांशेन सम्भवन्तु सुरस्त्रियः ॥ योगमाया च नन्दस्य यशोदायां भविष्यति ॥१८॥ देवक्यां जठरे गर्भं नयन्तं धाम मामकम् ॥ सन्निष्कास्य ततस्तूर्णं रोहिण्या जठरे कुरु ॥१९॥ इति सन्दिश्य तान्सर्वान् नमन्नन्तर्हितोऽभवम् ॥ ततो देवैस्समं ब्रह्मा तान्दिशम्प्रणिपत्य च ॥ २० ॥ आश्वास्य च महीं देवी परंधाम जगाम ह ॥ ततोऽहं देवकीगर्भ-माविशं स्वेन तेजसा ॥ २१ ॥ हतेषु षट्सु बालेषु देवक्या औग्रसेनिना ॥ कारागृहस्थितायाश्च

वक्सन्छ भने निन्चय नै हामीलाई तपाई जस्तै छोरो होस्' भनी वर माँगे ॥१६॥ मैले पनि सेवाका प्रेमले ती दुवैलाई 'अच्छा'यस्तो भनिदिएको थिएँ। त्यही काम पूरा गर्नका लागि म ती दुवैको छोरो हुनेछु ॥१७॥ त्यसकारण द्यौताहरू र देवस्त्रीहरू पनि आफ्नाफ्ना अंशले पृथ्वीतलमा उत्पन्न होऊन्। योगमाया पनि नन्दकी यशोदा स्त्रीमा उत्पन्न हुने-छिन् ॥१८॥ देवकीको पेटमा गर्भवास लिएका मेरा अनन्त धाम बलभद्रलाई त्यहाँबाट निकालेर त्यो गर्भ चाँडै नै रोहिणीको पेटमा गर, यानी सार ॥ १९ ॥ ती सबैलाई यस्तो अराएर नमस्कार गर्दै म अन्तरधान भएँ। तब सबै द्यौताहरूका साथै ब्रह्माजी पनि म अलप भएको दिशालाई प्रणाम गरेर ॥ २० ॥ पृथ्वी मातालाई आश्वासन दिएर आफ्नू परम धाममा जाँदो भए। तब म पनि आफ्नू तेजले तेजिलिंदै देवकीको गर्भमा प्रवेश गरें॥२१॥

वसुदेवेन वै सह ॥२२॥ गतेऽर्द्धरात्रसमये सुप्ते सर्वजने निशि ॥ भाद्रमासे सिते पक्षेऽष्टम्यां ब्रह्मर्क्ष-
संयुजि ॥ २३ ॥ सर्वग्रहशुभे काले प्रसन्नहृदयाशये ॥ आविरासन्निजेनैव स्वरूपेणाऽवनीपते ॥ २४ ॥
वसुदेवोऽपि मां दृष्ट्वा हर्षशोकपरिप्लुतः ॥ भीतः कंसादतितरस्तुष्टोवाच कृताञ्जलिः ॥ २५ ॥ वसु-
देव उवाच ॥ अत्यद्भुतमिदं रूपं दुर्दर्शं योगिनामपि ॥ त्वत्तेजसारिष्टगृहमभवत् सम्प्रकाशितम्
॥ २६ ॥ उद्विजे भगवन्कंसाद्यो मे बालानघातयत् ॥ उपसंतर तस्मात्त्वमेतद्रूपमलौकिकम् ॥ २७ ॥
शंखचक्रगदापद्मलसत्कौस्तुभमालिनम् ॥ किरीटहारमुकुटकर्पूरवलयांकितम् ॥ २८ ॥ तडिद्व-

---

वसुदेवकै साथमा भयालखानामा रहेकी देवकीका छः ओटा बालकहरू उग्रसेनको छोरो कंसले मारिएपछि ॥ २२ ॥
भदौ महीनाको, कृष्णापक्षको, रोहिणी नक्षत्रले युक्त भएको अष्टमीको रात सबै जना सुतेको आधारातको समय भएमा ॥२३॥
सारा ग्रहले शुभ समयमा, हृदयको आशय प्रसन्न भएको वेलामा अर्थात् वातावरण स्वच्छ भएको वेलामा हे राजन् ! आफ्नै
चतुर्बाहुरूपले अवतार लिंदो भएँ ॥२४॥ त्यतिखेर मलाई देखेर हर्ष र शोकमा डुबेका, कंसदेखि अत्यन्तै डराएका वसुदेवले
पनि हात जोडेर स्तुति गर्दै भने ॥२५॥ वसुदेवले भने—अद्भुत यो रूप योगीहरूले पनि कठिनले दर्शन पाइने छ ।
तिम्रा तेजले यो सूतिकागृह झलमल्ले भयो ॥२६॥ हे भगवान् ! जसले मेरा बालकहरूलाई मार्‍यो त्यस कंसदेखि डराउँछु ।
त्यसकारण तिमी—'शंख-चक्र गदा-पद्म शोभिएको, कौस्तुभको माला लगाएको, किरीट-हार मुकुट-घुँघुरा-झकिझकाउ भएको

सनसम्वीतं क्वणत्कांचनमेखलम् ॥ स्फुरद्राजीवताम्राक्षं स्निग्धाञ्जनसमप्रभम् ॥ २९ ॥ महामरकत-
स्वच्छं कोटिसूर्यसमप्रभम् ॥ ३० ॥ श्रीकृष्ण उवाच ॥ एवं सम्प्रार्थितो राजन्वसुदेवेन वै तदा ॥
तेनैव निजरूपेण भूत्वाऽहं प्राकृतः शिशुः ॥ ३१ ॥ नय मां गोकुलमिति वसुदेवमचोदयम् । स मां
संप्रापयामास नन्दो गोकुलमञ्जसा ॥ ३२ ॥ द्वाराण्युपाकृतान्यासन्स्वप्रभावात्स्वयम्प्रभो ॥ ददौ
मार्गञ्च कालिन्दी जलकल्लोलमालिनी ॥ ३३ ॥ ततो यशोदाशयने न्यस्य चानकदुन्दुभिः ॥
तत्राप्येकां स्थितां गृह्य दारिकामगमत्पुनः ॥ ३४ ॥ द्वाराण्यपिहितान्यासम्पूर्ववन्निगडन्ततः ॥

बिजुली जस्तो वस्त्र बेरिएको, छम्-छम् बज्ने काञ्चीको कन्धनी लाएको, खिलेका लालकमल समान राता-राता आँखा वाला, चिल्लो गाजलसमानको तेज भएको, महामरकत मणि (नीलम) जस्तो स्वच्छ, कोटिन् सूर्यसदृश तेजिलो'—यो अलौकिक रूप लुकाऊ ॥२७-३०॥ फेरि श्रीकृष्णले भन्नुभयो—हे राजन् ! वसुदेवले यसरी प्रार्थना गरिएको म त्यस वेला त्यसै आफ्नु रूपले नै प्राकृत (सामान्य) बालक भएर ॥३१॥ 'मलाई गोकुलमा लानुहोस्' यो कुरोले वसुदेवलाई ढिपी-गरें । उहाँले पनि मलाई झट्टै ने नन्दको गोकुलमा पुरयाए ॥३२॥ त्यस वेला मेरो आफ्नु प्रभावले भयालखानाका ढोका-हरू आफै खुलेका थिए । पानीका छालका ताँतीले उर्लिएकी यमुना नदीले पनि वाटो दिइन् अर्थात् स्वाचै घटिदिइन् ॥३३॥ तबवसुदेवजी गोकुलमा पुगेर यशोदाका ओछ्यानमा मलाई राखेर उहाँ यौटी कन्यालाई लिएर फेरि द्वारिकामा आउनुभयो

विन्यस्य पादयोरारते शयने न्यस्य दारिकाम् ॥ ३५ ॥ ततो रुरोद महता स्वरेणाऽपूर्य सा दिशः ॥ तस्या रुदितशब्देन उत्थिता यामिका गृहात् ॥३६॥ कंसमागत्य चाचक्षुः प्रसूता देवकीति च ॥ सोऽपि तल्पात्समुत्थाय भयेनातीव विह्वलः ॥ ३७ ॥ जगाम सूतिकागेहे देवक्याः प्रस्स्खलन्नपि ॥ दारिकां शयनाद् गृह्य रुदन्त्याश्चैव स्वस्वसुः ॥ ३८ ॥ अपोथयच्छिलापृष्ठे सोऽपि तस्य कराच्च्युता ॥ उवाच कंसमाभाष्य देवी ह्याकाशगामिनी ॥ ३९ ॥ किम्मया हतया मन्द जातः कुत्रापि ते रिपुः ॥ इत्युक्तस्सोऽप्यभूत्कंसः परमोद्विग्नमानसः ॥ ४० ॥ वनेषूपवनेष्वेव पुरग्रामव्रजेषु च । आज्ञापयायास

॥३४॥ उहाँ आफ्नू ठाउँमा पुगेपछि ढोकाहरू पहिलेकै जस्तो बन्द भएका थिए । तब उहाँ आफ्ना दुवै गोडामा नेल लाएर कन्यालाई ओछ्यानमा राखेर रहनुभयो ॥ ३५ । तब त्यो कन्या ठुलो स्वरले दिशाहरू भर्दै रुन थाली । जसका रुवाइको शब्दले उठेका पालेहरू कारा-घरबाट ॥३६॥ कंसभाठौं आएर 'देवकी सुत्केरी भइन्' भनी उसलाई भने । उ पनि भयले अत्यन्त विह्वल हुँदै पलङ्गबाट उठेर ॥३७॥ लरखराउँदै देवकी सुत्केरी भएको घरमा गयो र रोइरहेकी आफ्नी बहिनीको ओछ्यानबाट कन्यालाई लिएर ॥ ३८ ॥ दुङ्गामाथि पच्छारयो, पच्छार्दा उनी पनि उसको हातबाट छुटी आकाशमा गएकी ती देवीले कंसलाई फट्कार्दै भनिन्—॥३९॥ हे मूर्ख ! मलाई मारेर के हुन्छ ? तेरो शत्रु त कतै जन्मिसक्यो । देवीले यस्तो भनिएको त्यो कंस पनि अत्यन्तै खिन्न चित्त भएको भयो ॥ ४० ॥ त्यसपछि जंगलमा, तरीमा, शहरमा, गाउँमा, गोठमा

ततो बालानां कदनाय वै ॥ ४१ ॥ दानवाश्चाऽपि बालानां कदनं च कुरूद्यताः ॥ अहञ्च गोकुले स्थित्वा पूतनां बालघातिनीम् ॥ ४२ ॥ स्तनं दातुम्प्रवृत्ता च प्राणैस्सममशोषयम् ॥ तृणावर्त बकारिष्टं धेनुकं केशिनं तथा ॥ ४३ ॥ अन्यानपि खलान् हत्वा स्वप्रभावमदर्शयम् ॥ ततश्च मथुरां गत्वा हत्वा कंसादिदानवान् ॥ ४४ ॥ ज्ञातीनाम्परमं हर्षं कृतवानस्मि सादरम् ॥ देवकी वसुदेवश्च परिष्वज्य मुदा मम ॥ ४५ ॥ आनन्दजैर्जलैर्मूर्ध्नि सेचयामासतुर्नृप ॥ तस्मिन् रङ्गवरे मल्लान् हत्वा चाणूरमुख्यकान् ॥ ४६ ॥ गजं कुवलयापीडं कंसभ्रातृननेकशः ॥ एवं हतेऽसुरे कंसे

जतातत्तै जन्मेका बालकहरूको कर्दल पार्नका लागि आज्ञा दियो ॥ ४१ ॥ दानवहरूले पनि लागिपरेर बालकहरूको कर्दल गरे मैले पनि गोकुलमा रहेर बालक मारिहिंड्ने पूतनालाई ॥ ४२ ॥ दूध प्याउन लाग्दा प्राणैसहित चुसिदिएँ। फेरि तृणावर्त–बकारिष्ट–धेनुक–केशी अनि ॥४३॥ अरू पनि दुष्टहरूलाई मारेर आफ्नू प्रभाव देखाएँ। त्यसपछि मथुरामा गएर कंस आदि समस्त दानवहरूलाई मारेर ॥४४॥ आफ्ना बन्धु-बान्धव समस्त ज्ञातीहरूलाई आदरपूर्वक अत्यन्त खुशी पार्दो भएँ। देवकी र वसुदेवले पनि प्रेमपूर्वक मलाई अँगालो हालेर ॥ ४५ ॥ हे राजन्! आनन्दले उब्जेका अश्रुजलले शिरमा सेचन गरे। त्यस मल्लभूमि (अखाडा) मा चाणूर मुख्य भएका पहलमानहरूलाई मारेर ॥४६॥ कुवलयापीड हात्तीलाई र

सर्वलोकैककंटके ॥ ४७ ॥ अन्येषु दुष्टदैत्येषु सर्व्वलोकमहोत्सवे ॥ लोकास्समुत्सुकास्सर्वे मां समेत्योचुरावृताः ॥ ८ ॥ कृष्ण कृष्ण महायोगिन् भक्तानामभयप्रदा ॥ प्रलयात्पाहि नो देव शरणागतवत्सल ॥ ४९ ॥ अनाथनाथ सर्वज्ञ सर्वभूतहिते रत ॥ किञ्चिद्विज्ञामहे देव तन्नो वक्तुं त्वमर्हसि ॥ ५० ॥ तव जन्मदिनं लोके न ज्ञातं केनचित्क्वचित् ॥ ज्ञात्वा च तद्दिनं सर्वे कुर्म्मो जन्मदिनोत्सवम् ॥ तेषां दृष्ट्वा तु तां भक्तिं श्रद्धामपि सुसौहृदम् ॥ ५१ ॥ मया जन्मदिनं तेभ्यो ख्यातं निर्मलचेतसाम् ॥ ५२ ॥ श्रुत्वा तेऽपि तथा चक्रुर्विधिना येन तच्छृणु ॥ पार्थ तद्दिवसे

कंसका अनेक भाइहरूलाई समेत सोतर पारें, यस्ता प्रकारले सारा लोक (जनता) को प्रमुख काँडो जस्तो असुर कंस अनि अरू पनि दुष्ट दैत्यहरू मरेपछि सारा मानिसको ठुलो उत्सवमा फुरुङ्ग भएका सबै मानिसहरू मभाटौं आएर घेर्दै भन्न थाले ॥४७-४८॥ हे कृष्ण, हे कृष्ण, हे महायोगी ! हे भक्तहरूलाई अभय दिने ! हे शरणमा आउनेलाई प्यारो गर्ने, हे भगवान् ! हामीलाई विनाशदेखि बचाउनोस् ॥ ४९ ॥ हे सबै कुरो जान्ने ! हे सबै प्राणीको कल्याणमा लागिपरेका ! अनाथका नाथ ! हे भगवान् ! हामी केही जान्न चाहन्छौं, त्यो हामीहरूलाई भन्न तपाईं योग्य हुनुहुन्छ ॥ ५० ॥ यस संसारमा तपाईंको जन्मदिन कसैले पनि कहीं पनि जानेको छैन । त्यो दिन जान्न पाए हामी सबै तपाईंको जन्मदिनको उत्सव गर्छौं ॥ ५१ ॥ पवित्र चित्त भएका तिनीहरूको त्यो भक्ति, श्रद्धा र स्नेह देखेर मैले तिनीहरूलाई आफ्नु जन्मदिन विख्यात गरिदिएँ ॥ ५२ ॥ तिनीहरूले पनि मेरो जन्मदिन सुनेपछि

प्राप्ये दन्तधावनपूर्वकम् ॥ ५३ ॥ स्नात्वा पुण्यजले शुद्धे वाससी परिधाय च ॥ निर्वर्त्याऽऽवश्यकं कार्यं व्रतं संकल्पमारभेत् ॥ ५४ ॥ अद्य स्थित्वा निराहारं श्वोभूते तु परेऽहनि ॥ भोक्ष्यामि पुण्डरीकाक्ष शरणं मे भवाऽव्यय ॥ ५५ ॥ गृहीत्वा नियमञ्चैव संस्थाप्यार्चनसाधनम् ॥ मण्डपं शोभनं कृत्वा फलपुष्पादिसंयुतम् ॥ ५६ ॥ तस्मिन्मां पूजयेद् भक्त्या गन्धपुष्पादिभिः पृथक ॥ उपचारैः षोडशभिर्द्वादशाक्षरविद्यया ॥ ५७ ॥ मद्यः प्रसूतां जननीं वसुदेवं च मारिष ॥ बलदेव-समायुक्तां रोहिणीं गुणशोभिनीम् ॥ ५८ ॥ नन्दं यशोदां गोपींश्च गोपान्गाञ्चैव सर्वशः ॥ गोकुलं

जुन विधिले भनेमुताबिक जन्मोत्सव गरे त्यो सुन—हे राजन्! त्यो दिन आएपछि दतिवन लाईवरी ॥ ५३ ॥ पवित्र जलमा न्वाहेर शुद्ध-शुद्ध कम्मरमुनि र कम्मरमाथिका लुगा लाएर, आफ्ना आवश्यक काम निष्ट्याएर व्रतको संकल्प गर्न थाल्नू—॥ ५४ ॥ संकल्प गर्दा हे पुण्डरीकाक्ष! आज निराहार (उपवास) रहेर भोलि भएपछि अर्को दिन भोजन गर्नेछु, हे अव्यय अविनाशी भगवान् मेरो शरण हुनुहोस् ॥ ५५ ॥ नियमपूर्वक व्रत लिएर, पूजाका सामान समीपमा राखेर, फल-फूलहरूले सजिएको सुन्दर मण्डप बनाएर ॥ ५६ ॥ त्यसै मण्डपमा चन्दन फूल आदि सामानद्वारा भक्तिसाथ अलग-अलग षोडश उपचारले 'ॐ नमो भगवते वासुदेवाय' यो द्वादशाक्षरी मन्त्र पढ्दै मलाई पूजा गर्नू ॥ ५७ ॥ भरखरै सुत्केरी भएकी आमालाई, वसुदेवलाई पनि त्यहीं पूजा गर्नू। अनि बलदेवका साथमा रहेकी गुणले शोभिएको रोहिणीलाई ॥५८॥ नन्दलाई, यशोदालाई, गोपीहरूलाई, गोपहरूलाई, सारा गाइहरूलाई, गोकुललाई, यमुनालाई, यशोदाका ओछ्यानमा

यमुनां चैव योगमायां च दारिकाम् ॥५९॥ यशोदाशयने सुप्तां सद्योजातां दिगम्बराम् ॥ सर्वान्स म्पूजयेत्सम्यक् नाममन्त्रैः पृथक् पृथक् ॥ ६० ॥ सुवर्णरूप्यताम्रारसृत्स्नादिभिरलंकृताः ॥ प्रतिमाः विविधा प्रोक्तास्तासु चान्यतरां यजेत् ॥ ६१ ॥ रात्रौ जागरणं कुर्याद् गीतनृत्यादिभिस्सह ॥ पुराणैः स्तोत्रपाठैश्च जातनामादिसूत्सवैः ॥ ६२ ॥ श्वोभूते पारणं कुर्यात् द्विजान्सम्भोजयेत्ततः ॥ एवं कृते महाराज व्रतानामुत्तमं व्रतम् ॥ ६३ ॥ सर्वान्कामानवाप्नोति विष्णुलोके महीयते ॥ मोहान्न कुरुते यस्तु याति संसारगह्वरे ॥ ६४ ॥ अंगदेशोद्भवो राजा मित्रजिन्नाम नामतः ॥

सुतेकी भरखरै जन्मेकी नाङ्गी बच्ची योगमायालाई समेत सबैलाई अलग-अलग उनीहरूकै नामरूप मन्त्रले राम्रोसित पूजा गर्नू ॥५९-६०॥ सुन-चाँदी-तामो-पित्तल-माटो आदिले पूर्ति गरिएका थरी-थरीका प्रतिमाहरू बताइएका छन्, तिनमा कुनै पनि यौटालाई पुजा गर्नू ॥६१॥ र राति नाच-गानहरूका साथै पुराण सुनेर या स्तोत्र पाठ गरेर अथवा जातकर्मका उत्सवहरू गर्दै जाग्राम गर्नू ॥६२॥ भोलिपल्ट भएपछि पारण गर्नु, त्यसपछि बाहुनलाई भोजन गराउनु । हे महाराज ! व्रतहरूमध्येमा अति उत्तम यो व्रत यस्ता किसिमले गर्नाले ॥ ६३ ॥ त्यो व्यक्ति सारा चिताएको चीज पाउँछ र अन्त्यमा विष्णुको लोकमा मजा लिन्छ । जो लोभले या अविवेकले यो व्रत गर्दैन त्यो जन संसाररूपी गुफामा गइरहन्छ अर्थात् जन्म-मरणको गुफाबाट छुट्तैन ॥ ६४ ॥ अघि कुनै समयमा नामले मित्रजित् नाम गरेको राजा अङ्गदेशमा जन्मेको थिए ।

तस्य पुत्रो महासेनस्सत्यजित् सत्पथे स्थितः ॥ ६५ ॥ पालयामास धर्मज्ञ विधिवद्रञ्जयन्प्रजाः ॥
तस्यैवं वर्तमानस्य कदाचिद्दैवयोगतः ॥ ६६ ॥ पाखण्डैः सह संवासो बभूव बहुवासरम् ॥
तत्संसर्गात् स नृपतिरधर्म्मनिरतोऽभवत् ॥ ६६ ॥ वेदशास्त्रपुराणानि विनिन्द्य बहुशो नृप ॥
ब्राह्मणेषु तथा धर्मविद्वेषन्परमङ्गतः ॥ ६८ ॥ एवम्बहुतिथं कालं गते भरतसत्तम ॥ कालेन
निधनं प्राप्तो यमदूतवशंगतः ॥ ६९ ॥ बद्ध्वा पाशैर्नीयमानो यमदूतैर्यमान्तिकम् ॥ पीडित-
स्ताड्यमानोऽसौ दुष्टसंगवशात्ततः ॥ ७० ॥ नरके पतितः पी यातनां बहुवत्सरम् ॥ मुक्त्वा पाप-

---

उसको छोरो अत्यन्त तेजस्वी सत्यजित् नामको सत्-मार्गमा चल्नेवाला थियो ॥ ६५ ॥ धर्म जान्ने उसले विधि-विधानपुर्वक प्रसन्न पार्दै प्रजाहरूलाई पालना गरेको थियो । यसै गरी रहिरहेका उसको कुनै दिन भाग्यवश ॥ ६६ ॥ पाखण्डीहरूका साथ धेरै दिनसम्म बसउठ भयो । ती पाखण्डीहरूको संगतले त्यो राजा पनि अधर्म कर्ममा लाग्ने भयो र ॥ ६७ ॥ त्यो राजा वेदशास्त्र र पुराणहरूलाई नाना प्रकारले निन्दा गरेर ब्राह्मणहरूलाई र धर्ममा पनि अत्यन्तै विद्वेष गर्ने भयो ॥ ६८ ॥ हे भरतसत्तम युधिष्ठिर यस्तै प्रकारले आज-भोलि गर्दै निकै समय सकिएपछि कालको वशमा वशीभूत भएर मरेको त्यो राजा यमराजका दूतको अधीन भयो र ॥६९॥ यमराजका दूतहरूले लठाराले टन्काएर यमराजका नगीचै लगिन लागेको त्यो राजा दुष्टका संगतले गर्दा खूब गोदियो र सताइयो, तब ॥ ७० ॥ लगेर नरकमा जाकिएको त्यो पापी धेरै

स्य शेषेण पैशाचीं योनिमास्थितः ॥७१॥ तृष्णा क्षुधा समाक्रान्तो भ्रमन्स मरुधन्वसु ॥ कस्यचित्त्वथ वैश्यस्य देहमाविश्य संस्थितः ॥७२॥ सह तेनैव संयातो मथुराम्पुण्यदाम्पुरीम् ॥ समीपे रक्षकैः सोऽथ तस्माद्देहाद्बहिष्कृतः ॥ ७३ ॥ बभ्राम विपिने सोऽपि ऋषीणामाश्रमेषु च । कदाचिद् दैवयोगन मम जन्माष्टमीदिने ॥ ७४ ॥ क्रियमाणां महापूजां व्रतिभिर्मुनिभिर्द्विजैः ॥ रात्रौ जागरणेनैवं नामसंकीर्तनादिभिः ॥ ७५ ॥ ददर्श सर्वं विधिवच्छुश्राव च हरेः कथाः ॥ निष्पापो दर्शनादेव शुद्धनिर्मलमानसः ॥ ७६ ॥ प्रेतदेहं समुत्सृज्य विष्णुलोकं विमानगः ॥ मम दूतैः

वर्षसम्म यातना भोगेर पनि बाँकी रहेको पापको प्रभावले पिशाच भएर जन्म्यो ॥ ७१ ॥ तब त्यो राजा मरु देशमा भोक-प्यासले आकुल-व्याकुल भएर घुम्दा तब कुनै वैश्यको देहमा घुसेर रहना थाल्यो र ॥ ७२ ॥ त्यसै वैश्यका साथै संयोगले पुण्य दिने पुरी (शहर) मथुरामा पुग्यो । तब त्यस पुरीका नगीच पुग्नेबित्तिकै नगर-रक्षकहरूले त्यस वैश्यको देहदेखि त्यो पिशाचलाई निकालिदिए ॥ ७३ ॥ तब त्यो पिशाच पनि जंगलमा भटूकन थाल्यो र ऋषिहरूका आश्रममा पनि घुमिहिंड्थ्यो । यसरी घुम्दाघुन्दै कुनै वेला दैवसंयोगले मेरो जन्माष्टमीको दिन ॥ ७४ ॥ व्रत ब्राह्मण मुनिहरूले गरिरहेको ठलो पूजा र मेरा नामको कीर्तनले त्यसरी राति जागरण गरेको ॥ ७५ ॥ सारा देख्यो र विधिपूर्वक कहिएका हरिका कथाहरू पनि सुन्दो भयो । त्यसै दर्शनले पापरहित र कथाका सुनाइले निर्मल मनवाला भएको त्यो ॥७६॥ प्रेत शरीरलाई

तस्य पुत्रो महासेनस्सत्यजित् सत्पथे स्थितः ॥ ६५ ॥ पालयामास धर्मज्ञ विधिवद्रञ्जयन्प्रजाः ॥
तस्यैवं वर्तमानस्य कदाचिद्दैवयोगतः ॥ ६६ ॥ पाखण्डैः सह संवासो बभूव बहुवासरम् ॥
तत्संसर्गात् स नृपतिरधर्म्मनिरतोऽभवत् ॥ ६६ ॥ वेदशास्त्रपुराणानि विनिन्द्य बहुशो नृप ॥
ब्राह्मणेषु तथा धर्मविद्वेषन्परमङ्गतः ॥ ६८ ॥ एवम्बहुतिथं कालं गते भरतसत्तम ॥ कालेन
निधनं प्राप्तो यमदूतवशंगतः ॥ ६९ ॥ बद्ध्वा पाशैर्नीयमानो यमदूतैर्यमान्तिकम् ॥ पीडित-
स्ताड्यमानोऽसौ दुष्टसंगवशात्ततः ॥ ७० ॥ नरके पतितः पी यातनां बहुवत्सरम् ॥ मुक्त्वा पाप-

---

उसको छोरो अत्यन्त तेजस्वी सत्यजित् नामको सत्-मार्गमा चल्नेवाला थियो ॥ ६५ ॥ धर्म जान्ने उसले विधि-विधानपुर्वक प्रसन्न पार्दै प्रजाहरूलाई पालना गरेको थियो । यसै गरी रहिरहेका उसको कुनै दिन भाग्यवश ॥ ६६ ॥ पाखण्डीहरूका साथ धेरै दिनसम्म बसउठ भयो । ती पाखण्डीहरूको संगतले त्यो राजा पनि अधर्म कर्ममा लाग्ने भयो र ॥ ६७ ॥ त्यो राजा बेदशास्त्र र पुराणहरूलाई नाना प्रकारले निन्दा गरेर ब्राह्मणहरूलाई र धर्ममा पनि अत्यन्तै विद्वेष गर्ने भयो ॥ ६८ ॥ हे भरतसत्तम युधिष्ठिर यस्तै प्रकारले आज-भोलि गर्दै निकै समय सकिएपछि कालको वशमा वशीभूत भएर मरेको त्यो राजा यमराजका दूतको अधीन भयो र ॥६९॥ यमराजका दूतहरूले लठाराले टन्काएर यमराजका नगीचै लगिन लागेको त्यो राजा दुष्टका संगतले गर्दा खूब गोदियो र सताइयो, तब ॥ ७० ॥ लगेर नरकमा जाकिएको त्यो पापी धेरै

स्य शेषेण पैशाचीं योनिमास्थितः ॥७१॥ तृष्णा क्षुधा समाक्रान्तो भ्रमन्स मरुधन्वसु ॥ कस्यचित्त्वथ वैश्यस्य देहमाविश्य संस्थितः ॥७२॥ सह तेनैव संयातो मथुराम्पुण्यदाम्पुरीम् ॥ समीपे रक्षकैः सोऽथ तस्माद्देहाद्बहिष्कृतः ॥ ७३ ॥ बभ्राम विपिने सोऽपि ऋषीणामाश्रमेषु च । कदाचिद् दैवयोगन मम जन्माष्टमीदिने ॥ ७४ ॥ क्रियमाणां महापूजां व्रतिभिर्मुनिभिर्द्विजैः ॥ रात्रौ जागरणेनैवं नामसंकीर्तनादिभिः ॥ ७५ ॥ ददर्श सर्वं विधिवच्छुश्राव च हरेः कथाः ॥ निष्पापो दर्शनादेव शुद्धनिर्मलमानसः ॥ ७६ ॥ प्रेतदेहं समुत्सृज्य विष्णुलोकं विमानगः ॥ मम दूतैः

वर्षसम्म यातना भोगेर पनि बाँकी रहेको पापको प्रभावले पिशाच भएर जन्म्यो ॥ ७१ ॥ तब त्यो राजा मरु देशमा भोक-प्यासले आकुल-व्याकुल भएर घुम्दा तब कुनै वैश्यको देहमा घुसेर रहना थाल्यो र ॥ ७२ ॥ त्यसै वैश्यका साथै संयोगले पुण्य दिने पुरी (शहर) मथुरामा पुग्यो । तब त्यस पुरीका नगीच पुग्नेबित्तिकै नगर-रक्षकहरूले त्यस वैश्यको देहदेखि त्यो पिशाचलाई निकालिदिए ॥ ७३ ॥ तब त्यो पिशाच पनि जंगलमा भटूकन थाल्यो र ऋषिहरूका आश्रममा पनि घुमिहिंड्थ्यो । यसरी घुम्दाघुन्दै कुनै वेला दैवसंयोगले मेरो जन्माष्टमीको दिन ॥ ७४ ॥ व्रत ब्राह्मण मुनिहरूले गरिरहेको ठलो पूजा र मेरा नामको कीर्तनले त्यसरी राति जागरण गरेको ॥ ७५ ॥ सारा देख्यो र विधिपूर्वक कहिएका हरिका कथाहरू पनि सुन्दो भयो । त्यसै दर्शनले पापरहित र कथाका सुनाइले निर्मल मनवाला भएको त्यो ॥७६॥ प्रेत शरीरलाई

समानीता दिव्यभोग-समन्वितः ॥ ७७ ॥ मम सान्निध्यमापन्नो व्रतस्यास्य प्रभावतः ॥ नित्यमेव व्रतञ्चैतत्पुराणे सार्वकालिकम् ॥ ७८ ॥ गीयते विधिवत्सम्यक् मुनिभिस्तत्त्वदर्शिभिः ॥ सर्व कामिकमेवैतत्कृत्वा कामानवाप्नुयात् ॥ ७९ ॥ एतत्ते सर्वमाख्यातं व्रतानामुत्तमं व्रतम् ॥ मम सान्निध्यकृद्राजन् किं भूयः श्रोतुमिच्छसि ॥ ८० ॥

इति श्रीभविष्योत्तरपुराणे जन्माष्टमी-व्रतकथा समाप्ता ॥

त्यागेर पुण्य शरीरको भयो—तब मेरा दूतहरूले विमानमा बसाएर, दिव्य भोगले युक्त गराएर विष्णुलोकमा त्यो आदरसाथ ल्याइयो ॥ ७७ ॥ यसै व्रतका प्रभावले मेरो सान्निध्य अर्थात् नजीक-वास पायो । सबै समयमा गर्न हुने यो व्रत सधैं नै पुराणमा ॥ ७८ ॥ तत्त्वदर्शी मुनिहरूले विधिपूर्वक राम्रोसित गाइन्छ । सबै इच्छा परा गरिदिने यो व्रत गरेर सारा इच्छित कुरो पाइन्छ ॥ ७९ ॥ हे राजन् ! मेरो नजीक गराउन सक्ने व्रतहरूमा अति उत्तम यो व्रत मैले तपाईंलाई सबै सुनाएँ, अब फेरि के सुन्न चाहनुहुन्छ ॥ ८० ॥

॥ इति श्रीकृष्णजन्माष्टमी व्रतकथा समाप्त ॥

* १०—अथ हरितालिका-पूजाविधिः *

भाद्रपद-शुक्लतृतीयायां प्रातः वा गङ्गायां वा नद्यादौ तडागे वा गत्वा तिलामलककल्केन स्नात्वा पट्टवस्त्रं परिधाय आचम्य तत्रादौ संकल्पः । ॐ तत्सत् ३ विष्णुः ३ .... मम समस्त-पाप-क्षय-पूर्वकं सौभाग्यादि विवृद्धये उमामहेश्वर प्रीत्यर्थं हरितालिका-व्रतमहं करिष्ये । इति संकल्पं कृत्वा व्रतं चरेत् । ततः पुनः सायंकाले गङ्गायां नद्यां तडागे कूपे वा दन्तधावनपूर्वकं यथाविधि स्नात्वा शुद्धपट्टवस्त्रं परिधाय पूजास्थान-मागत्य कदलीस्तंभ-ध्वज-तोरणादिभिर्मण्डपं मण्डयित्वा आसने उपविश्य ईशान्याऽभिमुखो भूत्वा वालुकामयं गौरीसहित-शिवलिङ्गं निर्माय स्वकुलगृहोक्तविधिना प्राणप्रतिष्ठादिकं कृत्वा पूजासंकल्पं कुर्यात् । आचम्य । पूर्वसंकल्पसिद्धिरस्तु मम सकल-जन्म-जन्मनि संचितानि अनेक-महापातक-उपपातकानि निरसनपूर्वकं अस्मिन्लोके समस्तश्रियाऽभिजुष्टा नानाविधैश्वर्य - सुखप्राप्तिपूर्वकं स्वर्णविमानाधिरोहण - उर्वश्यादि देवाङ्गनाभिः सह नन्दन-वनोद्यानविहरणादि अनेक - स्वर्गभोगकामस्तदुत्तरं शिवसायुज्यप्राप्तिकाम आदौ दीप-

कलश - गणेश - पूजनपूर्वकं यथामिलितोपचारैः उमामहेश्वरपूजनमहं करिष्ये ॥ ततो दीप-
कलश - गणेशादीन् संपूज्य गौरी - सहितमहेश्वरं आवाहनादिक्रमेण पूजयेत् । आवाहनम् ॥
देवदेव महादेव प्रार्थयेऽहं जगन्मय ॥ इमां मया कृतां पूजां गृहाण सुरसत्तम । उमामहेश्व-
राभ्यां नमः ॥ ध्यानम् । मंदारमालाकुलितालकायै कपालमालाङ्कितशेखराय ॥ दिव्यांबरायै च
दिगम्बराय नमः शिवायै च नमः शिवाय ॥ उमामहेश्वराभ्यां नमः । आसनम् । हर शंभो
महादेव विश्वेशामरवल्लभ ॥ अनेक-रत्न-संयुक्तमासनं प्रतिगृह्यताम् ॥ उमामहेश्वराभ्यां
नमः ॥ पाद्यम् ॥ जलं सुशीतलं चारु नाना गन्धसमन्वितम् ॥ पाद्यं गृहाण देवेश महादेव
नमोऽस्तु ते ॥ उमाम० नमः ॥ अर्घ्यम् ॥ गंगाजलं समानीतं सुवर्णकलशे स्थितम् ॥ आचम्य-
तां महादेव उमया सहितोऽनघ ॥ उमाम० नमः ॥ पञ्चामृतम् ॥ पयोदधिघृतं चैव शर्करा मधु-
संयुतम् ॥ पञ्चामृतेन स्नपनं प्रीत्यर्थं प्रतिगृह्यताम् ॥ उमाम० नमः ॥ स्नानम् ॥ गङ्गासरस्वती-
रेवा-पयोष्णी-नर्मदाजलैः ॥ स्नापितोऽसि मया देव तथा शान्तिं कुरुष्व मे ॥ उमाम० नमः ॥
वस्त्रम् ॥ सर्वभूषादिके सौम्ये लोकलज्जानिवारणे ॥ मयोपपादिते तुभ्यं वाससी प्रतिगृह्य-

ताम् ॥ उमाम० नमः ॥ यज्ञोपवीतम् ॥ सुवर्णतन्तुग्रथितं कार्तस्वर-विभूषितम् ॥ यज्ञोपवीतं देवेश गृहण जगदीश्वर ॥ उमाम० नमः ॥ गन्धम् ॥ कुङ्कुमाऽगरुकस्तूरी-चन्दनं घनमिश्रितम् ॥ विलेपनं महादेव गन्धं दास्यामि भक्तितः ॥ उमाम० नमः ॥ अक्षताः ॥ रञ्जिताः कुंकुमौघेन त्रक्षताश्चाभिशोभनाः ॥ भक्त्या समर्पितास्तुभ्यं प्रसन्नो भव शंकर। उमाम० नमः ॥ उमायै कञ्चुक्यादि–सौभाग्यद्रव्यं समर्पयेत्। कंचुकीमुपवस्त्रं च नानारत्नसमन्वितम्। गृहाण त्वं मया दत्तं पार्वती च नमोऽस्तु ते ॥ उमायै० नमः। सौभाग्यद्रव्याणि। हरिद्रां कुंकुमं चैव सिन्दूरं कज्जलान्वितम् ॥ सौभाग्यद्रव्यसंयुक्तं गृहाण जगदीश्वरि ॥ उमायै नमः ॥ पुष्पाणि ॥ सेवन्तिका-बकुल-चंपक-पाटलाब्जैः पुन्नाग-जाति-करबीर-रसाल-द्रोणैः ॥ बिल्व-प्रवाल-तुलसीदल-मालतीभिस्त्वां पूजयामि जगदीश्वर मे प्रसीद ॥ उमाम० नमः ॥

अथाङ्गपूजा—पुष्पाक्षतान् गृहीत्वा ॐ शंकराय नमः जंघे पूजयामि। ॐ शंभवाय नमः जानुनी पू०। ॐ भूतेशाय नमः ऊरू पू०। ॐ नीललोहिताय नमः कटिम् पू०। ॐ उग्राय नमः नाभिं पू०। ॐ कृशानुरेतसे नमः उदरं पू०। ॐ हराय नमः स्तनौ पू०। ॐ नीलकंठाय

नमः कण्ठं पू० । ॐ शिवाय नमः मुखं पू० । ॐ त्रिनेत्राय नमः नेत्रे पू० ।
ॐ रुद्राय नमः कर्णौ पू० । ॐ ललाटाक्षाय नमः ललाटं पू० । ॐ शर्वाय नमः
शिरः पू० । अथ धूपम् । ॐ वनस्पतिरसोद्भूतः कृष्णागरुसमन्वितः ॥ आनीतोऽयं मया धूपो
गृहाण परमेश्वर । धूपमाघ्रापयामि उमाम० नमः ॥ दीपम् ॥ ॐ त्वं ज्योतिः सर्वदेवानां तेजसां तेज
उत्तमम् । आत्मज्योतिः परं धाम दीपोऽयं प्रतिगृह्यताम् । ॐ उमाम० नमः दीपं दर्शयामि ॥
नैवेद्यं ॥ अन्नं चतुर्विधं स्वादु रसैः षड्भिः समन्वितम् । भक्ष्यभोज्यसमायुक्तं नैवेद्यं प्रतिगृह्यताम्
उमाम० नमः ॥ आचमनीयम् । मलयाचलसंभूतं कर्पूरेण समन्वितम् ॥ आचम्यतां जलं
स्वच्छं प्रसन्नो भव सर्वदा ॥ उमाम० नमः ॥ करोद्वर्तनं समर्पयामि उमामहेश्व० नमः ॥
फलम् । इदं फलं मया देव स्थापितं पुरतस्तव । तेन मे सफलावाप्तिर्भवेज्जन्मनि जन्मनि ॥
उमाम० नमः । ताम्बूलं ॥ पूगीफलं महद्दिव्यं नागवल्लीदलैर्युतम् । एलाचूर्णादिसंयुक्तं ताम्बूलं
प्रतिगृह्यताम् ॥ उमाम० नमः ॥ दक्षिणाम् । हिरण्यगर्भगर्भस्थं हेमबीजं विभावसोः । अनन्त-
पुण्यफलदमतः शान्तिं प्रयच्छ मे ॥ उमाम० नमः ॥ भूषणम् ॥ वज्र-माणिक्य-वैदूर्य-मुक्ताबिन्दु-

समन्वितम् । पुष्परागं-समायुक्तं भूषणं प्रतिगृह्यताम् ॥ उमाम० नमः ॥ नीराजनम् । चन्द्रादित्यौ च धरणी विद्युदग्निस्त्वमेव च ॥ त्वमेव सर्वज्योतींषि आर्तिक्यं प्रतिगृह्यताम् । उमाम० नमः । अथ नामपूजा ॥ ॐ उमायै नमः । ॐ गौर्यै नमः । ॐ पार्वत्यै० । ॐजगद्धात्र्यै० । ॐ जगत्प्रतिष्ठायै० । ॐ शान्तिरूपिण्यै० । ॐ हराय० । ॐ महेश्वराय० । ॐ शंभवे० । ॐ शूलपाणये० । ॐ पिनाकहस्ताय० । ॐ शिवाय० । ॐ पशुपतये० । ॐ महादेवाय० ॥ पुष्पाञ्जलिः ॥ ॐ मन्दारमालाकुलितालकायै, कपालमालाङ्कितशेखराय ॥ दिव्यांबरायै च दिगंबराय नमः शिवायै च नमः शिवाय ॥ उमामहे० नमः ॥ प्रदक्षिणां ॥ यानि कानि च पापानि ब्रह्महत्यासमानि च । तानि तानि विनश्यन्तु प्रदक्षिणपदे पदे ॥ उमामहेश्वराभ्यां नमः ॥ नमस्कारः । अन्यथा शरणं नास्ति त्वमेव शरणं मम । तस्मात् कारुण्यभावेन रक्ष मां त्रिदलेश्वर ॥ उमाम० नमः ॥ प्रार्थना । पुत्रान् देहि धनं देहि सौभाग्यं देहि सुव्रते ॥ अन्याँश्च सर्वकामाँश्च देहि देव नमोऽस्तु ते ॥ उमाम० नमः ॥ ततो वायनादि ब्राह्मणाय दद्यात् ॥ अन्नं सुवर्णपात्रस्थं सवस्त्रफलदक्षिणाम् । वायनं गौरि विप्राय ददामि प्रीयते तव ॥

सौभाग्यारोग्यकामाय सर्वसंपत्-समृद्धये । गौरी-गौरीश-तुष्ट्यर्थं वायनं ते ददाम्यहम् ॥ उमाम० नमः ॥ क्षमार्पणम् । मंत्रहीनं क्रियाहीनं विधिहीनं च यद्भवेत् । तत्सर्वं क्षम्यतां देव परिपूर्णं तदस्तु मे ॥ इति विसर्जयेत् ॥

॥ इति हरितालिका-व्रतपूजाविधिः समाप्तः ॥



* ११–अथ हरितालिका-व्रतकथा *

(चन्दन अक्षता फूल लिई हात जोर्नोस्)

पुष्पाञ्जलि :—

मन्दारमालाकुलितालकायै कपालमालाङ्कितशेखराय । दिव्याम्बरायै च दिगम्बराय नमश्शिवायै च नमश्शिवाय ॥

सूत उवाच ॥ कैलासशिखरे रम्ये गौरी पृच्छति शंकरम् ॥ गुह्याद् गुह्यतरं गुह्यं कथयस्व महेश्वर ॥ १ ॥ सर्वेषां धर्म्मसर्वस्वमल्पायासान्महत्फलम् ॥ प्रसन्नोऽसि यदा नाथ तथ्यं ब्रूहि ममाऽग्रतः ॥ २ ॥ केन त्वं हि मया प्राप्तस्तपोदानव्रतादिना ॥ अनादि-मध्यनिधनो भर्ता शिव

पार्वतीका प्रश्नको उत्तरमा महादेवले प्रेमपूर्वक पार्वतीलाई कहनुभयो भनी व्यासजीले आफूलाई बताउनुभएको हरितालिकाको महात्म्य; नैमिषारण्य क्षेत्रमा रहने अट्ठासी हजार ऋषिहरूलाई कथा सुनाउँदै आएको सिलसिलामा सम्बोधन गर्दै सूतजीले भन्नुभयो-अत्यन्त राम्रो कैलासको टाकुरामा कुनै दिन शंकरलाई गौरीले विन्ती बिसाउनुभयो–हे महेश्वर ! सबैका लागि धर्मको सिरिखुरी भएको अर्थात् धर्मको 'सर्वस्व-रूप भएको, साथै थोरै मिहिनेतले ठूलो फल मिल्ने गुप्तभन्दा पनि गुप्त आजसम्म कसैले नजानेको अति गुप्त धर्म कहिबक्सियोस् । हे नाथ ! जब मभा प्रसन्न हुनुहुन्छ त मेरा अगाडि वास्तविक साँचो कुरो कहनुहोस् ॥ १-२ ॥ मेरा कुन तपस्या या दान अथवा व्रत नियम इत्यादिले

जगत्प्रभुः ॥ ३ ॥ ईश्वर उवाच ॥ शृणु देवि प्रवक्ष्यामि तवाऽग्रे व्रतमुत्तमम् ॥ यद्गोप्यम्मम सर्वस्वं कथयामि तव प्रिये ॥ ४ ॥ यथा चोडुगणे चन्द्रो ग्रहाणाम्भानुरेव च ॥ वर्णानाञ्च यथा विप्रो देवानाम्विष्णुरुत्तमः ॥ ५ ॥ नदीषु च यथा गङ्गा पुराणानां तु भारतः ॥ वेदानाञ्च यथा साम इन्द्रियाणां मनो यथा ॥ ६ ॥ पुराणवेदसर्व्वस्वं आगमेन यथोदितम् ॥ एकाग्रेण शृणुष्वैतत् यथादृष्टम्पुरातनम् ॥ ७ ॥ येन पुण्यप्रभावेण प्राप्तमर्द्धासनम्मम ॥ सर्वम् तत्कथयिष्येऽहं त्वम्मम प्रेयसी यतः ॥ ८ ॥ भाद्रे मासि सिते पक्षे तृतीया हस्तसोमयुक् ॥ ९ ॥

जगत्का प्रभु, आदि–मध्य - अन्त्य नभएका तपाईंलाई मैले पति पाएँ ? ॥ ३ ॥' गौरीको यस्तो प्रश्न सुनेर महादेवले भन्नुभयो—हे प्रिये ! सुन, तिम्रा साम्नु उत्तम व्रत बताउँछु, जो अति गोप्य छ र मेरो सर्वस्व-रूप छ, त्यस्तो व्रत म तिम्रा लागि प्रकट गरी कहन्छु, हे प्यारी ! ॥ ४ ॥ जस्तो ताराममूहमा चन्द्रमा, ग्रहहरूमा बीच सूर्य, जस्तो चार वर्णहरूका मध्ये ब्राह्मण, द्यौताहरूका मध्यमा विष्णु उत्तम हुनुहुन्छ र ॥ ५ ॥ जस्ती नदीहरूमा गंगाजी, पुराणहरूमा भारत, जस्तो वेदहरूमा सामावेद र जस्तो इन्द्रियहरूमा मन छ ॥ ६ ॥ जस्तो वेदहरूको सर्वस्व-रूप पुराण हो, त्यस्ता शास्त्र-हे ७ कहे–मुताबिकको अति पुरानो, मैले स्वयं देखेको यो व्रत कथा एकाग्र चित्तले सुन ॥ ७ ॥ जुन व्रतका पुण्यक प्रभावले मेरो आधा आसन तिमीले पायौ त्यो सारा रहस्य म कहन्छु किनकि तिमी मेरी अति प्यारी हौ ॥ ८ ॥

तदनुष्ठानमात्रेण सर्व्वपापैः प्रमुच्यते। शृणु देवि त्वया पूर्वं यद्व्रतञ्चरितम्महत् ॥ तत्सर्वं कथयिष्याति यथा वृत्तं हिमाचले ॥ १० ॥ पार्वत्युवाच ॥ कथम्कृतम्मया नाथ व्रतानामुत्तमम् व्रतम् ॥ तत्सर्व्वं श्रोतुमिच्छामि त्वत्सकाशान्महेश्वर ॥ ११ ॥ ईश्वर उवाच ॥ आसीत्तत्र महादिव्यो हिमवान्नग उत्तमः ॥ नाना भूतिसमाकीर्णो नाना द्रुमसमाकुलः ॥ १२ ॥ नाना पक्षिसमायुक्तो नाना मृगविचित्रितः ॥ यत्र देवाः सगन्धर्वाः सिद्धचारणगुह्यकाः ॥ १३ ॥ विवरन्ति यथा देवि गन्धर्वध्वनिसंकुलम् ॥ स्फाटिकैः काञ्चनैः शृंगैर्मणिवैदूर्य-

---

भदौ महीनामा शुक्ल पक्षमा स्हता नक्षण र सोमवारले युक्त भएको जो तृतीया तिथि हुन्छ, त्यसको अनुष्ठान गर्नाले मात्रै पनि मानिस सबै पापबाट छुट्तछ ॥ ९ ॥ हे प्यारी, उहिले तिमीले जुन ठूलो व्रत गरयौ, त्यसबारे हिमालयमा जस्तो घटना घटेको थियो, त्यो सारा कुरो कहन्छु, सुन ॥ १० ॥ तब पार्वतीले भन्नुभयो—हे नाथ स्वामी ! ब्रतहरूमा अति उत्तम व्रत मद्वारा कसरी गरियो ? हे महेश्वर ! त्यो सारा वृत्तान्त तपाईंबाट सुन्न चाहन्छु ॥ ११ ॥ अनि महादेवले भन्नुभयो—अनेक प्रकारका प्राणीहरूले खचाखच भरिएको, थरी-थरीका रूखहरूले ढाकिएको, रङविरङका चाराहरूले रङिएको, किसिम-किसिमका मृगहरूले शोभिएको अति राम्रो यो उत्तमहिमालय पहाड हो। जुन पहाडमा सिद्ध-चारण-गुह्यक र गन्धवसहितका देवताहरू ॥ १२-१३ ॥ हे प्यारी ! गन्धर्वहरूका नाच-गानका ध्वनिले मस्त हुँदै टहल्दछन्, वैदूर्य मणिहरूले सिंगारिएका जहाँका

भूषितैः ॥ १४ ॥ भुजैर्लिखन्निवाकाशं सुहृदो मन्दिरैर्यथा ॥ हिमेन सहितो नित्यं गङ्गाध्वनिनिना
दितः ॥ १५ ॥ पार्वति त्वं तत्र बाल्ये परमञ्चाचरत्तपः ॥ अब्दद्वादशकं देवि धूमपानमधो मुखी ॥१६॥
संवत्सरं चतुष्षष्ठिं पक्वपर्णाशनङ्कृतम् ॥ दृष्ट्वा तातेन तत्कष्टं चिन्तया दुःखितोऽभवत् ॥ १७ ॥
कस्मै देया मया कन्या एवं चिन्तातुरोऽभवत् ॥ तदैवाम्बरतः प्राप्तो ब्रह्मपुत्रस्तु धर्म्मवित् ॥ १८ ॥
नारदो मुनिशार्दूलश्शैलपुत्रीं दिदृक्षया ॥ दत्त्वार्घ्यं विष्टरम्पाद्यं नारदायोक्तवान्गिरः ॥ १९ ॥ शैल
उवाच ॥ किमर्थमागतः स्वामिन् वदस्व मुनिसत्तम ॥ महद्भाग्येन सम्प्राप्तं त्वदागमनमुत्तमम्

स्फटिक र सुनका टाकुराहरूले मानो आफ्ना हातले आकाशमा लेखिरहेका छन् कि जस्तो देखिन्छ, जो द्यौताको मन्दिर मानिएको छ, सधैं हिउँले ढाकिएको छ र गंगा-प्रवाहका ध्वनिले कलकलाइरहेको छ ॥ १४-१५ ॥ यसै हिमालयको कुनै ठाउँमा बालक कालमा तिमीले ठूलो तपस्या गरेकी थियौ, हे प्यारी ! जुन तपस्या गर्दा तिमीले बाह्र वर्षसम्म उँधोमुख गरी धूम्रपान गरिरह्यौ ॥ १६ ॥ चौसट्ठी वर्षसम्म त पाकेका पात-पतिङ्गर मात्र खाने गरयौ । त्यस्तो कष्ट देखेर तब तिम्रा पिता चिन्ताले दुःखी भए ॥ १७ ॥ मैले छोरी कसलाई दिने भन्ने चिन्ताले पिरिएका थिए । त्यसै वेला आकाशमार्गले ब्रह्माका छोरा धर्म जान्ने ॥१८॥ मुनिहरूमा श्रेष्ठ नारदजी पार्वतीलाई हेर्ने इच्छाले उहीं आइपुगे । नारदजीलाई आफ्नै घरमा आएको देखेर स्वागत गर्दै हिमालय पर्वतराजले पाद्य विष्टर अर्घ्य दिएर अर्थात् जहाँको पूजा गरेर भने ॥ १९ ॥ पर्वतराजले भने–हे मालिक ! के कामले पाल्नुभयो ? हे बुद्धिमान्हरूमा श्रेष्ठ नारदजी ! बताइबक्सियोस् । तपाईंको यो उत्तम आगमन

॥ २० ॥ नारद उवाच ॥ शृणु शैलेन्द्र मद्वाक्यं विष्णुना प्रेषितोऽस्म्यहम् । योग्यं योग्याय दातव्यं कन्यारत्नमिदं त्वया ॥ २१ ॥ वासुदेवसमो नास्ति ब्रह्मविष्णुशिवादिषु ॥ तस्मै देया त्वया कन्या अत्रार्थे सम्मतं मम ॥ २२ ॥ गिरिरुवाच ॥ वासुदेवः स्वयं देवः कन्यां प्रार्थयते यदि । तदा मया प्रदातव्या त्वदागमनगौरवात् ॥ २३ ॥ इत्येवं गदितं श्रुत्वा तस्य त्वन्तर्दधे मुनिः । ययौ पीतांबरधरं शङ्खचक्रगदाधरम् ॥ २४ ॥ कृताञ्जलिपुटो भूत्वा मुनीन्द्रस्तमभाषत ॥ नारद उवाच ॥ शृणु देव भवत्कार्य्यं विवाहो निश्चितस्तव ॥ २५ ॥ हिमवाँस्तु तदा गौरीमुवाच

ठूलो भाग्यले प्राप्त भयो ॥ २० ॥ तब नारदजीले भन्नुभयो–हे गिरिराज ! मेरो कुरो सुन्नुहोस्, म विष्णुले पठाइएको हुँ । तपाईंले यो योग्य कन्यारूपी रत्न योग्यलाई नै दिनु योग्य छ ॥ २१ ॥ ब्रह्मा-विष्णु-महादेव आदि समस्त द्यौताहरूमा विष्णु-बराबर कोही छैन । तपाईंले उनैलाई कन्या (छोरी) दिनुपर्छ, यस विषयमा त मेरो पनि राय यही छ ॥ २२ ॥ तब गिरि-राजले भने–यदि स्वयं वासुदेव भगवान् कन्या माँग्नुहुन्छ, त्यसैका लागि तपाईं कन्यार्थी भै आउनुभएको छ त यस खुशि-यालीमा मैले कन्या दिनैपर्छ र दिएँ पनि ॥ २३ ॥ गिरिराजको यस्तो प्रकारको कुरो सुनेर नारद मुनि तुरुन्तै अन्तरधान हुनुभो र शंख चक्र गदा लिने पीताम्बरधारी भगवान्कहाँ पुग्नुभो ॥ २४ ॥ उहाँ पुगेपछि मुनिमा श्रेष्ठ नारदले हात जोडेर विष्णुलाई विन्ती बिसाउनुभयो ॥ नारदले भन्नुभयो—हे भगवान् ! तपाईंको काम सुन्नुहोस्, तपाईंको बिहेको कुरो पक्का भयो ॥२५॥ नारद गएपछि यता गिरिराजले पनि खुशी हुँदै गौरीलाई कुरो भने–हे छोरी ! मद्वारा विष्णु भगवान्लाई

वचनं मुदा ॥ दत्ताऽसि त्वं मया पुत्रि देवाय गरुडध्वजे ॥ २६ ॥ श्रुत्वा वाक्यम्पितुर्देवी सखीभिः सहिता वने ॥ सिंहव्याघ्रमृगैर्व्याप्ते तत्र सुप्ता च निर्जने ॥ १७ ॥ सख्युवाच ॥ किमर्थं दुःखिता देवि कथयस्व ममाग्रतः ॥ यत्ते भवत्यभिहितं करिष्येहं न संशयः ॥ २८ ॥ पार्वत्युवाच ॥ सखि प्रिये शृणुष्वाऽद्य मनोभिलषितम्मम ॥ कपर्दिनञ्च भर्त्तारङ्करिष्येऽहं न संशयः ॥ २९ ॥ एतन्मे चिन्तितं कार्य्यं नातेन कृतमन्यथा ॥ तस्माद्देहपरित्यागं करिष्येऽहं सखिप्रिये ॥ ३० ॥ पार्वत्या वचनं श्रुत्वा सखीवचनमब्रवीत् ॥ पिता यत्र न जानाति गमिष्यामो हि तद्वनम्

तिमी दिइयौ ॥ २६ ॥ बाबुको यस्तो कुरो सुनेर तिमी पार्वती आफ्ना सखीहरूका साथै सिंह-बाघ-मिर्गहरूले छयाप्छयाप्ती भएको निर्जन बनमा पुगी त्यहीं लम्पसार परयौ ॥ २७ ॥ तब कुनै सखीले भनी—हे देवी ! केका लागि दुःखी हुनुभएको हो ? मेरा सामु भन्नुहोस्, जो तपाईंको इच्छा हुन्छ, त्यो म गर्नेछु, यसमा कुनै दुविधा छैन ॥ २८ ॥ अनि पार्वतीले भन्नुभो—हे प्रिय सखी ! तिमी आज मेरो मनको इच्छा सुन—म पक्कै महादेवलाई नै पति गर्नेछु ॥ २९ ॥ भन्ने यो मेरो चिताएको काम बाबाले बिगारिदिनुभयो । त्यसकारण, हे प्रिय सखी ! अब म आत्महत्या गर्दछु ॥ ३० ॥ पार्वतीको यस्तो वचन सुनेर सखीले कुरो भनी—त्यसो भए ! जहाँ बाबाले पत्तै पाउनुहुन्न पक्कै त्यसै बनमा जाऔं

॥३१॥ इत्येवं सम्मतं कृत्वा नीताऽसि त्वम्महद्वनम् ॥ पिता निरीक्षयामास हिमवाँस्तु गृहे गृहे
॥३२॥ केन नीताऽसि मे पुत्रि देवदानवकिन्नरैः । नारदाय कृतं सत्यं किं दास्ये गरुडध्वजम्
॥३३॥ इत्येवञ्चिन्तयाऽऽविष्टो मूर्च्छितो निपपात ह ॥ हाहा कृत्वा प्रधावन्ति लोकास्ते गिरिपुङ्गवम्
॥३४॥ ऊचुर्गिरिवरं सर्व्वे मूर्छाहेतुं गिरे वद ॥ दुःखस्य हेतुं शृणुत कन्यारत्नं हृतम्मम ॥ ३५ ॥
दष्टा वा कालसर्पेण सिंहव्याघ्रेण वा हता । न जाने क्व गता पुत्री केन दुष्टेन वा हता ॥ ३६ ॥
चकम्पे शोकसन्तप्तो वातेनेव महातरुः ॥ गिरिर्विनाद्वनं यातस्तदालोकनकारणात् ॥ ३७ ॥

॥ ३१ ॥ यस किसिमको सल्लाह गरेर तिमी ठूलो वनमा लगियौ । पिता हिमालयचाहिं घर-घरमा खोज्न लागे ॥ ३२ ॥ कतै नपाएर दिक्क भै 'ए मेरी छोरी ! द्यौता या दानव अथवा किन्नर कसले तिमी हरियौ ? नारदलाई सत्यवाचा गरिसकेको छु, अब भगवान् विष्णुलाई के दिने !' ॥३३॥ यसप्रकारको चिन्ताले व्याकुल भएका बिचरा उनी मूर्छा परेर ड्वाङ्ङ पच्छारिए । तब ती देख्ने मानिसहरू हाहाकार कोकोहोलो गर्दै गिरिश्रेष्ठ हिमालयभाठौं पुग्न दौडदा भए ॥ ३४ ॥ उहाँ पुगेर सबैले 'हे गिरिराज ! मूर्छाको कारण कहनुहोस्' भनी हिमालयलाई भने, तब हिमालयले भने—तपाईंहरू मेरो दुःखको कारण सुन्नुहोस्—मेरो कन्यारूपी रत्न हरियो ॥ ३५ ॥ अथवा कालसर्पले ढस्यो, या सिंह बाघले मारयो जान्दिनँ, मेरी छोरी कता गई, अथवा कुनै दुष्टले पो हरयो कि ! ॥ ३६ ॥ भन्दै शोकले सन्तापिएर आँधीले ठूलो रूख झै बिचरा काँपेर छोरीलाई हेर्नका निम्ति सिंह बाघ भालू सर्पहरूले सलबलिएको वनमा यो वनदेखि उ वन, उ वनदेखि

सिंहव्याघ्रैश्च भल्लूकैरहिभिस्सहितम्वनम ॥ त्वं चाऽपि विपिने घोरे व्रजन्ती सखीभिस्सह ॥ ३८ ॥
यत्र दृष्ट्वा नदीं रम्यां तत्तीरे च महागुहाम् । सम्प्रविश्य सखीसार्द्धमन्नभोगविवर्ज्जिता ॥ ३९ ॥
संस्थाप्य बालुकापिण्डम्पार्वत्या सहितम्मम । या तृतीया भाद्रपदे हस्तनक्षत्रसंयुता ॥ ४० ॥
तत्र वादित्रगीतेन रात्रौ जागरणं कृतम् ॥ तेन व्रतप्रभावेण आसनञ्चलितन्मम ॥ ४१ ॥
सम्प्राप्तोऽहं तदा तत्र यत्र त्वं सखीभिः सह ॥ प्रसन्नोऽस्मि मया प्रोक्तम्वरं ब्रूहि वरानने ॥ ४२ ॥
पार्वत्युवाच ॥ यदि देव प्रसन्नोऽसि भर्त्ता भवतु मे हर ॥ तथेत्युक्त्वा तु तां देवींकैलासम्पुनरा-

---

अर्को वन गिरिराज गए, तिमी पनि सखीहरूका साथ घोर जंगलमा जाँदा ॥ ३७-३८ ॥ उहाँ राम्रो नदी र उसैको तीरमा ठूलो गुफा देखेर त्यसै गुफामा पसेर सखीहरूका साथै खान-पान त्यागेकी छँदो ॥ ३९ ॥ भाद्रशुक्लमा हस्त नक्षत्रले युक्त भएको जुन तृतीया तिथि हुन्छ त्यस दिन पार्वतीसहित मेरो वालुकापिण्ड थापेर ॥ ४० ॥ त्यहाँ गानाबजानाले राति जाग्राम गरयौ । त्यसै व्रतका प्रभावले मेरो आसन चलायमान भयो ॥४१॥ तब म जहाँ सखीहरूका साथ तिमी थियौ उहीं पुगेर 'म प्रसन्न छु, हे वरानने ! के वर चाहिन्छ भन' मैले भनें ॥ ४२ ॥ तब पार्वतीले भनिन्—'हे भगवन् ! प्रसन्न हुनुहुन्छ भने हे महादेव ! मेरा भर्ता (पति) हुनुहोस् । तब मैले ती देवीलाई 'ठीक छ' यति भनेर फेरि कैलास आएँ

गतः ॥ ४३ ॥ ततः प्रभाते सम्प्राप्ता नद्यां सर्वं विसर्जितम् ॥ पारणं तु कृतं तत्र सख्या सार्द्धम् त्वया शुभम् ॥ ४४ ॥ हिमवानपि तम् देशमाजगाम धनम् वनम् ॥ चतुराशान्निरीक्षंस्तु विह्वलः पतितः पुनः ॥ ५४ ॥ दृष्ट्वा यत्र नदीतीरे प्रसुप्तं कन्यकाद्वयम् ॥ ४६ ॥ उत्थाप्योत्सङ्गमारोप्य रोदनं कृतवान् गिरिः ॥ सिंहव्याघ्राहिभल्लूकैर्वने दुष्टे कुतः स्थिता ॥ ४७ ॥ पार्वत्युवाच ॥ शृणु तात मया ज्ञातं त्वम् दास्यसीश्वराय माम् ॥ तदन्यथाकृतं तात येनाहम् वनमागता ॥ ४८ ॥ ददासि तात यदि मां गिरिशाय तदा गृहम् ॥ आगमिष्यामि

॥ ४३ ॥ तब विहान भएपछि सब चीज नदीमा विसर्जन गरेर त्यहाँ तिमीले सखीका साथै शुभ पारण गर्दी भयौ ॥ ४४ ॥ गिरिराज हिमालय पनि चारै दिशामा हेर्दै बारम्बार लड्दै-पड्दै विह्वल भएका छँदा घना जंगल भएको त्यसै ठाउँमा आइपुगे ॥४५॥ त्यहाँ नदीका तीरमा सुतेका दुइटी कन्यालाई देखेर उनलाई उठाई काखमा राखेर हिमालय त रुन थाले र ॥४६॥ 'सिंह बाघ भालू आदि दुष्ट जन्तुले डरलाग्दो वनमा कसरी रह्यौ ?' भने ॥ ४७ ॥ तब पार्वतीले भनिन्-हे बाबा ! सुन्नुहोस् ! मैले जानें तपाईं मकन विष्णुलाई दिनुहुन्छ रे ! हे बाबा ! त्यो नचाहिने काम गरियो, त्यसैले म वनमा आएकी हुँ ॥ ४८ ॥ हे बाबा ! मकन यदि महादेवलाई दिनुहुन्छ भने तब त घर आउनेछु, हैन भने निश्चय नै यही

नौवञ्चेदिह स्थास्यादि निश्चतम् ॥ ४९ ॥ तथेत्युक्त्वा हिमवता नीताऽसि त्वं गृहम्प्रति ॥ पश्चाद्दत्ता त्वमस्माकं कृत्वा वैवाहिकीं क्रियाम् ॥ ५० ॥ तेन व्रतप्रभावेण सौभाग्यं साधितं त्वया । अद्याऽपि व्रतराजस्तु न कस्यापि निवेदितः ॥ ५१ ॥ नामास्य व्रतराजस्य शृणु देवि यथाऽभवत् । आलिभिर्हरिता यस्मादतः सा हरितालिका ॥ ५२ ॥ पार्वत्युवाच ॥ नामेदङ्कथितं तस्य विधिम्वद मम प्रभो ॥ किम्पुण्यं किम्फलञ्चाऽस्य केन च क्रियते व्रतम् ॥ ५३ ॥ ईश्वर उवाच । शृणु देवि व्रतम्वक्ष्ये नारीणां व्रतमुत्तमम् ॥ करिष्यसि प्रयत्नेन यदि सौभाग्यमिच्छसि ॥ ५४ ॥ तोरणा-

रहनेछु ॥ ४९ ॥ 'अच्छा हुन्छ' यस्तो भनेर हिमालयले तिमी घर लगियौ र पछि तिमी विवाहका विधि गरेर मलाई दिइयौ ॥५०॥ त्यसै व्रतका प्रभावले तिमीले यो सौभाग्य सिद्ध गऱ्यौ । हे पार्वती ! यो व्रतराज मैले आजसम्म कसैलाई पति बताइएको थिएन ॥५१॥ हे श्रीपती ! यस व्रतराजको नामकरण जसरी भयो त्यो पनि सुन ! यस्मात् = महादेवलाई पूजा-पाउँ भन्ने जुन कारणले, आलिभिः = सखीहरूले, हरिता = लुकाइयौ, तस्मात् = त्यसैकारण गरिएका त्यस दिनका पूजा-आजा व्रत-उपवास गाना-बजानापूर्वकको जागरणले, सा = यो भाद्र शुक्लको तृतीया, हरितालिका = हरितालिका (तीज) नामको भयो ॥ ५२ ॥ तब पार्वतीले भनिन्—हे प्रभु ! त्यसको यो नाम त कहिबक्सियो, अब मलाई त्यस व्रतको विधि पनि बताइवक्सियोस्, यस व्रतको के पुण्य र के फल हो ? कसले यो व्रत गरिन्छ ? ॥ ५३ ॥ अनि महादेवले भन्नुभयो— हे प्रिये ! यस व्रतको बारे म भन्छु सुन ! यो व्रत नारीहरूका लागि अति उत्तम व्रत हो । यदि तिमी पनि सौभाग्य चाहिरहन्छयौ भने परिश्रमपूर्वक यो व्रत गर्नें गरे ॥ ५४ ॥ केराका थामले सजाएको पूजामण्डपलाई तोरणहरूले अलंकृत गर्नू ।

दिप्रकर्तव्यं कदलीस्तम्भ-मण्डितम् ॥ आच्छाद्य पट्टवस्त्रैस्तु नानावर्ण-विचित्रितैः ॥ ५५ ॥ चन्दनेन सुगन्धेन लेपयेद्गृहमण्डलम् ॥ शङ्खभेरीमृदङ्गैश्च कारयेद्बहुनिस्वनैः ॥ ५६ ॥ नाना-मंगलगीतैश्च कर्त्तव्यम्मम सद्मनि । स्थापयेद्वालुकालिंगम्पार्वत्या सहितं मम ॥ ५७ ॥ पूजयेद्बहु-पुष्पैश्च गन्धधूपादिभिर्नवैः ॥ नानाप्रकारैर्नैवेद्यैः पूजयेज्जागरञ्चरेत् ॥ ५८ ॥ नारिकेलैः पुङ्गिफलै-र्जम्बीरैबकुलैस्तथा ॥ वीजपूरैस्सनारंगैः फलैश्चान्यैश्च भूरिशः ॥ ५९ ॥ धूपदीपैगन्धपुष्पै-र्मन्त्रणानेन पूजयेत् ॥ ६० ॥ नमः शिवाय शान्ताय पञ्चवक्त्राय शूलिने ॥ नन्दिभृङ्गिमहाकालगण-

---

मण्डपमा रङविरङका रङले रङिएका लुगाहरूले ढाकेर ॥ ५५ ॥ त्यस पूजामण्डपलाई वास्ना आउने चन्दनले पोत्नू । चर्को आवाज आउने शंख दमाहा मादलहरूले शब्दायमान गराउनू ॥ ५६ ॥ थरी-थरीका मंगलमय गीतहरूले गुञ्जायमान पार्नू र मेरो पूजाका लागि बनाएको पूजामण्डपमा पार्वतीले सहित बालुवाको मेरो मूर्ति थाप्नू र ॥ ५७ ॥ नयाँ-नयाँ धेरै फूलहरूले र चन्दन अक्षता धूप दीपले अनि कैयन् प्रकारका नैवेद्यहरूले पूजा गर्नू, रातभर जाग्राम पनि गर्नू ॥ ५८ ॥ पूजा गर्दा नरिवल-सुपारी-ज्यामीर-मौलसरी-बिमिरो-सुन्तला र अरू-अरू पनि प्रशस्त फलहरूले ॥ ५९ ॥ त्यसपछि त्यस ऋतुमा हुने धेरै प्रकारका कन्द-मूलहरूले अनि चन्दन अक्षता फूल धूप दीप नैवेद्य आदिले पूजा गर्नुपर्छ यस मन्त्रले ॥६०॥ 'नन्दि-भृङ्गि महाकालगणले युक्त ईश्वर ! शान्त त्रिशूली पञ्चास्य शिवलाई नमो नमः ॥ ६१ ॥

युक्ताय शंभवे ॥ ६१ ॥ शिवायै हरकान्तायै प्रकृत्यै सृष्टिहेतवे ॥ शिवायै सर्व्वमांगल्यै शिवरूपे जगन्मये ॥ ६२ ॥ शिवे कल्याणदे नित्यं शिवरूपे नमोऽस्तु ते ॥ शिवरूपे नमस्तुभ्यं शिवायै सततं नमः ॥ ६३ ॥ नमस्ते ब्रह्मरूपिण्यै जगद्धात्र्यै नमो नमः ॥ संसारभयसंतापात्त्राहि मां सिंहवाहिनी ॥ ६४ ॥ येन कामेन देवेशि पूजिताऽसि महेश्वरी ॥ राज्य-सौभाग्य-सम्पत्तिम् देहि मामम्ब पार्वति ॥६५॥ मन्त्रेणाऽनेन देवि त्वां पूजयित्वा मया सह । कथां श्रुत्वा विधानेन दद्यादन्नञ्च भूरिशः ॥६६॥ ब्राह्मणेभ्यो यथाशक्त्या देया वस्त्रहिरण्यगाः ॥ अन्येभ्यो दीयते भूरि स्त्रीणाम् वा भूषणादिकम् ॥६७॥

प्रकृति सृष्टिकी हेतु शिवरूपी जगत्मया । सर्वमङ्गलमांगल्या हरकान्ता शिवा उमा ॥ ६२ ॥ कल्याणदा तिमीलाई नमस्कार छ सर्वदा । शिवरूपे तिमीलाई हमेशै छ नमो नमः ॥६३॥ ब्रह्मरूपे जगद्धात्री ! तिमीलाई नमो नमः । संसारभय-सन्तापदेखिन् हे सिंहवाहिनी ! मलाई त्राहि देवेशी गिरिजाऽम्ब महेश्वरी ! जे इच्छाले पूजियौ द्यौ राज्य सौभाग्य सम्पत्ति ॥ ६४-६५॥' हे प्रिये ! यस मन्त्रले मेरा साथै तिम्रो पूजा गरेर, विधिपूर्वक कथा सुनेर प्रशस्त अन्न दुःखीदाखीलाई दिनू ॥६६॥ ब्राह्मणहरूलाई पनि शक्ति-अनुसार लुगा गहना गाई दिनू । अनि अरू स्त्रीहरूलाई पनि प्रशस्तै लुगाफाटो-गरगहनाहरू दिनुपर्छ र ॥६७॥ शक्तिले भरिएको चित्तले पतिका साथै यो कथा सुनेर पूजाको पूर्ति गर्नू ॥ हे प्रिये ! यो शक्तिशाली

भर्त्रा सह कथां श्रुत्वा भक्तियुक्तेन चेतसा ॥ कृत्वा व्रतेश्वरं देवि सर्वपापैः प्रमुच्यते ॥६८॥ सप्तजन्म भवेद्राज्यं सौभाग्यञ्चैव वर्द्धते ॥ तृतीयायां तु या नारी आहारङ्कुरुते यदि ॥ ६९ ॥ सप्तजन्म भवे-
या० द्वन्ध्या वैधव्यं जन्मजन्मनि । दारिद्र्यं पुत्रशोकञ्च कर्कशादुःखभागिनि ॥७०॥ पच्यते नरके घोरे
८१ नोपवासं करोति या ॥ राजते कांचने ताम्रे वैणवे चाथ मृण्मये ॥७१॥ भाजने विन्यसेदन्नं सवस्त्रफल-
दक्षिणाम । वायनं द्विजवर्य्याय दद्यादन्ते च पारणम् ॥ ७२ ॥ एवं विधिं या कुरुते च नारी त्वया
समाना रमते स्वभर्त्रा ॥ भोगाननेकान् भुवि भुज्यमाना सायुज्यमन्ते लभते नरेण ॥ ७३ ॥

व्रत गरेर नारी सबै पापबाट छुट्तछे ॥ ६८ ॥ एकपल्ट गरेका यस बतले सात जन्मसम्म राज्य अर्थात् ढलिमली भैरहन्छ, सौभाग्य पनि बढ्दछ । यदि भाद्रशुक्ल तृतीयामा कुनै नारी खान्छे भने ॥ ६९ ॥ सात जन्मसम्म बाँझी हुन्छे र जन्म-जन्ममा अर्थात् जन्मैपिन्छे विधवा भैरहन्छे । अथवा दारिद्र्य भैरहन्छ, पुत्रशोक हुन्छ, क्रोधिनी हुन्छे र दुःख भोगिरहनुपर्ने हुन्छ ॥७०॥ जो नारी भाद्र शुक्ल तृतीयामा उपवास गर्दिन त्यो घोर नरकमा पकाइन्छे। चाँदी-सुन-तामा-चित्रा अथवा माटाकै भए पनि ॥७१॥ भाँडामा वस्त्र-फल-दक्षिणासहित अन्न राख्नू र व्रत पारणका लागि त्यो वायन (पूर्णपात्र) अन्न उत्तम ब्राह्मणलाई दिनु ॥७२॥ यस्ता प्रकारले विधिपूर्वक जो नारी व्रत गर्दछे त्यो तिमी जस्तै आफ्ना पतिका साथ रमण गरिरहन्छे र पृथ्वी-तलमा अनेक किसिमका भोग भोग्दै अन्त्यमा पतिका साथै सायुज्य मुक्ति पाउँछे ॥ ७३ ॥ हजारौं अश्वमेध अङ्ग र सयकडौं

अश्वमेधसहस्राणि वाजपेयशतानि च ॥ कथाश्रवणमात्रेण तत्फलम् प्राप्यते नरैः ॥ ७४ ॥ एतत्ते कथितं देवि तवाऽग्रे व्रतमुत्तमम् ॥ कोटियज्ञकृतं पुण्यं यस्याऽनुष्ठानमात्रतः ॥ ७५ ॥

इति भविष्योत्तरपुराणे हरितालिका-व्रतकथा समाप्ता

बाजपेय यज्ञ गर्नाले जो फल मिल्छ त्यो फल केवल हरितालिकाको कथा सुन्नाले मात्रै पनि मानिसहरूले पाइन्छ ॥ ७४ ॥ हे प्रिये ! यो उत्तम व्रतको बारेमा विस्तारपूर्वक तिम्रा अगाडि तिपीलाई कहें, जुन व्रतको अनुष्ठान (व्रत-पूजादि) गर्नाले मात्रै पनि करोडौं यज्ञ गरेको पुण्य प्राप्त हुन्छ ॥ ७५ ॥ भनी महादेवले पार्वतीलाई सुनाएको, व्यासले मलाई बनाएको हरितालिकाको पुण्य कथा हे ऋषीश्वरहो ! मैले तपाईंहरूलाई सुनाएँ भनी सूतजीले नैमिषारण्यक्षेत्रमा रहने अट्ठासी हजार ऋषिहरूलाई कहेको यो कथा हे श्रोताहरूहो ! आफ्नू बुद्धि अनुसार मैले तपाईंहरूका साम्रु विस्तार गरें ॥

इति हरितालिका व्रतकथा समाप्ता

* १२–अथाऽगस्त्यार्घ्यविधिः *

ॐ अत्सत् ३, विष्णुः ३, अद्य ह श्रुतिस्मृतिपुराणोक्तफलप्राप्तिकामनया अगस्तिपूजनपूर्वकाऽगस्त्यार्घ्यदानमहं करिष्ये इति संकल्पः ॥ ततो दीप-कलश-गणेशान्पूजयेत् ॥ आवाहनम् ॥ आगच्छ मुनिशार्दूल तेजोराशे महामुने ॥ इमां मया कृतां पूजां गृहीत्वा मुनिपुङ्गव ॥ भो अगस्त्य इहागच्छेह तिष्ठ यावत्पूजां करोमि तावत्त्वं सुस्थिरो भव सुप्रसन्नो भव, पाद्यादि अगस्तये नमः । इदं-मनुलेपनादि अगस्तये नमः ॥ धूपादि अगस्तये नमः ॥ द्रव्यमगस्तये नमः ॥ पुष्पाञ्जलिः ॥ काश-पुष्पप्रतीकाश अग्निमारुतसंभव ॥ मित्रावरुणयोः पुत्र कुम्भयोने नमोऽस्तु ते ॥ अर्घ्यम् । काश-पुष्पप्रतिकाश वह्निमारुतसम्भव ॥ मित्रावरुणयोः पुत्र कुम्भयोने नमोऽस्तु ते ॥ विन्ध्यवृद्धिक्षयकर मेघतोयविषापह ॥ रत्नवल्लभदेवेश लंकावास नमोऽस्तु ते ॥ वातापी भक्षितो येन समुद्रः शोषितः पुरा ॥ लोपामुद्रापतिः श्रीमान् यो ऽसौ तस्मै नमो नमः ॥ येनोदितेन पापानि विलयं यान्ति व्याधयः । तस्मै नमोऽस्त्वगस्त्याय सशिष्याय च पुत्रिणे ॥ अगस्त्याय नमः नमः इति अगस्त्यायाऽर्घ्यं निवेदयेत् ॥ पुनः राजपुत्रि महाभागे ऋषिपत्नि वरानने ॥ लोपामुद्रे नमस्तु-

भ्यमर्घ्यं मे प्रतिगृह्यताम् ॥ दत्त्वैवमर्घ्यं कौरव्य प्रणिपत्य विसर्जयेत् ॥ इति अर्घ्यं दत्त्वा अञ्जलिं बद्ध्वा—अर्चितस्त्वं यथाशक्त्या नमोऽगस्त्यमहर्षये । ऐहिकाऽमुष्मिकीं दत्त्वा कार्य-सिद्धिं व्रजस्व मे ॥ शोक-सन्ताप-हर्ता च दुःखदारिद्र्यनाशन ॥ इदमर्घ्यं मया दत्तमगस्त्यं प्रणमाम्यहम् ॥

इत्यगस्त्यर्घ्यदानविधिः समाप्तः ॥

* १३–अथ ऋषिपञ्चमी-पूजाविधिः *

ऋषिपञ्चमी–पूजा मध्याह्न–व्यापिनी ग्राह्या। गङ्गायां वा नद्यादौ तडागे गत्वा पूर्वाऽभिमुखी भूत्वा आचारात् अपामार्गकाष्ठेन ३६० दन्तधावनं कुर्यात्। प्रथमतः प्रार्थना। आयुर्बलं यशोवर्चः प्रजापशुवसूनि च। ब्रह्मप्रज्ञां च मेधां च त्वन्नो देहि वनस्पते। इति मन्त्रेण संप्रार्थ्य अनेन मन्त्रेण दन्तधावनम्। मुखदौर्गन्धिनाशाय दन्तानां च विशुद्धये। ष्ठीवनाय च गात्राणां कुर्वेऽहं दन्तधावनम्॥ अनेन मन्त्रेण दन्तान् संशोध्य ३६० मृत्तिकालेपनस्नानादिकं च कृत्वा पञ्चगव्यं प्राश्य पूजां कृत्वा तत्रादौ संकल्पः। आचम्य। ॐ पूर्वसंकल्पसिद्धिरस्तु इति मासपक्ष - वारादीन् उल्लिख्य मम ऋतुसंपर्कजनितदोषपरिहारार्थं दीप - कलश-गणेशपूजनपूर्वकं अरुन्धती - सहित कश्यपादि - सप्तऋषिप्रीत्यर्थं ऋषिपूजनमहं करिष्ये। ततो दीप - कलश - गणेशादीन् संपूज्य अष्टदलं विलिख्य अष्टदलोपरि आवाहनादि क्रमेण पूजयेत्॥ आवाहनम्। आगच्छन्तु महाभागश्चतुर्वेदपरायणाः॥ यावत् पूजामहं कुर्वे कृपया सुस्थिरो भव। ध्यानम्॥ मूर्तिब्रह्मण्यदेवस्य ब्रह्मण्यं तेजमुत्तमम्। सूर्यकोटिप्रतीकाशं

ऋषिवृन्दं विचिन्तये । आसनम् । ऋग्यजुः सामवेदानां स्वरूपेभ्यो नमो नमः । पुराण-
पुरुषेभ्यो हि देवर्षिभ्यो नमो नमः ॥ पाद्यम् । गन्धपुष्पाक्षतैर्युक्तं पाद्यं गृह्णन्तु भो द्विजाः ।
प्रसादं कुरुते प्रीत्या तुष्टाः सन्तु सदा मम ॥ अर्घ्यम् । नमस्ते शुक्लपञ्चम्यामर्चिता
ऋषिसत्तमाः । दहन्तु पापं मे सर्वं गृह्णन्त्वर्घ्यं नमो नमः ॥ आचमनम् ॥ लोकानां तुष्टिकर्तारो
यूयं सर्वे तपोधनाः । नमो वो धर्मविज्ञेभ्यो महर्षिभ्यो नमो नमः । पञ्चामृतम् ॥ पयो दधि घृतं चैव
शर्करामधुसंयुतम् । पंचामृतेन स्नपनं करिष्ये ऋषिसत्तमाः । स्नानम् । मंदाकिन्याः समानीतं
यमुना - गौतमी - जलम् । कृष्णा च नर्मदा तापी ताभ्यः स्नानार्थमर्पितम् ॥ वस्त्रम् ॥ सर्वे नित्यं
तपोनिष्ठा ब्रह्मज्ञाः सत्यवादिनः । वस्त्राणि प्रतिगृह्णन्तु मुक्तिदाः सन्तु मे सदा ॥ यज्ञोपवीतम् । नाना
मन्त्रैः समुद्भूतं त्रिवृत्तं ब्रह्मसूत्रकम् ॥ प्रत्येकं च प्रयच्छामि ऋषयः प्रतिगृह्यताम् । गन्धम् ॥ कुंकुमा-
गरुकर्पूरसुगन्धैर्मिश्रितं शुभम् । गन्धाढ्यञ्चन्दनं दिव्यं गृह्णन्तु ऋषिसत्तमाः ॥ अक्षताः ।
शुभ्राऽक्षताश्च संपूर्णाः प्रक्षाल्य च नियोजिताः ॥ शोभार्थे च मया दत्ताः गृह्यन्तां मुनिसत्तमाः ॥

पुष्पाणि । मालती चंपकादीनि नाना पुष्पाणि वै द्विजाः ॥ मया हृतानि पूजार्थं गृह्णन्तु मुनिपुङ्गवाः ॥
धूपम् । वनस्पतिरसोद्भूतो गन्धाढ्यः सुमनोहरः । आघ्रेयः सर्वदेवानां धूपोऽयं प्रतिगृह्यताम् ॥
दीपम् । आज्यं च वर्तिसंयुक्तं वह्निना योजितं मया । गृह्णन्तु ऋषयः सर्वे दीपोऽयं तिमिरापहः ॥
नैवेद्यम् । नानापक्वान्नसंयुक्तं रसैः षड्भिः समन्वितम् । गृह्णन्तु ऋषयः सर्वे नैवेद्यं सुमनोहरम् ॥
नैवेद्यान्ते जलम् । उत्तरापोशनं हस्त-प्रक्षालनं करोद्वर्तनं च । ॐ सप्तर्षिभ्यो नमः इति
मन्त्रेण दद्यात् ॥ फलम् ॥ नमो वेदविदां श्रेष्ठा ऋषयः सूर्य्यसन्निभाः ॥ गृह्णन्त्विदं फलं तुष्टा मया
दत्तं हि भक्तितः ॥ पूगीफलं ताम्बूलं च । ॐ सप्तऋषिभ्यो नमः इति मन्त्रेण समर्पयेत् ॥ दक्षि-
णाम । हिरण्यगर्भगर्भस्थं हेमबीजं विभावसोः । अनन्त पुण्यफलदमतः शान्तिं प्रयच्छ मे ॥
प्रदक्षिणा । यानि कानि च पापानि ब्रह्महत्यासमानि च । तानि तानि विनश्यन्तु प्रदक्षिण-
पदे पदे ॥ नमस्कारः । नमोऽस्तु ऋषिवृन्देभ्यो देवर्षिभ्यो नमो नमः । सर्वपापहरेभ्यो हि वेद-
विद्भ्यो नमो नमः ॥ प्रार्थना ॥ एते सप्तर्षयः सर्वे भक्त्या संपूजिता मया ॥ सर्वपापं व्यपोहन्तु-

ज्ञानतोऽज्ञानतः कृतम् । वायनम् (पूर्णपात्रम्) वायनं फलसंयुक्तं सघृतं दक्षिणान्वितम् । द्रुजवार्याय दास्यामि व्रतसंपूर्तिहेतवे ॥ ऋषयः प्रतिगृह्णन्तु ज्योतिरूपास्तपोधनाः । उभयोस्तारकाः सन्तु वायनस्य प्रदानतः ॥ विसर्जनम् । न्यूनातिरिक्तकर्माणि मया यानि कृतानि च । क्षमध्वं तानि सर्वाणि यूयं सर्वे तपोधनाः । एवं विधिवत् संपूज्य यथाशक्ति ब्राह्मणान् भक्ष्यभोज्यदक्षिणादिभिः पूजयित्वा कथां श्रुत्वा स्वयमपि हविष्यान्नं भुक्त्वा समापयेत् ॥

॥ इति ऋषिपञ्चमी-पूजाविधिः समाप्तः ॥

—:❀:—

* १४—अथ ऋषिपञ्चमी-व्रतकथा *

युधिष्ठिर उवाच ॥ श्रतानि देवदेवेश व्रतानि सुबहूनि च । साम्प्रतं मेऽन्यदाचक्ष्व व्रतं पापप्रणाशनम् ॥ १ ॥ श्रीकृष्ण उवाच ॥ यथाऽन्यदपि राजेन्द्र ! पञ्चमी ऋषि-संज्ञिता । कथयिष्यामि यत्कृत्वा नारी पापात्प्रमुच्यते ॥ २ ॥ युधिष्ठिर उवाच ॥ कीदृशी पंचमी कृष्ण कथञ्च ऋषिसंज्ञिता ॥ पातकान्मुच्यते कस्मान्नारी यदुकुलोद्भव ॥ ३ ॥ पापानि च बहून्यत्र विद्यन्ते किल केशव ॥ कः पापो नश्यति कृष्ण व्रतानेन हि तद् वद ॥ ४ ॥ श्रीकृष्ण उवाच । अज्ञानात् ज्ञानतो

नैमिषारण्य क्षेत्रमा बस्ता त्यहाँका अट्ठासी हजार ऋषिहरूलाई सम्बोधन गर्दै सूतजीले भन्नुभयो—हे ऋषीश्वर हो ! कुनै समयमा युधिष्ठिरले धार्मिक कथाहरू सुन्न खोज्दा उहाँलाई श्रीकृष्णले बताउनुभएको भनी मलाई व्यासले सुनाउनुभएको कथा कहन्छु, सुन्नुहोस्—युधिष्ठिरले भन्नुभयो—हे द्यौताका पनि द्यौताका अधिपति ! व्रतबारेका धेरै नै कथाहरू सुनिसकें । तैपनि फेरि यतिखेर पाप नाश गर्नें व्रतकथा मलाई अझै सुनाइबक्सियोस् ॥ १ ॥ भन्दा श्रीकृष्णले भन्नुभयो—हे राजेन्द्र ! अब म अर्को पनि कथा भन्दछु—ऋषि नाम हुने पञ्चमी छ, जुन ऋषिपञ्चमीको व्रत गर्नाले नारी पापबाट छुट्तछे ॥२॥ फेरि युधिष्ठिरले भन्नुभयो—हे कृष्ण ! त्यो कस्ती पञ्चमी हो ? कसरी त्यसको नाम ऋषिपञ्चमी भयो ? यदुकुलमा पैदा हुनुभएका हे भगवन् ! त्यसको व्रत गर्नाले नारी कुन पापबाट छुट्तछे ॥ ३ ॥ हे केशव ! पाप पनि त यस संसारमा धेरै नै छन् ? हे कृष्ण, त्यस व्रतले कुन पाप छुट्छ ? ॥ ४ ॥ तब श्रीकृष्णले भन्नुभयो—जो नारी रजोवती भएर

वाऽपि नारी जाता रजस्वला ॥ दुष्टा स्पृशति भाण्डानि गृहकर्म्माणि संस्थिता ॥ ५ ॥ प्राप्नोति सा महापापं सर्वनारी रजस्वला ॥ शृणुष्व कारणं यस्मात् वर्जनीया रजस्वला ॥ ६ ॥ प्रोत्सार्या गृहतश्चाऽपि चातुर्वर्णेन भारत ॥ ७ ॥ ब्रह्महत्या पुरा शक्रो वृत्रं हत्वा स प्राप्तवान् ॥ तया वै राजशार्दूल ! व्रीडितो वृत्रसूदनः ॥ ८ ॥ ब्रह्माणं समुपागच्छदात्मनश्शुद्धिकारणात् ॥ शुद्धिं शक्रस्य राजन्द्र ! प्रहृष्टेनान्तरात्मना ॥ ९ ॥ विभज्य ब्रह्महत्यां तु चतुर्धा तु चतुर्मुखः ॥ प्राक्षिपद्राजशार्दूल ! चतस्स्थानेषु वै तदा ॥ १० ॥ वह्नेः प्रथमजातासु ज्वालासु च नदीषु च ॥ पर्वतेषु

नियमपुर्वक दुःखले रहँदा नजानेर अथवा जानी-जानी घरका काममा रत रहेर भाँडाकुँडा छुन्छे भने ॥ ५ ॥ त्यो रजोवती नारीले सारा महापाप पाउँछे, अर्थात् उसलाई सबै ठुला पाप लाग्छ । जुन कारणले रजस्वला नारी त्यागिने हो त्यो कारण सुन ॥६॥ हे महाराज ! चारै वर्णले घरैबाट पनि अलग्गै रहनु योग्य छ ॥ ७ ॥ उहिले कुनै समयमा इन्द्रले वृत्रासुरलाई मारेर ब्रह्महत्या पाएका थिए, यानी उनलाई ब्रह्महत्याको पापले पिरेको थियो, हे राजसिंह, त्यसै हत्याले लजाएका वृत्रासुर मारा इन्द्र ॥८॥ आफ्नु शुद्धिका लागि ब्रह्माभाठौं गए ॥ हे राजेन्द्र ! दिलैदेखि खुशी भएर इन्द्रको शुद्धिका लागि ॥९॥ चतुर्मुख ब्रह्माले पनि ब्रह्महत्यालाई चार किसिमको भाग लाएर हे राजशार्दल ! त्यसै बेला नै चार स्थानमा पयाँकिदिए ॥ १० ॥ आगोको पहिलो बलेको ज्वालामा, पहिले बाढी आएको खोलामा, अनि हे राजेन्द्र ! पहाडमा र हे नृपति !

च राजेन्द्र नारी रजसि पार्थिव ॥ ११ ॥ अतो रजस्वला नारी प्रोत्सार्य्या च प्रयत्नतः ॥ ब्राह्मण-
श्शासनात्पार्थ चातुर्वर्णेन सर्वदा ॥ १२ ॥ प्रथमेऽहनि चाण्डाली द्वितीये ब्रह्मघातिनी ॥ तृतीये
रजकी प्रोक्ता चतुर्थेऽहनि शुद्ध्यति ॥ १३ ॥ अज्ञानाद् ज्ञानतो वाऽपि जातसंसर्गपातकम् ॥
तत्पापसंक्षयार्थं हि कार्येयं ऋषिपंचमी ॥ १४ ॥ सर्वपापप्रशमनी सर्वोपद्रवनाशिनी ॥
ब्रह्मक्षत्रियविट् शूद्रस्त्रीभिः कार्या विशेषतः ॥ १५ ॥ श्रीकृष्ण उवाच ॥ अथान्यदपि
राजन्द्र प्रवक्ष्यामि कथानकम्। पुरा कृतयुगे राजन्! विदर्भायां बभूव ह ॥ १६ ॥ श्यनजि-

---

तब नारीको मासिक रगतमा ॥ ११ ॥ यसैकारण हे राजन्! ब्रह्माको आज्ञाले चारै वर्णले सधैं पटकैपिच्छे रजोवती नारीलाई सावधानीसाथ पर पन्साउनुपर्छ ॥ १२ ॥ रजोवती हुँदा पहिलो दिनमा चाण्डाली, दोस्रो दिनमा ब्रह्मघातिनी, तेस्रो दिनमा धोबिनी कहिन्छे र चौथो दिन शुद्ध हुन्छे ॥ १३ ॥ त्यस तीन दिनमा जानेर होस् या नजानेर छातछुत-नाट भएको पाप लाग्छ नै! त्यसै पापको नाशका लागि यो ऋषिपञ्चमी व्रत गर्नुपर्छ ॥ १४ ॥ सारा पाप सखाप पार्नें, सम्पूर्ण उपद्रो नाश्ने यो ऋषिपञ्चमी व्रत,—ब्रह्मण क्षत्रिय-वैश्य शूद्रजातिका स्त्रीहरूले विशेषरूपले गर्नुपर्छ ॥ १५ ॥ फेरि श्रीकृष्णले भन्नुभयो—हे राजेन्द्र! अब यस विषयमा अर्कों पनि कथानक भन्दछु—हे राजन्, उहिले सत्ययुगमा विदर्भ देशमा चारै वर्णलाई राम्रोसित पालना गर्नें श्येनजित नामका राजर्षि थिए। तिनका देशमा त्यतिखेर वेद-वेदांगमा पारंगत

नाम राजर्षिर्चातुर्वर्णानुपालकः । तस्य देशे वसद्विप्रो वेदवेदाङ्गपारगः ॥ १७ ॥ सुमित्रो नाम राजेन्द्र सर्वभूतहिते रतः । कृषिवृत्या समासीनः कुटुम्बपरिपालकः ॥ १८ ॥ तस्य भार्य्या सुसाध्वी च पतिशुश्रूषणे रता । जयश्री नाम विख्याता बहुभृत्यसुहृज्जना ॥ १९ ॥ क्षेत्रादिषु रता साध्वी व्याकुलीकृतमानसा । एकदा स्वात्मनः प्राप्तमृतुकालं व्यलोकयत् ॥ २० ॥ रजस्वलाऽपि सा राजन् ! गृहकर्म चकार ह ॥ भाण्डानि साऽस्पृशद्राजन् ! ऋतौ प्राप्तेऽपि भामिनी ॥ २१ ॥ कालेन बहुना साध्वी पञ्चत्वमगमत्तदा । तस्य भर्ताऽपि विप्रोऽसौ कालधर्ममपेयिवान् ॥ २२ ॥

भएका कुनै बाहुन बस्तथे ॥१६-१७॥ हे राजेन्द्र ! उनको नाम सुमित्र थियो, उनी समस्त प्राणीको भलाइमा रत रहन्थे । उनी कृषिवृत्ति अर्थात् खेतीको कामले जहान बच्चालाई भरण-पोषण गरेर रहने गर्थे ॥ १८ ॥ पतिको सेवामा लागिपरेकी, धेरै नोकर-चाकर मित्रजन भएकी उनकी पतिव्रता पत्नी 'जयश्री' नामले प्रसिद्ध थिइन् ॥१९॥ सीधीसाधी उनी चटारिएको मनवाली भएर खेतीपातीका काममा नै लागिरहन्थिन्, यस्तै चटारोमा एक दिन उनले आफू नछुने भएको देखिन् ॥ २० ॥ हे राजन् ! परमरेकी पनि उनले त्यस वेला घरको काम गर्दा भइन् । हे राजन् ! नछुने भएको वेलामा पनि ती सती स्त्रीले घरका भाँडाकुँडा छातछुत गरिन् ॥ २१ ॥ तब धेरै समयपछि ती पतिव्रता मरिन् । उनका पति ती ब्राह्मण पनि कालको धर्ममा प्राप्त भए अर्थात् मरे ॥ २२ ॥ यस्ता प्रकारले तब ती दुवै पति-पत्नि हे राजन् ! आफ्ना कर्मका अधीन हुन गए ।

एवं तौ दम्पती राजन् ! स्वकर्मवशगौ तदा ॥ भार्या तस्य जयश्रीः सा साक्षात्सम्पर्कदोषतः ॥२३॥
शुनीयोनिमनुप्राप्ता सुमित्रोऽपि नरेश्वर ॥ तस्यास्सम्पर्कदोषेण बलीबर्दो बभूव सः ॥ २४ ॥
तद्दोषेण महाराज दुर्गतिं तौ गतौ तदा ॥ सुमित्रस्य च पुत्रोऽभूत्पितृशुश्रूषणे रतः ॥ २५ ॥ सुमति-
नाम धर्मज्ञो देवताऽतिथिपूजकः ॥ तस्य तौ पितरौ पार्थ ऋतुसंपर्कदोषतः ॥ २६ ॥ तिर्यग्योनिमनु
प्राप्तावुभौ जातिस्मरौ नृप ॥ उच्छिष्टभोजिनी साऽभूत्स्मरन्तौ पूर्वपातकम् ॥२७॥ सुमित्रोऽपि पिता
तस्य बलीबर्दो बभूव ह । अथ क्षयाहे सम्प्राप्ते पितृशुश्रूषणे रतः ॥ २८ ॥ भार्य्यां चन्द्रावतीं प्राह

ती ब्राह्मणकी जयश्री नामकी ती पत्नीले जानी-जानी गरेका छुवछुतका दोषले ॥ २३ ॥ आफ्नै घरमा कुकुर्नीको जन्म पाइन, हे नरेश्वर ! युधिष्ठिर ! ती सुमित्र ब्राह्मण पनि जयश्रीको छुवाछुतको दोषले गर्दा उहीं गोरु हुँदा भये ॥ २४ ॥ हे महाराज ! रजस्वला हुँदा गरेका लाटलुटका दोषले त्यसरी ती दुवै पति-पत्नी दुर्गतिमा प्राप्त भए । सुमित्रको छोरो भने बाबु आमाको सेवामा रत ॥ २५ ॥ देवता र अतिथिहरूको पूजा सेवा गर्ने, धर्म जान्ने सुमति नामका थिए । हे राजन ! त्यसका ती दुवै मात-पिता नछुने भएका वेलामा गरेका छुवाछुतका दोषले ॥ २६ ॥ पशुको जन्म पाए पनि दुवैलाई जातिस्मरण अर्थात् पूर्वजन्ममा हामी यस्ता थियौं भन्ने संझना थियो । पूर्वजन्मको पाप सजिने त्यो कुकुर्नी पनि जूठो खाएर रहने भई ॥२७॥ त्यो सुमतिको बाबु सुमित्र पनि जोत्ने गोरु भएको थियो । यस्तै प्रकारले रहँदा वस्ता बाबुको श्राद्धको दिन आएपछि बाबुको सेवामा रत रहने ॥ २८ ॥ श्रद्धालु सुमतिले आफ्नी पत्नी चन्द्रावतीलाई भन्यो–हे राम्रो मुस्कुराइवाल सुन्दरी !

न्नाम राजर्षिर्चातुर्वर्णानुपालकः । तस्य देशे वसद्विप्रो वेदवेदाङ्गपारगः ॥ १७ ॥ सुमित्रो नाम राजेन्द्र सर्वभूतहिते रतः । कृषिवृत्या समासीनः कुटुम्बपरिपालकः ॥ १८ ॥ तस्य भार्य्या सुसाध्वी च पतिशुश्रूषणे रता । जयश्री नाम विख्याता बहुभृत्यसुहृज्जना ॥ १९ ॥ क्षेत्रादिषु रता साध्वी व्याकुलीकृतमानसा । एकदा स्वात्मनः प्राप्तमृतुकालं व्यलोकयत् ॥ २० ॥ रजस्वलाऽपि सा राजन् ! गृहकर्म चकार ह ॥ भाण्डानि साऽस्पृशद्राजन् ! ऋतौ प्राप्तेऽपि भामिनी ॥ २१ ॥ कालेन बहुना साध्वी पञ्चत्वमगमत्तदा । तस्य भर्ताऽपि विप्रोऽसौ कालधर्ममपेयिवान् ॥ २२ ॥

भएका कुनै बाहुन बस्तथे ॥१६-१७॥ हे राजेन्द्र ! उनको नाम सुमित्र थियो, उनी समस्त प्राणीको भलाइमा रत रहन्थे । उनी कृषिवृत्ति अर्थात् खेतीको कामले जहान बच्चालाई भरण-पोषण गरेर रहने गर्थे ॥ १८ ॥ पतिको सेवामा लागिपरेकी, धेरै नोकर-चाकर मित्रजन भएकी उनकी पतिव्रता पत्नी 'जयश्री' नामले प्रसिद्ध थिइन् ॥१९॥ सीधीसाधी उनी चटारिएको मनवाली भएर खेतीपातीका काममा नै लागिरहन्थिन् , यस्तै चंटारोमा एक दिन उनले आफू नछुने भएको देखिन् ॥ २० ॥ हे राजन् ! परमरेकी पनि उनले त्यस वेला घरको काम गर्दा भइन् । हे राजन् ! नछुने भएको वेलामा पनि ती सती स्त्रीले घरका भाँडाकुँडा छातछुत गरिन् ॥ २१ ॥ तब धेरै समयपछि ती पतिव्रता मरिन् । उनका पति ती ब्राह्मण पनि कालको धर्ममा प्राप्त भए अर्थात् मरे ॥ २२ ॥ यस्ता प्रकारले तब ती दुवै पति-पत्नि हे राजन् ! आफ्ना कर्मका अधीन हुन गए ।

एवं तौ दम्पती राजन् ! स्वकर्मवशगौ तदा ॥ भार्या तस्य जयश्रीः सा साक्षात्सम्पर्कदोषतः ॥२३॥
शुनीयोनिमनुप्राप्ता सुमित्रोऽपि नरेश्वर ॥ तस्यास्सम्पर्कदोषेण बलीबर्दो बभूव सः ॥ २४ ॥
तद्दोषेण महाराज दुर्गतिं तौ गतौ तदा ॥ सुमित्रस्य च पुत्रोऽभूत्पितृशुश्रूषणे रतः ॥ २५ ॥ सुमति-
र्नाम धर्मज्ञो देवताऽतिथिपूजकः ॥ तस्य तौ पितरौ पार्थ ऋतुसंपर्कदोषतः ॥ २६ ॥ तिर्यग्योनिमनु
प्राप्तावुभौ जातिस्मरौ नृप ॥ उच्छिष्टभोजिनी साऽभूत्स्मरन्तौ पूर्वपातकम् ॥२७॥ सुमित्रोऽपि पिता
तस्य वलीबर्दो बभूव ह । अथ क्षयाहे सम्प्राप्ते पितृशुश्रूषणे रतः ॥ २८ ॥ भार्य्यां चन्द्रावतीं प्राह

ती ब्राह्मणकी जयश्री नामकी ती पत्नीले जानी-जानी गरेका छुवछुतका दोषले ॥ २३ ॥ आफ्नै घरमा कुकुर्नीको जन्म पाइन, हे नरेश्वर ! युधिष्ठिर ! ती सुमित्र ब्राह्मण पनि जयश्रीको छुवाछुतको दोषले गर्दा उहीं गोरु हुँदा भये ॥ २४ ॥ हे महाराज ! रजस्वला हुँदा गरेका लाटलुटका दोषले त्यसरी ती दुवै पति-पत्नी दुर्गतिमा प्राप्त भए । सुमित्रको छोरो भने बाबु आमाको सेवामा रत ॥ २५ ॥ देवता र अतिथिहरूको पूजा सेवा गर्ने, धर्म जान्ने सुमति नामका थिए । हे राजन ! त्यसका ती दुवै मात-पिता नछुने भएका वेलामा गरेका छुवाछुतका दोषले ॥ २६ ॥ पशुको जन्म पाए पनि दुवैलाई जातिस्मरण अर्थात् पूर्वजन्ममा हामी यस्ता थियौं भन्ने संझना थियो । पूर्वजन्मको पाप सजिने त्यो कुकुर्नी पनि जूठो खाएर रहने भई ॥२७॥ त्यो सुमतिको बाबु सुमित्र पनि जोत्ने गोरु भएको थियो । यस्तै प्रकारले रहँदा वस्ता बाबुको श्राद्धको दिन आएपछि बाबुको सेवामा रत रहने ॥ २८ ॥ श्रद्धालु सुमतिले आफ्नो पत्नी चन्द्रावतीलाई भन्यो–हे राम्रो मुस्कुराइवाल सुन्दरी !

सुमतिः श्रद्धयाऽन्वितः । अद्य संवत्सरदिनं पितुर्मे चारुहासिनि ॥ २९ ॥ भोजनीया मया विप्राः पाकशुद्धिर्विधीयताम् ॥ तथा कृता पाकशुद्धिस्सुमतेर्भर्तुसङ्गका ॥ ३० ॥ मुक्तं पयसि भाण्डेऽस्यास्सर्पेण गरलन्ततः । दृष्ट्वा ब्रह्मवधाद्भीता शुनी भाण्डानि साऽस्पृशत् ॥३१॥ द्विजभार्या च तां दृष्ट्वा उल्मुकेन जघान ताम् । भोजिता ब्राह्मणास्तत्र श्राद्धं कृत्वा प्रयत्नतः ॥ ३२ ॥ ततो भुक्तेषु चोच्छिष्टं कोपेन न ददौ बहिः । द्वारस्थायास्तदाशून्या उपवासं तदाऽभत् ॥ ३३ ॥ ततो रात्र्यां प्रवृत्तायां सा शुनी क्षुधिता नृप ॥ वलीवर्दमुपागत्य भर्त्तारमिदमब्रवीत् ॥ ३४ ॥ बुभुक्षिताऽद्य-

आज मेरा पिताको एकोद्दिष्ट श्राद्धको दिन हो ॥२९॥ मैले ब्राह्मणहरूलाई भोजन गराउनुपर्छ, त्यसकारण थरी-थरीका खाने चोज बनाऊ । पति सुमतिको आज्ञाले चन्द्रावतीले पनि भनेमुताबिक तरह-तरहका खानेकुरा तैयार गरिन् ॥ ३० ॥ चन्द्रावती काममा अलमलिएको वेलामा उनका खीरको भाँडामा सर्पले विष उकेलिदियो, त्यो देखेर खीर खाने ब्राह्मण मर्लान् भनी डराएकी त्यस कुकुर्नीले भोजन राखेका भाँडाहरू छोइदी ॥३१॥ ब्राह्मण-पत्नी चन्द्रावतीले त्यो छोएको देखेर उस कुकुर्नीलाई अगुल्टाले हिर्काइन् र फेरि उहाँ हतार-हतार आफैं भोजन तयारी पारी श्राद्ध गरेर ब्रह्मणहरूलाई खुवाइन् ॥ ३२ ॥ तब सबैले खाइसकेपछि रिसले गर्दा बाहिर दैलामा रहेकी कुकुर्नीलाई चन्द्रावतीले जूठोसम्म पनि दिइनन् । त्यसकारण त्यस दिन बिचरी कुकुर्नीको उपवास नै भयो ॥ ३३ ॥ तब रात परेपछि हे राजन् ! भोकाएकी त्यो कुकुर्नी लोग्ने गोरुभाठौं गएर यो कुरो भनी ॥ ३४ ॥ हे नाथ ! आज म भोकै छु, मलाई खान

नाथाऽहं न दत्तं भोजनं तु मे ॥ ग्रासादिकञ्च न लभेत् क्षुधा मां बाधते बलात् ॥३५॥ अन्यस्मिन्दिवसे पुत्रो मम लेह्यं ददात्यसौ । अद्य मह्यं किमप्येष उच्छिष्टमपि नो ददौ ॥ ३६ ॥ पायसाऽन्ने पपाताद्य गरलं सर्पसंभवम् । मया विचिन्त्य मनसा मरिष्यन्ति द्विजोत्तमाः ॥ ३७ ॥ संस्पृष्टं पायसं रोषाद्वद्ध्वाऽहं ताडिता भृशम् ॥ दुखितं तेन गात्रम्मे कटिर्भग्ना करोति किम् ॥ ३८ ॥ वलीवर्द उवाच ॥ ततः प्राह स वै भर्ता भद्रे ! तत्पापग्रहात् । किं करोमि ह्यशक्तस्तु भारवाहत्वमागतः ॥ ३९ ॥ अद्याहमात्मजक्षेत्रे वाहितस्सकलं दिनम् । मारितश्चात्मजेनाऽहं मुखं बद्ध्वा बुभुक्षितः ॥ ४० ॥ दम्पतीभ्यां हि पितरौ पीडितौ पापकर्मणा । वृथा श्राद्धं कृतं तेन जाताद्य

दिइएन । पूरा एक गाँस पनि पाइएन, मलाई भोकले असाध्यै काउँ-काउँ पारेको छ ॥ ३५ ॥ अरू दिन त यो छोरो मलाई टपरी पतरी चटनसम्म दिन्थ्यो, आज त उसले मलाई अलिकति जूठोसम्म पनि दिएन ॥ ३६ ॥ आज खीरको भाँडामा सर्पको विष परेको थियो, खान बोलाइएका विद्वान् ब्राह्मणहरू त्यो खीर खाएर मर्लान् भन्ने मनले सोचेर मैले खीर छोहदिएँ, त्यसै रिसले बुहारीले मलाई बेसरी हिर्काई। त्यसै पिटाइले मेरो जीउ दुखेको छ, कमर पनि भाँचियो, के गरूँ ! ॥ ३७-३८ ॥ गोरुले भन्यो—तब त्यो लोग्ने गोरुले भन्यो--हे कल्याणि, त्यो सब पापको बटुलाइले भएको हो, के गरूँ, म पनि अशक्त छु, भारी बोक्ने गर्दछु ॥ ३९ ॥ आज मैले दिनभर छोराको खेतमा जोतिनुपर्‍यो । भोको मलाई छोराले मोहलाले मुख बाँधेर पिट्यो पनि ॥ ४० ॥ दुवै पति

मम कष्टता ॥ ४१ ॥ श्रीकृष्ण उवाच ॥ तयोस्संवदतो रेवं मातापित्रोश्च भारत ! श्रुत्वा पुत्रस्तदा वाक्यं यदुक्तं च तदोभयोः ॥ ४२ ॥ ततो रजन्यां तत्काले ददौ तस्यैव भोजनम् ॥ पितरौ तौ विदित्वा तु दत्तवान्सुमतिस्तदा ॥ ४३ ॥ तदाऽसौ दुःखितः पुत्रो ज्ञात्वाऽवस्थां तदा तयोः । मातापित्रोस्तु राजेन्द्र ! तदाऽसौ प्रस्थितो वनम् ॥ ४४ ॥ ज्ञातुमिच्छामि कष्टञ्च मातापित्रोस्तु भारत । तत्र गत्वा ज्ञानवृद्धान् ऋषीन् सप्त वनाश्रितान् ॥ ४५ ॥ प्रणिपत्याऽब्रवीद्वाक्यं हितञ्चैव तदा तयोः । सुमतिरुवाच । कथयध्वं ऋषे तर्व प्रश्नमेतं समाहिताः ॥ ४६ ॥ केन कर्मविपाकेन

पत्नीले पापकर्मले बाबु-आमालाई पीड़ा दिए । त्यसले श्राद्ध गरेको पनि वेकार छ, आज मलाइ कष्ट भैरहेंकोछ ॥४१॥ फेरि श्रीकृष्णले भन्नुभयो—हे राजन् ! यस्ता प्रकारले त्यस वेला परस्परमा कुरा गर्ने ती दुइ आमा-बाबुले जो कुरो भनियो त्यो सब छोराले सुने र ॥४२॥ तब सुमतिले ती दुवैलाइ आमा-बाबु पो रहेछन् भन्ने जानेर अनि त तुरुन्तै रात्रिमै भोजन तयार पारेर ती दुवैलाइ खान दिये ॥ २३ ॥ तब ती दुइ आमा बाबुको त्यस्तो अवस्थालाइ जानेर दुःखी भयेको छोरो त्यो सुमति हे राजेन्द्र ! उत्ति नै खेरि कुन पापले कष्ट भयो ! जान्न चाहन्छु भनी वनतिर प्रस्थान गऱ्यो । वनमा गयेर ज्ञानले बूढ़ा भयेका अर्थात् असाध्यै जान्ने वनवासी सातोटा ऋषिलाइ ॥४४-४५॥ साष्टाङ्ग दण्डवत् प्रणाम गरेर तब ती दुइ आमा-बाबुको कल्याणका लागि कुरो बोले । सुमतिले भने—हे शान्त चित्त भयेका ऋषीश्वरहो ! यो प्रश्नको उत्तर कहिबक्सियोस ॥ ४६ ॥ तपस्या नै धन हुने महाशयहो ! कुन कर्मका फलले मेरा आमा-बाबु यस्तो अवस्थामा प्राप्त भये ? त्यस पाप-

पितारौ मे तपोधनाः। इमामवस्थां संप्राप्ता मोक्षेते पातकात् कथम् ॥ ४७ ॥ ऋषय ऊचुः।
तव माता पुरा विप्र स्वगृहे बालभावतः ॥ प्राप्तं ऋतुं विदित्वा तु सम्पर्कमकरोद्द्विज ॥ ४८ ॥
तेन कर्मविपाकेन शुनीयोनिमुपागता । पिताऽस्य स्पर्शशोषेण वलीबर्दौ वभूव ह ॥ ४९ ॥
एतयोर्मुक्तिकामार्थं कुरु त्वं ऋषिपञ्चमी ॥ भार्यया सह विप्रेन्द्र ऋषीन् संपूज्य यत्नतः
॥ ५० ॥ आचरस्व व्रतं तत्र सप्तवर्षं द्विजोत्तम । अन्ते चोद्यापनं कुर्याद्वित्तशाठ्यविवर्जितः
॥ ५१ ॥ शाकाहारस्तु कर्तव्यः श्यामकाहार एव वा ॥ नीवारैर्वापि कर्तव्यं कृष्टपच्यं न भक्षयेत्
॥ ५२ ॥ प्राप्य भाद्रपदे मापि शुक्लपक्षेऽथ पंचमी । तस्यां मध्याह्नसमये नद्यादौ विमले जले

वा० १०५ ऋ.क०

बाट कसरी मुक्त हुन्छन् ? ॥ ४७ ॥ तब ऋषिहरूले भने—हे ब्राह्मण ! पहिलो जन्ममा तिम्री आमाले नछुने भएको जानी-जानीकन पनि मूर्खताले अपनू घरमा हे ब्राह्मणजी ! छातछुत गर्दी भइन् ॥४८॥ त्यसै पापका फलले यस जन्ममा कुकुर्नीको जन्म पाएकी हुन्। तिम्रा बाबुचाहिं रजस्वला लाई छोएका दोषले गोरु हुँदा भए ॥४९॥ यी दुवैको मुक्तिका लागि तिमा ऋषिपञ्चमीको व्रत गर। त्यस दिन हे श्रेष्ठ ब्राह्मण ! पत्नीका साथै मिहिनेतसाथ ऋषिहरूबाई पूजा गरेर ॥५०॥ हे उत्तम ब्राह्मण ! त्यस ऋषिपञ्चमीमा सात वर्ष व्रतगर्नें गर र आखिरमा कञ्जूस्याइँ नगरीकन उद्यापन गर्नू ॥५१॥ त्यस दिन एकसुइरे सागको मात्र भोजन गर्नुपर्छ, अथवा सामाका चामलको भोजन गर्नू अथवा आफै उम्रेका जंगली धानको चामल तिन्नीको भोजन गर्नुपर्छ, कुनै हालतमा पनि खनजोत गरी रोपी उमारी फलाइएको अन्न नखानू ॥५२॥ भाद्रमहीनाको शुक्लपक्षको पञ्चमी तिथि प्राप्त भएपछि त्यस पञ्चमीमा मध्याह्न समयमा नदी या तलाउ पोखरी आदिमा सफा पानीमा

॥ ५३ ॥ कृत्वाऽपामार्गवृक्षेण दन्तधावनमादितः ॥ आयुर्बलं यशोवर्चः प्रजाः पशुवसूनि च । ब्रह्मप्रज्ञां च मेधाञ्च त्वन्नो देहि वनस्पते ॥५४॥ संप्रार्थ्याऽनेन मंत्रेण कुर्याद्वै दन्तधावनम् ॥ मुख-दुर्गन्धिनाशाय रदनानां विशुद्धये ॥ ष्ठीवनाय च गात्राणां कुर्वेऽहं दन्तधावनम् ॥ ५५ ॥ अनेन दन्तान्संशोध्य स्नायात् सृत्स्नानपूर्वकम् । तिलामलककल्केन केशान् संशोध्य यत्नतः ॥ ५६ ॥ परिधाय नवे शुद्धे वाससी सुसमाहितः ॥ पूजयस्व ऋषीन्दिव्यानरुन्धत्या समन्वितान् ॥ ५७ ॥ कश्यपोऽत्रिर्भरद्वाजो विश्वामित्रोऽथ गौतमः ॥ जमदग्निर्वशिष्ठाश्च साध्वी चैवाप्यरुन्धती ॥ ५८ ॥ मन्त्रेणाऽनेन सप्तर्षीन्पूजयेत्सुसमाहितः । व्रतेन ऋषिपञ्चम्याः कृतेनैव द्विजोत्तम ॥ ५९ ॥ ऋतु-

---

पुगेर ॥ ५३ ॥ पहिले अपामार्गका डाँठले दतिवन गर्दा बल कीर्ति आयु तेज धन सन्तान वस्तु र प्रज्ञ बुद्धि तिमी हामी लाई द्यौ हे वनस्पते !' ॥ ५४ ॥ यस मन्त्रले दतिवनको प्रार्थना गरेर अनि दतिवन गर्नू । दाँत माझ्दा-बेसरी दाँत माझेर मुख-दुर्गन्ध नाशन । खकार पयाक्न देहैको म गर्छू तन्तधावन ॥' ॥ ५५ ॥ यो मन्त्र पढ्दै दाँत माझेर पहिले माटो मोली न्वाहुनु अनि तिल र अमलाको पिनाले खवसित केश न्वाहेर ॥ ५६ ॥ नयाँ शुद्ध दुइ वस्त्र (कम्मरमुनि र कम्मरमाथि) पहिरेर बड़ो सावधानीपूर्वक अरुन्धतीले सहित भएका दिव्य सात ऋषिहरूलाई पूजा गरे ॥५७॥ 'काश्यप-अत्रि-भरद्वाज-विश्ववा-मित्र र गौतम । जमदग्नि वसिष्ठै र पतिव्रता अरुन्धती' ॥ ५८ ॥ यसै नाममन्त्रले साधानीसाथ सप्तर्षिहरूलाई पूजा गर्नू । हे उत्तम ब्राह्मण ! ऋषिपञ्चमीको व्रत गर्नाले मात्र ॥५९॥ नछुने हुँदा गरेका छातछुतको दोष नाश हुन्छ, यसमा कुनै संशय

संपर्कजो दोषः क्षयं याति न संशयः ॥ ६० ॥ श्रीकृष्ण उवाच । तच्छ्रुत्वा सुमतिर्वाक्यं परमं ऋषिभाषितम् । गृहमेत्य व्रतं चक्रे सभार्यः श्रद्धयाऽन्वितः ॥ ६१ ॥ व्रतन्तु ऋषिपंचम्याः सर्व-पापप्रणाशनम् । कृत्वा सर्वं तथोक्तं तु माता-पित्रोः फलं ददौ ॥ ६२ ॥ व्रतपुण्यप्रभावेण माता तस्य श्वयोनितः । मुक्ता नृपतिशार्दूल विमानवरसंस्थिता ॥ ६३ ॥ दिव्याम्बरधरा भूत्वा गता स्वर्गञ्च भारत । पिताऽपि सो मृतोऽगच्छत्सुमतेः पशुयोनितः ॥ ६४ ॥ स्वर्गम्प्राप्तो महाराज व्रतस्याऽस्य प्रभावतः । तस्य यज्जायते पुण्यं तच्छृणुष्व द्विजोत्तम ॥ ६५ ॥ सर्वव्रतेषु यत्पुण्यं सर्व-

---

छैन ॥६०॥ ऋषिहरूले सुमतिलाई गरेको उपदेश सुनाएर फेरि श्रीकृष्णले भन्नुभयो—ऋषिहरूले भनेको पवित्र त्यो कुरो सुनेपछि सुमतिले घर गएर श्रद्धालु भई आफ्नी पत्नीका साथै त्यो व्रत गरे ॥ ६१ ॥ त्यसरी समस्त पाप सखाप पार्न ऋषि पञ्चमीको व्रत गरेर कहेमुताबिक त्यसको सबै फल आमा-बाबुलाई दिंदा भए ॥ ६२ ॥ त्यस व्रतका पुण्यका प्रभावले ती सुमतिकी आमा कुकुर्नीको जुनीबाट छुटेर हे नृपश्रेष्ठ ! वेस बिमानमा बसेको ॥ ६३ ॥ राम्रा लुगा लाएकी भएर हे महाराज स्वर्ग जाँदी भइन् । त्यसै गरी सुमतिका ती बाबु पनि मरेपछि पशुजन्मबाट पार पाएर स्वर्गै गए ॥ ६४ ॥ हे महाराज ! त्यसै व्रतका प्रभावले ती दुवै दम्पतीलाई स्वर्ग मिल्यो । हे उत्तम राजा ! अझै त्यस व्रतको प्रभावले जो पुण्य प्राप्त हुन्छ, त्यो सुन्नुहोस ॥६५॥ सम्पूर्ण व्रतहरूमा जो पुण्य छ, सारा तीर्थहरूमा जो फल छ, समस्त दान दिंदा जो धर्म मिल्द त्यो सबै

तीर्थेषु यत्फलम् । सर्वदानेषु दत्तेषु तदेतद्व्रतपारणात् ॥ ६६ ॥ कुरुते या व्रतन्नारी सा भवेत्सुखभागिनी ॥ रूपलावण्ययुक्ता च पुत्रपौत्रादिसंयुता ॥ ६७ ॥ इहलोके सदैव स्यात्यात्परत्र च परां गतिम् । एतत्ते कथितं राजन् व्रतानामुत्तमम् व्रतम् ॥ ६८ ॥ सर्वसम्पत्प्रदञ्चैव नारीणाम्पापनाशनम् । धनं यशश्च स्वर्गञ्च पुत्रानपि युधिष्ठिर ॥ ६९ ॥ पठतां शृण्वताम्वाऽपि सर्वपापप्रणाशमम् ॥ ७० ॥

॥ इतिश्री भविष्योत्तरपुराणे ऋषिपञ्चमी-व्रतकथा भाषाटीका समाप्ता ॥

फल यसै ऋषिपञ्चमीको व्रत पार लाउनाले पाइन्छ ॥ ६६ ॥ जो नारी यो व्रत गर्नें गर्छें त्यो नारी सुख भोग्नेवाली हुन्छे । रूप र सुन्दरताले युक्त हुन्छे, छोरा-छोरी-नातिनातिनाले भरिपूर्ण भएको हुन्छे र ॥६७॥ यस लोकमा सुख भोगेर परलोकमा पनि उत्तम गति भोग गर्छें । हे राजन् ! युधिष्ठिर ! व्रतहरूमध्ये अति उत्तम यो व्रत तपाईलाई बताएँ ॥ ६८ ॥ हे युधिष्ठिर यो व्रत धन कीर्ति स्वर्ग सन्तान समेत सब प्रकारको सम्पत्ति दिने, नारीहरूको पाप नाश पार्नेवाला हो र ॥ ६९ ॥ पढ्ने सुन्नेहरूको पनि सबै पाप नाश गर्नेवाला हो ॥ ७० ॥ भनी श्रीकृष्णले युधिष्ठिर महाराजलाई बताउनुभएको, व्यासले सूतलाई कहनुभएको, सूतले शौनकादि ऋषिहरूलाई सुनाउनुभएको सोही कथा हे श्रोता महानुभावहो । मैले बुद्धि-अनुसार तपाईंहरूलाई सुनाएँ । भन्नुहोस्—"श्रीकृष्ण भगवान्को जय, अरुन्धती-सहित कश्यप आदि सप्तर्षिहरूको जय"

इति ऋषिपञ्चमी-व्रतकथा समाप्ता

* १५–अथाऽनन्तपूजाविधिः *

प्रातर्नद्यादिके स्नात्वा नित्यकर्म समाप्य च ॥ अनन्तं हृदये कृत्वा शुचिस्तत्र समा-
हितः ॥ अव्रणं कलशं चैव वस्त्रयुग्मेन वेष्टितम् ॥ मुष्टिमात्रेण दर्भैस्तु फणिराजं च कारयेत् ॥
स्थापयेत्कलशस्याग्रे जगदाधारमव्ययम् ॥ आराधयेदनन्तञ्च तस्मिन्कुम्भे विशेषतः ॥ गोचर्म-
मात्रामालिप्य गोमयेन विचक्षणः ॥ तन्मध्ये स्थण्डिलं कृत्वा पद्ममष्टदलं लिखेत् ॥ तस्योपरि
न्यसेत्कुम्भं चूतपल्लवसंयुतम् ॥ प्राणायामं ततः कृत्वा तिथ्यादि परिकीर्तयेत् ॥ मम
सकुटुम्बस्य क्षेमस्थैर्यायुरारोग्य–चतुर्विधपुरुषार्थसिद्ध्यर्थं श्रीमदनन्तदेवताप्रीत्यर्थं यथाज्ञानं
ध्यानावाहनादि–षोडशोपचारैः श्रीमदनन्तपूजां करिष्ये ॥ तथा च आसनादिकं समाराधनादि
च करिष्ये ॥ इति संकल्प्य ॥ पृथिवीति० इत्यासनविधिं कृत्वा ॥ कलशं० सर्वे समुद्राः०
सितासिते० कलशे वरुणं सम्पूज्य ॥ ततः शंखं घण्टां च पूजयेत् ॥ अपवित्रः० पूजाद्रव्याणि
आत्मानं च प्रोक्ष्य यमुनापूजनं करिष्ये ॥ लोकपालस्तु तां देवीमिन्द्रनीलसमुद्भवाम् ॥ यमुनां
त्वामहं ध्याये सर्वकामार्थसिद्धये ॥ ध्यानम् ॥ सरस्वति नमस्तुभ्यं सर्वकामप्रदायिनि ॥ आगच्छ

वा० १०१ अ० पू० १०

देवि यमुने व्रतसंपूर्तिहेतवे ॥ इमं मे गंगे० इत्यावाह्य ॥ सिंहासनसमारूढे देवशक्तिसमन्विते ॥
सर्वलक्षणसंपूर्णे यमुनायै नमोऽस्तु ते ॥ आसनम् ॥ रुद्रपादे नमस्तुभ्यं सर्वलोकहितप्रिये ।
सर्वपापप्रशमनि तरंगिण्यै नमोऽस्तु ते ॥ पाद्यम् ॥ तार्क्ष्यपादे नमस्तुभ्यं शंकरप्रियभामिनि ॥
सर्वकामप्रदे देवि यमुने ते नमः ॥ अर्घ्यम् ॥ विष्णुपादोद्भवे देवि सर्वाभरणभूषिते ॥
कृष्णमूर्ते महादेवि कृष्णावेण्यै नमो नमः ॥ आचमनम् ॥ सर्वपापहरे देवि विश्वप्रिय-
प्रदर्शिनी ॥ सौभाग्यं यमुने देहि यमुनायै नमोऽस्तु ते ॥ मधुपर्कम् ॥ नन्दिपादे
महादेवि शंकरार्धशरीरिणी ॥ सर्वलोकहिते देवि भीमरथ्यै नमोऽस्तु ते ॥ पञ्चामृत-
स्नानम् ॥ सिंहपादोत्तमे देवि नारसिंहसमप्रभे ॥ सर्वलक्षणसंपूर्णे भवनाशिनि ते नमः ॥
शुद्धोदकस्नानम् ॥ विष्णुपादाब्जसंभूते गंगे त्रिपथगामिनि ॥ सर्वपापहरे देवि भागीरथ्यै
नमोऽस्तु ते ॥ श्वेतवस्त्रम् । त्र्यम्बकस्य जटोद्भूते गौतमस्याघनाशिनी ॥ सप्तधा सागरं याति
गोदावरि नमोऽस्तु ते ॥ कंचुकीम् ॥ माणिक्य-मुक्तावलिकौस्तुभाँश्च गोमेदवैडूर्यसुपुष्परागैः ॥
वज्रैश्च नीलैश्च सुशोभितानि गृहाण सर्वाभरणानि देवि ॥ आभरणानि ॥ चंदनागरुकस्तूरी

रोचनं कुंकुमं तथा ॥ कर्पूरेण समायुक्तं गन्धं ददामि च भक्तितः ॥ गन्धं ॥ श्वेताँश्च चन्द्र-
वर्णाभा हरिद्रारागरंजितान् ॥ अक्षताँश्च सुरश्रेष्ठे ददामि यमुने शुभे ॥ अक्षतान् ॥ मन्दार-
मालती जाती केतकी पाटलैः शुभैः ॥ पूजयामि च देवेशि यमुने भक्तवत्सले ॥ पुष्पाणि ॥

अथाऽङ्गपूजा ॥ चञ्चलायै नमः पादौ पूजयामि ॥ चपलायै नमः जानुनी पूजयामि ॥ भक्त
वत्सलायै नमऽ कटीं पू० ॥ हरायै० नाभिं पूजयामि ॥ मन्मथवासिन्यै गुह्यम पू० ॥ अज्ञान
वासिन्यै० हृदयं पू० ॥ भद्रायै नमः स्तनौ पू० ॥ अधहंत्र्यै० भुजौ पू० । रक्तकंठयै० कण्ठं
पू० ॥ भवहंत्र्यै नमः मुखं पू० गौर्यै नमः नेत्रे पू० ॥ भागीरथ्यै ललाटं पू० ॥ यमुनायै०
शिरः पू० । सरस्वत्यै० सर्वाङ्गम् पूज० ॥ अथ नामपूजा ॥ यमुनायै नमः । सीतायै० ॥ कमलायै
नमः ॥ उत्पलायै० ॥ अभीष्टप्रदायै० ॥ धात्र्यै० । हरिहररूपिण्यै नमः ॥ गंगायै नमः ॥ नर्म-
दायै नमः॥ गौर्यै० ॥ भागीरथ्यै० ॥ तुंगायै० ॥ भद्रायै० ॥ कृष्णावेण्यै० ॥ भवनाशिन्यै० ॥
सरस्वत्यै० ॥ कर्बर्यै० ॥ सिंधवे० । गौतम्यै नमः ॥ गोमत्यै० ॥ गायत्र्यै० ॥ गरुडायै०
गिरिजायै० ॥ चन्द्रचूडायै० ॥ सर्वेश्वर्यै० ॥ महालक्ष्म्यै० ॥ सर्वपापहरे देवि सर्वोपद्रवनाशिनि ॥

सर्वसंपत्प्रदे देवि यमुनायै नमोऽस्तु ते ॥ इति नामपूजा ॥ दशांगगुग्गुलू द्भूतश्चन्दनागरु-
संयुतः ॥ कपिलाघृतसंयुक्तो धूपोऽयं प्रतिगृह्यताम् ॥ धूपं स. ॥ घृतवर्तिसमायुक्तं वह्निनायोजितं
मया ॥ गृहाण दीपकं देवि सर्वैश्वर्यप्रदायिनि ॥ दीपम् ॥ शर्करामधुसंयुक्तं दधि क्षीराज्य-
संयुतम् ॥ पक्वमन्नं मया दत्तं नैवेद्यं प्रतिगृह्यताम् ॥ नैवेद्य ॥ पानीयं पावनं श्रेष्ठं गंगादि-
सरिदुद्भवम् ॥ हस्तप्रक्षालनं देवि गृहाण मुखशोधनम् ॥ हस्तप्रक्षालनं० । मुखप्रक्षालनं० ॥
कर्पूरेण समायुक्तं यमुने चारुचन्दनम् । समर्पितं मया तुभ्यं करोद्वर्तनकं कुरु ॥ करोद्वर्तनार्थे
चन्दनम् ॥ इदं फलम्० इति फलम् ॥ पूगीफलमिति ताम्बूलं० ॥ हिरण्यगर्भेति दक्षिणाम् ॥
त्रैलोक्यपावने गंगे अन्धकारविनाशिनि ॥ पंचार्तिक्यं गृहाणेदं विश्वप्रीत्यै नमोऽस्तु ते ॥
अर्तिक्य० ॥ केतकी-जातिकुसुमैर्मल्लिकामालतीभगैः ॥ पुष्पाञ्जलिर्मया दत्तस्तवा प्रीत्यै
नमोऽस्तु ते ॥ पुष्पाञ्जलिं समर्पयामि ॥ यानि कानि चेति प्रदक्षिणाम् ॥ अन्यथा शरणं नास्ति
त्वमेव शरणं मम ॥ तस्मात्कारुण्यभावेन संरक्ष परमेश्वरि ॥ नमस्कारान् ॥ सुरासुरेन्द्रादि-
किरीटमौक्तिकैर्युक्तं सदा यत्तव पादपङ्कजम् ॥ परावरं पातु वरं सुमंगलं नमामि भक्त्या मम

कामसिद्धये ॥ भक्तानि च महालक्ष्मि सर्वकामप्रदायिनि ॥ व्रतं संपूर्णतां यातु यमुनायै नमोऽस्तु ते ॥ इति प्रार्थना ॥ इति यमुनापूजा ॥ यमुनाकलशोपरि पूर्णपात्रं निधायाऽस्योपरि सप्तफणायुतं शेषं संस्थाप्य पूजयेत् ॥ अथ ध्यानम् ॥ ब्रह्माण्डाधारभूतश्च यमुनान्तरवासिनम् ॥ फणासप्तसमायुक्तं ध्यायेऽनन्तं हरिप्रियम् ॥ ध्यायामि ॥ शेषं सप्तफणायुक्तं कालपन्नगनायकम् ॥ अनन्तशयनार्थं त्वां भक्त्या ह्यावाहयाम्यहम् ॥ आवाहनम् ॥ नव नागकुलाधीश शेषोद्धारक काश्यप ॥ नानारत्नसमायुक्तमासनं प्रतिगृह्यताम् ॥ आसनम् ॥ अनन्तप्रिय शेषेश जगदाधार-विग्रह ॥ पाद्यं गृहाण भक्त्या त्वं काद्रवेय नमोऽस्तु ते ॥ पाद्यम् ॥ कश्यपानन्दजनक मुनिवंदित भो प्रभो ॥ अर्घ्यं गृहाण सर्वज्ञ सादरं शंकरप्रिय ॥ अर्घ्यम् ॥ सहस्रफणिरूपेण वसुधोद्धारक प्रभो ॥ गृहाणाचमनं देव पावनं च सुशीतलम् ॥ आचमनम् ॥ कुमाररूपिणे तुभ्यं दधिमध्वाज्यसंयुतम् ॥ मधुपर्कं प्रदास्यामि सर्पराज नमोऽस्तु ते ॥ मधुपर्कम् ॥ ततः पञ्चामृत-स्नानम् ॥ गंगादि-पुण्यतीर्थैस्त्वामभिषिञ्चेयमादरात् ॥ बलभद्रावतारेश नन्दज श्रीपतेः सखे ॥ स्नानम् ॥ कौशेययुग्मं देवेश प्रीत्या तव मयार्पितम् ॥ गृहाण पन्नगाधीश

तार्क्ष्यशत्रो नमोऽस्तु ते । वस्त्रम् ॥ सुवर्णनिर्मितं सूत्रं ग्रथितं कण्ठहारकम् ॥ अनेकरत्नैः खचितं सर्पराज नमोऽस्तु ते ॥ यज्ञोपवीतम् ॥ अनेकरत्नान्वितहेमकुण्डले माणिक्यसंकाशित-
बा० कंकणद्वयम् ॥ हेमांगुलीयं कृतरत्नमुद्रिकं हैमं किरीटं फणिराजमर्पितम् ॥ सर्वाभरणम् ॥ न०पू०
११० श्रीखण्डचन्दनम् । अक्षताश्च सुरश्रेष्ठ० अक्षतान् ॥ करवी रैर्जातिकुसुमैश्च । पुष्पाणि० ॥

अथाऽङ्गपूजा । सहस्रपादाय पादौ पू० ॥ गूढगुल्फाय० गुल्फौ पू० ॥ हेमजंघाय नमः जंघे पू० ॥ मंदगतये० जानुनी पू० ॥ पीताम्बराय नमः कटीं पू० ॥ गंभीरनाभाय नमः नाभिं पूज० ॥ पवनाशनाय० उदरं पू० ॥ उरगाय० हस्तौ पू० ॥ कालिकायै नमः भुजौ पूजयामि ॥ कम्बुकण्ठाय नमः कण्ठं पूजयामि ॥ विषवक्त्राय नमः वक्त्रं पूजयामि ॥ अनन्तप्रियाय० सर्वांगं पूजयामि ॥ इत्यङ्गपूजा ॥ वनस्पति० धूपं ॥ साज्यं च वर्ति० दीपं ॥ नैवेद्यं गृ० नैवेद्यं ॥ मध्ये पानीयं० ॥ उत्तरापोशा० ॥ हस्तप्रक्षालनं० ॥ मुख-प्रक्षालनं ॥ करोद्वर्तनार्थे चन्दनं० ॥ पूगीफलं० ॥ ताम्बूलं ॥ इदं फलं० ॥ फलं ॥ हिरण्यगर्भेति दक्षिणां० ॥ श्रिये जात इति नीराजनम् ॥ नानाकुसुम-संयुक्तं पुष्पाञ्जलिमिमं

प्रभो ॥ कश्यपानन्दजनक सर्पेश प्रतिगृह्यताम् ॥ मन्त्रपुष्प० ॥ यानि कानि० प्रदक्षिणां० ॥ नमोऽस्त्वनन्ताय० नमस्कारान्० ॥ अनन्तकल्पोक्तफलं देहि मे त्वं महीश्वर ॥ त्वं पूजारहितश्चार्द्ध-फलं प्राप्नोति मानवः ॥ प्रार्थना० इति शेषपूजा ॥ अथ द्वारपूजा ॥ प्राग्द्वारे द्वारश्रियै नमः । नन्दायै नमः । सुनन्दायै नमः । धात्र्यै नमः ॥ विधात्र्यै नमः । चिच्छक्त्यै नमः । शंखनिधये नमः । पद्मनिधये नमः । दक्षिणद्वारे श्रियै नमः । चण्डायै नमः । प्रचण्डायै नमः । धात्र्यै नमः । चिच्छक्त्यै नमः । मायाशक्त्यै नमः । शंखनिधये नमः । पद्मनिधये नमः पश्चिमद्वारे द्वारश्रियै नमः । बलायै नमः । प्रबलायै नमः । धात्र्यै नमः । चिच्छक्त्यै नमः । माया-शक्त्यै नमः ॥ शंखनिधये नमः पद्मनिधये नमः ॥ उत्तरद्वारे श्रियै नमः । महाबलायै नमः ॥ प्रबलायै नमः ॥ धात्र्यै नमः । विधात्र्यै नमः ॥ चिच्छक्त्यै नमः । मायाशक्त्यै नमः । शंख-निधये नमः । पद्मनिधये नमः । अथ पीठ पूजा । मध्ये वास्तुपुरुषाय नमः । मंडूकाय नमः । काला-ग्निरुद्राय नमः । आधारशक्त्यै नमः । कूर्माय नमः । पृथिव्यै नमः । अमृतार्णवाय नमः । श्वेत-द्वीपाय नमः । कल्पवृक्षेभ्यो नमः ॥ मणिमन्दिराय नमः । हेमपीठाय नमः । धर्माय नमः । अधर्माय नमः ।

ज्ञानाय नमः। वैराग्याय नमः ऐश्वर्याय नमः। फणैश्वर्याय नमः। सहस्रगणान्वितायानंताय नमः। सर्वसत्त्वाय नमः। पद्माय नमः॥ आनन्दकन्दाय नमः। संविन्नालाय नमः। वह्निमंडलाय नमः। सं० सत्त्वाय नमः। रं रजसे नमः। तं तमसे नमः। आत्मने नमः॥ परमात्मने नमः। अन्तरात्मने नमः। ज्ञानात्मने नमः। प्राणात्मने नमः। कालात्मने नमः॥ पूर्वादिदिक्षु—।जयायै नमः। विजयायै नमः। अजितायै नमः। अपराजितायै नमः नित्यायै नमः। विनाशिन्यै नमः। दोग्ध्र्यै नमः। अघोराय नमः। मंगलायै नमः। आधारशक्तिकमलासनायै नमः॥ इति पीठपूजा॥ अथ श्रीप्राणप्रतिष्ठामन्त्रस्य ब्रह्मविष्णुमहेश्वरा ऋषयः सामाथर्वाणिच्छंदांसि परा प्राणशक्तिर्देवता॥ आँ बीजम्॥ ह्रीँ शक्तिः॥ क्रोँ कीलकम् श्रीमदनन्तस्य प्राणप्रतिष्ठापने विनि०॥ ॐ पाँ ह्रीं क्रों अं रं लँ वँ शँ षँ सँ हँ लँ क्षँ अः क्रों ह्रीँ आँ अनन्तस्य प्राणा इह प्राणः। ॐ आँ ह्रीँ अनन्तस्य जीव इह स्थितः। ॐ आँ ह्रीँ क्रोँ अनन्तस्य सर्वेन्द्रियाणि वाङ्-मनस्त्वक् चक्षुः श्रोत्र जिह्वा घ्राण पाणि पाद पायूपस्थानि इहागत्य सुखं चिरं तिष्ठन्तु स्वाहा। असुनी० चत्वारिवाक० गर्भाधानादि संस्कारसिद्ध्यर्थं पञ्चदश प्रणवावृत्तीः

करिष्ये ॥ ॐ रक्तांभोधिः प्राणशक्तिपरानः ॥ अथानन्तपूजा ॥ ततस्तु मूलमन्त्रेण नमस्कृत्य जनार्दनम् । नवाम्रपल्लावाभासं पिंगलश्मश्रुलोचनम् । पीताम्बरधरं देवं शंखचक्रगदाधरम् । अलंकृतं समुद्रस्थं विश्वरूपं विचिन्तये । ध्यायामि । आगच्छानन्त देवेश तेजोराशे जगत्पते । इमां मया कृतां पूजां गृहाण पुरुषोत्तम । सहस्रशीर्षा० आवाहनम् । नानारत्नसमायुक्तं कार्तस्वरविभुषितम् । आसनं देवदेवेश गृहाण पुरुषोत्तम । पुरुष० आसनं । गंगादि सर्वतीर्थेभ्यो मया प्रार्थनयाहृतम् । तोयमेतत्सुखस्पर्शं पाद्यार्थं प्रतिगृह्यताम् । एतावा० पाद्यं । अनन्तानन्तदेवेश अनन्तफलदायक। अनंतानंतरूपोऽसि गृहाणार्घ्यं नमोऽस्तु ते । त्रिपादू० अर्घ्यम्। गंगोदकं समानीतं सुवर्णकलशे स्थितम् । आचम्यतां हृषीकेश प्रसीद पुरुषोत्तम ॥ तस्माद्वि० आचमनम् ॥ अनन्तगुणरूपाय विश्वरूपधराय च ॥ नमो महात्मदेवाय अनन्ताय नमो नमः ॥ यत्पुरु० स्नानं ॥ ततः पञ्चामृतस्नानम् ॥ सुरभेस्तु समुत्पन्नं देवानामपि दुर्लभम् ॥ पयो ददामि देवेश स्नानार्थं प्रतिगृह्यताम् ॥ आप्यायस्व० पयः स्नानम् ॥ चन्द्रमण्डलसंकाशं सर्वदेवप्रिये हि तत् ॥ ददामि दधि देवेश स्नानार्थं प्र० । दधिक्राव्णो० दधि स्नानं ॥ आज्यं सुराणामा० आज्यं

पवित्रं परमं स्नानार्थं प्र० । घृतमिमिक्षेघृतमस्य योनि घृतेश्रितो घृतमस्यधाम० घृतस्नानं० ॥
सर्वौषधिसमुत्पन्नं पीयूषसदृशं मधु ॥ स्नानाय ते मया दत्तं गृहाण परमेश्वर ॥ मधु वाता०
मधु ॥ इक्षुदण्डसमुद्भूतां शर्करां मधुरां शुभाम् ॥ स्नानाय ते मया दत्तां गृहाण पर-
मेश्वर ॥ स्वादुः पवश्चेति शर्करा ॥ शुद्धोदकस्नानं ॥ नाममन्त्रैः पूर्वपूजां कुर्यात् ॥ पुरुषसूक्तेनाऽ
भिषेकः ॥ तप्तकांचनवर्णाभं कौशेयं च सुनिर्मितम् ॥ वस्त्रं गृहाण देवेश लक्ष्मीयुक्त नमोऽस्तु ते ॥
तं यज्ञं वस्त्रं ॥ वस्त्रानन्तरमाचमनं । दामोदर नमस्तेऽस्तु त्राहि मां भवसागरात् ॥ ब्रह्मसूत्रं
सोत्तरीयं गृहाण पुरुषोत्तम ॥ तस्माद्यज्ञा० ॥ यज्ञोपवीतान्तरमाचमनीयम् । श्रीखण्डम् ।
तस्माद्यज्ञात्सर्वहुत० चन्दनम् ॥ अक्षताश्चसु० अक्षतान् ॥ माल्यादीनि सुगन्धीनि० ॥ तस्मा-
दश्वा० पुष्पाणि ॥ अथ ग्रन्थिपूजा ॥ श्रियै नमः । मोहिन्यै नमः ॥ पद्मिन्यै० ॥ महाबलायै० ॥
अजायै० ॥ मंगलायै० ॥ वरदायै० ॥ शुभायै० ॥ जयायै० ॥ विजयायै० ॥ जयन्त्यै० ॥ पाप-
नाशिन्यै० ॥ विश्वरूपायै० । सर्वमंगलायै० ॥ १४ ॥ इति ग्रन्थिपूजा ॥ अथाङ्गपूजा ॥
मत्स्याय नमः पादौ पूजयामि ॥ कूर्माय० गुल्फौ पू० ॥ वाराहाय० जानुनी पू० ॥

नारसिंहाय० उरू पू० ॥ वामनाय० कटीं पू० ॥ रामाय० उदरं पूजयामि । श्रीरामाय० हृदये पू० ॥ कृष्णाय० मुखं पू० ॥ सहस्रशिरसे० शिरः पू० ॥ श्रीमदनन्ताय सर्वाङ्गं पू० ॥ अथावरणपूजा ॥ अनन्तस्य दक्षिणापार्श्वे रमायै ॥ वामपार्श्वे भूम्यै० ॥ इति प्रथमावरणम् ॥ आवरणदेवतामावाह्य हस्तं प्रक्षाल्य ॥ गंधं पुष्पं तर्जनीमध्यमांगुष्ठैर्धृत्वा ॥ मध्ये शंखोदकं गृहीत्वा मन्त्रान्ते शंखोदकं भूमौ निक्षिप्य पुष्पं देवोपरि निक्षिपेत् ॥ दयाब्धे त्राहि संसारसर्पान्मा शरणाऽगतम् ॥ भक्त्या समर्पये तुभ्यं प्रथमावरणार्चनम् ॥ इति ॥ मन्त्रमुच्चार्य जलं त्यक्त्वा पुष्पं देवोपरि विन्यसेत् ॥ एवमग्रेऽपि ॥ १ ॥ पर्वादिक्रमेण वृद्धोल्काय० ॥ महोल्काय० । शतोल्काय० ॥ सहस्रोल्का० ॥ दयाब्धे त्रा० द्वितीयावरणार्चनम् ॥ २ ॥ तथैव ॥ वासुदेवाय० संकर्षणाय० ॥ प्रद्युम्नाय० ॥ अनिरुद्धाय० ॥ दयाब्धे० तृतीयावरणार्चनम् ॥ ३ ॥ प्राच्याम् । केशवा० ॥ नारायणा० ॥ माधवा० ॥ गोविन्दा० ॥ मधुसूदना० ॥ त्रिविक्रमा० ॥ वामना० ॥ श्रीधराय० ॥ हृषीकेशाय० ॥

पद्मनाभाय॰ ॥ दामोदरा॰ । दयाब्धे॰ चतुर्थावरणार्चनम् ॥ ४ ॥ पर्वादिक्रमेण ॥ मत्स्याय॰ ॥
कूर्माय ॥ वाराहाय॰ ॥ नरसिंहाय नमः ॥ वामनाय नमः ॥ परशुरामाय नमः ॥ श्रीरामाय
नमः ॥ कृष्णाय॰ ॥ बौद्धाय नमः । कल्कये॰ ॥ अनन्ताय नमः ॥ विश्वरूपिणे नमः ॥ दयाब्धे त्रा॰
पञ्चमावरणार्चनम् ॥ ५ ॥ पर्वादिक्रमेण ॥ अनन्ताय नमः ॥ दक्षिणस्यां ब्रह्मणे नमः ॥ पश्चि-
मायां वायव्यै नमः ॥ उत्तरस्यामीशानाय नमः ॥ आग्नेयां वारुण्यै नमः ॥ नैर्ऋत्यां गायत्र्यै
नमः ॥ वायव्यां भारत्यै नमः ॥ ऐशान्यां गिरिजायै नमः ॥ अग्रे गरुडाय नमः ॥ वामे
सुपुण्याय नमः ॥ दयाऽब्धे॰ त्राहि सं॰ षष्ठावरणार्चनम् ॥ ६ ॥ पर्वादिक्रमेण ॥ इन्द्राय
नमः ॥ अग्नये नमः ॥ यमाय नमः ॥ निर्ऋतये नमः ॥ वरुणाय नमः ॥ सोमाय नमः ॥
ईशानाय नमः ॥ दयाऽब्धे त्रा॰ सप्तमावरणार्चनम् ॥७॥ आग्नेय्यां शेषाय नमः ॥ नैर्ऋत्यां
विष्णवे नमः ॥ वायव्यां विधये नमः ॥ ऐशान्यां प्रजापतये नमः ॥ दयाऽब्धे त्राहि॰ अष्टमा-
वरणार्चनम् ॥८॥ आग्नेय्यां गणपतये नमः ॥ नैर्ऋत्यां सप्तमातृभ्यो नमः । वायव्यो दुर्गायै नमः ॥
ऐशान्यां क्षेत्राधिपतये नमः ॥ दयाऽब्धे त्राहि नवमावरणार्चनम् ॥ ९ ॥ मध्ये—ब्रह्म-

णे० ॥ भास्कराय० ॥ शेषाय० ॥ सर्वव्यापिने० ॥ ईश्वराय० ॥ विश्वरूपाय नमः । महाकालाय नमः ॥ सृष्टिकर्त्रे नमः ॥ कृष्णाय नमः ॥ हरये नमः । शिवाय नमः । स्थितिकारकाय नमः । अन्तकाय नमः । दयाऽब्धे त्राहि संसारात् दशमावरणार्चनम् ॥ १० ॥ शौरये नमः । वैकुण्ठाय नमः । महाबलाय नमः । पुरुषोत्तमाय नमः । अजाय नमः । पद्मनाभाय नमः । मङ्गलाय नमः । हृषीकेशाय नमः । वरदाय नमः । मधुसूदनाय नमः । अच्युताय नमः । अनन्ताय नमः । गोविन्दाय नमः । विजयाय नमः । अपराजिताय नमः । कृष्णाय नमः । दयाब्धे त्राहि सं० एकादशावरणार्चनम् ॥ ११ ॥ अनन्ताय नमः । कपिलाय नमः । शेषाय नमः । संकर्षणाय नमः । हलायुधाय नमः । तारणाय नमः । सीरपाणये नमः । बलभद्राय नमः । दयाब्धे त्राहि सं० द्वादशावरणार्चनम् ॥ १२ ॥ क्षीराब्धिशायिने नमः । अच्युताय नमः । भूम्याधाराय नमः । लोकनाथाय नमः । फणामणिविभूषणाय नमः । सहस्रमूर्ध्ने नमः । सहस्राचिषे नमः । दयाब्धे त्राहि सं० त्रयोदशावरणार्चनम् ॥ १३ ॥ केशवादि चतुर्विंशतिनामभि । दयाब्धे त्राहि सं० चतुर्दशावरणार्चनम् ॥ १४ ॥ अथ पत्रपूजा । कृष्णाय नमः पलाश-

पत्रं स० । विष्णवे नमः औदुम्बरपत्रं समर्पयामि । हरये नमः अश्वत्थपत्रं स० ॥ शंभवे भृङ्गिराजपत्रं समर्पयामि । ब्रह्मणे० जटाधारपत्रं सम० । विश्वात्मने० अशोकपत्रं स० । शेषाय० कपित्थपत्रं स० । सर्वव्यापिने० वटपत्रं स० । ईश्वराय नमः आम्रपत्रं समर्पयामि । विश्वरूपिणे० कदलीपत्रं सम० । महाकालाय नमः अपामार्गपत्रं समर्पयामि । सृष्टिकर्त्रे० करवीरपत्रं समर्पयामि । स्थितिकर्त्रे नमः पुन्नागपत्रं समर्पयामि । अनन्तकाय नमः नागवल्लीपत्रं समर्पयामि । अथ पुष्पपूजा । अनन्ताय नमः पद्मपुष्पं समर्पयामि । विष्णवे नमः धात्रीपुष्पं समर्पयामि । अव्ययाय नमः कह्लारपुष्पं समर्पयामि । सहस्रजिते नमः केतकीपुष्पं समर्पयामि । अनन्तरूपिणे नमः बकुलपुष्पं समर्पयमि । इष्टाय नमः । शतपुष्पं समर्पयामि । विशिष्टाय नमः पुन्नागपुष्पं समर्पयामि ॥ शिष्टेष्टाय नमः करवीरपुष्पं समर्प० । शिखण्डिने नमः धत्तूरपुष्पं समर्पयामि ॥ नहुषाय नमः कुन्दपुष्पं समर्पयामि ॥ विश्वबाहवे नमः मल्लिकापु० ॥ महीधराय नमः मालतीपुष्पं सम० ॥ अच्युताय नमः कर्णिकारपुष्पं समर्पयामि ॥ अन्तकाय नमः कदलीपुष्पं समर्पयामि ॥ अथाऽष्टोत्तरशतनामभिः पूजयेत् ॥ अनन्ताय

नमः ॥ अच्युताय नमः ॥ अद्भुतकर्मणे नमः ॥ अमितविक्रमाय नमः ॥ अपराजिताय नमः ॥ अखण्डाय नमः ॥ अग्निनेत्राय नमः ॥ अग्निवपुषे नमः ॥ अदृश्याय नमः ॥ अत्रिपुत्राय नमः ॥ १० ॥ अनन्तकुलाय नमः ॥ अनाशिने नमः । अनघाय नमः ॥ अब्दनीलाय नमः ॥ अहरहाय नमः ॥ अचञ्चलाय नमः ॥ शब्दातिगाय नमः ॥ २० ॥ अचलरूपाय नमः ॥ अखिलधराय नमः ॥ अव्यक्ताय नमः ॥ अनुरूपाय नमः ॥ अभयंकराय नमः ॥ अक्षताय नमः । अवपुषे नमः ॥ अयोनिजाय नमः ॥ अरविन्दाय नमः ॥ अशनवर्जिताय नमः ॥ ३० ॥ अधोक्षजाय नमः ॥ आदित्यपत्राय नमः ॥ अम्बिकापतिपूर्वजाय नमः ॥ अपस्मारनाशिने नमः ॥ अव्ययाय नमः ॥ अनादये नमः ॥ अप्रमेयाय नमः ॥ अघशत्रवे नमः ॥ अमरारिघ्नाय नमः ॥ अनीश्वराय नमः ॥ ४० ॥ अजाय नमः । अघोराय नमः । अनादिनिधनाय नमः ॥ अमरप्रभवे नमः ॥ अग्राह्याय नमः ॥ अक्रूराय नमः ॥ अनुत्तमाय नमः ॥ अरूपाय नमः ॥ अह्नेनमः ॥ अमोघाधिपतये नमः ॥ ५० ॥ अजाय नमः ॥ अक्षयाय नमः ॥ अमृताय नमः अघोरवीर्याय नमः ॥ अव्यङ्गाय नमः ॥ अविघ्नाय नमः ॥ अतीन्द्रियाय नमः ॥ अमिततेजसे

नमः ॥ अमितये नमः ॥ अष्टमूर्तये नमः ॥ ६० ॥ अनिलाय नमः ॥ अवशाय नमः ॥ अणोरणीयसे नमः ॥ अशोकाय नमः ॥ अरविन्दाक्षाय नमः ॥ अधिष्ठाय नमः ॥ अमितनयनाय नमः ॥ अरण्यवासिने नमः ॥ अप्रमिताय नमः ॥ अनन्तरूपाय नमः ॥ ७० ॥ अनलाय नमः ॥ अनिमिषाय नमः ॥ अक्षरूपाय नमः ॥ अग्रगण्याय नमः ॥ अप्रमिताय नमः ॥ अनन्तकाय नमः ॥ अचिंत्याय नमः ॥ अपांनिधये नमः ॥ अतिसुन्दराय नमः ॥ अमरप्रियाय नमः ॥ ८० ॥ अष्टसिद्धिप्रदाय नमः ॥ अरविन्दप्रियाय नमः ॥ अरविन्दोद्भवाय नमः ॥ अनयाय नमः ॥ अर्थाय नमः ॥ अक्षोभ्याय नमः ॥ अर्चिष्मते नमः ॥ अनेकमूर्तये नमः ॥ अनन्तब्रह्माण्डपतये नमः । अनन्तशयनाय नमः ॥ ९० ॥ अमराधिपतये नमः ॥ अनाधाराये नमः ॥ अनन्तनाम्ने नमः ॥ अनतन्तश्रिये नमः ॥ अनन्तदेवाय नमः ॥ अक्षराय नमः ॥ अमायाय नमः ॥ आश्रमस्थानाय नमः ॥ आश्रममातीताय नमः ॥ आनन्दाय नमः ॥ आत्मयोनये नमः ॥ १०० ॥ अवनीपतये नमः अवनिधराय० ॥ अनादये नमः ॥ आदित्याय नमः ॥ अमृताय नमः ॥ अपवर्गप्रदाय नमः ॥ अव्यक्ताय नमः ॥ अनन्ताय नमः ॥ १०१ ॥ इत्यष्टोत्तरशतनामपूजा ॥

धूपम् ॥ दशाङ्गगुग्गुलोद्भूतं चन्दनागरुसंयुतम् ॥ सर्वेषामुत्तमं धूपम् गृहाण सुरपूजित ॥ यत्पुरुषं० धूपम् ॥ साज्यं च वर्तिसंयुक्तं वह्निना योजितं मया ॥ दीपम् गृहाण देवेश त्रैलोक्यतिमिरापहम् ॥ ब्राह्मणोस्य० ॥ दीपं० ॥ अन्नं चतुर्विधं स्वादु पयोदधिघृतैर्युतम् ॥ नाना व्यंजनशोभाढ्यं नैवेद्यं प्रतिगृह्यताम् ॥ चन्द्रमामनसो० ॥ नैवेद्यमध्ये पानीयं० ॥ ऊत्तरापोशनार्थं ते दद्मि तोयं सुवासितम् ॥ गृहाण सुमुखो भूत्वा अनन्ताय नमो नमः ॥ उत्तरापोशानम् ॥ मुखप्रक्षालनम् ॥ हस्तप्रक्षालनम् ॥ करोद्वर्तनकं देव मया दत्तं हि भक्तितः ॥ चारु चन्द्रप्रभं दिव्यं गृहाण जगदीश्वर ॥ करोद्वर्तनम् ॥ इदं फलं मया देव स्थापितं पुरतस्तव ॥ तेन मे सफलावाप्तिर्भवेज्जन्मनि जन्मनि ॥ नारिकेलफलम् ॥ ताम्बूलम्—पूगीफलं महद्दिव्यं नागवल्लीदलैर्युतम् ॥ कर्पूरैलासमायुक्तं ताम्बूलम्प्रतिगृह्यताम् ॥ ताम्बूलम् स० ॥ हिरण्यगर्भेति दक्षिणाम् ॥ प्रदक्षिणा—यानि कानि च पापानि जन्मान्तरकृतानि च ॥ तानि तानि विनश्यन्तु प्रदक्षिणपदे पदे ॥ इति प्रदक्षिणाम् ॥ नमस्ते भगवन्भूयो नमस्ते धरणीधर ॥ नमस्ते सर्वनागेन्द्र नमस्ते मधुसूदन ॥ सप्तास्येति नमस्कारः ॥ नमस्ते देवदेवेश नमस्ते

गरुडध्वज ॥ नमस्ते कमलाकान्त अनन्ताय नमो नमः । यज्ञेन यज्ञमिति मन्त्रपुष्पाञ्जलिः ॥ अथ दोरकप्रार्थना ॥ अनन्ताय नमस्तुभ्यं सहस्रशिरसे नमः ॥ नमोऽस्तु पद्मनाभाय नागानां पतये नमः ॥ अनन्तकामदः कामाननन्तो मे प्रयच्छतु ॥ अनन्तो दोररूपेण पुत्रपौत्रान् प्रवर्धय ॥ इति प्रार्थ्य दोरकं गृहीत्वा ॥ अथ दोरकबन्धनमन्त्रं ॥ अनन्तसंसारमहासमुद्रमग्नं समभ्युद्धर वासुदेव ॥ अनन्तरूपे विनियोजयस्व ह्यनन्तसूत्राय नमो नमस्ते ॥ इति बध्नीयात् ॥ जीर्णदोरकविसर्जनमन्त्रः ॥ नमः सर्वहितानन्त जगदानन्दकारक ॥ जीर्णदोरममुं देव विसृजेऽह त्वदाज्ञया ॥ इति विसृजेत् ॥ अथ वायनमन्त्रः ॥ गृहाणेदं द्विजश्रेष्ठ वायनं दक्षिणायुतम् ॥ त्वत्प्रसादादहं देव मुच्येयं कर्मबन्धनात् ॥ प्रतिगृह्ण द्विजश्रेष्ठ अनन्तफलदायक ॥ पक्वान्नफलसंयुक्तं दक्षिणाघृतसंयुतम् ॥ वायन द्विजवर्याय दास्यामि व्रतपूर्तये ॥ अथ जीर्णदोरकदानमंत्रः ॥ अनन्तः प्रतिगृह्णाति अनन्तो वै ददाति च ॥ अनन्तस्तारको यस्मादनन्ताय नमो नमः ॥ इति दद्यात् ॥ ततो यथाशक्ति ब्राह्मणान् भोजयेत् ॥ अनेन कृतपूजनेन श्रीमदनन्तः प्रीयताम् ॥

॥ इत्यनन्तपूजाविधिः समाप्तः ॥

* १६–अथ अनन्तव्रत-कथा *

अथ कथा ॥ सूत उवाच ॥ पुरा तु जाह्नवीतीरे धर्मो धर्मपरायणः ॥ जरासन्धवधार्थाय राजसूयमुपाक्रमत् ॥ १ ॥ कृष्णेन सह धर्मोऽसौ भीमार्जुनसमन्वितः ॥ यज्ञशालामकुरुत नानारत्नोपशोभिताम् ॥ २ ॥ मुक्ताफलसमाकीर्णमिन्द्रालयसमप्रभाम् ॥ यथार्थान् भूपतीन् सर्वान् समानीय प्रयत्नतः ॥ ३ ॥ गान्धारीतनयो राजा तदानीं नृपनन्दनः ॥ दुर्योधन इति ख्यातः समागच्छन्मखालयम् ॥ ४ ॥ दृष्ट्वा दुर्योधनस्तत्र प्राङ्गणं जलसन्निभम् ॥ ऊर्ध्वं कृत्वा

वनवास बसेका युधिष्ठिरका प्रश्नको उत्तरमा श्रीकृष्णले युधिष्ठिरलाई सुनाउनुभएको भनी व्यासजीले आफूलाई बताउनुभएको अनन्तको माहात्म्य नैमिषारण्यक्षेत्रमा रहने अट्ठासी हजार ऋषिहरूलाई, कथा सुनाउँदै आएको सिलसिलामा, सम्बोधन गर्दै सूतजीले भन्नुभयो—उहिले धर्मक्षेत्र भएको गंगाजीको किनारामा धर्मात्मा राजा युधिष्ठिरले जरासन्धको वधका लागि राजसूय यज्ञ गर्ने ठीकठाक गर्न लागे ॥ १ ॥ भीम-अर्जुनले सहित ती राजा युधिष्ठिरले श्रीकृष्णका साथ भै नाना रत्नहरूले शोभिएका गुच्छाहरूले सिंगारिएको मानों इन्द्रको दरबार जस्तै चहकिलो यज्ञशाला तयार गरे र यज्ञका लागि लागिपरेर सबै राजाहरूलाई बोलाइए ॥२-३॥ त्यस वेला गान्धारीको छोरो, राजाहरूको प्यारो 'दुर्योधन' भन्ने नामले प्रसिद्ध भएको राजा पनि त्यस यज्ञशालामा आएका थिए ॥४॥ दुर्योधनले त्यहाँ आउँदा आँगनलाई पानीले

तु वस्त्राणि तत्रागच्छच्छनैः शनैः ॥ ५ ॥ स्मितवक्त्राश्च तं दृष्ट्वा द्रौपद्यादिवराङ्गनाः ॥
दुर्योधनस्ततो गच्छज्जलमध्ये पपात ह ॥ ६ ॥ पुनः सर्वे नृपाश्चैव ऋषयश्च तपोधनाः ॥ उपहासञ्च
चक्रुस्ता द्रौपद्यादिसुलोचनाः ॥ ७ ॥ महाराजाधिराजोऽसौ महाक्रोधपरायणः ॥ विनिर्गतः
स्वकं राष्ट्रं मातुलेन वृतो नृपः ॥ ८ ॥ तस्मिन्काले तु शकुनिः प्रोवाच मधुरं वचः ॥
मुञ्च राजन्महारोषं पुरतः कार्यगौरवात् ॥ ९ ॥ द्यूतोपक्रमणेनैव सर्वं राज्यमवाप्स्यसि ॥
गन्तुमुत्तिष्ठ राजेन्द्र सत्रस्य सदनं प्रति ॥ १० ॥ तथेत्युक्त्वा महाराजः समागच्छन्मखालयम् ॥

भरिएको देखेर पोशाक मास्तिर सारेर त्यहस आँगनमा बिस्तारै-बिस्तारै हिडे ॥ ५ ॥ त्यसरी हिंड्ने ती दुर्योधनलाई देखेर द्रौपदी आदि श्रेष्ठ नारीहरू मुस्कुराए। त्यसपछि पानीले भरिएको कुण्डलाई पानी नै नभएको जस्तो देखेर त्यतैबाट हिंड्दा दुर्योधन राजा पानीका कुण्डमा जाकिए ॥ ६ ॥ त्यो तमाशा देखेर अरू राजाहरूले, तपस्वी ऋषिहरूले र ती द्रौपदी आदि गरिएका सुन्दर सुन्दरीहरूले 'अन्धाको छोरो अन्धै' आदि शब्दहरूले हँस्सी पनि गरे ॥७॥ महाराजाधिराज भएका ती दुर्योधन राजा पनि त्यस घटनाले अत्यन्त क्रोधित भएर मामाका साथ भई आफ्नू देशतिर जान त्यहाँबाट निक्ले ॥ ८ ॥ त्यसै वेला मामा शकुनिले मीठो कुरो भन्यो—हे राजन्! अब अगाडि गर्नुपर्ने कामको प्रतिष्ठाका लागि यो ठुलो क्रोध त्याग्नुहोस् ॥९॥ जूआका बहानाले नै सब राज्य पाउनुहुनेछ, त्यसकारण, हे राजेन्द्र! यज्ञशालतिरै जान उट्नुहोस् ॥१०॥

विनिवृत्य मखं जग्मुर्नृपाः सर्वे स्वकं पुरम् ॥ ११ ॥ ततो दुर्योधनो राजा समागत्य गजाह्वयम् ॥ आनीय पाण्डुपुत्राँश्च धर्मभीमार्जुनान् वरान् ॥ १२ ॥ द्यूतेनैव जिताः सर्वे पाण्डवा वीतकल्मषाः ॥ ततोऽरण्यान्तरे गत्वा वर्तन्ते वनचारिणः ॥ १३ ॥ ततो वृत्तान्तमाकर्ण्य भ्रातृभिः सह पाण्डवम् ॥ युधिष्ठिरं द्रष्टुमनाः कृष्णोऽगाज्जगदीश्वरः ॥ १४ ॥ सूत उवाच ॥ अरण्ये वर्तमानास्ते पाण्डवा दुःखकर्शिताः ॥ कृष्णं दृष्ट्वा महात्मानं प्रणिपत्य तमब्रुवन् ॥ १५ ॥ युधिष्ठिर उवाच ॥ अहं दुःखीह संजातो भ्रातृभिः परिवारितः ॥ कथं मुक्तिर्वदास्माकमनन्ताद् दुःखसागरात् ॥ १६ ॥ कं देवं पूजयिष्यामि राज्यं प्राप्स्याम्य-

'अच्छा !' यस्तो भनेर महाराज दुर्योधन पनि यज्ञशालामा आए । यज्ञ सकिएपछि सबै राजाहरू आफाफ्ना शहरतिर गए ॥११॥ त्यसपछि राज दुर्योधन पनि हस्तिनापुर (दिल्ली) आएर सोझा धर्मराज, भीम, अर्जुन आदि पाण्डुका छोराहरूलाई त्यहीं ल्याएर ॥१२॥ जूवा खेल्दा छलकपट नजान्ने सबै पाण्डवहरू जूवाले नै जितिए । तब वनका बीच गएर वन-वन घुम्दै छन् ॥ १३ ॥ भन्ने समाचार सुनेपछि अनि भाइहरूका साथै रहेका पाण्डव युधिष्ठिरलाई हेर्ने (भेट्ने) मन भएका जगदीश्वर कृष्ण उहीं जानुभयो ॥ १४ ॥ अझै सूतजीले भन्नुभयो—जंगलमा रहनाले दुःखले दुब्लाएका ती पाण्डवहरूले महात्मा कृष्णलाई देखेपछि उहाँलाई ढोगेर भने—॥ १५ ॥ युधिष्ठिरले भन्नुभयो—भाइहरूले घेरिएको म अत्यन्त दुःखी भएको छु । यस अनन्त दुःखसागरबाट कसरी मुक्ति होला ? त्यो हामीहरूलाई बताइदिनुहोस् ॥ १६ ॥ कुन देवताको

नुत्तमम् ॥ अथवा किं व्रतं कुर्या त्वत्प्रसादाद्भवेद्धितम् ॥ १७ ॥ श्री कृष्ण उवाच ॥ अनन्तव्रत-
मस्त्येकं सर्वपापहरं शुभम् ॥ सर्वकामप्रदं नृणां स्त्रीणां चैव युधिष्ठिर ॥ १८ ॥ शुक्लपक्षे चत-
दर्श्यां मासि खाद्रपदे भवेत् ॥ तस्याऽनुष्ठानमात्रेण सर्वपापं व्यपोहति ॥ १९ ॥ युधिष्ठिर
उवाच ॥ कृष्ण कोऽयमनन्तेति प्रोच्यते यस्त्वया विभो ॥ किं शेषनाग आहोस्विदनन्तस्तक्षकः
स्मृतः ॥ २० ॥ परमात्माऽथ वाऽनन्त उताहो ब्रह्म गीयते ॥ क एषोऽनन्त संज्ञो वै तथ्यं मे
ब्रूहि केशव ॥ २१ ॥ श्रीकृष्ण उवाच ॥ अनन्त इत्यहं पार्थ मम रूपं निबोध तत् ॥

पूजा गर्ने गरूँ ? के गरेदेखि आफ्नु उत्तम राज्य पाउनेछु ? अथवा कुन व्रत गरूँ ? जसद्वारा तपाईंका कृपाले कल्याण होस ॥ १७ ॥ तब श्रीकृष्णले भन्नुभयो—हे युधिष्ठिर ! पुरुषको र स्त्रीहरूको पनि सबै इच्छा पूरा गरिदिने, समस्त पाप हरिदिने, कल्याणकारी यौटा अनन्त नामको व्रत छ ॥१८॥ भदौ महीनाको शुक्लपक्षको चतुर्दशीमा त्यो व्रत हुन्छ । त्यस व्रतको अनुष्ठान मात्रैले पनि सबै पाप नाशिन्छ ॥१९॥ अनि युधिष्ठिरले भन्नुभयो—हे कृष्ण ! तपाईले जो 'अनन्त' भन्ने भनियो यो को हो ? हे विभु ! के शेषनाग हो ? अथवा तक्षकलाई 'अनन्त' भनिएको हो ? ॥२०॥ अथवा 'अनन्त' भनेको परमात्मा हो ? या ब्रह्म नै 'अनन्त' भनिन्छ ? हे केशव ? 'अनन्त' नामको यो को हो ? मलाई यसबारे साँचो कुरो कहनु-होस ॥ २१ ॥ अब श्रीकृष्णले भन्नुभयो—हे पार्थ ! 'अनन्त' भनेको मै हुँ, मेरै रूपलाई अनन्त भन्ने जान । सूर्य आदि ग्रह-

आदित्यादिग्रहात्माऽसौ यः काल इति पठ्यते ॥ २२ ॥ कलाकाष्ठामुहूर्तादि-दिन-रात्रि-शरीर-
वान् ॥ पक्ष-मासर्तु-वर्षादि-युगकाल-व्यवस्थया ॥ २३ ॥ योऽयं कालो मया ख्यातः सोऽनन्तः
इति कीर्त्यते ॥ सोऽहं कृष्णोऽवतीर्णोऽत्र भूभारोत्तारणाय च ॥ २४ ॥ दानवानां वधार्थाय
वसुदेवकुलोद्भवम् ॥ मां विद्धि सततं पार्थ साधूनां पालना च ॥ २५ ॥ युगे पूर्वे महा-
बाहो योगिध्येयमनुत्तमम् ॥ अनादि-मध्य-निधनं कृष्णं विष्णुं हरिं शिवम् ॥ २६ ॥ वैकुण्ठं
भास्करं सोमं सर्वव्यापिनमीश्वरम् ॥ विश्वरूपमनन्तञ्च यस्मिन्निन्द्राश्चतुर्दश ॥ २७ ॥

हरूको आत्मा भएको यो 'अनन्त' जो 'काल' भनी भनिन्छ ॥ २२ ॥ काष्ठा (अठार झिंक्याइ), कला (तीस काष्ठा), मुहूर्त (तीन सय साठी कला), तीस मुहूर्तहरूले एक दिन-रात (अहोरात्र) भएर समय पूरा शरीरवाला हुन्छ। यस्ता शरीरधारी पन्ध्र दिनको एक पक्ष, दुइ पक्षले एक महीना, दुइ महीनाले एक ऋतु, छः ऋतुले एक वर्ष आदि युगहरूको काल (समय) को व्यवस्थाले हुन्छ ॥ २३ ॥ जो यो 'काल' मैले कहियो त्यही नै 'अनन्त' कहिन्छ। उही अनन्त म कृष्ण यस पृथ्वीमा पृथ्वीको भार उतार्नका लागि उत्रेको अर्थात् अवतार लिएको हुँ ॥ २४ ॥ हे पार्थ! दानव (दुष्ट) हरूको वधका लागि र हमेशा साधु सज्जनहरूको रक्षाका लागि नै मलाई वसुदेवको कुलमा उत्पन्न भएको भन्ने जान ॥ २५ ॥ हे महाबाहु युधिष्ठिर! पहिलेका युगमा योगीहरूले ध्यान गरिने, असाध्यै उत्तम, आदि - मध्य - अन्त नभएको कृष्ण विष्णु हरि शिव वैकुण्ठ भास्कर (सूर्य) चन्द्रमा सारामा व्याप्त प्रभु विश्वरूप अनन्तरूप जुन रूपमा चौध इन्द्र अष्टवसु द्वादशादित्य एकादश कहिने रुद्र सप्तर्षि सप्तसमुद्र पर्वतहरू ठूला - ठुला नद - नदीहरू नक्षत्रहरू

वसवो द्वादशादित्या रुद्रा एकादश स्मृताः ॥ सप्तर्षयः समुद्राश्च पर्वताः सरितोत्तमाः ॥ २८ ॥ विश्वरूपं महाकालं सृष्टिसंहारकारकम् ॥ प्रत्यार्थं महारूपं फाल्गुनाय प्रदर्शितम् ॥ २९ ॥ नक्षत्राणि दिशो भूमिः पातालं भूर्भुवादिकम् ॥ मा कुरुष्वाऽत्र सन्देहः सोऽहं पार्थ न संशयः ॥ ३० ॥ युधिष्ठिर उवाच ॥ अनन्तव्रतमाहात्म्यविधिं वद विदांवर ॥ किं पुण्यं किं फलं चारय किं दानं कस्य पूजनम् ॥ ३१ ॥ केन चैतत्पुरा चीर्णं मर्त्ये केन प्रकाशितम् ॥ एवं सविस्तरं सर्वं ब्रह्मनन्तव्रतं मम ॥ ३२ ॥ श्रीकृष्ण उवाच । आसीत्पुरा कृतयुगे सुमन्तुर्नाम वै द्विजः ॥ वसिष्ठगोत्रसंभूत-सुरूपां च भृगोः सुताम् ॥ ३३ ॥ दीक्षानाम्नीं चोपयेमे वेदोक्त-

---

दिशाहरू भूमि पाताल भूर्भुवः स्वः आदि लोकहरू सृष्टि संहार गर्नें महाकालस्वरूप ठुलो रूप भएको विश्वरूप विश्वासका लागि अर्जुनलाई देखाइसकेको छु । हे पार्थ ! प्रतियुगमा दानव दलन गर्नें म उही हूँ. यह कुरामा सन्देह नगर, केही शंका छैन ॥ २६-३० ॥ फेरि युधिष्ठिरले भन्नुभयो—हे जान्नेहरूमा श्रेष्ठ कृष्ण ! अनन्त व्रतको माहात्म्य, अनन्त व्रत गर्नें विधि बताइबक्सियोस ! यसको के पुण्य हो ? के फल हो ? के दान हो ! कसको पूजा गर्नें ! ॥ ३१ ॥ पहिले यो व्रत कसले कह्यो ? तर्त्यमण्डल पृथिवीमा कसले गऱ्यो ? यो सबै विस्तारपूर्वक अनन्तव्रतबारे मलाई बताइबक्सियोस ॥ ३२ ॥ तब श्रीकृष्णले कहनुभयो—पहिले सत्ययुगमा बसिष्ठ गोत्रमा जन्मिएका 'सुमन्तु' नामक कोही ब्राह्मण थिए । उनले भृगुकी छोरी अति राम्रो ॥३३॥ 'दीक्षा' नामकी कन्यालाई हे राजन् ! वेदमा बताइएका विधिले विवाह गरे । केही समय

विधिना नृप ॥ तस्याः कालेन संजाता दुहिताऽनन्तलक्षणा ॥ ३४ ॥ शीला नाम्नी सुशीला सा वर्धते पितृवेश्मनि ॥ माता च तस्याः कालेन ज्वरदाहेन पीडिता ॥ ३५ ॥ विनष्टा सा नरीतीरे ययौ स्वर्गं पतिव्रता ॥ सुमन्तुस्तु ततोऽन्यां वै धर्मपुंसः सुतां पुनः ॥ ३६ ॥ उपयेमे विधानेन कर्कशा नाम नामतः ॥ दुःशीलां कर्कशां चण्डीं नित्यं कलहकारिणीम् ॥ ३७ ॥ साऽपि शीला पितुर्गेहे गृहार्चनपरावुभौ ॥ कुड्यस्तंभबहिर्मोरदेहलीतोरणादिषु ॥ ३८ ॥ वर्णकैश्चित्रमकरोन्नीलपीतसितासितैः । स्वस्तिकैः शंखपद्मैश्च सार्चयन्ती पुनः पुनः ॥ ३९ ॥

वा० १३३

अ०क०

१२

वितेपछि ती दीक्षाकी अनन्त लक्षणले युक्त भएकी छोरी जन्मिन् ॥३४॥ 'शीला' नामकी सुशीला त्यो कन्या बाबुका घरमा बढ्न लागिन् । ती शीलाकी आमा केही दिनपछि जरोको पोलाइले पीडित भएर ॥३५॥ ती पतिव्रता नदीका तीरमा नाशिइन् (मरिन्) र स्वर्ग गइन् । त्यसपछि सुमन्तुले फेरि नामैले पनि 'कर्कशा' नाम भएकी, शील-स्वभाव नभएकी, साँच्चैकी कर्कशा, झगडालु सधैं बाझिरहने यस्ता धर्मपुरुषकी छोरीसित विधिपूर्वक अर्को बिहे गरे ॥ ३६-३७ ॥ तो शीला छोरी पनि बाबुका घरमा पूजा-आजाको काममा लागेकी भइन् । भित्ता-खाँभा-दैलो, पल्ला-साँधारहरूमा ॥ नीला-पहेंला-सेता-खैरा रंगीन वस्तुहरूद्वारा चित्र तथा स्वस्तिक अनि शंख, पद्मको चित्र पनि बनाउने गर्थिन् र ती बारम्बार पूजा गर्ने गर्थिन् ॥३८-३९॥ तब यस्तै किसिमले धेरै समय बितेपछि कुमारी अवस्थामा

ततः काले बहुगते कौमारवशवर्तिनी ॥ एवं सा वर्धते शीला पितृवेश्मनि मंगला ॥ ४० ॥
पित्रा दृष्टा तदा तेन स्त्रीचिह्न यौवने स्थिता ॥ तां दृष्ट्वा चिन्तयामास वराननुगुणान्भुवि ॥
कस्मै देया मया कन्या विचार्येति सुदुःखिताः ॥ ४१ ॥ एतस्मिन्नेव काले तु मुनिर्वेद-
विदांवरः ॥ कन्यार्थी चागतः श्रीमान्कौडिन्यो मुनिसत्तमः ॥ ४२ ॥ उवाच रूपसंपन्नां त्वदीयां
तनयां वृणे ॥ पिता ददौ द्विजेन्द्राय कौडिन्याय शुभे दिने ॥ ४३ ॥ गृह्योक्तविधिना पार्थ
विवाहमकरोत्तदा ॥ मंगलाचारनिर्घोषं तत्र कुर्वन्ति योषितः ॥ ४४ ॥ ब्राह्मणः स्वस्तिवचनं

रहने भहन् । मङ्गल काम गर्नें त्यो शीला यसै किसिमले बाबुका घरमा बढ्दथिन् ॥४०॥ तब यस्तैमा बाबुले उसलाई तरुनी भएकी,स्त्रीका चिह्नहरू पर्ष्टएकी देखे। त्यसलाई देखेर 'मैले यो कन्या कसलाई दिने !' यस्तो सोच्तै अत्यन्त दुःखित भएर शीलाको जस्तै गुण भएको योग्य वरका लागि मनमा चिन्ता गर्न थाले ॥४१॥ यसै समयमा नै वेद जान्नेहरूमा अति श्रेष्ठ,मुनिहरूमा अति सज्जन, राम्रा लायक 'कौडिन्य' नामका मुनि कन्यार्थी (कन्या-माँग्ने) भएर उहाँ आए र ॥४२॥ (तपाईंकी रूपवती छोरीलाई म माँग्दछु) भने । बाबुले पनि शुभ साइतको दिनमा ब्राह्मणश्रेष्ठ कौडिन्यलाई छोरी दिए ॥४३॥ हे राजन् ! तब गृहसूत्रमा बताएका विधिले विवाह गरे । यस विवाहमा स्त्रीहरूले मङ्गलका आचारको गान गर्दा भए ॥ ब्राह्मणहरूले वेदका मन्त्रले स्वस्तिवाचन र बन्दीजन (भाट)-हरूले

जयघोषं च वन्दिनः । निर्वर्त्योद्वाहिकं सर्वं प्रोक्तवान्कर्कशां द्विजः ॥ ४५ ॥ सुमन्तुरुवाच ॥ किंचिद्दायादिकं देयं जामातुः पारितोषिकम् ॥ तच्छ्रुत्वा कर्कशा क्रुद्धा प्रोत्सार्य गृहमण्डनम् ॥ ४६ ॥ पेटके सुस्थिरं बद्ध्वा स्वगृहं गम्यतामिति ॥ खोज्यावशिष्टचूर्णेन पाथेयं च चकार सा ॥ ४७ ॥ उवाच वित्तं नैवास्ति गृहे पश्य यदि स्थितम् ॥ तच्छ्रुत्वा विमनाः पार्थ संयतात्मा मुनिस्तदा ॥ ४८ ॥ कौडिन्योऽपि विवाह्यैनां पथि गच्छञ्छनैः शनैः ॥ शीलां सुशीलामादाय नवोढां गोरथेन हि ॥ ४९ ॥ ददर्श यमुनां पुण्यां तामुत्तीर्य तटे रथम् ॥ संस्थाप्यावश्यकं

जय-जय ध्वनिले गुञ्जायमान गर्दा भए। विवाहको सबै काम सकेपछि सुमन्तु बाहुनले कर्कशा कान्छी स्वस्नीलाई भने- ॥४४-४५॥ सुमन्तुले भने-(ज्वाइँलाई पुरस्कारस्वरूप केही द्रव्य आदि दिनुपर्छ) त्यो कुरो सुनेर क्रुद्ध भएकी कर्कशाले घरका गरगहना रुपियाँ पैसा खञ्याकखुरुक पारी ॥६४॥ पटुकामा बलियोसित बाँधी (जानुहोस्)यस्तो भनी र बचेको खानाको धूलोमूलो नै बाटाको सामल ठीक गरिदिई र उसले ॥४७॥(धन छँदै छैन, यदि घरमा छ भने हेर)भनी। हे राजन्! तब त्यो सुनेर खिन्न मन भएका संयमी मुनि ॥४८॥ कौडिन्य पनि शीलालाई विवाह गरेर नयाँ दुलही सुशीला शीलालाई लिएर गोरुगाडाद्वारा बाटामा बिस्तार-बिस्तार जाँदा॥४९॥कुनै दिन पुण्य यमुना नदीलाई देखेर र त्यहीं उत्रिएर

कर्तुं गतः शिष्यान्नियुज्य वै ॥ ५० ॥ मध्याह्ने भोज्यवेलायां समुत्तीर्य सरित्तटे ॥ ददर्श शीला सा स्त्रीणां समूहं रक्तवाससम् ॥ ५१ ॥ चतुर्दश्यामर्चयन्तं भक्त्या देवं जनार्दनम् ॥ उपगम्य शनैः शीला प्रपच्छ स्त्रीकन्दबकम् ॥ ५२ ॥ आर्याः किमेतन्मे ब्रूत किन्नाम व्रतमीदृशम् ॥ ता ऊचुर्योषितस्तां तु शीलां शीलविभूषणाम् ॥ ५३ ॥ अनन्तव्रतमेतद्धि व्रतेऽनन्तस्तु पूज्यते ॥ साऽब्रवीदहमप्येतत्करिष्ये व्रतमुत्तमम् ॥ ५४ ॥ विधानं कीदृशं तत्र किं दानं कोऽत्र पूज्यते । स्त्रिय ऊचुः ॥ शीले सदन्नप्रस्थस्य पुंनाम्ना संस्कृतस्य च ॥ ५५ ॥ अर्धं विप्राय दातव्यमर्ध-

---

किनारामा रथ राखेर, शिष्यहरूलाई कुर्न खटाएर नगरी नहुने नित्यकर्म गर्न गए ॥५०॥ मध्याह्नमा खाने वेलमा नदीको किनारामा उत्रिएपछि त्यस शीलाले त्यहाँ लाल लुगा लाएका ललनाहरूको समूह देखी ॥ ५१ ॥ चतुर्दशीमा भक्तिपूर्वक जनार्दन भगवानलाई पूजा गरिरहेका स्त्रीहरूभाठौं बिस्तारै गएर सोधी ॥ ५२ ॥ हे श्रेष्ठ स्त्रीहो ! यो के हो ! के नामको यो यस्तो व्रत हो ? मलाई भनिदिनुहोस् ! तब ती स्त्रीहरूले पनि शीलाले शोभिएकी त्यस शीलालाई भने—॥ ५३ ॥ यो अनन्तको व्रत हो; यस व्रतमा (अनन्त) भगवान् पूजिनुहुन्छ । तब उस शीलाले भनी—म पनि यो उत्तम व्रत गर्नेछु ॥ ५४ ॥ यस व्रतमा विधान कस्तो छ ? के दान गरिन्छ ? यसमा कुन देवता पूजिन्छन् ? तब ती स्त्रीहरूले भने—हे शीला ! पुन्नामले अर्थात फटकी निफनी बिनी केलाइएको असल एक पसेरी अन्नमध्ये ॥ ५५ ॥ आधा ब्राह्मणलाई दिनू र आधाबाट आफूले भोजन गर्नू । कत्ति पनि कञ्जू-

मात्मनि भोजनम् ॥ शक्त्या च दक्षिणां दद्याद्वित्तशाठ्यविवर्जितः ॥ ५६ ॥ कर्तव्यं च सरित्तीरे सदाऽनन्तस्य पूजनम् ॥ शेषं कुशमयं कृत्वा वंशपात्रे निधाय च ॥ ५७ ॥ स्नात्वाऽनन्तं समभ्यर्च्य मण्डले गंधदीपकैः ॥ पुष्पैर्धूपैश्च नैवेद्यैर्नानापक्वान्नसंयुतैः ॥५८॥ तस्याऽग्रतो दृढं न्यस्य कुंकुमाक्तं सुदोरकम् ॥ चतुर्दशग्रन्थियुक्तं गन्धाद्यैरर्चयेच्छुभैः ॥ ततस्तु दक्षिणे पुंसां स्त्रीणां वामे करे न्यसेत् ॥ ५९ ॥ अनन्त-संसारमहासमुद्रे मग्नं समभ्युद्धर वासुदेव ॥ अनन्तरूपे विनियोजयस्व ह्यनन्तसूत्राय नमो नमस्ते ॥ ६० ॥ अनेन दोरकं बद्ध्वा कथां

स्याइँ नगरीकन शक्ति अनुसार दक्षिणा दिनू ॥५६॥(अन्नत)को पूजा गर्दा सधैं नदीका तीरमा नै गर्नू । कुशैकुशको शेष बनाएर,चोयाले बनाएको भाँडामा राखेर ॥५७॥ अनन्तलाई न्वाहेर पूजामण्डपमा राखी चन्दन अक्षता फूल धूप दीप किसिम-किसिमका पक्वान्नले युक्त नैवेद्यले राम्रोसित पूजा गरेर ॥५८॥ उनै शेषको अगाडि चौध पवित्र गाँठा बनाएको, कुकुमले रङाएको डोरी राखेर चन्दनादि षोडशोपचारले राम्रोसित पूजा गर्नू र त्यसपछि पुरुषहरूको दाहिने,स्त्रीहरूको बायाँ पाखुरामा धारण गर्नु ॥५९॥ 'अनन्तसंसारमहासमुद्रमा. डुबीरहेको छु उतार देव ! मिलाउ मैलाइ अनन्तरूपमा अनन्त डोरो ! छ नमो नमस्ते ॥ ६० ॥ यस मन्त्रले त्यो डोरो बाँधेर हरिको यो कथा सुनेर, अनन्त विश्वरूप

श्रुत्वा हरेरिमाम् ॥ ध्यात्वा नारायणं देवमनन्तं विश्वरूपिणम् ॥ ६१ ॥ भुक्त्वा चान्ते व्रजेद्वेश्म भद्रे प्रोक्तं व्रतं तव ॥ श्रीकृष्ण उवाच ॥ एवमाकर्ण्य राजेन्द्र प्रहृष्टेनान्तरात्मना ॥ ६२ ॥ साऽपि चक्रे व्रतं शीला करे बद्ध्वा सुदोरकम् ॥ पाथेयमर्धं विप्राय दत्त्वा भुक्त्वा स्वयं ततः ॥ ६३ ॥ पुनर्जगाम संहृष्टा गोरथेन स्वकं गृहम् ॥ भर्त्रा सहैव शनकैः प्रत्ययस्तत्क्षणादभूत् ॥ ६४ ॥ तेनाऽनन्तव्रतेनास्य बभौ गोधनसंकुलम् ॥ गृहाश्रमं श्रियाजुष्टं धनधान्यसमन्वितम् ॥ ६५ ॥ आकुलं व्याकुलं रम्यं सर्वदाऽतिथिपूजनैः ॥ सापि माणिक्यकाञ्चीभिर्मुक्ताहारैर्विभूषिता

भगवान् नारायणलाई ध्यान गरेर ॥६१॥ अन्तमा प्रसाद खाएर घर जानु । हे भद्रे शीला ! तिमीलाई हामीले व्रतविधि बतायौं ॥ तब श्रीकृष्णले भन्नुभयो—हे राजेन्द्र युधिष्ठिर ! प्रसन्न चित्तले यस्तो व्रत-विधि सुनेर ॥ ६२ ॥ उस शीलाले पनि व्रत गरी र बायाँ पाखुरामा अनन्त डोरो बाँधेर, आधा सामल ब्राह्मणलाई दिएर तब बचेकाबाट आफूले खाएर ॥ ६३ ॥ फेरि गोरुगाडाद्वारा खुशी मनले पतिका साथै बिस्तार-बिस्तार आफ्नु घर गई । त्यसै वेलादेखि यस व्रतको बारेमा विश्वास बढ्दो भयो ॥६४॥ त्यसै अनन्तव्रतका प्रभावले त्यस शीलाको गृहाश्रम धन-धान्य-सहित लक्ष्मीले टञ्च भएको, वस्तुभाउभरिएको, सधैंको अतिथिपाहुनापासालाई गरिने सत्कारले घञ्चमञ्च भै शोभिएको हुँदो भयो। शीला पनि मणि जडेका काञ्ची (करधनी)-हरूको र मोतीका हारहरूले सिंगारिएकी ॥६५-६६॥ धौताका

॥६६॥ देवाङ्गनेव संपन्ना सावित्रीप्रतिमाऽभवत् ॥ विचचार गृहे भर्तुः समीपे सुखरूपिणी ॥६७॥
कदाचिदुपविष्टाय दृष्टो बद्धः स दोरकः ॥ शीलाया हस्तमूले तु भर्त्रा तस्या द्विजन्मना
॥ ६८ ॥ किमिदं दोरकं शीले मम वश्याय कल्पितम् । धृतं सुदोरकं त्वेतत्किमर्थं ब्रूहि
तत्त्वतः ॥ ६९ ॥ शीलोवाच ॥ यस्य प्रसादात्सकला धनधान्यादिसंपदः ॥ लभ्यते मानवैश्चापि
सोऽनन्तोऽयं मया घृतः ॥ ७० ॥ शीलायास्तद्वचः श्रुत्वा भर्त्रा तेन द्विजन्मना । श्रीमदान्धेन
कौरव्य साक्षेपं त्रोटितस्तदा ॥ ७१ ॥ कोऽनन्त इमि मूढेन जल्पता पापकारिणा ॥ क्षिप्तो

बा० अ०क०
११९

स्त्रीहरू झैं सर्वसम्पन्न, सावित्री जस्तै पतिव्रता हुँदी भई आफ्ना घरमा, पतिका पासमा मजासित बसउठ गर्थीं ॥६७॥ कुनै वेला बसेकी शीलाको पाखुरामा बाँधेको अनन्त डोरो उसको पति कौडिन्य ब्राह्मणले देखेर भने–॥६८॥ हे शीला ! यो डोरो के हो ? मलाई वश पार्न रचिएको हो ? यो पूजा गरिएको डोरो केको लागि लाएको हो ? साँचो-साँचो भन ॥६९॥ तब शीलाले भनी-जसका कृपाले मनुष्यहरूले पनि धन-धान्य आदि सकल सम्पत्ति पाइन्छ, उही यो अनन्त मैले लाएको हुँ ॥७०॥ शीलाको त्यो कुरो सुनेर सम्पत्तिको मदले अन्धो भएको शीलाका लोग्ने त्यो बाहुनले हे युधिष्ठिर ! तब अनन्त न सनन्त, के यो त्यान्द्रो कसेको ? हटौ ! भन्दै छ्यास्नासम्म छ्यासेर त्यो डोरो छिनालिदियो ॥७१॥ उस मूढ पापीले 'को हो यो, अनन्त भनेको ?' भन्दै दन्किरहेको आगोमा त्यो त्यान्द्रो फ्याँकिदियो । तब हाय हाय ! गर्दै

ज्वालाकुले वह्नौ हांहा कृत्वा प्रधावती ॥ ७२ ॥ शीला गृहीत्वा तत्सूत्रं क्षीरमध्ये समाक्षिपत् ॥
तेन कर्मविपाकेन सा श्रीस्तस्य क्षयं गता ॥ ७३ ॥ गोधनं तस्करैर्नीतं गृहं दग्धं धनं गतम् ॥
यद्यथैवागतं गेह तत्तथैव पुनर्गतम् ॥ ७३ ॥ स्वजनैः कलहो नित्यं बन्धुभिस्ताडनं तथा
अनन्ताक्षेपदोषेण दारिद्र्यं पतितं गृहे ॥ ७५ ॥ न कश्चिद्वदते लोकस्तेन सार्धं युधिष्ठिर ॥
शरीरेणातिसंतप्तो मनसाऽप्यतिदुःखितः ॥ ७६ ॥ निर्वेदं परमं प्राप्तः कौडिन्यः प्राह तां प्रियाम्
कौडिण्य उवाच ॥ शीले ममेदमुत्पन्नं सहसा शोककारणम् ॥ ७७ ॥ येनातिदुःखमस्माकं

दौडिएकी ॥७२॥ शीलाले त्यो अनन्त डोरोलाई लिएर दूधमा हालिदिइन्। त्यसै कर्मका फलले उसको त्यो सम्पत्ति नाश भयो ॥७३॥ बस्तुभाउ चोरहरूले चोरेर लगे, घर डढ्यो, धन खतम भयो, जो जसरी घरमा आएको थियो, त्यो त्यसरी नै फेरि गयो ॥७४॥ रोजै दाजु-भाइसँग कलह हुन्थ्यो,त्यस्तै बन्धु-बान्धवसित कुटाकुट भइरहन्थ्यो। अनन्त फ्याँकिदिएको दोषले घरमा दारिद्र्य जाकियो ॥७५॥ हे युधिष्ठिर ! त्यस बाहुनसित कोही पनि मानिस बोल्दैनथ्यो । शरीरले पनि उ अति सन्तापियो (दुब्लायो) पनि मनले पनि अति दुःखित भयो ॥७६॥ यस्ता प्रकारले अत्यन्तै खिन्न भएका कौडिन्यले एक दिन ती प्रियालाई भने–कौडिन्यले भने–हे शीला ! मलाई एकाएक यो शोकको कारण उत्पन्न भयो ॥७७॥ जुन

जातः सर्वधनक्षयः ॥ स्वजनैः कलहो गेहे न कश्चिन्मां प्रभाषते ॥ ७८ ॥ शरीरे नित्यसंतापः खेदश्चेतसि दारुणः ॥ जानासि दुर्नयः कोऽत्र किं कृत्वा सुकृतं भवेत् ॥ ७९ ॥ प्रत्युवाचाथ तं शीला सुशीला शीलमण्डना ॥ शीलोवाच ॥ प्रायोऽनन्तकृताऽऽक्षेपपापसम्भवजं फलम् ॥ ८० ॥ भविष्यति महाभाग तदर्थं यत्नमाचर ॥ एवमुक्तः स विप्रर्षिर्जगाम मनसा हरिम् ॥ ८१ ॥ निर्वेदान्निर्जगामाऽथ कौडिन्यः प्रयतो वनम् ॥ तपसे कृतसंकल्पो वायुभक्षो द्विजोत्तमः ॥ ८२ ॥ अनन्तं मनसा ध्यात्वा क्व द्रक्ष्यामि च तं विभुम् ॥ यस्य प्रसादात्संजातमाक्षे-

---

कारणले हामीलाई अति दुःख भइरहेको छ, सारा धन नाश भयो, घरमा आपस्सँग झगडा हुन्छ, कोही पनि मसित बोल्दैन ॥७८॥ शरीरमा सधैं सन्ताप छ, चित्तमा सहि नसक्नु खेद छ । हे प्रिये, तिमी जान्दछयौ ? मबाट के अपराध भयो ? के गरेदेखि कल्याण होला ॥७९॥ तब शील नै भूषण भएकी सुशीला शीलाले ती बाहुनलाई जबाफ दिइन— शीलाले भनिन्-हुन सक्छ, अनन्तलाई निन्दा गरेको पापले पैदा भएको यो परिणाम ॥८०॥ होला । हे स्वामी । त्यसका लागि कोशिश गर्नु होस् । शीलाले यस्तो भनिएका ती विप्रर्षिले मनले हरिलाई संझँदै ॥८२॥ खिन्नताले गर्दा तब ती कौडिन्य घरबाट निस्कँका भएर र बनतिर प्रस्थान गरे। अनि तपस्याका लागि मनले निश्चय गरेका ती उत्तम ब्राह्मणले बतासको मात्र आहार गर्नें भई ॥८२॥ मनले अनन्त प्रभुलाई ध्यान गर्दै जसका कृपाले धन-धान्य परिपुर्ण भयो र जसलाई

पान्निधनं गतम् ॥ ८३ ॥ धनादिकं ममाऽतीव सुखदुःखप्रदायकम् ॥ एवं संचिन्तयन्सोऽयं बभ्राम गहने वने ॥ ८४ ॥ तत्रापश्यन्महाचूतं पुष्पितं फलितं द्रुमम् ॥ वर्जितं पक्षिसंघातैः कीटकोटिसमावृतम् ॥ ८५ ॥ तमपृच्छद् द्विजोऽनन्तः क्वचिद् दृष्टो महातरो ॥ ब्रूहि सौम्य ममातीव दुःखं चेतसि वर्तते ॥८६॥ सोऽब्रवीद्भद्र नाऽनन्तः क्वचिद्दृष्टो मया द्विज । एवं निराकृतस्तेन स जगामाऽथ दुःखितः ॥ ८७ ॥ क्व द्रक्ष्यामीति गच्छन्स गामपश्यत्सवत्सकाम् ॥ वनमध्ये प्रधावन्तीमितश्च पाण्डव ॥ ८८ ॥ सोऽब्रवीद्धेनुके ब्रूहि यद्यनन्तस्त्वयेक्षितः ॥ गौरु-

---

निन्दा गर्नाले सारा सम्पत्ति स्वाहा हुन गयो त्यस्ता विभु ईश्वरलाई म कहाँ देखुँला ॥८३॥ मेरा लागि धन-धान्य सम्पत्ति सुख दुःखका कारण भए अर्थात् पहिले सुख दिएर अहिले दुःखले सताए । यस्ता कुरा सोच्दै तब ती धना जङ्गलमा भट्कन थाले ॥८४॥ उहाँ उनले फुलेफलेको तर पटक्कै पक्षिपमूह नभएको,कडौरौं कीरैकारा छयाछ्याप्तिएको ठूलो आँपको रूख देखे ॥८५॥ तब ती वाहुनने'हे ठूला वृक्ष ! कहीं'अनन्त'लाई देख्यौ ?' भनी उसलाई सोधे । हे सुन्दर वृक्ष! मेरो मनमा असाध्यै दुःख छ, देखेको भए बताइदेऊ ॥८६॥ तब उसले भन्यो–हे भलादमी ब्राह्मण ! मैले कहिल्यै 'अनन्त' लाई देखेको छैन।' यसरी उसले खिन्न पारिएका उनी तब दुःखी हुँदै अगाडि बढे ॥७७॥ कहाँ देखुँला भनी गइरहेका उनले हे युधिष्ठिर ! वनका बीचमा यताउति हिंडिरहेकी वाच्छो-सहितकी गाईलाई देखेर ॥८८॥ उनले भने–हे गाई !

वाचाथ कौडिन्य नाऽनन्तं वेद्म्यहं द्विज ॥ ८९ ॥ ततो व्रजन्ददर्शाऽग्रे वृषभं शाद्वलस्थितम् ॥ दृष्ट्वा पप्रच्छ गोस्वामिन्ननन्तो वीक्षितस्त्वया ॥९०॥ वृषभस्तमुवाचेदं नानन्तो वीक्षतो मया। ततो व्रजन्ददर्शाऽग्रे रम्यं पुष्करिणीद्वयम् ॥ ९१ ॥ अन्योन्यजलकल्लोलैर्वीचिपर्यन्त-संगतम्। छन्नं कमलकह्लारैः कुमुदोत्पलमण्डितम् ॥ ९२ ॥ सेवितं भ्रमरैः हंसैश्चक्रैः कारण्ड-कैर्वकैः ॥ ते अपृच्छद् द्विजोऽनन्तो युवाभ्यामुपलक्षितः ॥ ९३ ॥ उचतुस्ते पुष्करिण्यौ नानन्तो वीक्षितो द्विज ॥ ततो व्रजन्ददर्शाऽग्रे गर्दभं कुञ्जरं तथा ॥९४॥ तावप्युक्तो द्विजेनेत्थं नेति ताभ्यां

यदि तिमीले अनन्तलाई देखेकी भए भन। तब ती गाईले कौडिन्यलाई भनिन्—हे ब्राह्मण, अनन्तलाइ म जान्दिन' ॥८१॥ तब त्यहाँबाट पनि अगाडि गइरहेका उनले घासमाथि बसेको साँढेलाई देखे। उसलाई देखेर—'हे गाईहरूका पति साँढे, तिमीले अनन्तलाई देख्यौ ?' भनी सोधे ॥९०॥ तब उस साँढेले उनलाई—'मैले अनन्तलाई देखेको छैन' यस्तो भन्यो। अनि त्यहाँबाट पनि अगाडि गइरहेका उनले—एकका बाद अर्को गरी उभिरहेका जलका छालहरूले र तरङ्गहरूले किनारैसम्म भरिएको, राता-सेता कमलहरूले ढाकिएको, अरू पनि किसिम-किसिमका कमलहरूले शोभिएको र भमरा-हाँस-चखेवा-कारण्डव-चकुल्लाहरूले सेविएको राम्रो-राम्रो दुइटा पोखरी देखे। तब ती बाह्मनले ती दुवै पोखरीलाई—'तिमीहरूले 'अनन्त'लाई देख्यौ ?' भनी सोधे ॥९१-९३॥ तब ती दुवै पोखरीले 'हे बाजे। खोइ। अनन्तलाई त देखेनौं' भने। त्यहाँ-बाट पनि अगाडि गइरहेका उनले गधा र हात्तीलाई देखे ॥९४॥ ती दुइलाई पनि ब्राह्मणले उस्तै सोधे, उनीहरूले 'अहँ'

निवेदितम् ॥ एवं स पृच्छन्नष्टांशस्तत्रैव विषसाद ह ॥ ९५ ॥ कौडिन्यो विह्वलीभूतो निराशो जीविते नृप ॥ दीर्घमुष्णं च निःश्वस्य पपात भुवि भारत ॥ ९६ ॥ प्राप्य संज्ञां वने तस्मिन्नुत्थाय स द्विजः ॥ नूनं त्यक्ष्याम्यहं प्राणानिति संकल्प्य चेतसि ॥९७॥ यावदुद्बन्धनं वृक्षे चक्रे तावद्युधिष्ठिर ॥ कृपयाऽनन्तदेवोऽस्य प्रत्यक्षं समजायत ॥ ९८ ॥ वृद्धब्राह्मणरूपेण इत एहीत्युवाच तम् ॥ प्रगृह्य दक्षिणे पाणौ गुहायां प्रविवेश तम् ॥९९॥ स्वां पुरीं दर्शयामास दिव्यसिंहासने शुभे ॥१००॥ पार्श्वस्थं शंखचक्राब्जगदागरुडशोभितम् ॥ विभूतिभेदैश्चानन्तैराजन्त-

---

भने । यस्ता किसिमले सोद्धै हिंडेका उनी निराश भएर उहीं थ्याच्चै बसे ॥ ९५॥ हें युधिष्ठिर । तब विह्वल भएका ती कौडिन्यले जीवनमा निराश भयेर अर्थात् बाँच्नु नै बेकार ठानेर हे युधिष्ठिर ! तातो लामू सास फरेर अर्थात् खुऽऽऽऽय गरेर भक्कानिंदै भुईंमा पच्छारिये ॥९६॥ फेरि होशमा आयेपछि 'अनन्त' यस्तो बड़वड़ाउँदै उठेर ती बाहुनले 'अब म पक्कै प्राण त्याग्छु' मनमा यस्तो निश्चय गरेर ॥९७॥ जसै रूखमा झुण्डिन ठीक गरेथे, हे युधिष्ठिर, त्यति नै खेर कृपा गरेर अनन्त भगवान् उनका सामु प्रत्यक्ष भये ॥९८॥ बूढो ब्राह्मणको रूप लियेका अनन्त भगवान्ले कौडिन्यलाई 'यता आऊ' भने र उनको दाहिने हातमा समातेर उनलाई लिंदै गुफाभित्र पसे र ती बाहुनलाई ॥९९॥ दिव्य नारी रत्नरहरूले भरियेको आफ्नू पुरी (शहर) देखाइदिये र त्यसै पुरीमा आरामदायी दिव्य सिंहासनमा आफू बसेको, ॥१००॥ बगलमा

ममितौजसाम् ॥ दर्शयामास विप्राय विश्वरूपमनन्तकम् ॥ १०१ ॥ कौस्तुभेन विराजन्तं वनमालाविभूषितम् ॥ १०२ ॥ तं दृष्ट्वा देवदेवेशमनन्तमपराजितम् ॥ स्तूयमानो जगादोच्चैर्जय-शब्दपुरःसरम् ॥ १०३ ॥ पापोऽहं पापकर्माऽहं पापात्मा पापसंभवः ॥ त्राहि मां पुण्डरीकाक्ष सर्व-पापहरो भव ॥ १०४ ॥ अद्य मे सफलं जन्म जीवितं च सुजीवितम् । यत्तवांघ्र्यब्जयुगले मन्मूर्धा भ्रमरायते ॥ १०५ ॥ तच्छ्रुत्वाऽनन्तदेवेशः प्राह सुस्निग्धया गिरा ॥ मा भैस्त्वं ब्रूहि विप्रेन्द्र यत्ते मनसि वर्तते ॥ १०६ ॥ कौडिन्य उवाच ॥ मया भूत्यवलिप्तेन त्रोटितोऽनन्तदोरकः ॥

रहेका शंख-चक्र-कमल-गदा-गखडहरूले शोभिएको, यति भनेर भनि नसक्नु अनेक प्रकारका ऐश्वर्यहरूले चमचम चम्किएको, अङ्कलै काट्न नसकिने शक्ति भएको, कौस्तुभमणिले झल्किएको, वनमाला (फूलका मालाहरूले) सिंगारिएको, छेउ नभएको विशाल आफ्नो विश्वरूपकन बाहुनलाई देखाइदिए ॥१०१-१०२॥ तब द्यौताका द्यौताका द्यौता उनका पनि स्वामी, कसैले पनि पार पाइ नसक्नु अनन्त त्यो विश्वरूपलाई देखेर बडो जोडले (जय जय) कारपूर्वक ढोग्दै बाहुनले भने-॥१०३॥ हे पुण्डरीकाक्ष, म पापी हुँ, म पाप कर्म गर्ने हुँ, पापी मनको छु, पापैपापले भरिएको छु, मलाई रक्षा गर्नुहोस्, मेरा सारा पाप हर्नें हुनुहोस ॥१०४॥ मेरो जन्म आज सफल भयो, जिउनु पनि असल जिउनु भयो यानी जीवन सफल भयो। जो कि तपाईका जोडै चरणमलमा मेरो शिर भमरो हुन पाएको छ अर्थात् साक्षात् तपाईका चरणकमलमा ढग्नो पाएको छु ॥ १०५ ॥ त्यस्तो स्तुति र प्रार्थना सुनेर अनन्त भगवान्ले मधुर वाणीले 'हे उत्तम ब्राह्मण, तिमी नडराऊ, तिम्रो मनमा जे इच्छा छ, भन' भन्नुभयो ॥ १०६ ॥ तब कौडिन्यले भने-ऐश्वर्यका मदले बुद्धि टालिएको मैले अनन्तको

तेन पापविपाकेन भूतिर्मे प्रलयं गता ॥ १०७ ॥ स्वजनैः बलहो गेहे न कश्चिन्मां प्रभाषते ॥
निर्वेदाद् गमितोऽरण्ये तव दर्शनकांक्षया ॥ १०८ ॥ कृपया देवदेवेश त्वयाऽऽत्मा संप्रदर्शितः ॥
तस्य पापस्य मे शान्तिं कारुण्याद्वक्तुमर्हसि ॥ १०९ ॥ श्रीकृष्ण उवाच ॥ तच्छ्रुत्वाऽनन्तदेवेश
उवाच द्विजसत्तमम् ॥ भक्त्या संतोषितो देवः किं न दद्याद्युधिष्ठिर ॥ ११० ॥ अनन्त उवाच ॥
स्वगृहे गच्छ कौडिन्य मा विलम्बं कुरु द्विज ॥ चरानन्त-व्रतं भक्त्या नव वर्षाणि पञ्च च ॥ १११ ॥
सर्वपापविशुद्धाऽऽत्मा प्राप्स्यसे सिद्धिमुत्तमाम् ॥ पुत्रपौत्रान्समुत्पाद्य भुक्त्वा भोगान् यथेप्सितान्

डोरो छिनालिदिएँ, त्यसै पापका परिणामले मेरो ऐश्वर्य बिलायो ॥१२७॥ घरमा आफन्तसँग झगडा भइरहन्छ, कोही बान्धव पनि मसित बोल्दैन। यिनै कारणले खिन्न भएर तपाईका दर्शनको इच्छाले जंगलतिर हिंडें ॥ १०८ ॥ हे देव-देवेश, कृपा गरेर तपाईले आत्मस्वरूप देखाइदिनुभयो। अब कृपापूर्वक मलाई त्यस पापको शान्ति बताउन योग्य हुनुहुन्छ ॥१०९॥ फेरि श्रीकृष्णले भन्नुभयो—त्यस्तो कुरो सुनेर अनन्त भगवान्ले ती सज्जन ब्राह्मणलाई भन्नुभयो—हे युधिष्ठिर, भक्तिले प्रसन्न पारिनुभएको भगवान्ले के दिनुहुन्न ! ॥११०॥ अनन्तले भन्नुभयो—'हे कौडिन्य, आफ्नो घर जाऊ, हे ब्राह्मण ढिलो नगर। भक्तिपूर्वक चौध वर्षसम्म अनन्तको व्रत गर ॥१११॥ तब तिमी तमाम पापबाट छुटेर अति शुद्ध आत्मावाला भै उत्तम सिद्धि पाउनेछौ। धेरै छोरा नाति जन्माएर, चाहेकुताबिकको भोगहरू भोगेर ॥११२॥ मर्नें बेलामा पनि मेरो स्मरण

॥ ११२ ॥ अन्ये मत्स्मरणं प्राप्य मामुपेष्यत्यसंशयम् ॥ अन्यं च ते वरं दद्मि सर्वलोकोप-
कारकम् ॥ ११३ ॥ इदमाख्यानकवरं शीलानन्तव्रतादिकम् ॥ करिष्यति नरो यस्तु कुर्वन् व्रत-
मिदं शुभम् ॥ ११४ ॥ सोऽचिरात्पापनिर्मुक्तः प्राप्नोति परमां गतिम् ॥ गच्छ विप्र गृहं शीघ्रं
यथा येनागतो ह्यसि ॥ ११५ ॥ कौडिन्य उवाच ॥ स्वामिन्पृच्छामि ते ब्रूहि किंचित्कौतूहलं
मया ॥ अरण्ये भ्रमता दृष्टं तद्वदस्व जगद्गुरो ॥ ११६ ॥ यश्चूतवृक्षः कस्तत्र का गौः को
वृषभस्तथा । कमलोत्पलकह्लारैः शोभितं सुनमोहरम् ॥ ११७ ॥ मया देव महारण्ये कि

पाएर निश्चय नै मैमा प्राप्त हुनेछौ । सबै लोकको उपकार हुने अर्को पनि वर तिमीलाई दिन्छु ॥११३॥ जो मनुष्य कल्याण-
कारी यो व्रत गर्दै शीलाले अनन्तव्रत गरेदेखि अहिलेसम्मको यो श्रेष्ठ आख्यान (कथा) सुन्ने गर्छ भने ॥११४॥ त्यो
मानिस चाँडे नै पापबाट छुटेर श्रेष्ठ उत्तम गति पाउँदछ । तसर्थ हे ब्राह्मण, जसरी जुन बाटो गरी आएका हौ उसै गरी
चाँडो घर जाऊ ॥ ११५ ॥ तब फेरि कौडिन्यले भने–हे मालिक, तपाईंलाई केही सोद्धछु, कहिबविसयोस् । जंगलमा
भट्कँदा मैले आश्चर्य देखें, हे जगद्गुरु, त्यसबारे बताइबविसयोस् ॥११६॥ त्यस जंगलमा जो आँपको रूख थियो त्यो
को हो ? गाई को हुन् ? त्यस्तै त्यो साँढे को हो ? राता-सेता-रङबिरङका कमलफूलले शोभिएकोले एकदम मनै हर्ने ॥११७॥
ती दुइ पोखरी–अटउयको जंगलमा जो मैले देखें–त्यो के हो ? गधा को हो ? त्यो हाथी को हो ? ती बूढा ब्राह्मणश्रेष्ठ

तत्पुष्करिणीद्वयम् ॥ कः खरः कुञ्जरः कोऽसौ कोऽसौ वृद्धो द्विजोत्तमः ॥ ११८ ॥ अनन्त उवाच ॥ स चूतवृक्षो विप्रोऽसौ वेदविद्या-विशारदः ॥ विद्या न दत्ता शिष्येभ्यस्तोनाऽसौ तरुतां गतः ॥ ११९ ॥ या गौर्वसुन्धरा दृष्टा सफला या त्वया द्विज । वृषो धर्मस्त्वया दृष्टः शाद्वलेयः समास्थितः ॥ १२० ॥ धर्माधर्मव्यवस्थानं तच्च पुष्करिणीद्वयम् ॥ ब्राह्मण्यौ केचिदप्यास्तां भगिन्यौ ते परस्परम् ॥ १२१ ॥ धर्माधर्मादि यत्किंचित्तो निवेदयतो मिथः ॥ विप्राय न क्वचि-द्दत्तमतिथौ दुर्बलेऽपि वा ॥ १२२ ॥ भिक्षा दत्ता न चार्थिभ्यस्तेन पापेन कर्मणा ॥ वीचि-

---

को हुन् ? ॥ ११८ ॥ तब अनन्तले भन्नुभयो—त्यो आँपको रूख, उनी पहिले वेदविद्यामा विद्वान् ब्राह्मण थिए । उनले शिष्यहरूलाई विद्या दिएनन्, त्यसैले उनी रूख भए ॥११९॥ हे ब्राह्मण ! तिमीले जुन बाच्छो सहितकी गाई देख्यौ, ती (पृथ्वी) हुन् तिमीले देखिएको साँढे, जो धाँसरूप सत्यमाथि बसेको थियो त्यो, (धर्म) हो ॥१२०॥ ती दुइ पोखरी धर्म र अधर्मको व्यवस्था हुन्, पहिले ती दिदी-बहिनी हुनै ब्राह्मणी थिए, परस्परमा ॥ १२१ ॥ यौटीले अर्कोसित दुवै धर्म-अधर्मबारे कच्याङकुचुङ भनिरहन्थे । तर ब्राह्मणलाई, पाहुना र अशक्तहरूलाई पनि कहिल्यै केही दिएनन् ॥१२२॥ माँग्ने-

कण्ठोत्तमालाभिर्गच्छन्तस्ते परस्परम् ॥ १२३ ॥ खरः क्रोधस्तथा दृष्टः कुञ्जरो मद उच्यते ॥
ब्राह्मणोऽसावन्तोऽहं गुहा संसारगह्वरम् ॥ १२४ ॥ इत्युक्त्वा देवदेवेशस्तत्रैवान्तरधीयत ॥
स्वप्नप्रायं तु तद्दृष्ट्वा ततः स्वगृहमागतः ॥ १२५ ॥ कृत्वाऽनन्तव्रतं सम्यक् नव वर्षाणि पञ्च
च ॥ भुक्त्वा सर्वमनन्तेन यथोक्तं पाण्डुनन्दन ॥ १२६ ॥ अन्ते च स्मरणं प्राप्य गतोऽनन्तपुरे
द्विजः ॥ तथा त्वमपि राजर्षे कथां शृण्वन् व्रतं कुरु ॥ १२७ ॥ यद्वै चतुर्दशे वर्षे फलं प्राप्तं
द्विजन्मना । वर्षैकेन तदाप्नोसि कृत्वा सांख्यानकं व्रतम् ॥ १२८ ॥ एतत्ते कथितं भूप व्रताना-

ब्रा० १०९

अ० क०

हरूलाई पनि भिक्षा दिएनन्, त्यसै पाप कर्मले गर्दा तरङ्ग र छालाका ताँती भएर ती दिदी-बहिनी यता र उता गइरहन्छन ॥ १२३ ॥ त्यस्तै, तिमीले देखेको गधा 'क्रोध' हो र हात्तीचाहिं घमण्ड हो । उ ब्राह्मणचाहिं मै अनन्त हुँ, गुफाचाहिं संसाररूपी ओडार हो ॥१२४॥ यति भनिसकेपछि देवदेवेश अनन्त प्रभु तुरुन्तै नदेखिने हुनुभयो । सपना जस्तो त्यो सब घटना देखेर तब कौडिन्य आफ्नू घर आए ॥ १२५ ॥ अनि चौध वर्षसम्म राम्रोसित अनन्तको व्रत गरेर हे पान्डुनन्दन युधिष्ठिर ! अनन्तले कहेमुताबिक सारा भोग भोगेर ॥ १२६ ॥ अन्तमा मरेपछि पनि ती ब्राह्मण अनन्त भगवान्कै पुरमा गए । हे राजर्षि युधिष्ठिर ! त्यस्तै तपाईं पनि कथा सुन्ने गर्दै यो अनन्तको व्रत गर्नुहोस् ॥१२७॥ चौध वर्षमा ब्राह्मणले जो फल पाए त्यो फल कथाश्रवणसहित यो गरेर एकै वर्षमा तपाईं पाउनुहुनेछ ॥ १२८ ॥ हे राजन् ! व्रतहरूमा यो एक

मुत्तमं व्रतम् । यत्कृत्वा सर्वपापेभ्यो मुच्यते नाऽत्र संशयः ॥ १२९ ॥ येऽपि शृण्वन्ति सततं पठ्यमानं पठन्ति ये ॥ तेऽपि पापविनिर्मुक्ताः प्राप्स्यन्ति च हरेः पदम् ॥ १३० ॥ संसारसागरगुहासु सुखं विहर्तुम् वाञ्छन्ति ये कुरुकुलोद्भव शुद्धसत्त्वाः ॥ संपूज्य च त्रिभुवनेशमनन्तदेवं बध्नन्ति दक्षिणकरं वरदोरकं ते ॥ १३१ ॥

॥ इत्यनन्तव्रतकथा समाप्ता ॥

उत्तम व्रत तपाईंलाई कहियो । जुन व्रत गरेर मानिस सबै पापबाट छुट्तछ, यसमा कुनै शंका छैन ॥ १२९ ॥ यो कथा जो हमेशा पढ्दछन् र पढिरहेका यो कथा जो बरम्बार सुन्दछन्, ती पनि पापहरूबाट छुटेर हरिको पदमा पुग्नेछन् ॥ १३० ॥ हे कुरुकुलमा जन्मेका महाराज ! जो शुद्ध चित्तवाला प्राणी यो संसाररूपी सागरको गुफा (कुर) मा सुखपूर्वक विहार गर्न चाहन्छन् ती तीनै भुवनका मालिक 'अनन्त' भगवान्लाई पूजा गरेर दाहिनो पाखुरामा अनन्त नामको उत्तम डोरो बाँधून् ॥ १३१ ॥ भनी कृष्णले युधिष्ठिर महाराजलाई बताउनुभएको, व्यासजीले सूतजीलाई कहनुभएको, सूतजीले शौनकादिहरूलाई सुनाउनुभएको सोही कथा हे श्रोतागणहो ! मैले आफ्नो बुद्धि-अनुसार तपाईंहरूलाई सुनाएँ ॥ भन्नुहोस् 'श्रीकृष्ण भगवान्को जय' ।

॥ इति अनन्तव्रतकथा समाप्त ॥

* १७–अथ शरत्कालीय-नवरात्र-पूजाविधिः *

तत्रादौ प्रतिपदि कृत्यम् ॥ तत्र निर्णयः ॥ अमा-युक्ता न कर्तव्या प्रतिपत्पूजने मम । मुहूर्त्तमात्रे कर्तव्य द्वितीयादिगुणान्विते ॥ इतिवचनात् । पुनः । देशभङ्गो भवेत्तत्र दुर्भिक्ष्यं चोपजायते । नन्दायां दर्शयुक्तायां यत्र स्यात् मम पूजनम् ॥ इतिवचनात् । भार्गवार्चन-चन्द्रिकायाम् । त्वाष्ट्रवैधृतियुक्ता चेत्प्रतिपत् चण्डिकाऽर्चने । तयोरन्ते विधातव्यं कलशारोपणं गृहे ॥ इतिवाक्यात् । चित्रानक्षत्रं वैधृतियोगं अमायुक्तप्रतिपत्तिथिं च वर्जयित्वा शुद्धप्रतिपत्तिथौ अथवा द्वितीयातिथौ घटस्थापनं कुर्यात् ॥ यदि तु प्रतिपल्लुप्ता तदाऽमा-यामपि कार्य्यम् ॥ रात्रौ स्थापनं कुर्यान्न च कुम्भाभिषेचनमिति मत्स्यपुराणवाक्यात् । रात्रौ घटस्थापनविसर्जनं च नैव कुर्यात् ॥ तथा प्रयोगः–प्रातः समये स्नानसंध्यादि नित्यकृत्य कर्म कृत्वा कदल्यादिस्तम्भैर्वितानतोरण - वस्त्र - वेष्टित - मण्डिते दुर्गागृहे चतुरस्त्रचतुर्हस्त वेदिकोपरि सर्वतोभद्रादिमण्डिते शुद्धगूढभूमौ चन्दनाक्षतपुष्प - धूप - दीप - नैवेद्य - कुशतिल जलादिकं सम्पूर्णसामग्रीं संपाद्य कर्मारम्भे दीपपूजनमित्याचारः ॥ आचम्य कर्मपात्रं कृत्वा

कुशादीन्यादाय ॥ ॐ तत्सत् ३ ॐ विष्णुः ३ इत्यादि देशकालौ संकीर्त्य अद्येहे-
त्यादि अमुकगोत्रस्य सदारापत्यस्याऽमुकशर्मणो मम अद्यप्रभृति नवमोपर्यन्तं उपवासाद-
न्यतरनियमैरिष्टदेवताप्रीतिद्वारा भ्रातृवर्गसंपत्तिसिद्धये नवरात्रव्रतमहं करिष्ये ! तदंगतया
करिष्यमाण - नवदिनपर्यन्तमहर्निशं दीपप्रज्वालनादि नवरात्रव्रतकर्मणि निर्विघ्नतासिध्यर्थम्
श्रीगणेश्वरस्य यथामिलितोपचारैः पूजनमहं करिष्ये इति संकल्प्य, एकदन्तं शूर्पकर्णमित्यादिना
ध्यानावाहनासनपाद्यार्घ्याचमनस्नानपञ्चामृतस्नानाऽऽचमनवस्त्रयज्ञोपवीत - भूषण - गन्ध-
पुष्पाक्षत - धूपदीपनैवेद्यान्तं गणानान्त्वेति मन्त्रेण च गणेशं संपूज्य स्वशक्त्या मातृकां च
सम्पूज्य पुण्याहवाचनं कुर्यात् ॥ सति सम्भवे ग्रहं च संस्थाप्य ततः ॐ यवोसि यवयास्मद्वेषो
यवयारातीर्दिवेत्वान्तरिक्षायत्वा पृथिव्यै त्वा शुन्धन्ताँल्लोकाः पितृषदनाः पितृषदनमसि इति-
मन्त्रेण यवान् प्रक्षाल्य शुद्धमृत्तिकायाः मण्डपं कृत्वा संकल्पं कुर्यात् । अद्येह देव्यास्तुष्ट्यर्थं
यवारोपणमहं करिष्ये ॥ तत्र मंत्रः ॥ ॐ यव त्वं यवरूपोऽसि पत्रार्थे निर्मितोऽसि हि ॥ देवी-
नां तृप्तिकारी च तस्मात्त्वं वरदो भव ॥ जयन्ती मंगलाकाली भद्रकाली कपालिनी ॥ दुर्गा क्षमा

शिवा धात्री स्वाहा स्वधा नमोऽस्तु ते ॥ इति मन्त्रेण यवमारोप्य ॥ शुद्धोदकेन यवोपरि सेचनम् ॥ अथ घटनास्थापनम् ॥ तत्र संकल्पः ॥ अद्येह ममेह जन्मनि दुर्गाप्रीतिद्वारा सर्वा-
पच्छान्तिपूर्वकं दीर्घायुर्विपुलधनपुत्रपौत्राद्यनवच्छिन्नसन्ततिवृद्धि - स्थिरलक्ष्मी - कीर्तिलाभ-
शत्रुपराजय - सदभीष्टसिद्ध्यर्थं शारदीयनवरात्रप्रतिपदि विहितकलशस्थापनपूर्वकं दुर्गाकुमारी-
पूजनमहं करिष्ये इति संकल्प्य, कलशस्थापनविधिना घटं संस्थाप्य तत्र घटोपरि प्रतिमां
संस्थाप्य अथवा तदभावे दध्यक्षतां संस्थाप्य श्रीदुर्गामावाहयेत् ॥ अथ ध्यानम् ॥ जटा - जूट-
समायुक्तामर्द्धेन्दुकृतमेखलाम् ॥ लोचनत्रयसम्पन्नां पद्मेन्दुसदृशाननाम् ॥ अतसीपुष्पवर्णाभां
सुप्रतिष्ठां सुलोचनाम् ॥ नवयौवनसम्पन्नां महिषासुरमर्दिनीम् ॥ त्रिशूलं दक्षिणे दद्यात् खड्गं
चक्रं च वामतः ॥ तीक्ष्णं बाणं तथा शक्तिं वामतो सन्निवेशयेत् ॥ खेटकं पूर्णचापं च
पाशमंकुशमूर्द्धजम् ॥ घण्टं च परशुं चापि वामतः सन्निवेशयेत् ॥ अधस्तान्महिषं तद्वद्द्विशि-
रष्कं प्रदर्शयेत् ॥ शिरच्छेदोद्भवं तद्वद्दानवं खड्गपाणिनम् ॥ हृदि शूलेन निर्भिन्नं तीर्यगं च
विभूषितम् ॥ रक्तरक्तीकृताङ्गञ्च रक्तविस्फारितेक्षणम् ॥ वेष्टितं नागपाशेन भृकुटीभीषणा-

ननम् ॥ वमत्रुधिरवक्त्रञ्च देव्याः सिंहं प्रदर्शयेत् ॥ देव्यास्तु दक्षिणं पादं समसिंहोपरिस्थितम् ॥ किञ्चदूर्ध्वं तथा वाममंगुष्ठं महिषोपरि ॥ स्तूयमानं च तद्रूपममरैः सन्निवेशयेत् ॥ अथाऽऽवाहनम् । एहि दुर्गे महाभागे रक्षार्थं मम सर्वदा ॥ आवाहयाम्यहं देवि सर्वकामार्थसिद्धये ॥ अस्यां मूर्तौ समागच्छ इह तिष्ठ इह सन्निहिता भव इह स्थिरा भव सुप्रसन्ना भव इत्यवाह्य एतन्तीते इति प्रतिष्ठाप्य । ॐ दुर्गे रक्षिणि स्वाहा । जयन्ती मङ्गला काली० इति मन्त्रेण च दुर्गादेव्यै - पादयार्घ्याऽऽचमनीयपञ्चामृतस्नान - शुद्धोदकस्नान - वस्त्रयज्ञोपवीताऽऽभूषण-चन्दन-सिन्दूराञ्जनाऽऽदर्शादि सौभाग्य-द्रव्याक्षतपुष्पमाल्य-विल्वपत्र-धूप - दीप - नैवेद्य - ताम्बूल-दक्षिणादि षोडशोपचारैः पञ्चोपचारैः यथासम्भवैर्वा दुर्गां सम्पूज्य देवीम् प्रणम्य प्रार्थयेत् । आगच्छ देवदेवेशि दैत्यदर्पनिषूदनि । पूजां गृहाण सुमुखि नमस्ते शंकरप्रिये ॥ सर्वतीर्थमयं वारि सर्वदेवसमन्वितम् ॥ इमं घटं समागच्छ तिष्ठ देवगणैः सह ॥ दुर्गे देवि समागच्छ सान्निध्यं कुरु वै ध्रुवम् ॥ बलिं पूजां गृहाण त्वमष्टाभिः शक्तिभिः सह ॥ महिषघ्नि महामाये चामुण्डे मुण्डमालिनि ॥ द्रव्यमारोग्यविजयं देहि देवि नमः

सदा ॥ सर्वमङ्गलमाङ्गल्ये शिवे सर्वार्थसाधिके ॥ शरण्ये त्र्यंबके गौरि नारायणि नमोऽस्तु ते ॥
रूपं देहि यशो देहि भाग्यं भवति देहि मे । पुत्रं देहि धनं देहि सर्वान् कामान् प्रदेहि मे ॥
एवं प्रार्थनानन्तरं सुगन्धिद्रव्यं देयम् ॥ अथ कन्यापूजा । गणेश - बटुक - दुर्गाः प्रणम्य
संकल्पः ॥ अद्येह मम देविप्रसाद-विविधमनोऽभीष्ट - कामनावाप्ति - राज्यकरणोत्तर - कालिका
नवदेवीलोकगमनकामः कुमारं बटुकं च पूजनपूर्वकं भोजयिष्ये ॥ मंत्राक्षरमयीं
लक्ष्मीं मातृणां रूपधारिणीम् ॥ नवदुर्गात्मिकां साक्षात्कन्यामावाहयाम्यह ॥ इत्यावाह्य
ततः पूजां यन्त्रञ्च ॥ जगत्पूज्ये जगद्धात्रि शर्वशक्ति - स्वरूपिणि ॥ पूजां गृहाण कौमारि
जगन्मातर्नमोऽस्तु ते ॥ इति मन्त्रेण पादप्रक्षालनादिभिः पूजयेत् भोजयेच्च नानावस्त्र
पक्वान्न अलंकारैः स्वशक्त्या देवीपूजाऽनन्तरं नवमोपर्यन्तं प्रत्यहं वा कुर्यात् ॥ एकैकां
पूजयेत्कन्यामेकवृद्ध्यस्तथैव च ॥ द्विगुणा वाऽपि प्रत्येकं नवकं च विशेषतः ॥ द्विवर्षकन्या-
मारभ्य दशवर्षाऽवधिक्रमात् ॥ पूजयेत्सर्वकार्येषु यथाविध्युक्तमार्गतः ॥ अत ऊर्ध्वन्तु या कन्या
सर्वकार्येषु वर्जिता ॥ आयुष्यं बलवृद्ध्यर्थं कुमारी पूजयेन्नरः ॥ आयुःकामी त्रिमूर्तिम् तु

त्रिवर्गस्य फलप्रदाम् ॥ अल्पमृत्युव्याधिपीडादुःखदारिद्र्यनाशनम् ॥ आरोग्यं सुखकामी च जयकामी तथैव च ॥ यशःकामी नरो नित्यं रोहिणीं प्रतिपूजयेत् ॥ विद्यार्थी चाभयार्थी च राज्यार्थी च विशेषतः ॥ शत्रूणां च विनाशार्थी कालिकां पूजयेन्नरः ॥ ऐश्वर्यसुखकामी च पुत्रकामी च यो नरः ॥ संग्रामे जयकामी च चण्डिकां प्रतिपूजयेत् ॥ दुःखदारिद्र्यनाशाय नृपसंमोहनाय च ॥ महापापविनाशार्थं शांभवीं च प्रपूजयेत् ॥ सर्वलोकस्य शत्रूणां उग्रसाधनकर्मणि ॥ दुर्गां तु दुःखनाशाय पूजयेद्यत्नतो बुधः ॥ सौभाग्यधनधान्यादि वाञ्छितार्थफलाप्तये ॥ सुभद्रां पूजयेन्मर्त्यो दासीदासादिवृद्धये ॥ अथ त्रिमूर्तिपूजा ॥ त्रिपुरां त्रिपुराधारां त्रिवर्गज्ञानरूपिणीम् ॥ कामदां करुणोदारां कालीं च पूजयाम्यहम् ॥ अथ कल्याणीम् ॥ मालात्मिकां कलातीनां कारुण्यहृदयां शिवाम् । कल्याणजननीं नित्यं कल्याणीं पूजयाम्यहम् । रोहिणीपूजा ॥ अणिमादिगुणाधारां मकराद्यक्षरात्मिकाम् ॥ अनन्तशक्तिकां लक्ष्मीं रोहिणीं पूजयाम्यहम् । कालिका - पूजा । कामवारिशुभाकान्तां कालचक्रस्वरूपिणीम् ॥ कामदां करुणोदारां कालीं च पूजयाम्यहम् ॥ चण्डिकापूजा ॥ चण्डवीरां चण्डमायां चण्डमुण्डप्रभञ्ज-

नीम् ॥ पूजयामि सदा देवीं चण्डिकां चण्डविक्रमाम् ॥ शांभवीपूजा ॥ सदानन्दकरीं शान्तां सर्वदेवनमस्कृताम् ॥ सर्वभूतात्मिकां लक्ष्मीं शाम्भवीं पूजयाम्यहम् ॥ दुर्गापूजा ॥ दुर्गमे दुस्तरे कार्ये भवदुःखविनाशिनीम् ॥ पूजयामि सदा भक्त्या दुर्गादुर्गार्तिनाशिनीम् । सुन्दरीं स्वर्णवर्णाभां सुखसौभाग्यदायिनीम् ॥ सुभद्रां जननीं देवीं सुभद्रां पूजयाम्यहम् ॥ भक्तितः कुमारीणां यत्नतः पूजा कार्या ॥ कञ्चुकैश्चैव वस्त्रैश्च गन्धपुष्पाक्षतादिभिः ॥ नानाविधैर्भक्षभोज्यैर्भोजयेत् पायसादिभिः । इति कुमारीपूजा ॥ अथ सप्तशतीपाठविधिः । सकलपूजानन्तरं सप्तशत्यादि पाठ - जपादिकं कुर्यात् ॥ ब्राह्मणद्वारा कार्यम् श्रूयाद् वा ॥ तत्र सप्तशतीपाठस्यावृत्तिसंख्याभेदेन प्रयोगसारतन्त्रोक्तफलविशेषमाह ॥ तद्यथा ॥ चण्डीपाठफलं देवि शृणुष्व गदतो नमः । पाठाद्बलिप्रदानाच्च सिद्धिमाप्नोति मानवः ॥ उपसर्गोपशान्त्यर्थं त्रिरावृत्तिं पठेन्नरः । ग्रहोपशान्तौ कर्त्तव्यं पञ्चावृत्तिं वरानने । महाभये समुत्पन्ने सप्तावृत्तिं समुन्नयेत् ॥ नवावृत्या भवेच्छान्तिर्वाजपेयफलं लभेत् ॥ राजवश्याय भूत्यै वा रुद्रावृत्तिमुदीरयेत् ॥ अर्कावृत्या काम्यसिद्धिर् वैरहानिस्त्रयोदशे ॥ मन्वावृत्या रिपुर्वश्यस्तथा स्त्रीवश्यतामियात् । सौख्यं पञ्चदशा-

वृत्या श्रियमाप्नोति च प्रिये ॥ म्हारणविमोक्षाय विंशावृत्ति पठेत्सुधीः ॥ पञ्चविंशावर्तनात्तु भवेद्बन्धविमोक्षणम् ॥ संकटे समनुप्राप्ते दुश्चिकित्सा भये तथा । जातिभ्रंशे बलोच्छेदे चायुषो-नाश आगते ॥ वैरवृद्धौ व्याधिवृद्धौ धननाशे तथा क्षये ॥ तथैव विविधोत्पाते तथा चैवाति-पातके ॥ कुर्याद्यस्माच्छतावृत्तिस्ततः संपद्यते शुभम् ॥ श्रेयो वृद्धिः शतावृत्या राज्यवृद्धि-स्तथापरः ॥ मनसा चिन्तितं देवि सिद्धेदष्टोत्तरावृता । शताश्वमेधयज्ञानां फलमाप्नोति सुव्रते ॥ सहस्रावर्त्तनाल्लक्ष्मीरावृणोति स्वयं स्थिता ॥ भुक्त्वा मनोरथान् कामान्नरो मोक्षमवाप्नुयात् ॥ आदावन्तञ्च कुर्वीत प्रणवं संहितां पठेत् ॥ सर्वत्र पाठे विज्ञेयो ह्यन्यथा विफलं भवेत् ॥ न कर्मा-शक्तचित्तेन क्रुद्धेन स्तोत्रवाचनम् ॥ आधारे स्थापयित्वा तु पुस्तकं तु जपेत्सुधीः ॥ हस्ते संस्था-पनादेव यस्मादल्पफलं भवेत् ॥ ब्राह्मणं वाचकं विद्यान्नान्यद्वर्णजमादरात् ॥ श्रुत्वान्यवर्णा-जाद्राजन्वाचकान्नरकं व्रजेत् ॥ अथ सप्तशतीपाठ–वेदपाठाऽनेकपुराणान्तर्गतस्त्रोत्रपाठ–गायत्री-जप–नवार्णवमन्त्रजपस्वेष्टदेवतामन्त्रजपं यथाशक्ति कृत्वा संकल्पः ॥ अद्येह मम भूतभविष्यत्-वर्तमान–जन्मजन्मान्तराणां दुष्कृतनिवृत्तिदुष्कृतोत्थसमस्तपापक्षय शत्रुदस्युराजशस्त्रानल-

तोयौघहेतुकभयाभाव महामारी समुद्भवा शेषोपसर्गागमत्रिविधोत्पातोपशमसर्वापच्छान्तिपूर्वकं रक्षोभूतपिशाचग्रहपरकृत्या बालग्रहादि - सकलबाधा - भय - निर्भय - सकल - सांनिध्यर्थं सर्व-गुणोत्पत्तिदीर्घायु – विपुलधनधान्य – पुत्रपौत्रादयनवच्छिन्न – सन्ततिवृद्धि–सकलकुलानन्द–स्थिर-लक्ष्मी कीर्तिलाभ सुखप्राप्ति सदभीष्टसिद्ध्यर्थं महाकाली महालक्ष्मी महासरस्वती प्रीयते मार्कण्डेयपुराणान्तरगत 'सावर्णिः सूर्यतनय' इत्याराभ्य 'सावर्णिर्भविता मनुः' पर्यन्तमदयारभ्य नवमीपर्यन्तं सप्तशतीपाठं ब्राह्मणानां पूजनवरणं च करिष्ये । पाठान्ते यथाशक्ति बलिदानं छागकूष्माण्डफलैर्वा वक्ष्यमाणविधिना कार्यम् ॥ अथ द्वितीयादि – दिनकृत्यम् ॥ द्वितीयायां श्रीपरमेश्वर्यै पट्ट–केशरज्जुकङ्कतिकां ददयात् ॥ तृतीयायां दर्पणं सिन्दूरं कज्जलम् ॥ चतुर्थ्यां मधु शर्करा दधि काश्यपात्रेऽन्नं काश्यस्थालिकास्थमधुपर्कं कज्जलम् ॥ पंचम्यां उद्वर्तनं सौवर्णरौप्यं वा भूषणमथवा तत्पुष्पं दद्यात् ॥ प्रतिसन्ध्यं प्रतिपदादि तिथिषु पूजनं यथा-शक्त्या ॥ द्वितीयायां मध्याह्नतः ऊर्ध्वं संध्याकालादर्वाक् बालचन्द्रदर्शनं कुर्यात् शङ्खार्घश्वेत-चन्दन दध्यक्षत तोयं निधाय जानुनाऽवनिं स्पृष्ट्वा दक्षिणहस्तेन चन्द्रर्घ्यदानम् ॥ तत्र मन्त्रः ॥

अत्रिनेत्रसमुद्भूत क्षीरोदार्णवसंभव ॥ गृहाणार्घ्यं शशांकेश रोहिण्या सहित प्रभो ॥ प्रणाम-
मन्त्रः ॥ नमः सुधांशवे तुभ्यं लक्ष्मीभ्रातर्नमो नमः ॥ निष्कलङ्किन् कलाधारिन् गंगाधरशिरो-
मणे ॥ शम्भोर्जटाजूटवासिन्बालचन्द्र नमोऽस्तु ते ॥ इत्यर्घ्यं दत्त्वा ॥ अथ षष्ठ्यां बिल्वनिमन्त्रण-
विधिः ॥ शुक्लषष्ठ्याम् ज्येष्ठायुतायां केवलायां वा बिल्वतरुसन्निधौ गत्वा उपवासादि नित्यकर्म
कृत्वा तदन्तरं पूर्वमुखे उत्तरे वा, उपविश्याऽऽचम्य संध्याकालसमये दीपं प्रज्वाल्य संकल्पं कुर्यात् ॥
अद्येह० श्रीदुर्गाप्रीतिकामः श्रीवृक्षपूजनपूर्वकं बिल्वनिमन्त्रणमहं करिष्ये ॥ ॐ भगवति दुर्गे
इहागच्छ इहतिष्ठत्यावाह्य । पाद्यादि नैवेद्यान्तोपचारैः सम्पूजयेत् ॥ तत्र मन्त्रः । रावणस्य वधार्थाय
रामस्याऽनुग्रहाय च । अकाले लवणाम्भोधौ देव्यस्त्वद्यत्कृतः पुरा ॥ अहमप्याश्रितः षष्ठ्यां
सायाह्ने बोधयाम्यतः ॥ पूजयामीह दुर्गे त्वां सर्वशत्रुविनाशिनीम् ॥ देवदेवांश संभूत श्रीवृक्ष
चण्डिकाप्रिय ॥ आमन्त्रयामि पूजार्थं शाखामेकां प्रयच्छ मे ॥ इत्यामन्त्र्य । यथोक्तविधिना
बिल्ववृक्षाधिवासं कृत्वा नृत्य - गीत - वाद्योत्सवैः, रात्रौ जागरणं कृत्वा ॥ ततः पुनः । ॐ बिल्व
इहागच्छ इह तिष्ठेत्यावाह्य बिल्वाय नमः इति मन्त्रेण पाद्यादिभिः सिन्दूर गन्ध पुष्पाक्षत

तथा दुर्गा काली रुद्राणी वैष्णवी तथा ॥ भद्रकाली विशालाक्षी भैरवी सर्वरूपिणी ॥ सर्वाः सुमनसो भूत्वा शृङ्गारैः स्नापयन्तु ते ॥ पूर्ववत् संपूज्य ॥ तत्रैव तक्षकादींश्च स्नापयेत् पूजयेच्च ॥ तक्षकाद्याश्च ये चान्ये पातालतलवासिनः ॥ सर्वाः सुमनसो भूत्वा शृङ्गारैः स्नापयन्तु ते। अनेन प्रकारेण प्रत्येकं पत्रिकासु स्नापयित्वा पूजयेत्। ततो बिल्वफलशाखायां श्रीपरमेश्वरीमावाहयेत्। यथाऽऽवाहनम् ॥ आवाहयाम्यहं देवीं श्रीफले मृण्मये तथा। आयुरारोग्यमैश्वर्यं देहि देवि नमः सदा। कैलासशिखरे देवि हिमाद्रौ हिमपर्वतात्। आगच्छ बिल्वशाखायां चण्डिके कुरु सन्निधिम्। स्थापितासि महादुर्गे पूजये त्वां प्रसीद मे। आयुरारोग्यमैश्वर्यं देहि देवि नमोऽस्तु ते ॥ महादुर्गे स्वरूपासि सुरतेजोमयाचिंते। सदानन्दकरी देवि प्रसीद मम वृद्धये। एह्येहि भगवत्यम्बे शक्रयज्ञजयप्रदे ॥ भक्त्या च पूजयामि त्वां दुर्गे देवि नमोऽस्तु ते ॥ पल्लवैश्च फलोपेतैः पुष्पैश्च सुमनोहरैः ॥ पल्लवे संस्थिते देवि पूजये त्वां प्रसीद मे ॥ दुर्गे देवि इहागच्छ सान्निध्यं मम कल्पय। यज्ञभागान् गृहाण त्वं योगिनी-कोटिभिः सह ॥ इत्यावाह्य सर्वत्र यवान् विकीर्य ॥ ॐ दुर्गे रक्ष स्वाहा दुर्गायै नमः ॥ जयन्ती मंगला काली चेति पाद्यार्घ्याचमनीय-मधुपर्क-पञ्चामृत-शुद्धस्नान-वस्त्राभूषण-गन्धाक्षत-पुष्प-सिन्दूर

कज्जलादिद्रव्यं धूप-दीप-नैवेद्य-ताम्बूलादिसमस्तं पत्रिकास्वरूपायै भगवत्यै दुर्गादेव्यै नमः इत्यादि दत्त्वा ॥ अथ नमस्कारः ॥ उग्रचण्डे रुद्रचण्डे चण्डोग्रे चण्डनायिनि ॥ चण्डिकेऽसि चण्डवती चण्डि तुभ्यं नमो नमः ॥ महिषघ्नि महामाये चामुण्डे मुण्डमालिनि ॥ क्षेममारोग्यमैश्वर्यं देहि देवि नमोऽस्तु ते ॥ इति प्रणम्य प्रार्थयेत् । बिल्वपत्रमादाय ॥ सुधोद्भवं च श्रीवृक्षं शंकरस्य सदाप्रियम् । पवित्रं ते प्रयच्छामि बिल्वपत्रं सुरेश्वरि ॥ द्रोणपुष्पमादाय ॥ ब्रह्म - विष्णु - शिवादीनां द्रोणपुष्पं सदाप्रियम् ॥ तत्ते दुर्गे प्रयच्छामि सर्वकार्यार्थसिद्धये ॥ कुंकुमेन समालिप्ते चन्दनेन विलेपिते ॥ बिल्वपत्र - कृताऽऽपीडैः दुर्गेऽहं शरणं गतः ॥ रूपं देहि यशो देहि भगं भगवती तथा ॥ पुत्रान्देहि धनं देहि सर्वान्कामान्प्रदेहि मे ॥ अथ प्रत्येकं नवपत्रिका - पूजा ॥ अद्येत्यादि नवपत्रिकायां नवदेवीनां पूजनमहं करिष्ये ॥ अथाऽऽवाहनादिताम्बूलान्तैः संपूज्य प्रत्येकं प्रार्थयेत् ॥ कदल्यां ब्रह्माणी - पूजा ॥ दुर्गे देवि समागच्छ सांनिध्यमिह कल्पय ॥ रम्भारूपेण मे नित्यं शान्तिं कुरु सदाशुभे ॥ ब्रह्माण्यै नमः ॥ १ ॥ दाडिम्यां रक्तचण्डिकाम् पूजयेत् ॥ दाडिमि त्वं पुरा युद्धे रक्तबीजस्य सम्मुखे ॥ उमाकार्यं कृतं यस्माद्

दुर्गे देवि नमो नमः ॥ २ ॥ धान्ये लक्ष्मीम् । जगतः प्राणरक्षाय ब्रह्मणा निर्मितं पुरा ॥ उमा-
प्रीतिकरं धान्यं तस्माद्रक्षतु सर्वदा ॥ ३ ॥ हरिद्रायां दुर्गाम् । हरिद्रे वरदे देवि उमारूपासि
सुप्रभे ॥ मम विघ्नविनाशाय पूजां चैव गृहाण भो ॥ ४ ॥ मानके चामुण्डाम् ॥ अस्मिन् देवि
समातिष्ठ मानवृक्षे शचीप्रिये । मम चानुग्रहार्थाय पूजास्वीकरणाय च ॥ ५ ॥ कर्चुरके कालि-
काम् । महिषासुरयुद्धेषु कालीभूतासि सुव्रते । मम चानुग्रहार्थाय आगतासि हरिप्रिये ॥ ६ ॥
बिल्वे शिवाम् । महादेवप्रियकरो वासुदेवप्रियः सदा । उमाप्रीतिकरो यस्माद्बिल्ववृक्ष नमोऽस्तु ते
॥ ७ ॥ अशोके शोकहारिणीम् । हरिप्रियकरो वृक्ष सदा त्वं शोकनाशनः । दुर्गाप्रीतिकरो
यस्मात्तस्मात् त्वं रक्ष मां सदा ॥ ८ ॥ जयन्त्यां कार्त्तिकीम् । निशुम्भशुम्भमथने सेन्द्रैर्देवगणैः
सह । जयन्ति पूजयामि त्वामस्माकं वरदा भव ॥ ९ ॥ इति नवपत्रिकां सम्पूज्य प्रार्थयेच्च ।
खड्ग-छुरिका-धनुर्ध्वज-पताका-शक्ति-चर्मासि - दुन्दुभि - शंख - कट्टारक-छत्र - चामर - शस्त्रास्त्राणि
श्रीदुर्गासमीपे संस्थापयेत् । इति सप्तम्यां पत्रिकाप्रवेशपूजनविधिः । अथ महाष्टम्यां कालराज्या
भद्रिकापूजानिर्णयः । नाष्टमी सप्तमी युक्ता सप्तमी नाष्टमीयुता । नवम्यां सह कार्या स्यादष्टमी
सर्वदा बुधैः । अष्टमी सप्तमी युग्मे क्रियते हि महोत्सवः । इति वाक्यात् नवमीयुक्तायाः प्राश-

वा० १६.

णा.पु०

स्त्याभिधानात् । सति सम्भवे सप्तमीविद्धा सर्वथा वर्जनीया ॥ यदि सूर्योदये न स्यान्नवमी वापरेऽहनि । तदाष्टमीं प्रकुर्वीत सप्तम्या सहिता नृप । इति । अहं भद्रा च भद्रा च आवयोरन्तरं नहि । सर्वसिद्धिं प्रदास्यामि भद्रायामर्चिताप्यहम् ॥ इतिवचनात् भद्रकाल्यार्चनवरेण महाष्टम्यां निशीथकाले पुजा कर्त्तव्या ॥ दक्षयज्ञविनाशिन्या अर्द्धरात्रे प्रादुर्भावात् ॥ तत्राष्टम्यां महाकाली दक्षयज्ञविनाशिनी ॥ प्रादुर्भूता महाघोरा ह्यर्द्धास्ते चन्द्रमण्डले ॥ इति ब्रह्मवचनात् ॥ सप्तमीविद्धा न कुर्वीत मुख्यशुद्धाष्टम्यां कालरात्रिं कुर्यात् । अष्टम्यां सायं सन्ध्योत्तरं देवीपुजा कार्या ॥ अद्येह दुर्भिक्षादि दुःख - निवृत्तिदीर्घायुष्यपरमानन्द-परम-पद-गमन—दशाश्वमेध - फलध्वजमालाकुलविमानवरारोहण - शाश्वतकालाऽवछिन्न - हर्ष - विजयकामः श्रीदुर्गादेव्याः पुजनं ध्यानं चाहं करिष्ये ॥ इति संकल्प्य ॥ ततः गणेश - दीप - पुजनार्घ्यस्थापनं कृत्वा—जटाजूटसमायुक्तेत्यादि पुर्वोक्तध्यानम् कुर्यात् ॥ अथाऽऽवाहनम् । एहि दुर्गे महाभागे रक्षार्थं मम सर्वदा ॥ आवाहयाम्यहं देवि सर्वकामार्थसिद्धये ॥ अस्यां मूर्तौ समागच्छ स्थितिं मत्कृपया कुरु ॥ रक्षां कुरु सदाभद्रे विश्वेश्वरि नमोऽस्तु ते ॥ ॐ एतन्तेति ।

धूपदीप-ताम्बूल-नैवेद्यादिकं दद्यात्, बिल्ववृक्षं स्पृष्ट्वा मन्त्रं पठेत्। श्रीशैलशिखरे जात श्रीफल श्रीनिकेतन ॥ नेतव्योऽसि समागच्छ पूज्यो दुर्गास्वरूपतः ॥ इति पठेत् ॥ अन्यच्च सप्तमीदिन-कृत्यम् ॥ सप्तम्यां प्रातरारभ्य पत्रिकापूजनान्तर्यन्तं पुस्तकादौ सरस्वतीं पूजयेत्। मन्त्रमग्रे वक्ष्यते रुद्रयामले। "मूलऋक्षे सुराधीश पूजनीया सरस्वती" ॥ इति ॥ सप्तम्यां मूलयुक्तायां वा केवलायां पत्रिकाप्रवेशः। तद्दिने प्रातः समये नित्यकर्म कृत्वा पुनः बिल्वसमीपं गत्वा प्रणम्य प्रार्थयेत्। "बिल्ववृक्ष महाभाग सदा त्वं शङ्करप्रिय ॥ गृहीत्वा तव शाखाञ्च पूज्या दुर्गेति च स्मृतिः ॥ उत्तिष्ठ पत्रिके देवि सर्वकल्याणहेतवे ॥ पूजां गृहाण सकलामस्माकं वरदा भव ॥ मेरुमन्दरकैलास - हिमवच्छिखरे गिरौ ॥ जातः श्रीफलवृक्षे त्वमम्बिकायाः सदाप्रिये" ॥ इति प्रार्थ्य। बिल्ववृक्षस्य दक्षिणस्यां दिशि श्रीफलयुगलसहितां शाखां गृहीत्वा गन्धादिभिः संपूज्य। ॐ छिन्धि फट् अस्त्राय नमः। ॐ हुं फट् स्वाहा इति मन्त्रेण संछिद्य तच्छाखात्रोटनं कृत्वा वृक्षा-दवतीर्य। कदलीस्तम्भ-दाडिम-धान्यवृक्ष - हरिद्रावृक्ष - मानक - कचूर - बिल्वपत्राशोकजयन्ती द्रोण-पुष्पान्यपुष्पफलञ्च यल्लभ्यं संपूर्णमाहृत्य प्रार्थयेत्। शाखाच्छेदेन यद्दुःखं यत्कृतं हि मया प्रभो ॥

क्षम्यतां मम वृक्षेश! बिल्ववृक्ष नमोऽस्तु ते ॥ बिल्ववृक्ष महाभाग सर्वदा शङ्करप्रिय ॥ गृहीत्वा तव शाखाँश्च देवीपूजां करोम्यहम् ॥ इति प्रार्थ्य ॥ ॐ हाँ हूँ क्रीं चामुण्डे चल शीघ्रं त्वमम्बिका प्रविश्व ॥ चण्डि त्वं दुर्गरूपासि सुरतेजो महाबले ॥ प्रविश्य तिष्ठ यज्ञेऽस्मिन् यावत् पूजां करोम्यहम् ॥ इति प्राविश्य स्थापयेत् । ॐ स्थां स्थीं इति स्थिरो भव ॥ आरोपितासि दुर्गे त्वं मृण्मयं श्रीफलन्तु वा ॥ स्थिरीभूता च त्वं देवि गृहाण कामदा भव ॥ इति स्थिरीकृत्वा पत्रिकामुत्थात्य दोलायामारोप्य दोलां स्कन्धे निधाय मौनी सन् गृहसमीपे आनीय नानावादित्रादिमङ्गलपुरस्सरं पत्रिकायां यथामिलितोपचारैः संपूज्य, ततो देवीगृहाभ्यन्तरे सायंकाले पत्रिकां प्रवेशयेत् ॥ अथ सप्तम्यां सन्ध्योत्तरकृत्यम् ॥ ततः भूतादीनां कृच्छ्रान्नबलिं दद्यात् ॥ ॐ भूत इहागच्छेहतिष्ठेत्यावाह्य संस्थाप्य भूतादिभ्यो नमः इति पाद्यादिनैवेद्यान्तं संपूज्य प्रार्थयेत् ॥ भूताः प्रेता पिशाचाश्च ये वसन्त्यत्र भूतले ॥ ते गृह्णन्तु मया दत्तं बलिमेतत्प्रसादितम् ॥ पूजिताबलिपुष्पाद्यैस्तर्पिताबलिभिस्तथा ॥ देशादस्माद्विनिःसृत्य पूजां गृह्णन्तु यत्कृताम् ॥ एषा माषबलिर्भूतादिभ्यो नमः सर्षपञ्च विकीर्य बल्युपरि दीपं प्रज्वाल्य गृहाद्बहिः स्थापयेत् ॥ ततः

सप्तम्यां पुस्तकादौ प्रभाते वा पत्रिकापूजनान्तरं वा सरस्वतीं स्थापयेत् ॥ यथा—वेदशास्त्र-
पुराणानि स्मृति - व्याकरणानि च ॥ मन्त्रविद्या - ज्योतिषं च सर्वाविद्यामनेकथा ॥१॥ विततं
पुस्तके मातर्निश्चयं कुरु मे गृहे ॥ संजीवनकुलेजातपुस्तकाय नमो नमः ॥२॥ इति मन्त्रादिना
पूजयेत् ॥ अद्य हेत्यादि सर्वापच्छान्ति - सर्वकल्याणोत्पत्ति - नानाविधसौख्य - प्राप्त्यर्थं देवीगृहे
अहर्निशं दीपप्रज्वालनमहं करिष्ये ॥ ततः अद्य हेत्यादि आश्विनशुक्लासप्तम्यां सर्वापच्छान्ति-
पूर्वकं सर्वविधिसौख्यप्राप्तिपूर्वकं शरत्कालीयनवदुर्गा - शाकंभरीस्थापनमहं करिष्ये ॥ मृण्मयीं
दुर्गाप्रतिमां सफलां बिल्वशाखाकदल्यादि - नवपत्रिकां च संस्थाप्य पञ्चामृतेन संस्नाप्य एतन्ते
इति प्रतिष्ठाप्य पूजयेत् ॥ पत्रिका - नामानि । कदली दाडिमा धान्यं हरिद्रा मान - कर्चुरौ ।
बिल्वाशोकौ जयन्ती च विज्ञेया नवपत्रिका ॥ अतः प्रत्येकं नवपत्रिकापूजनं यथाशक्ति
कृत्वा स्नानीयं दद्यात् ॥ तद्यथा ॥ आत्रेयी नर्मदा गङ्गा यमुना च सरस्वती ॥ सरयू
गण्डकी पुण्या श्वेतगङ्गा च कौशिकी ॥ भोगावती च पाताले स्वर्गे मन्दाकिनी तथा ॥
सर्वाः सुमनसो भूत्वा शृङ्गारैः स्नापयन्तु ते ॥ कदल्यै नमः । कदल्यां भो-ब्रह्माणि इहागच्छेहतिष्ठे-

त्यावाह्य ब्रह्माण्यै नमः इति पाद्यादिनैवेद्यान्तं दत्त्वा ॥ अथ दाडिम्यां रक्तचण्डिकाम् । सर्वेषाम-
धिपो देव ईशानो नाम नामतः । शूलपाणिर्महादेवो शृङ्गारैः स्नापयन्तु ते ॥ पूर्ववदिहागच्छेत्या-
दिना सम्पूज्य ॥ धान्ये लक्ष्मीम् । पुण्यस्त्वं पुण्यशाखानां मंगलानाञ्च मंगलम् । विष्णुना
विधृतो नित्यमतः शान्तिं प्रयच्छ मे ॥ मन्दाकिन्यास्तु ते वारि सर्वपापहरं शुभम् । स्वर्गस्रोतस्तु
वैष्णव्यं शृं० ॥ पूर्ववत्संपूज्य ॥ हरिद्रायां दुर्गाम् ॥ परं पवित्रमुष्णं च वह्निज्योतिसमन्वितम् ।
जीवनं सर्वपापघ्नं शृं० ॥ पूर्ववत्संपूज्य ॥ मानके चामुण्डाम् ॥ गन्धाढ्यं चन्दनं दिव्यं तच्छीतल-
सुरप्रियम् ॥ सर्वपापहरं चैव शृं० ॥ पूर्ववत्संपूज्य ॥ कर्चुरे कालिकाम् ॥ सागराः सरितः
सर्वाः सर स्रोतोगमस्तथा ॥ सर्वौषधीभिः पापघ्नी शतशः स्नापयन्तु ते । सर्वाः सुमनसो
भूत्वा शृं० ॥ पूर्ववत्सम्पूज्य ॥ बिल्वे शिवाम् ॥ हिमबद्धेमकूटाद्याश्चाभिषिञ्चन्तु पर्वता ॥
निर्झरोदकपूर्णेन षष्ठेन कलमेन तु । सर्वाः सुमनसो भूत्वा शृं० ॥ पूर्ववत्संपूज्य । अशोके
शोकहारिणीम् ॥ लवणेक्षुसुरासर्पिर्दधिक्षीरजलैस्तथा । सर्वाः सुमनसो भूत्वा शृं० । पूर्ववत्संपूज्य ॥
जयन्त्यां कार्तिकाम् ॥ दुर्गा चण्डीश्वरी चण्डी वाराही कार्तिकी तथा ॥ हरसिद्धी

भगवति दुर्गे इहागच्छ इह तिष्ठेहसन्निहिता भव इह स्थिता भव सुप्रसन्ना भव इत्यावाह्य ॥ ॐ जयन्ती मङ्गला कालीति दुर्गे दुर्गे रक्षणि स्वाहा ॐ दुर्गायै नमः इति मन्त्रेण आसन-पाद्यार्घ्यपञ्चामृतस्नानाचमनशुद्धोदकस्नानरक्तवस्त्रभूषण - सिन्दूर - चन्दनाक्षतपुष्पकज्जलधूप - दीप-नैवेद्यताम्बूल - दक्षिणान्तं कृत्वा ॥ अथाऽऽवरणपूजा ॥ देव्या दक्षिणभागे एकादशगौरीः पूज-येत् ॥ ॐ ह्रीं जयन्त्यै नमः इति । प्रणवादि - नमोऽन्तं सर्वत्र ज्ञेयम् ॥ ह्रीं मंगलायै० ॥ ह्रीं काल्यै० ॥ ह्रीं भद्रकाल्यै० ॥ ह्रीं कपालिन्यै० ॥ ह्रीं दुर्गायै० ॥ ह्रीं क्षमायै० ॥ ह्रीं शिवायै० ॥ ह्रीं धात्र्यै० ॥ ह्रीं स्वाहायै० ॥ ह्रीं स्वधायै० ॥ अर्घ्यादि-नैवेद्यान्तैः पूजयेत् ॥ देव्याष्ट-भागे द्वादशदेवीः पूजनम् ॥ ह्रीं आदिनमोऽन्ताः सर्वत्र ज्ञेयाः ॥ ह्रीं उग्रचण्डायै नमः ॥ प्रचण्डायै० ॥ चण्डोग्रायै० ॥ चण्डनायिकायै० ॥ चण्डायै० ॥ चण्डवत्यै० ॥ चण्डरूपायै० ॥ चण्डिकायै० प्रत्येकं संपूज्य देव्या वामभागे नवदेवीं पूजयेत् । ह्रीं आदिनमोऽन्तैः ॥ उग्रदंष्ट्रायै० ॥ शुभदंष्ट्रायै० ॥ करालिन्यै० ॥ भीमनेत्रायै० ॥ विशालाक्ष्यै० ॥ मङ्गलायै० ॥ जयायै० ॥ विजयायै० ॥ देव्याग्रभागे षोडशदेवीः पूजयेत् ॥ ह्रीं आदिनमोऽन्तैः सर्वत्र ॥ मंगलायै० ॥ नन्दि-

न्यै० ॥ रुद्रायै० ॥ लक्ष्म्यै० ॥ कीर्त्यै० ॥ यशश्विन्यै० ॥ पुष्ट्यै० ॥ मेधायै० ॥ शिवायै० ॥ साध्यै० ॥
यशोवत्यै० ॥ शोभायै० ॥ जयायै० ॥ धृत्यै० ॥ आनन्दायै० ॥ सुनन्दायै० ॥ देव्यग्रभागे
चतुःषष्टिदेवीः ॥ ह्रीं आदिनमोऽन्तैः पू० ॥ ह्रीं बीजयायै० ॥ मंगलायै० ॥ भद्रायै० ॥ धृत्यै० ॥
शान्त्यै० ॥ शिवायै० । क्षमायै० । सिद्ध्यै० । तुष्ट्यै० । पुष्ट्यै० । उमायै० ॥ श्रियै० ॥ ऋद्ध्यै० ॥
स्त्यै० ॥ दीप्तायै० ॥ कान्त्यै० ॥ यशोदायै० लक्ष्म्यै० ॥ ईश्वर्य्यै० ॥ वृद्ध्यै० ॥ शक्त्यै० ॥
जयावत्यै० ॥ ब्राह्म्यै० ॥ जयन्त्यै० ॥ अपराजितायै० ॥ अजितायै० ॥ मानस्यै० ॥ दित्यै० ॥
मायायै० ॥ महामायायै० ॥ मोहिन्यै० ॥ रतिलालसायै० ॥ तारायै० ॥ विमलायै० ॥
गौर्य्यै० ॥ शरण्यायै० ॥ कौशिक्यै० ॥ मत्यै० ॥ दुर्गायै० ॥ क्रियायै० ॥ अरुन्धत्यै० ॥
घण्टायै० ॥ कर्णायै० ॥ कपालिन्यै० ॥ रौद्र्यै० ॥ काल्यै० ॥ मायूर्यै० ॥ त्रिनेत्रायै० ॥
स्वरूपिण्यै० ॥ बहुरूपायै० ॥ रिपुहन्त्र्यै० ॥ अम्बिकायै० ॥ चर्चिकायै० ॥ सुरपूजितायै० ॥
वैवस्वत्यै० ॥ कौम्र्यै० ॥ माहेश्वर्यै० ॥ वैष्णव्यै० ॥ महालक्ष्म्यै० ॥ शिवदूत्यै० ॥ कार्त्ति-
क्यै० ॥ कुशिकायै० ॥ ह्रीं चामुण्डायै० अष्टमातृणां अष्टदिक्षु पूजयेत् ॥ ॐ ब्राह्मण्यै नमः ॥

माहेश्वर्यै० ॥ कौमार्यै० ॥ वैष्णव्यै० ॥ वाराह्यै० ॥ इन्द्रायै० ॥ चामुण्डायै० ॥ महा-
लक्ष्म्यै० ॥ मध्ये-चण्डिकायै० ॥ देव्याग्रभागे भैरवाय नमः इति पूजयेत् ॥ तत्र मन्त्रः ॥
भैरवं परमं देवं सर्वकामप्रसाधनम् ॥ पूजयाम्यूर्द्धतो देव्याः सर्वावासिफलप्रदम् ॥ ततः
श्रीपरमेश्वर्यै जल-दुग्ध-कुश-दधि-बदर-तण्डुल-यव-सर्षप-इति द्रव्येण दशवर्षसहस्रावच्छिन्न
दुर्गालोकमहीपतित्वकाम एषोष्टाङ्गोऽर्घ्यो भगवत्यै दुर्गादेव्यै मया दत्तः । दुर्गे दुर्गे
रक्षिणि स्वाहा दुर्गादेव्यै नमः ॥ इत्यर्घ्यं दत्त्वा चन्दनं दद्यात् ॥ अग्निष्टोम यज्ञफल-
प्राप्तिकामनया चन्दनेन भगवत्यै दुर्गादेव्यै अनुलेपनं दत्तं दुर्गादेव्यै नमः ॥ अथ
बिल्वपत्रम् ॥ शुद्धोद्भवं च श्रीवृक्षं शंकरस्य सदाप्रियम् । पवित्रं ते प्रयच्छामि
बिल्वपत्रं सुरेश्वरि ॥ दुर्गादेव्यै नमः ॥ अथ बिल्वपत्रमालामादाय ॥ चन्दनेन समा-
लिप्ते कुंकुमेन विलेपिते ॥ बिल्वपत्रकृतां मालां गृहाण सुरवन्दिते ॥ दुर्गादेव्यै नमः ॥ अथ-
सिंहपूजा ॐ ह्रौं हः महाशार्दूलवितानाय पिङ्गललोचनाय नमः ॥ अथ देव्याः षडङ्गपूजा—
ॐ कालीवज्रेश्वरी लोहदंष्ट्रायै स्वाहा हृदयाय नमः ॥ ॐ वालिवज्रे० स्वाहा शिरसे० ॥

ॐ कालिवज्रे॰ स्वाहा शिखायै वौषट् ॥ ॐ कालिवज्रे॰ स्वाहा कवचाय हुँ ॥ ॐ कालिवज्रे॰ स्वाहा नेत्राभ्यां वौषट ॥ ॐ कालिवज्रे॰ स्वाहा अस्त्राय फट् ॥ अथास्त्रपूजा ॥ त्रिशूलाय नमः ॥ खड्गाय॰ । चक्राय॰ । तीक्ष्णवाणाय॰ ॥ शक्त्यै॰ इति दक्षिणे ॥ खड्गाय॰ पूर्णचापाय॰ पाशाय॰ अङ्कुशाय॰ घण्टायै॰ इति वामे ॥ अथ सिंहासनपूजा ॥ वज्रनख दंष्ट्रायुधाय महासिंहाय हुँ फट् नमः ॥ विजयो जयदो जेता विप्रभेत्ता भयङ्करः ॥ दुःखहा धर्मदः शान्तः सर्वारिष्टविनाशकः ॥ इत्यष्टौ तव नामानि तस्मात्सिंहपराक्रमः ॥ तेन सिंहासनो नित्यं नाम्ना देवेषु गीयते ॥ त्वयि स्थितः शिवः साक्षात् त्वयि शक्रः सुरेश्वरि ॥ त्वयि स्थितो हरो देवस्त्वदर्थं तप्यते तपः ॥ नमस्ते सर्वतोभद्र भद्रतो नवभूपते ॥ त्रैलोक्य जय सर्वस्वं सिंहासन नमोऽस्तु ते ॥ अथ खड्गपूजा ॥ असिर्विसर्जनः खड्गस्तीक्ष्णधारो दुरासदः ॥ श्रीगर्भो विजयश्चैव धर्मराजस्तथैव च ॥ इत्यष्टौ तव नामानि स्वयमुक्तानि वेधसा ॥ नक्षत्रं कृत्तिका ते तु गुरुदेवो महेश्वरः ॥ रोहिणी च शरीरं ते धारादेव जनार्दनः ॥ पितापितामहोदेवस्त्वं मां पालय सर्वदा ॥ नीलजीमूतसंकाशः तीक्ष्णदंष्ट्रः कृशोदरः ॥

त्रिशुद्धधर्मा सततं तीक्ष्णाधारस्तथैव च ॥ इयं येन हता क्षोणी इतश्च महिषासुरः ॥ तीक्ष्ण-
धाराय शुद्धाय तस्मै खड्गाय ते नमः ॥ अथ क्षुरिकापूजा ॥ सर्वायुधानां प्रथमं निर्मितासि
पिनाकिना ॥ शूलायुधाद्विनिष्क्रिष्य कृत्या मुष्टिग्रहं शुभम् ॥ चण्डिकायै प्रदत्ताऽसि सर्वदंष्ट्र-
विनाशिनी ॥ तथा विस्तारिता चाऽसि देवानां प्रतिपादिता ॥ सर्वसत्वांग भूतानि सर्व-
दुष्टनिवारिणि ॥ क्षुरिके रक्ष मां नित्यं शान्तिं यच्छ नमोऽस्तु ते ॥ अथ कट्टारः ॥ कट्टारक
जगद्रक्ष रक्ष वाजि धनानि च ॥ मम देहं सदा रक्ष कट्टारक नमोऽस्तु ते ॥ अथ धनुः ॥
सर्वायुधमहाशस्त्र सर्वदेवारिसूदन ॥ चाप मां समरे रक्ष सायकैः सुरसेवित ॥ धृतं कृष्णेन
रक्षार्थं संहाराय हरेण च ॥ त्रयीमूर्तिश्च तं देव धनुरस्त्रं नमाम्यहम् ॥ अथ चर्म ॥ चर्म-
प्रदस्त्वं समरे सर्व सैन्यस्य रक्षकः ॥ रक्ष मां रक्षणीयोऽहं त्वयाऽनघ नमोऽस्तु ते ॥
अथ वारणः ॥ खड्गायुधानां त्राता त्वं वारणः सर्ववारणः ॥ वीराणां देहि धीरत्वं
वारणं सिद्धिदायक ॥ अथ मर्द्दलः ॥ नर्त्तकीर्त्तनकश्चैव वल्लभत्वं नृपस्य च ॥
मृदुमर्द्दल मां रक्ष गम्भीरध्वनि मर्द्दल ॥ अथ दुन्दुभिः ॥ दुन्दुभे च सपत्नानां घोषो

हृदयकंपनः ॥ तव भूम्यां च सौम्यानां तथा विजयवर्द्धनः ॥ यथा जीमूतघोषेण हृष्यन्ति वरवारणाः ॥ तथाऽस्तु तव शब्देन घोषोऽस्माकं सुखावहः ॥ अथ बाणः ॥ कामदेवस्य देवानां सफलाश्चार्जुनस्य च । रामस्य च यथाबाणस्तथास्माकं भवन्त्विह ॥ अथ त्रोणः ॥ रक्तवृक्षस्थितं त्वं च पूर्णमायुधसायकैः ॥ संग्रामे विजयं नित्यं त्रोणकाय नमोऽस्तु ते ॥ कुन्तः ॥ पाश पातय शत्रुं त्वं त्वनया लोकमायया ॥ गृहाण जीवितं तेषां मम सैन्यञ्च रक्षताम् ॥ अथ पताका ॥ नाग-किन्नर-गन्धर्व-यक्ष-भूत-महोरगाः ॥ प्रमथाश्च महोदैन्यैर्भूतेशो मातृभिः सह ॥ शक्रः सेनापतिस्कन्दो वरुणश्च श्रितस्त्वयि ॥ प्रदहन्तु रिपून् सर्वान् विजयं च स गच्छतु ॥ यानि मुक्तानि रिपुभिर्भूषणानि समन्ततः ॥ निहतानि सदा तानि त्वया दुःष्प्रेक्ष-तेजसा ॥ कालनेमिवधे युद्धे तथा त्रिपुरघातने ॥ हिरण्यकश्यपोर्युद्धे यथादेवासुरे तथा ॥ शोभितासि सुरैर्वन्द्या शोभितेयं यतस्ततः ॥ नीलांश्वतामिमां दृष्ट्वा विनष्यन्ति ममारयः ॥ अथ ध्वजापूजा ॥ शक्रकेतुर्महावीर सुवर्णस्त्वमुपासितः ॥ दयाप्रधानयोगानां कुरु रक्षां रिपोर्भयात् ॥ अथ वीणा ॥ शारदावल्लभे त्वं हि अङ्गनाशनभूषिते ॥ वीणे त्वं रक्ष मां

नित्यं विदग्धे नृपवल्लभे ॥ अथ चर्मपूजा ॥ शर्मदस्त्वं हि समरे शर्मसैन्ये यशोमये ॥ रक्ष मां रक्षणीयोऽहं तपनेय नमोऽस्तु ते ॥ अथ कुण्डलम् ॥ प्राणहन्तृरिपुस्त्वञ्चाऽमलयाऽऽलोकमालया ॥ गृहाण जीवितस्तेषां सैन्यं च मम रक्षताम् ॥ अथ चामरम् ॥ शशांककरशंकास हिमडिण्डिमपाण्डुर ॥ प्रोत्सारयाशु दुरितं चामराऽमरपूजित ॥ अथ छत्रम् ॥ यथाऽम्बुदश्छाययति शिवायै मां वसुन्धराम् ॥ तथा छादय मां छत्रं विजयारोग्यवर्द्धय ॥ अथ शंखः ॥ पुण्यदः शंख पुण्यानां मंगलानां च मंगलम् ॥ विष्णुना त्वं धृतो नित्यमतः शान्तिं प्रयच्छ मे ॥ इति शस्त्रास्त्रपूजा । श्रीपरमेश्वर्यै नानापुष्पमाल्यदीपमाला - नाना पक्वान्न-कदलीफलाम्रेक्षु-नारङ्गबीज-पूर-मूलक - कूष्माण्ड - ताम्बूल - पुङ्गीफलेत्यादिमिष्टद्रव्यं यथाशक्ति दत्त्वा ॥ रक्तपुष्पाञ्जलिमादाय स्तुतिं पठेत् ॥ ॐ दुर्गां शिवां शान्तिकारीं ब्रह्माणीं ब्रह्मणः प्रियाम् ॥ सर्वलोकप्रणेत्रीं च प्रणमामि सदाप्रियाम् ॥ मंगलां शोभनां शुद्धां निष्कलां परमांकलाम् ॥ विश्वेश्वरीं विश्वधात्रीम् प्रणमामि सदा उमाम् ॥ सर्वदेवमयीं देवीं सर्वरोगभयापहाम् ॥ ब्रह्मेशविष्णुनमितां चण्डिकां प्रणमाम्यहम् ॥ विन्ध्यस्थां विन्ध्यनिलयां

दिव्यस्थाननिवासिनीम् ॥ योगिनीं योगजननीं चण्डिकां प्रणमाम्यहम् ॥ ईशानां मातरं देवीमीश्वरीमीश्वरप्रियाम् ॥ प्रणताऽस्मि सदा दुर्गां संसारार्णवतारिणीम् । य इदं पठति स्तोत्रं शृणुयाद्वापि यो नरः ॥ स मुक्तः सर्वपापैस्तु मोदते दुर्गया सह ॥ इति स्तुत्वा प्रणमेत् ॥ अथाग्निस्थापनविधिना अग्निस्थापनं कृत्वा होमं कुर्यात् ॥ अथ बलिदान-विधिः ॥ प्रथमं छागसेचनम् ॥ स्वयंभूर्वासुदेवश्च शङ्करश्च महोदयः ॥ सदाराश्च सपुत्राश्च सगणाश्च सशक्तयः ॥ प्रोक्षन्तु त्वां पशुश्रेष्ठ ते वै विश्वैकहेतवः ॥ अथ छागाय नमः । इति अर्घ्य - चन्दन - पुष्प - धूप - दीप - नैवेद्यान्तां पूजां विधाय खड्गाय नमः इति खड्गं संपूज्य । छागमहिषादिरुधिरेण तृप्तिमाह—अद्यैकवर्षप्राप्त दुर्गातृप्तिकामनया इदं मेषरुधिरं देव्यै अहं ददे । छागरुधिरेण दशवर्षतृप्तिः । महिषरुधिरेण शतवर्षतृप्तिः । स्वदेवरुधिरेण सहस्रवर्षतृप्तिः ।X अथ छागोत्सर्गसंकल्पः ॥ ॐ अथ श्रीमद् दुर्गाभिदर्शना-ऽभिवन्दन – स्पर्शन – तर्पण – जनितपूर्वकं सदारापत्यस्य ममाखिलापच्छान्ति – नानाविध कल्याणोत्पत्ति दीर्घायुष्यबलपुष्टिवृद्धि – दुर्गाप्रीतिकामः श्रीदुर्गायै—अमुकछागबलिं वह्निदैवतं

नमः पशुंपशु गायत्रीं श्रावयेत् ॥ ॐ पशुपाशाय विद्महे शिरच्छेदाय धीमहि । तन्नः पशुः प्रचोदयात् । अञ्जलिं बध्वा पशुं प्रार्थयेत् । यज्ञार्थे पशवः सृष्टा यज्ञार्थे पशुघातनम् ॥ अतस्त्वां घातयिष्यामि तस्माद्यज्ञे वधो भव ॥ शिवादत्तो ह्यपिण्डोऽसि अतस्त्वं शिवतां गतः ॥ अपत्यं च पशोर्हि त्वं चाशिवं च शिवोसि हि ॥ पशुस्त्वं वाणरूपेण मम भाग्यादुपस्थितः ॥ चण्डिका प्रीतिदानेन मम चापद्विनाशनः । पशुरूपं परित्यज्य गन्धर्वस्त्वं स्वरूपधृक् ॥ गौरीलोकं समासाद्य मम कल्याणदो भव ॥ पशुपाशविमोक्षाय हैमकूटस्थिताय च । पशवे च नमस्तुभ्यं नमस्ते बलिरूपिणे ॥ छेदोऽसि बलिरूपस्त्वमाज्ञया परया गुरोः ॥ छेदभेदोद्भवं दुःखं क्षमस्व पशुरूपधृक् ॥ पशुयोनिप्रसूतोऽसि पूजाहोमादिकर्मणि ॥ तुष्टा भवतु सा देवी सरक्तं पिशितं तव ॥ इति स्तुत्वा ॐ कालीकाली बज्रेश्वरी लोहदण्डायै नमः ॥ पूर्वोक्त-मसिविर्जनादिमन्त्रेण च खड्गं प्रणम्य ॥ श्रीपरमेश्वरीं धात्वैकवारेण छिन्द्यात् ॥ कर्पूर-मिश्रितं रुधिरं समर्पयेत् ॥ अथ पुनर्गौतमोक्तछागोत्सर्गविधिः ॥ कुशाग्रेण छागं प्रोक्ष्य ॥ ॐ अग्निः पशुरासीत्तेना यजन्त स एतल्लोकमगमदग्निः स ते लोको भविष्यति तन्नेष्यसि

पिबेता अपः ॥ ॐ सूर्यः पशरासीत्तेनऽयजन्ती स इत्यादि ॥ ॐ वायुः पशुरासीत्तेनाऽयजन्त स इत्यादि ॥ ॐ चन्द्रः पशुरासीदिति ॥ ॐ गन्धर्वः पशुरासीदित्यादिना छागं हस्तेन स्पृशेत् ॥ ॐ वाचं ते शुन्धामि ॥ ॐ शिरस्ते शुन्धामि ॥ ॐ शृङ्गे ते शुन्धामि ॥ ॐ चक्षुस्ते शुन्धामि ॥ ॐ कर्णौ ते शुन्धामि । ॐ वक्त्रं ते शु० ॥ ॐ कण्ठं ते शु० ॥ ॐ मेढं ते सु० ॥ ॐ सर्वगात्राणि ते शुन्धामि ॥ अक्षतान् पशुगात्रे निक्षिप्य ॥ ॐ वाचं ते आप्यायताम् ॥ ॐ शिरस्ते आप्यायताम् ॥ ॐ शृङ्गे ते आप्यायताम् ॥ ॐ चक्षुस्ते आ० । ॐ कर्णौ ते आ० । ॐ वक्त्रं ते आ० । ॐ कण्ठं ते आ० । ॐ मेढं ते आ० । ॐ सर्वगात्राणि ते आप्यायताम् । पशूपरि पुष्पाणि निक्षिप्य प्रार्थयेत् । शिरे कण्ठे ललाटे च पादयोर्जङ्घयोस्तथा ॥ नेत्रयोः सर्वगात्रेषु मुञ्चन्तु पशुदेवताः ॥ अनेन छागं प्रोक्ष्य पशुगायत्रीं श्रावयेत् ॥ ॐ पशुपाशाय विद्महे शिरच्छेदाय धीमहि ॥ तन्नो छागः प्रचोदयात् । पुष्पाक्षतैः पूजयेत् साँ क्लोँ फेँ वारि सरस्वति लीयतां नमः फट् वौषट् ॥ इत्यादि क्रमेण साँ पादयोः पृथिवी लीयताम् ॥ साँ पायौ मित्रो लीयताम् । साँ उपस्थे जलं लीयताम् ॥ साँ चक्षुषि तेजो

लीयताम् ॥ साँ कर्णयोर्नभो लीयताम् ॥ साँ मनसि काली लीयतां फट् वौषट् ॥ इति तत्तत्स्थाने लीनं कृत्वा ततो दशाङ्ग स्पृशेत् ॥ ॐ चामुण्डायै नमः कपाले ॥ ॐ यमाय० शृङ्गयोः ॥ ॐ शशिभास्कराभ्यां० नेत्रयोः ॥ ॐ बृहस्पतये० कर्णयोः ॥ चन्द्राय० कपोलयोः ॥ ॐ रुधिरवदनाय० मुखे ॥ ॐ रक्तदन्तिकायै नमः दन्ते ॥ ॐ पृथिव्यै० नासिकयोः ॥ ॐ महादेवाय० कण्ठे ॥ ॐ पृथिव्यै० उदरे ॥ ॐ प्रजापतये० मेढ्रे ॥ ॐ कूर्माय० पृष्ठे ॥ ॐ सांगोपांगाय नमः पुच्छे ॥ ततः पूर्वोक्त 'याज्ञार्थे पशवः सृष्टा' इति मन्त्रेण पशुं प्रार्थयित्वा खड्गं पाद्यादिना संपूज्य ॐ मध्ये ब्रह्मणे नमः ॥ ॐ अग्रे महादेवाय नमः । ॐ पृष्ठे यमाय नमः ॥ ॐ धारे कालाय नमः पूर्वोक्त असिविसर्जनं पठित्वा ॥ छाग-स्कन्धे घर्षयेत् यावद्गात्रशिरवलिं न चालयति तावद्बलिं काल्यै नमः इति मन्त्रेण जलं प्रक्षिपेत् । अथ रुधिरसे० ॐ अद्येह दशवर्षावच्छिन्नदुर्गाप्रीतिकामनया इदं छागरुधिरं भगवत्यै मया दत्तम् ॥ अन्यछाग मेषमहिषि बलिदाने तु ॥ अद्य महाष्टम्यामर्द्धरात्रे मम सर्वापच्छांतिपूर्वक सर्व कल्याणोत्पत्ति दारुणग्रहपीडोपशमन शत्रुमारणनिमित्तक दिग्विजय राष्ट्रप्राप्तिकामनया

इमं महिषं यमदैवतमजं वह्निदैवतं मेषं वरुणदैवतं दक्षयज्ञविनाशिन्यै महाघोरायै कोटियोगिनी-
परिवृतायै भद्रकाल्यै ह्रीं ह्रीं दुर्गेरक्षिणि स्वाहा श्रीदुर्गादेवीप्रीतये घातयिष्ये इति। ततो
नाममन्त्रेण कूष्माण्डं संपूज्य अद्य ह सशैलवनकानन दानजन्य फलप्राप्तिकामः इदम् कूष्माण्ड-
फलं वनस्पतिदैवतं भगवत्यै दुर्गादेव्यै मया दत्तम् इति संकल्प्य कूष्माण्डफलं देवीप्रीतये
महिषत्वेन दद्यात् । ततो महिषरुधिरदान - संकल्पः । अद्य शतवर्षावच्छिन्न - दुर्गाप्रीतिकामनया
इदं महिषरुधिरं भगवत्यै दुर्गादेव्यै मया दत्तं नमः । पशुकपालं देव्याः पुरतो वामभागे संस्थाप्य
पुष्पाक्षतयुतं दीपं तत्कपालोपरि दद्यात् । ततोऽवशिष्टरक्तं धृत्वा कुशादिभिरष्टधा विभज्य
तेन पूर्वे चामुण्डां तर्पयामि ॥ तद्दक्षिणे योगिनी तर्पयामि ॥ पश्चिमे डाकिनीं तर्पयामि ॥ उत्तरे
भैरवीं तर्पयामि ॥ आग्नेये विदारिकीं तर्पयामि ॥ नैर्ऋत्ये पापराक्षसीं तर्पयामि ॥ वायव्ये
पूतनां तर्पयामि ॥ ईशाने कालिकां तर्पयामि इति संतर्प्य । खड्गाय खलनाशाय भक्तकार्याय
तत्परः ॥ पशुच्छेदस्त्वया कार्य्यो खड्गरूपि नमोऽस्तु ते ॥ इति खड्गं प्रणमेत् । बहुशोऽज-
महिषाघाते अद्य तत्संख्यावर्षावच्छिन्न दुर्गाप्रीतिकामनया एतान् छागान् वह्निदैवतान् एतान्मे-

षान् वरुणदैवतान् एतान् महिषान् यमदैवतान् श्रीदुर्गादेव्यै प्रीतये अहं घातयिष्ये ॥ महिषत्वेन कूष्माण्डं बीजपूरं नरस्ततः ॥ छागाभावे कर्कटी स्यान्मत्स्याभावे तु मूलकम् ॥ मधुत्रयं घृतमधु शर्करा परिकीर्त्तितम् ॥ नारिकेलोदकं पुण्यं रहस्यं हि शिवोदकम् ॥ इति ॥ विशेषवाक्येन नर-महिष-छाग-मत्स्याभावे बीजपूरकं कूष्माण्डं कर्कटीफलं मूलकं घृतं मधुशर्करानारिकेलोदकं भगवत्यै दुर्गादेव्यै क्रमेण निवेदयेत् ॥ कदलीं वृन्ताकं जम्बीरं नारङ्गी कोशातकीं च दद्यात् । अथ स्तुतिः ॥ जय देवि जगन्मातर्जय पापौघहारिणि ॥ जय जन्म-जराव्याधि-तृणादावानलाकृते ॥ जय सर्वविपत्तिघ्नि जय त्रिदशवन्दिते । जय नित्यानन्दरूपे जय कल्याणदायिनि ॥ जय शत्रुक्षयकरि जय रोगप्रणाशिनि ॥ जय भीमे जयाघोरे जय सङ्कटतारिणि ॥ जयामृतरसास्वाद-तुन्दिलानन्दविग्रहे ॥ त्रिनेत्रे विकरालास्ये मुण्डमालाविभूषिते ॥ सर्वासुरक्षयकरि खड्ग - खट्वांग - धारिणि ॥ महाघोरे महारावे दैत्यदर्पनिषूदिनि ॥ इमं पशुबलिं देवि गृहीत्वा कालरात्रिके ॥ प्रीता भव महाचण्डि रक्ष मां शरणागतम् ॥ आयुर्देहि धनं देहि भाग्यं कीर्तिं च देहि मे ॥ स्त्रियं देहि सुतान् देहि सर्वान् कामाँश्च देहि मे । उग्रचण्डे प्रचण्डाऽसि प्रचण्ड-

करवालिनि ॥ महाचण्डोग्रदोर्दण्डे विश्वेश्वरि नमोऽस्तु ते ॥ रक्ष मां शरणापन्नं त्वत्पादार्पित-
मानसम् ॥ हर पापं हर क्लेशं हर शोकं हराऽसुखम् ॥ हर रोगं हर क्षोभं हर दैन्यं हरप्रिये ॥
स्तुतिमेतां पठित्वैव दण्डवत्प्रणमेद् भुवि ॥ गुह्यकालि जगद्धात्रि सर्वान्तर्यामिनीश्वरि ॥
गृहित्वेमं पशुबलिं यथोक्तफलदा भव ॥ कायेन मनसा वाचा त्वत्तो नान्या गतिर्मम ॥ अन्नश्च-
रसिभूतानां दृष्टिस्त्वं परमेश्वरि ॥" इति स्तुत्वा गीतवाद्यादिकं च कृत्वा पुनर्देव्यै स्तोत्रपाठादिना
पुष्पाञ्जलिं दद्यात् ॥ पद्भ्यां कराभ्याञ्जानुभ्यां मनसा वचसा दृशा ॥ उरसा शिरसा चेति प्रणामोऽ-
ष्टाङ्ग ईरितः ॥ इति प्रणम्य ॥ श्रीपरमेश्वरीप्रीतये नवार्णवमन्त्रेणाऽथवा जयन्ती मङ्गलेति मन्त्रेण-
लक्षं सहस्रम् अष्टोत्तरशतं वा यथाशक्तिहोमं कृत्वा इष्टदेवताकुलदेवताभ्यां च संपूज्याऽऽहुतिं
दत्त्वा ब्रह्माण्याद्याष्टदलेषु बलिदानं कुर्यात् ॥ ब्रह्माणी माहेश्वरी कौमारी वैष्णवी वाराही नारसिंही
ऐन्द्री शिवदूती मध्ये च चण्डिका ॥ बलिदानमन्त्रः ॥ "ॐ भगवति ब्रह्माणि एष बहुघृत-
दीपमांससमन्वित-माषभक्त-बलिस्तुभ्यन्नमः" ॥ एवं क्रमेण सर्वाभ्यो मातृभ्यो बलिं दद्यात् ॥ अथ
सामान्यबलिदानम् ॥ ॐ नमः कपालि ग्रहनक्षत्र - सुरासुर - गन्धर्व - अक्षेश - विद्याधर - गरुड-

महोरग-किन्नर-गजेन्द्रदेव-ता-राक्षस-भूत-क्रव्याद- पिशाच - मनुष्य - मातृगण - योगिनी - शाकिनी-डाकिनीगणा इमं बलिं गृह्णन्तु स्वाहा ॥ पूर्ववद् द्रव्येण दद्यात् ॥ ॐ शिवाः कंकालवेतालाः पूतना जृम्भकादयः ॥ ते सर्वे तृप्तिमायान्तु बलिदानेन तोषिताः ॥ इति बलिं दद्यात् ॥ क्षेत्रपालाय कृच्छ्रान्नं वा दध्यक्षतबलिं दत्त्वा होमं समाप्य होमाऽन्ते श्रीपरमेश्वर्या विशेषतः पूजां कुर्यात् ॥

॥ इति महाष्टम्यां कालरात्रिविधिः समाप्तः ॥

—:❀:—

कालरात्रि हवने अग्निकुण्ड वेदी →



* १८—अथ महानवमी-विजयादशमी-पूजाविधिः *

सा तु पूर्वयुता ग्राह्या ॥ तद्यथा हेमाद्रौ ॥ पूर्वविद्धा प्रकर्तव्या नवमी बलिकर्मणि ॥ न कुर्यान्नवमी तात दशमीसंयुता सतीति स्कान्दे इत्यादिवचनात् । पूर्वाविद्धा शुभेति प्रतिभाति ॥ अष्टमी - दशमीसन्धौ तृतीयं खलु कथ्यते ॥ तस्मिन्कृते बलेर्दाने पुत्रनाशो भवेद् ध्रुवमिति ॥ नवम्यामपराह्णे तु बलिदान प्रशस्यते ॥ इति धौम्यवचनात् ॥ शुद्धा नवमी महानवमी न विद्धा ॥ शुद्धाया अभावे अपराह्णे तु यत्र नवमी तत्रैवेति ॥ नवम्यामपराह्णे तु बलिदानं प्रशस्यते ॥ दशमीं वर्जयेत्तत्र नात्र कार्या विचारणेति मदनरत्नोक्तत्वात् ॥ ब्रह्मवैवर्तेऽपि । नन्दायां ज्वलते वह्निः पूर्णायां पशुघातनम् ॥ भद्रायां गोकुलक्रीडा तत्र राज्यं विनश्यति ॥ यदा तु नवमी त्रुटिता तदाष्टम्यां नवमी - पूजा कार्या ॥ अथः पूजनविधिः ॥ अद्येहाऽऽश्विनशुक्लमहानवम्यां सकलपापक्षयपूर्वकं धर्म - यशोदीर्घायुष्यब्रह्मलोकगमन - ब्रह्मेन्द्ररुद्रविष्ण्वादि प्राप्य परमपदप्राप्तिकामस्त्रिशूलिनीं दुर्गां चण्डिकाञ्च पूजनमहं करिष्ये ॥ ॐ त्रिशूलिनीहागच्छेहतिष्ठेत्यावाह्य 'त्रिशूलिन्यै नमः' इति मन्त्रेण पाद्यादि - नैवेद्यान्तं सम्पूज्य तत्र दुर्गां शिवां शाङ्करीं चण्डिकाञ्च सम्पूज्य

म पू०

अष्टम्यामिवोक्तप्रकारेण बलिदानं कुमारीपूजनं शस्त्रास्त्रपूजनं च कुर्यात् । इति महानवमी-विधिः ।

अथ दशम्यामपराजिता - पूजा । श्रवणर्क्षेण संयुक्ता दशमी शुक्लपक्षगा इमे मासि

वा० स्थिता ज्ञेया विजयादशमी तिथिः । सा नवमीविद्धा कर्तव्या नत्वैकादशीयुक्ता ॥ म पू०

१८५ मध्याह्ने विजयामुहूर्ते इति केषाञ्चिन्मतम् ॥ सन्ध्यासमये केषाञ्चिन्मतम् ॥ विजयाख्योष्टमस्मृत

इति वसन्तराजः ॥ किञ्चित्सन्ध्यामतिक्रम्य किञ्चिदुत्पन्नतारकः ॥ विजयो नाम योगोऽयं

सर्वकर्मसु सिद्धिदः ॥ इति गर्गसंहितायामुक्तम् श्रवणयुक्ता शुद्धा दशमी ॥ अथवा यामसुक्तम्

वा विजयादशमी ॥ अद्याश्विनशुक्ल - दशम्यामपराजिताया विजयसिद्ध्यर्थं नवदुर्गापूजायां

न्यूनातिरिक्तपरिपूर्णार्थम् अपराजिता देवीपूजनपूर्वकं विसर्जनमहं करिष्ये ॥ चन्दनेनाऽष्टदलं

लिखित्वा तन्मध्ये मृण्मयपात्रत्रयं संस्थाप्याऽऽवाहयेत् । अथवा पूगीफलपुष्पाक्षतेष्वावाहयेत् ॥

मध्ये ॐ अपराजितायै नमः ॥ दक्षिणे क्रियायै, सिद्ध्यै, जयायै नमः ॥ वामे ॐ उमायै नमः ॥

विजयायै नमः । नाममन्त्रैः प्रतिष्ठाप्याऽऽवाह्य ॥ चतुर्भुजां पीतवस्त्रां सर्वाभरणभूषिताम् ॥

इत्यादिना खड्गचर्मधरां वराभयहस्तां त्रिनेत्रामीषत्प्रहसितवदनां सर्वाङ्गसुन्दरीं अपराजितां

श्रीभगवती ध्यात्वा ॐ अपराजिताय नमः ॥ ॐ जयायै नमः । ॐ विजयायै नमः । इति नाममन्त्रः-
पाद्यार्घ्याचमनवस्त्रभूषण - चन्दनाक्षत - पुष्पधूपदीपनैवेद्य - दक्षिणां दत्त्वा ॥ अथ प्रार्थना-
चारुणा मुखपद्मेन विचित्रकनकोज्ज्वला ॥ जया देवी शिवे भक्ता सर्वान्कामान्ददातु मे ॥ काञ्चनेन
विचित्रेण केयूरेण च भूषिता ॥ जयप्रदा महामाया शिवभाषितचेतसा ॥ विजया च महाभागा
ददातु विजयं मम ॥ हरेण सुविचित्रेण भास्वत्कनकमेखला ॥ अपरेयं रुद्ररता करोतु विजयं
मम ॥ इति मन्त्रैः संप्रार्थ्य हरिद्रा - सर्षप - दूर्वायुक्त - पीतवस्त्रपोटलिकां पीतसूत्रेण ॐ कारमुच्चरन्
बध्वा एतन्तेति प्रतिष्ठाप्याभिमन्त्रयेत् ॥ सदा पराजिते यस्मात् त्वं लता ह्युत्तमा स्मृता ॥
सर्वकामार्थसिद्ध्यर्थं तस्मात् त्वां पूजयाम्यहम् ॥ भवापराजिते देवि मम सर्वसमृद्धये ॥ पूजितायां
त्वयि श्रेयो ममाऽस्तु दुरितं हृतमिति मन्त्रेण अपराजितां देवीं समीपमभिमन्त्र्य ॥ अथ धारण-
मन्त्रः ॥ जयदे वरदे देवि दशम्यामपराजिते ॥ धारयामि भुजे दक्षे जयलाभाभिवृद्धये ॥ बलमाधे-
हि वलयं मम शत्रौ पराजयम् ॥ तद्धारणाद्भवेयुर्मे धनधान्यसमृद्धयः ॥ इति मन्त्रेण दक्षिणबाहौ
धारयेत् ॥ ततो मले देवीं सम्पूज्य प्रार्थयेत् । रूपं देहि यशो देहि भगं भगवति देहि मे ॥ पुत्रान्

देहि तथा मातः सर्वान्कामाँश्च देहि मे ॥ महिषघ्नि महामाये चामुण्डे मुंडमालिनि ॥ आयुरारोग्य-
मैश्वर्यं देहि देवि नमोऽस्तु ते ॥ ततः प्रणमेत् ॥ इमां पूजां मया देवि यथाशक्त्या निवेदिताम् ॥
रक्षार्थं त्वत्प्रसादाय व्रज स्वस्थानमुत्तमम् ॥ इति प्रणम्य ॐ कारेण विसर्जयेत् ॥ ॐ दुर्गे देवि
जगन्मातः स्वस्थानं गच्छ पूजिते ॥ संवत्सरे व्यतीते तु पुनरागमनं तव ॥ इति विसृज्य देवीम्
उत्थापयेत् ॥ उत्तिष्ठ देवि चण्डेशि शुभां पूजां प्रगृह्य च ॥ कुरुष्व मम कल्याणमष्टाभिः शक्तिभिः सह ॥
गच्छ गच्छ परं स्थानं स्वस्थानं देवि चण्डिके । व्रज स्रोतोजलं वृद्ध्यै स्थीयतां च जले त्वया ॥
ततो जपपाठनवरात्र व्रतदेवी पूजनकृतस्य संपूर्णकर्मणः साङ्गतायै दक्षिणासंकल्पं कुर्यात् ॥ पूर्वस्था-
पितपत्रिकां च मृण्मयप्रतिमाञ्चोत्थाप्य शिविकादिशुभयानोपरि सन्निवेश्य गीतवादित्रनिःस्वजनैर्जल-
समीपे गत्वा पूर्वोक्त 'दुर्गे देवि जगन्मातरिति' मन्त्रेण 'इमां पूजां मया देवि' इति मन्त्रेण च जले
प्रवाहयेत् ॥ ततो अपराजितायां पत्रत्रयं तण्डुलत्रयं च 'ॐ सः हाँसहक वराहाँस हुँ' इति मन्त्रेण
प्राशयेत् ॥ ततः शमीवृक्षान्ते गत्वा पूजा कार्या ॥ मंत्र ॥ 'शमे समय पापं मे शमो लोहितकंटक ॥
धरिष्यर्जुन बाणानां रामस्य प्रियवादिनि ॥ करिष्यमाणयात्रायां यथाकालं सुखं मया ॥ तत्र

निविघ्नकर्त्री त्वं भव श्रीरामपूजिता ॥ इति मन्त्रेण शमीं पूजयित्वा--पुष्पाणि साक्षतामार्द्रां शमीमूलगतां मृदम् ॥ शमीशाखां च गृहीत्वा शिविकादियानोपरि सन्निवेश्य गीतवादित्रादिनिर्घोषैः स्वगृहं प्रत्यानयेत् ॥ ततः स्वजनैः सह वेदोक्त-पुराण-मंत्रैरभिषेकं कृत्वा वस्त्राभूषणतिलकादिकं धारयेत् ॥ ततो जलसमीपे गोष्ठे नद्यां वा खञ्जनं विलोकयेत् ॥ प्रणाममन्त्रः ॥ नीलग्रीव शुभग्रीव सर्वकामफलप्रद । पृथिव्यामवतीर्णोऽसि खञ्जरीट नमोऽस्तु ते ॥ इति प्रणम्य ब्राह्मणेभ्यो दक्षिणां दत्त्वा आशीर्गृहीत्वा यथासुखं विहरेत् ॥

॥ इति शरत्कालीयदुर्गोत्सवपूजाविधिः समाप्तः ॥

* १९—कोजागर-लक्ष्मी-पूजाविधिः *

तत्रादौ संकल्पं कुर्यात् ॥ तद्यथा ॐ अद्य हेत्यादि पूर्वसंकल्पं समुच्चार्य ... मम सकलनोरथ-सिद्धिपूर्वकं लक्ष्मीलोकप्राप्तये दीपकलश—गणेशपूजनपूर्वकं लक्ष्मीपूजनमहं करिष्ये ॥ अङ्गन्यासादिकं विधाय दीपकलशगणेशादीञ्च सम्पूज्य सुवर्णप्रतिमायाम् आवाहयेत् ॥ अथ आवाहनम् ॥ ॐ आलयं ते हि कथितं कमलं कमलालये ॥ विमले ह्यस्मिन् स्थितिं त्वं कृपया कुरु ॥ आसनम् ॥ ॐ कमले पाहि मे देवि स्वर्णसिंहासनं शुभम् ॥ गृहाणेदं मया दत्तमासनं प्रतिगृह्यताम् । अर्घ्यम् ॥ ॐ इन्दिरे जगदाधारे जगत्पूज्ये हरिप्रिये ॥ गृहाणार्घ्यं मया दत्तं कल्याणं कुरु मां सदा ॥ आचमनीयम् ॥ ॐ आचम्यं जगदाधारे सिद्धि-लक्ष्मि जगत्प्रिये ॥ चपले देविदत्तं ते तोयमेतद् गृहाण मे ॥ पञ्चामृतम् ॥ ॐ पयो दधि घृतं-क्षौद्रं सितया च समन्वितम् ॥ स्नानं पञ्चामृतेनाद्य कुरु देवि दयानिधे ॥ स्नानम् ॥ ॐ इदं तव महालक्ष्मि कर्पूरागरु-मिश्रितम् ॥ तीर्थेभ्यः सुसमानीतं स्नानार्थं प्रतिगृह्यताम् ॥ वस्त्रम् ॥ ॐ सूक्ष्मतन्तुभवं वस्त्रं निर्मितं विश्वकर्मणा ॥ लोकलज्जाहरं देवि गृहाण सुरसत्तमे ॥

ततो नानासौभाग्यद्रव्याणि च ॥ ॐ महालक्ष्म्यै नमः ॥ इति मन्त्रेण समर्पयेत् ॥
चन्दनम् ॥ ॐ मलयाचलसंभूतं घनसारं मनोहरम् ॥ शीतलम् बहुलामोदं चन्दनं प्रतिगृह्यताम् ॥
ततो तिलाक्षताः ॥ विष्णुप्रियास्तिला नित्यमन्यदेवप्रियाऽक्षताः ॥ समर्पयामि ते देवि ! एताः
शुद्धास्तिलाक्षताः ॥ ॐ महालक्ष्म्यै नमः ॥ पुष्पम् ॥ ॐ नीलोत्पलं महामोदं मत्तालिकुल-
संकुलम् ॥ आनन्दिनन्दनोत्पन्नं पद्ममेतत्प्रगृह्यताम् ॥ अथ नामपूजा ॥ ॐ श्रियै नमः ॥ ॐ
लक्ष्म्यै० ॥ ॐ वरदायै० । ॐ विष्णुपत्न्यै० । ॐ क्षीरसागरवासिन्यै० । ॐ पद्मवासिन्यै० ।
मुक्तालंकारिण्यै० । ॐ तुर्यायै० ॥ ॐ चन्द्राननायै० ॥ ॐ विश्वमूर्त्यै० ॥ ॐ मुक्त्यै० ।
ॐ मुक्तिदात्र्यै० । ॐ ऋद्ध्यै० । ॐ तुष्ट्यै० नमः । ॐ पुष्ट्यै नमः । ॐ धनेश्वर्यै नमः ।
ॐ श्रद्धायै नमः । ॐ भोगिन्यै नमः । ॐ भोगदायै नमः । ॐ धात्र्यै० ॥ एवं नामपूजां विधाय
ऐरावतं इन्द्रं कुबेरं चन्द्रं च स्व - स्वनाममन्त्रेण चतुर्थ्यन्तपदेन पञ्चोपचारेण पूजां कुर्यात् ॥
अथ धूपम् । ॐ गन्धसारसमुद्भूतं कस्तूरीमोदसंभवम् ॥ सुरासुरनरोनारि धूपं देवि गृहाण मे ॥
दीपम् ॥ ॐ मार्तण्ड-मंडलाखण्ड चन्द्रबिम्बाग्नितेजसाम् ॥ निधानं देवि दीपोऽयं निर्मितस्तव

भक्तितः ॥ नैवेद्यम्—ॐ देवतालय - पातालभूतलाधार - धान्यजम् ॥ षोडशाकारसंभारं नैवेद्यं ते नमः सदा ॥ आचमनीयम्—ॐ स्नानादिकं विधोयन्ते यतः शुद्धिः प्रजायते ॥ एतदाचमनीयं च महालक्ष्मि विधीयताम् ॥ करोद्वर्तनार्थे जलं समर्पयामि ॥ ॐ महालक्ष्म्यै नमः ॥ इति करोद्वर्तनम् ॥ ताम्बूलम् । ॐ पातालतलसंभूतं वदनाम्भोजभूषणम् ॥ नानागुणसमाकीर्णं ताम्बूलं प्रतिगृह्यताम् ॥ दक्षिणा ॥ ॐ हिरण्यगर्भगर्भस्थं हेमबीजं विभावसोः ॥ अनन्तपुण्यफलदमतः शान्तिं प्रयच्छ मे ॥ नीराजनम् ॥ ॐ आज्यं च वर्तिसंयुक्तं वह्निना योजितं मया ॥ नीराजनं च दास्यामि गृहाण कमले रमे ॥ पुष्पाञ्जलिम् ॥ ॐ शारदेन्दुकलाकान्तिस्निग्धनेत्रा चतुर्भुजा ॥ पद्मयुग्मा च च भयदा कराग्रकराम्बुजा ॥ ऐरावतसमारूढा कमलासनसंस्थिता ॥ प्रसीद मम कार्येषु महालक्ष्मि नमोऽस्तु ते ॥ प्रार्थना । ॐ विष्णोर्वक्षसि पद्मे च शङ्खे चक्रे गदाधरे ॥ लक्ष्मि देवि यथासि त्वं मयि नित्यं तथा भव ॥ एवं पूजां विधाय भोज्यदक्षिणादिभिः ब्राह्मणान्सतोष्य स्वर्णतन्तुनिर्मितान् षोडशदीपाञ्च ब्राह्मणाय दत्त्वा नारिकेलजलभक्षणपूर्वकं बन्धुवर्गादीञ्च भोजयित्वा स्वयञ्च भुञ्जीयात् ॥

ततोऽर्धरात्रे जल - फल - चन्दन - दूर्वासमन्वितशखार्घ्यं चन्द्रमसे दद्यात् ॥ तद्यथा ॐ नमोऽस्तु ते निशानाथ लक्ष्मीभ्रातर्नमोऽस्तु ते ॥ व्रतं सम्पूर्णतां यातु गृहाणार्घ्यं नमोऽस्तु ते ॥ ततः कथा-श्रवणपूर्वकं नाना कौतुकममङ्गल - नृत्यगीत - तूर्य - भेरीवादन - द्यूतक्रीडनादिभिः रात्रौ जागरणं कुर्यात् ॥ प्रातःकाले स्नानसन्ध्यादिकं विधाय विसर्जनं कुर्यादनेन मन्त्रेण—ॐ पङ्कजं देवि संत्यज्य मम वेश्मनि संविश ॥ यथा सपुत्रभृत्योऽहं सुखी स्यां त्वत्प्रसादतः ॥

॥ इति कोजागरलक्ष्मीपूजाविधिः समाप्तः ॥

* २०—कोजागर-लक्ष्मी-व्रतकथा *

आश्विनपौर्णमासी परा ग्राह्या ॥ अश्वयुजि कर्मणि पूर्वाह्णव्यापिनी देवकर्मत्वाद् ग्राह्या ॥ अत्र कोजागरव्रते बहुव्यापिनी रात्रौ लक्ष्मीपूजनाक्षक्रीडा प्रधानत्वाद्रात्रिव्यापिन्येव कार्या ॥ ऋषय ऊचुः ॥ कार्तिकस्य उपाङ्गानि व्रतानि कथयन्तु नः । कृतेषु येषु भवति सम्पूर्णं कार्तिकव्रतम् ॥ बालखिल्या ऊचुः ॥ १ ॥ अश्विने शुक्लपक्षे तु भवेद्या चैव पूर्णिमा ॥ तदात्रौ पूजनं कुर्याच्छ्रियो जागृतिपूर्वकम् ॥ २ ॥ नारिकेलोदकं पीत्वा अक्षक्रीडां समारभेत् ॥

नैमिषारण्य क्षेत्रमा रहेका अठासी हजार ऋषिहरूलाई कथा सुनाउँदै आएको सिलसिलामा शौनकादिहरूलाई सम्बोधन गर्दै सूतजीले भन्नुभयो—हे शौनकादि ऋषीश्वरहो ! चीनभन्दा धेरै उत्तरतिर हिउँ नै हिउँले ढाकिएको निर्जन ठाउँमा तपस्या गरिरहेका बालखिल्यहरूलाई त्यहीं तपस्या गर्ने ऋषिहरूले सोधे—जुन व्रतहरू गर्नाले कार्तिकमा गरेको व्रत परिपूर्ण हुन्छ, कार्तिकका त्यस्ता सानातिना व्रतहरू पनि हामीलाई कहनुहोस् ॥ १ ॥ तब बालखिल्यहरूले भने—आश्विनको शुक्लपक्षमा जुन पूर्णिमा हुन्छ, त्यस रात लक्ष्मीको विधिपूर्जक पूजा गर्नू र त्यो रातभर जाग्रण रहने गरी ॥ २ ॥ नरिवलको पानी पिएर जूवा खेल्न शुरू गेर्नू । वर दिनको लागि लक्ष्मी देवी त्यस दिनकी आधारातमा

निशीथे वरदा लक्ष्मीः को जागर्तीति भाषिणी ॥ ३ ॥ जगत्प्रभ्रमति तस्यां लोकचेष्टावलो-
किनी ॥ तस्मै वित्तं प्रयच्छामि यो जागर्ति महीतले ॥ ४ ॥ सर्वथैव प्रकर्तव्यं व्रतं दारिद्र्य-
भीरुभिः ॥ एकद्व्रतप्रभावेण बलितोऽपि धनान्वितः ॥ ५ ॥ ऋषय ऊचुः ॥ बलितः प्रोच्यते
कोऽसौ लब्धवान् स कुतो व्रतम् ॥ एतद्विस्तरतो ब्रूथ बालखिल्यास्तपोधनाः ॥ ६ ॥ बालखिल्या
ऊचुः ॥ ब्राह्मणो बलितो नाम मागधः कुशसंभवः ॥ नानाविद्याप्रवीणोऽसौ सन्ध्यास्नानपरा-
यणः ॥ ७ ॥ याचनं मरणं तुल्यं मन्यते स द्विजोत्तमः ॥ गृहागतं स गृह्णाति नान्यद्याचयते

'को जागै छ ?' यस्तो भन्दै ॥ ३ ॥ 'त्यसैलाई धन दिन्छु जो पृथ्वीतलमा जागा छ' यस ध्येयले मानिसहरूको चेष्टा विचार्दै त्यस पूर्णिमाको रातमा संसारभरि चक्कर लाउनुहुन्छ ॥ ४ ॥ त्यसकारण दरिद्रताले दुःख पाएका या दरिद्रतादेखि डराउनेहरूले त्यस पूर्णिमाको व्रत अवश्यै गर्नुपर्छ, यसै व्रतका प्रभावले बलित पनि धनी भएका थिए ॥५॥ तब ऋषिहरूले भने—हे तपस्याका धनी बालखिल्यहो ! तपाईहरूद्वारा 'बलित' भनियो, यो 'बलित' भनेको को हो ? उनले कहाँबाट कसरी यो व्रत पाए ? यो कुरो हामीहरूलाई विस्तारपूर्वक बताईबक्सियोस् ॥ ६ ॥ अनि बालखिल्यहरूले भने—मगध देशमा (कुश) नामका ब्राह्मणका छोरा (बलित) भनिने कुनै बाहुन थिए । उनी अनेक विद्यामा प्रवीण र स्नान-सन्ध्या आदि कर्ममा लागिरहनेवाला थिए ॥ ७ ॥ तो उत्तम ब्राह्मण माँग्नु मरणतुल्य ठान्दथे । घरमा कसैले ल्याइदिएको मात्र उनी

क्वचित् ॥ ८ ॥ तस्य भार्या महाचण्डी नित्यं कलहकारिणी ॥ मद्भगिन्यः स्वर्णरौप्याऽलंकारादि-
विभूषिताः ॥ ९ ॥ नानामाल्याम्बरधरा दृश्या देवाङ्गना इव ॥ अहं दरिद्रस्य गृहि पतिताऽस्मि
दुरात्मनः ॥ १० ॥ लज्जा मां बाधतेऽत्यन्तं ज्ञातीनां मुखदर्शने ॥ धिगस्तु चैव विद्यानां निर्धनस्य
कुलस्य च ॥ ११ ॥ एवं वदति लोकेषु न करोति परीरितम् ॥ संकल्पं कृतवानेकं यद्यद्भर्ता
वदिष्यति ॥ १२ ॥ विपरीतं करिष्यामि यावल्लक्ष्मीः प्रसीदति ॥ भर्तः पाषाणबुद्धे त्वं चौर्यं
कुरु नृपालले ॥ १३ ॥ आनीयतां धनं भूरि नोचेत् संताड्याम्यहम् ॥ क्षणे रोदिति नाश्नाति

ग्रहण गर्थे, अरू कतै केही माँग्दैनथे ॥ ८ ॥ तिनकी पत्नी भने सधैं झगडा गरिरहने महाकी बझौटी थिइन्। मेरा दिदी-बहिनीहरू सुन-चाँदीका गहनाहरूले सिंगारिएका ॥९॥ किसिम-किसिमका हार र लुगाहरू लाएका एकदम अप्सरा-हरू जस्तै देखिने छन्। म भने दुष्ट आत्मा भएको दरिद्रीको घरमा परेकी छु ॥ १० ॥ आफ्ना नाताकुटुम्बका साम्नु मुख देखाउन पनि मलाई असाध्ये लाज लाग्छ। यस्तो विद्यालाई र यस निर्धन कुललाई पनि धिक्कार छ ॥११॥ जो भेट्यो उसलाई यस्तै कुरो भन्थिन्, लोग्नेले भनेको टेर्दिनथिन्। तब उनले (लक्ष्मी खुशी नहुन्जेलसम्म लोग्ने जे जे भन्नेछन्, सबै उल्टो गर्नेछु) भन्ने यौटा प्रतिज्ञा (अठोट) गरिन्। अनि ए कठोर बुद्धि भएका लोग्ने ! तिमी दरबारमा चोरी गर ॥१२-१३॥ मनग्गे धन ल्याऊ, हैन भने, तिमीलाई म पिट्छु भन्दै कहिले रुन्थी, कहिले खाँदै खान्नथी, कहिले भने खूब

कदाचिद्बहुखादति ॥ १४ ॥ सा कपालं ताडयातीत्येवं क्लेशयते पतिम् ॥ दृष्ट्वा तस्यास्तु चरितं याचने दुःखभीतितः ॥ १५ ॥ नोवाच वचनं किंचिद्यथालाभेन तोषितः ॥ एकस्मिन् श्राद्धपक्षे तु ह्युद्विग्नोऽभूद्द्विजोत्तमः ॥ १६ ॥ एकस्मिन् वत्सरे सर्वं श्राद्धसामग्रिकं गृहे ॥ वर्तते गृहिणी चेयं न करिष्यति किंचन ॥ १७ ॥ इत्युद्विग्नमना विप्रो न भाषयति किंचन । चिन्तयाविष्टमेवं तमाययौ मित्रमुत्तमम् ॥ १८ ॥ नाम्ना गणपतिख्यातं तस्मिन्नभ्यागते सति ॥ नोवाच पूर्वं तद्वार्ता मित्रो वचनमब्रवीत् ॥ १९ ॥ भो भो बलित चित्तं ते किमर्थं

हसुर्थी ॥ १४ ॥ कहिले उ टाउको ठटाउँथी, यस्तै प्रकारले लोग्नेलाई सताइरहन्थी । त्यसको त्यो चरित्र देख्दा पनि माँग्ने कामबा अत्यन्तै डराएर ॥१५॥ ज्यो मिल्यो त्यसैमा सन्तोष मान्ने बलितले पनि क्यै कुरो भनेनन् । श्राद्धपक्ष (सोह्रश्राद्ध) मा एक दिन ती उत्तम बाहुन खिन्न भए ॥ १६ ॥ यो साल घरमा श्राद्धमा सबै सामान छ, यो स्वास्नी क्यै गर्दिन ॥ १७ ॥ यिनै कुराले एकतमासको मन भएका ती बाहुन कसैसँग पनि बोल्दैनथे । यस्तै चिन्ताले घोरिइरहेका उनीभाठौं उनका उत्तम मित्र आइपुगे ॥ १८ ॥ गणपति नामका ती अभ्यागत आएको बेलामा पनि पहिले-पहिलेको जस्तो कुरा भनेनन् तब मित्रले कुरो कहे–॥ १९ ॥ अरे मित्र बलित ! केका निम्ति तिम्रो मन पिरिएको छ ? यवश्यै पनि म आफ्नू

चिन्तयाऽन्वितम् ॥ अवश्यं स्वधिया कृत्वा चिन्ता ते निर्हराम्यहम् ॥ २० ॥ बलित उवाच ॥ अधुना पितृपक्षे तु पितुः श्राद्धं समागतम् ॥ सामग्रिकं चास्ति गृहे विपरीतकरी प्रिया ॥ २१ ॥ कथं संपाद्यते श्राद्धमिति चिन्तायुतोऽस्म्यहम् ॥ गणपतिरुवाच ॥ धन्योऽसि कृतकृत्योऽसि भार्या यस्येदृशी गृहे ॥ २२ ॥ ब्रूहि त्वं वैपरीत्येन भार्या कार्यं करिष्यति ॥ बलितस्तु तथेत्युक्त्वा सायं भार्यामभाषत ॥ २३ ॥ अनर्थकारके चण्डि परश्वः श्राद्धकं पितुः ॥ न स्थापितं धनं यस्माद्यदर्थं तैस्तु पातकैः ॥ २४ ॥ तस्मान्न शीघ्रं पाकं त्वं कुरु दुष्टे करोसि चेत् ॥ ब्राह्मणः

बुद्धिद्वारा तिम्रो चिन्ता एकदम खतम पारिदिन्छु ॥ २० ॥ तब बलितले भने—अब पितृपक्षमा बाबुको श्राद्ध आयो । घरमा सामान पनि छ, तर स्वास्नी उल्टो काम गर्छे ॥ २१ ॥ कसरी श्राद्ध सम्पन्न गर्ने ! यसै चिन्ताले म घिरिएको छु । तब गणपतिले भने—घरमा जसकी भार्या यस्ती छे, त्यस्ता तिमी धन्य छौ र कृतकृत्य छौ ॥ २२ ॥ तिमी उल्टो पाराले भन्ने गर, तब तिम्री पत्नी सुल्टो काम गरिहाल्छिन् । बलितले पनि (अच्छा, त्यसै गर्छु) यति भनेर साँझमा पत्नीलाई भने— ॥ २३ ॥ ए उल्टी चण्डी ! पर्सि बाबुको श्राद्ध छ । जसका लागि ती पापीहरूले केही धन पनि राखेका छैनन् ॥ २४ ॥ त्यसकारण, हे दुष्टे ! तँ चाँडै खाना नपकाएस्, यदि पकाइस् भने पनि जुवाडो, चोखिनिती नभएका जो बाहुनहरू छन्

ये द्यूतकराः शौचाचारविर्जिताः ॥ २५ ॥ निमंत्र्यास्ते त्वयाऽमद्दे नोत्तमास्तु कदाचन ॥
इति भर्तृवचः श्रुत्वा संभारस्तु महान्कृतः ॥ २६ ॥ निमन्त्रितास्तु सद्विप्राः काले पाकः
कृतस्तथा । विपरीतैरेव वाक्यैः श्राद्धं संपादितं तया ॥ २७ ॥ पिण्डदानं ततः कृत्वा भार्या
वचनमब्रवीत् ॥ विसृज्य पिण्डान्नीत्वा त्वं क्षिप गङ्गाजले शुभे ॥ २८ ॥ पिण्डान्नीताँ-
स्तथेत्युक्त्वा शौचकूपे व्यचिक्षिपन् ॥ तच्छ्रुत्वा बलितो दुःखी बभूवाकुलिताननः ॥ २९ ॥
क्रोधाद्विनिर्ययौ गेहात्संकल्पं कृतवानिति ॥ लक्ष्मीर्यदि प्रसन्ना स्यात्तदान्नं भक्षयाम्यहम्
॥ ३० ॥ इति संकल्प्यैष विप्रो गहने निर्जने वने ॥ एको धर्मनदीतीरे वृक्षवल्कलधारकः

॥२५॥ तिनैलाई तैंले बोलाएस्, हे अकल्याणी, उत्तम बाहुनहरूलाई कुनै हालतमा पनि नबोलाएस् । लोग्नेको यस्तो वचन सुनेर उससे ठलो तथारी गरी ॥ २६ ॥ असल-असल बाहुनहरूलाई न्यौंता गरी, त्यस्तै वेलैमा खाना पकाई । उल्टैउल्टा कुराहरूले उसले श्राद्धका सामान ठीक पारी ॥२७॥ तब बलितले पिण्डदान गरिसकेर पत्नीलाई कुरो भने अर्थात् विर्सिएर सुल्टो अह्राए—तिमी पिण्डहरू उठाएर लगेर निर्मल गंगाजलमा सेलाइदेऊ ॥१८॥ उसले पनि (अच्छा) भनेर पिण्डहरू लगेर चर्पीमा फ्याँकिदिई । त्यो खबर सुनेर दुःखी बलित आकुलव्याकुल भए र ॥ २९ ॥ (यदि लक्ष्मी प्रसन्न भइन् भने मात्र म अन्न खाउँला) यस्तो प्रतिज्ञा गरेर झोकिंदै घरबाट निस्के ॥ ३० ॥ यस्तो प्रतिज्ञा गरेर ती बाहुन घना निर्जन वनमा गएर

॥ ३१ ॥ त्रिंशद्दिनानि च तदा आगादाश्विनपूर्णिमा ॥ कालीवंशसमुद्भूता नागकन्या सुलोचनाः ॥ ३२ ॥ निवसन्ति वने तस्मिन् व्रतं चक्रू रमासये ॥ श्वेतीकृतं त सुधया गृहं चन्द्रगृहोपमम् ॥ ३३ ॥ मण्डलानि विचित्राणि नानापिष्टैः कृतानि च ॥ पञ्चामृतानि रत्नानि दर्पणाच्छादनानि च ॥ ३४ ॥ स्थापयित्वेन्दिरापूजा कृता ताभिः प्रयत्नतः ॥ एवं तु प्रथमो यामो बालाभिः नीत एवं हि ॥ ३५ ॥ प्रारब्धं च ततो द्यूतं तुर्यस्तास्तु न लेभिरे ॥ चतुर्भिस्तु विनाक्षाऽणां क्रीडनं नैव जायते ॥ ३६ ॥ तस्मान्मृग्यस्तु विचरन् विचार्यैवं पुनर्गता ॥ कन्यका तु नदीतीरे ददर्श वलितं द्विजम् ॥ ३७ ॥ ज्ञात्वा तं साधुचरितं वलितं च मुखाकृतेः ॥

वा० १९६

का.क

धर्मनदीको तीरमा रूखका बोक्रा लाएर एकलै रहे ॥३१॥ त्यस्तै किसिमले तीस दीन बितेपछि असौजको पूर्णिमा आयो। कालीय नागका वंशमा जन्मेका, राम्रा-राम्रा आँखा भएका तीनोटी नागकन्याहरू ॥३२॥ त्यस वनमा बस्थे। त्यस दिन लक्ष्मीलाई प्रसन्न पार्नका निमित्त व्रत गरे। घरलाई चुनाले पोतेर मानो चन्द्रमण्डलै जस्तो सेतो पारे ॥३३॥ रङविरङका पीठाहरूले चित्रविचित्र वेदीहरू बनाए। अनि पञ्चामृत रत्न ऐना वस्त्रहरू ॥३४॥ पूजास्थानमा राखेर तिनीहरूले लागिपरेर लक्ष्मीको पूजा गरे। यसै किसिमले रात्रिको पहिलो पहर ती केटीहरूले बिताए र ॥३५॥ तब जूवाको खेल शुरू गरे, तर चौथो मानिस भेटिएन, चौथो मानिस नभैकन जूवाको खेल हुने सक्तैन ॥३६॥ त्यसकारण, यौटा मान्छे ढुंडनैपर्छ भन्ने यस्तो विचारेर फेरि डुल्दै यौटी नागकन्या नदीको किनारातिर गएकी त वलित बाह्मनलाई देखिन् ॥३७॥ मुखको आकृतिबाट

उवाच वचन चारु द्विज कोऽसि समागतः ॥ ३८ ॥ याह्यद्य क्रीडितुं द्यूतं लक्ष्म्याः प्रीतिकरं परम् ॥
इत्थं तद्वचनं श्रुत्वा बलितो वाक्यमब्रवीत् ॥ ३९ ॥ बलित उवाच ॥ द्यूतेन क्षीयते लक्ष्मीर्धर्मो विनश्यति । वृथैतद्वदसे किं त्वं कथं लक्ष्मीः प्रसीदति ॥ ४० ॥ कन्योवाच ॥ भाषसे त्वं पण्डितवत् कर्म तेऽस्ति तु मूर्खवत् ॥ इषस्य शुक्लपूर्णायां द्यूताल्लक्ष्मीः प्रसीदति ॥ ४१ ॥ द्यूतक्रीडां तु कृत्वैवं कौतुकं पश्य चैन्दिराम् ॥ इत्युक्त्वाऽसौ तयाऽऽनीतो क्रीडार्थं स्वस्य मन्दिरे ॥ ४२ ॥ दत्त्वा तस्मै नारिकेलजलं भक्ष्यादिकं तथा ॥ आरब्धं च तथा द्यूतं श्रीलक्ष्मीः प्रीयता-

बलितलाई असल चरित्र भएको जानेर 'हे बाहुन द्यौता ! तपाई को हुनुहुन्छ ? कहाँबाट आउनुभएको ?' लक्ष्मीलाई अत्यन्त मन परेको आजको जुआ खेल्न आउनोस् !' यस्तो सुन्दर वचन भनी । त्यसको यस्तो वचन सुनेर बलितले बोली बोले–॥ ३८-३९ ॥ बलितले भने–जूवाले धन सकिन्छ, जूवैले धर्म नाशिन्छ, बेकार तिमी यो के भनिरहेकी छयौ ? लक्ष्मी कसरी खुशी हुन्छिन् ? ॥ ४० ॥ तब कन्याले भनिन्–तपाई पण्डितले झैं बोल्नुहुन्छ, तपाईंको कामचाहि मूर्खको जस्तो छ । आश्विनशुक्लको पूर्णिमामा जूवा खेल्नाले लक्ष्मी रिझिन्छिन् ॥ ४१ ॥ पहिले जूवा खेलेर अनिमात्र लक्ष्मीको तमाशा हेर । यति भनेर उस बाहुनलाई त्यस केटीले जूवा खेल्नका लागि आफ्नू घरमा लयाई ॥४२॥ अनि ती बाहुनलाई नरिवलको

मिति ॥ ४३ ॥ स्थापितानि च रत्नानि कन्याभिर्ब्राह्मणेन तु ॥ कौपीनं लापितं स्वीयं ताभिर्नि-
जितमेव तत् ॥ ४४ ॥ ब्राह्मणः क्रोधसंयुक्तः किं कर्तव्यं मयाऽधुना ॥ उपवीतं लापयित्वा ततः
स्वीयं कलेवरम् ॥ ४५ ॥ लापयिष्ये विनिश्चित्य उपवीतं ललाप सः ॥ ताभिर्जितं च तदपि शरीरं
लापित स्वकम् ॥ ४६ ॥ ततोऽर्द्धरात्रे संजाते लक्ष्मीनारायणावुभौ ॥ आगतौ लोकचरितं द्रष्टुं
विप्रं ददर्श तु ॥ ४७ ॥ हीनोपवीतकौपीनं चिन्तया विवशीकृतम् ॥ उवाच वचनं विष्णुः शृणु त्वं
पद्मलोचने ॥ ४८ ॥ तव व्रतकरो विप्रः कथं जातः सचिन्तकः ॥ तस्मादेनं कुरु क्षिप्रं लक्ष्मीवन्तं

पानी र खानेकुराहरू दिएर लक्ष्मी खुशी होऊन्' भन्दै जूवा शुरू गरियो ॥४३॥ तब ती केटीहरूले रत्नहरू थापे । ब्राह्मणले चाहिं आफ्नु लँगौटी थापे, केटीहरूले त्यो लँगौटी जिति नै दिए ॥४४॥ तब झोकिएका ब्राह्मणले (अब मैले के गर्ने) भन्ने सोचेर 'जनै थाप्छु, त्यो हारे तब आफ्नु शरीरै ॥४५॥ थाप्नेछु, यस्तो निश्चय गरेर उनले जनै दाउमा थापे । केटीहरूले त्यो पनि जिते, तब बाहुनले आफ्नु शरीरै थापिदिए ॥ ४६ ॥ त्यसै वेला आधारात भएको वेलामा लक्ष्मी र नारायण दुवै जना मानिसको चरित्र हेर्न आएका थिए त जनै लँगौटी नभएको, चिन्ताले विवश गरिएको बाहुनलाई देखेर विष्णुले 'हे कमल जस्ता आँखा भएकी लक्ष्मी ! तिमी मेरो कुरो सुन ?' भन्नुभयो ॥४७-४८॥ तिम्रो व्रत गर्ने यो बाहुन कसरी यस्तो पिरिएको

सुखाऽन्वितम् ॥ ४९ ॥ इति विष्णुवचः श्रुत्वा पद्मयाऽसौ कटाक्षितः ॥ बालाचित्तहरो जातस्तत्कालं मदनोपमः ॥ ५० ॥ ततः कामेन संविद्धास्तास्तु या नागकन्यकाः ॥ विप्राय वचनं प्रोचुः शृण विप्र तपोधन ॥५१॥ यद्यस्माभिर्जितस्त्वञ्च भर्ताऽस्माकं वचोनुगः ॥ वयं त्वया निर्जिताश्चेद्यथेच्छसि तथा कुरु ॥ ५२ ॥ इति तद्वचनं श्रुत्वा तथा मेने स च द्विजः ॥ क्रीडनात्ता जिताः कन्या गान्धर्वेण विवाहिताः ॥ ५३ ॥ तासां रत्नानि ताश्चापि गृहीत्वा स्वगृहं ययौ ॥ ५४ ॥ प्राप्तं चण्डीतिरस्कारान्मयेदं भाग्यमुत्तमम् ॥ तस्मात्संमानिता चण्डी सापि प्रीता बभूव ह ॥ ५५ ॥ चकार स्वामिनश्चा-

---

भयो ? त्यसकारण यसलाई झट्टै धनवान् र सुखी पार' ॥४९॥ विष्णुका यस्तो वचन सुनेर लक्ष्मीले उसलाई आपना आँखा कुनाले हेरिन्। तब तुरुन्तै त्यो बाहुन त केटीहरूको मन हर्ने मानो कामदेवै जस्तो भयो ॥५०॥ तब कामबाणले घोचिएका ती जो नागकन्याहरू थिए उनले बाहुनलाई यस्तो कुरो भने-'हे तपस्वी बाजे, सुन्नुहोस् ! ॥ ५१ ॥ यदि हामीद्वारा तपाई जितिनुभो भने भने-अनुसार तपाईं हाम्रा पति हुनुहोस् ! यदि तपाई द्वारा हामी जितियौं भने तपाई जस्तो चाहनुहुन्छ त्यस्तै गर्नुहोस्' ॥५२॥ तिनीहरूको यस्तो वचन सुनेर ती बाहुनले पनि (ठीक छ) भनेर त्यो कुरो मंजूर गरे र खेल्दा बाहूनले ती केटीहरूलाई जिते र गान्धर्व विधिले अर्थात् प्रेमविवाहको विधिले तिनलाई बिहे गरे ॥ ५३ ॥ तब तिनीहरूको सम्पत्ति र उनीहरूलाई पनि लिएर आपना घर गए ॥५४॥ चण्डीकै तिरस्कारले गर्दा मैले यो उत्तम भाग्य पाएँ,त्यसकारण चण्डीलाई सन्मान गर्नुपर्छ भनिठानेर त्यो चण्डी पनि प्यारी हुँदी भई र ॥५५॥ आपनु प्रतिज्ञा तोडेर स्वामीको आज्ञा मान्ने गर्न

ज्ञामित्थं लक्ष्मीव्रतं त्विदम् ॥ बहुरात्रिव्यापिनी या साऽत्र पूर्णा विशिष्यते ॥ ५६ ॥ तत्राऽऽराध्यं महालक्ष्मीमिन्द्रमैरावतस्थिताम् ॥ उपवासं प्रकुर्वीत दीपान् दद्याच्च भक्तितः ॥ ५७ ॥ लक्षं तदर्द्धकयुतं शहस्रं शतमेव वा ॥ घृतेन दीपयेद्दीपान्तिलतैलेन वा व्रती ॥ ५८ ॥ रात्रौ जागरणं कुर्यात् नृत्यगीतपुरःसरम् ॥ यथाविभवतो देयाः पुरवीथीषु दीपिकाः ॥ ५९ ॥ देवतायतने चैव आरामेषु गृहेषु च ॥ ततः प्रभात सुस्नातः सम्पूज्य च शतक्रतुम् ॥ ६० ॥ ब्राह्मणान् भोजयेत्क्षीरं घृतशर्करपायसैः । वसोभिर्दक्षिणाभिश्च सवस्त्रान् पूजयेद्द्विजान् ॥ ६१ ॥ यथाशक्ति च दातव्या

याली । लक्ष्मीको यो यस्तो व्रत हो । चतुर्दशीको या पूर्णिमाको राती जुन रातमा धेरै पूर्णिमा पर्छ उही पूर्णिमा यस बारेमा विशेषता राख्तछ ॥५६॥ धेरै पूर्णिमा पर्नें त्यसै रातमा नै महालक्ष्मीलाई र ऐरावत हात्तीमाथि चढेका इन्द्रलाई आराधना गर्नुपर्छ । उसैका लगि उपवास गर्नुपर्छ; भक्तिपूर्वक स्वर्णदीपहरू दान गर्नुपर्छ ॥५७॥ लाख, त्यसको आधा या दश हजार अथवा हजार या सय नै भए पनि व्रतीले घिउमा या तिलका तेलमा भिजाएका बत्तीहरू बाल्नू ॥५८॥ नाच-गानापूर्वक राती जाग्राम बस्नू । सावगास-अनुसार टोलका बाटाहरूमा, मन्दिरहरूमा, फूलबारीहरूमा, घरका कौसीहरूमा झिलिमिली बत्ती बाल्न र विहान भएपछि न्वाइ-ध्वाइ गरिसकी इन्द्रको पूजा गरेर ॥५९-६०॥ ब्राह्मणलाई दूध घिउ चीनी खीर-सहित भोजन गराउनू । पोशाक पहिरेका ब्राह्मणहरूलाई लुगा र दक्षिणले पूजा गर्नू ॥ ६१ ॥ शक्ति-अनुसार सूनले बनाएका बत्तीहरू दान

दीपा स्वर्णविनिर्मिताः ॥ एवं विधिं विनिर्वर्त्य ततः पारणमाचरेत् ॥ ६२ ॥ व्रतस्याऽस्य प्रभावेण कल्पसंख्या वसेद्ध्रुवम् ॥ अप्सरोभिः परिवृत्तः स्वर्गलोके महीयते ॥ ६३ ॥ इहाचायुष्यमारोग्यं पुत्रपौत्रादिसंपदः ॥ एवं लक्ष्मीव्रतं कृत्वा न दरिद्री न दुःखभाक् ॥ ६४ ॥ कथां श्रुत्वा विधानेन व्रतस्याऽपि फलं लभेत् ॥ ६५ ॥

॥ इति सनत्कुमारसंहितायां कोजागरव्रतकथा समाप्ता ॥

दिन् । यस्ता प्रकारले सबै विधि गरिसकेर अनि व्रतको पारणा गर्नू ॥ ६२ ॥ यस व्रतका प्रभावले निश्चय नै स्वर्गलोकमा कल्प वर्षसम्म अप्सराहरूले घेरिएर रमाउँदै रहन पाउँछ ॥ ६३ ॥ यस लोकमा पनि पूरा आयु, आरोग्य छोरा-नातिसम्पत्तिवाला हुन्छ । लक्ष्मीको यस्तो व्रत गरेपछि दुःखी दरिद्री हुइन ॥६४॥ विधिपूर्वक कथा मात्रै सुन्यो भने पनि व्रतको फल पाउँछ, ॥६५॥ हे श्रोताहो, बालखिल्यहरूले उहींका ऋषिहरूलाई सुनाएको, व्यासले मलाई बताएको भनी सूतजीले शौनकादिहरूलाई सुनाएको कोजागर-व्रतकथा मैले तपाईंहरूलाई सुनाएँ ॥ नारायण भगवान्को जय ॥

॥ इति सनत्कुमारसंहितायां कोजागर-व्रतकथा-समाप्ता ॥

* २१–कार्तिककृत्यव्रतपूजोद्यापनविधिः *

अथ कार्तिकमासे मासादारभ्य समाप्तिपर्यन्तं कर्त्तव्यः प्रयोगः ॥ तत्रादौ स्नानम् । तत्र संकल्पः ॥ ॐ विष्णुः ३ ..... अद्येह अमुकोऽहं सकल-पापक्षय-पूर्वकमनोभिलषितकामनासिद्धये श्रीराधादामोदरप्रीतये आश्विनशुक्लैकादशीमारभ्य हरिबोधिन्येकादशीपर्यन्तं स्नानमहं करिष्ये स्नानमन्त्रौ ॥ कार्तिकेऽहं करिष्यामि प्रातःस्नानं जनार्दन ॥ प्रीत्यर्थं तव देवेश दमोदर मया सह ॥ ध्यात्वा श्रीं त्वां च देवेश जलेऽस्मिन् स्नातमुद्यतः ॥ तव प्रसादात्पापं मे दामोदर विनश्यतु ॥ इति स्नात्वा ॥ ततोऽर्घ्यं ददचात् ॥ मन्त्रः ॥ नित्यं नैमित्तिकं कृष्ण कार्तिके पापनाशनम् गृहाणार्घ्यं मया दत्तं राधया सहितो हरे ॥ इदं व्रतं मया देव कृतं प्रीत्ये तव प्रभो । निर्विघ्नं सिद्धिमायातु दामोदर नमोऽस्तु ते ॥ इति सम्प्रार्थ्य ॥ तत आचम्य ॥ शुक्लांबरधरं विष्णुमिति संप्रार्थ्य—ॐ विष्णुः ३ अद्येह सकलपापक्षयपूर्वकं मनोभिलषितकामनावाप्तये अद्यारभ्य समाप्तिपर्यन्तं श्रीराधादामोदरप्रीतये आकाशदीपदानमहं करिष्ये–इति ॥ मन्त्रः ॥ दामोदराय नभसि तुलया दोलया सह ॥ प्रदीपं ते प्रयच्छामि नमोऽनन्ताय वेधसे ॥

राधादामोदरप्रीत्ये दीपदानं कृतं मया ॥ निर्विघ्नं सिद्धिमायातु यावन्मासं समाप्यते ॥ कार्तिके-
मासि संपूर्णे आकाशे दीपदानतः ॥ अक्षयं संततिर्मेस्तु दामोदर नमोऽस्तु ते ॥ इति ॥ कार्तिक
स्नानस्य आकाशदीपदानं च मुहूर्तादर्वाक् रात्रिशेषे कुर्वन्ति ॥ सन्ध्यायामाकाशदीपदाने तु
मुहूर्तादर्वाक् अस्तमयाद् श्रीसूर्ये सति कुर्वन्ति ॥ इति संप्रदायः ॥ ततो राधादामोदरपूजनम् ॥
तुलसीपूजनञ्च ॥ अर्घ्यं संस्थाप्य ॥ भूतोत्सादनादिना नित्यपूजावत् कृत्वा प्राणनायम्य ।
ॐ विष्णुः ३ अद्येह व्रतसिद्ध्यर्थं कार्तिकस्नानाङ्गराधादामोदरयोः पूजनमहं करिष्य ॥
हिमस्यत्वेत्यरन्युत्तारायणपूर्वकं पञ्चामृतैस्संस्नाप्य ॥ एनत्त० इति प्रतिष्ठाप्य ॥ ॐ भूर्भुवः स्वः
राधादामोदर इहागच्छेत्यावाह्य ॥ ततो ध्यानम् ॥ दक्षिणाधः स्तनकरादारभ्यैतत्प्रदक्षिणम् ॥ शंख-
चक्र-गदा-शार्ङ्ग-पद्मैर्दामोदरो भवेत् ॥ ततो नाममन्त्रेण आवाहनमासनम्पाद्यं स्नानं मधुपर्क-
चक्र-गदा-शार्ङ्ग-पद्मैर्दामोदरो भवेत् ॥ ततो नाममन्त्रेण आवाहनमासनम्पाद्यं स्नानं मधुपर्क
म्पञ्चामृतमाचमनम् वस्त्रम् गन्धं यवान् पुष्पाणि ॥ ततोऽङ्गपूजा ॥ ॐ दामोदराय नमः पादौ
पूजयामि ॥ केशवाय० कटिं पू० ॥ नारायणाय० उदरं पू० ॥ श्रीधराय० बाहू पू० ॥ गोवि-
न्दाय० मुखं पू० ॥ सहस्राक्षाय० नेत्रे पू० ॥ सर्वेश्वराय० ललाटं पू० ॥ विष्णवे० शिरः पू० ॥

दामोदराय० ॥ सर्वाङ्गं पू० ॥ ततो धूपं दीपं नैवेद्यं ताम्बूलं दक्षिणां दत्त्वा ॥ ततो ध्यात्वा । सजलम् अर्घ्यं दद्यात् ॥ जानुभ्यामवनिं गत्वा ॥ ॐ नमः सहस्रशीर्षाय सहस्राक्षाय ते नमः ॥ नमः सहस्रपादाय पुरुषाय नमोऽस्तु ते ॥ सहस्रनाम्ने देवेश प्रसीद त्वं ममाऽच्युत ॥ अर्घ्यं गृहाण भगवन्सर्वकामप्रदो भव ॥ अक्षया संततिर्मेऽस्तु दामोदर नमोऽस्तु ते ॥ इति मंत्रेणाऽर्घ्यं ददयात् ॥ नीराजनं कृत्वा नाममंत्रेण पुष्पाञ्जलिम् ॥ एवं प्रत्यहं पूजां कुर्वन्कार्तिककथालापैरन्यैः स्तोत्र-पाठादिभिश्च कार्तिकमासं निगमयेत् । राधादामोदरपूजनं तु सुवर्णमयीं प्रतिमां संस्थाप्य पूजयेत् ॥ प्रतिमाऽभावपक्षे तुलस्यामेव पूजयेत् ॥

अथ कार्तिकस्नानाङ्गदीपदानम् ॥ ॐ विष्णुः ३ ... अद्येहामुकोऽहं सकलपापक्षयपूर्वकं मनोभि-लषितफलावाप्तये राधादामोदरप्रीतये ससुवर्णदीपदानमहं करिष्ये ॥ इति संकल्पः ॥ ॐ ज्ञानप्रदाय सर्वसौख्याय विष्णुदेवाय दीपाय नमः ॥ इति दीपं गन्धादिभिस्संपूज्य ब्राह्मणायार्पयेत् । दान-वाक्यम् ॥ दीपो ज्ञानप्रदो नित्यं देवतानां प्रियः सदा ॥ दानेनाऽस्य भवेत्सौख्यं शान्तिर्मे वाञ्छितं फलम् ॥ सज्योतिर्गुणपात्रं च दीपं घृतसमन्वितम् ॥ सुखदं चाऽस्य दानेन शान्ति-रस्तु सदा मम ॥ इति दीपदानविधिः ॥

अथ कार्तिककृष्णत्रयोदश्यां कृत्यम् ॥ प्रातःकाले काकबलिदानम् ॥ तत्र क्रमः ॥
मत्स्यमांससमन्वितम् भक्तबलिं गृहीत्वाऽङ्गणे काकं संपूज्याऽनेन मन्त्रेण बलिं दद्यात् काकोऽसि
यमदूतोऽसि वायसोऽसि महामते ॥ इमं बलिं गृहाण त्वं त्रायस्व यमसंकटात् ॥ तस्यामेव
सन्ध्यायां यमदीपदानम् ॥ ॐ विष्णुः ३ ... मम सपरिवारस्यायुरारोग्यैश्वर्योदयाभिपूर्वकाऽप-
मृत्युनिवारणाय यमप्रीत्यै दीपदानमहं करिष्ये । दीपं प्रज्वाल्य गन्धपुष्पाक्षतमादाय ध्यायेत्—
यमाय पाशहस्ताय महिषारूढाय कृष्णवर्णाय नमः इति ॥ ततोऽञ्जलिं बद्ध्वा प्रार्थयेत् ।
मृत्युः पाशधरः कृष्णः कालदण्डधरो महान् ॥ तुष्टोऽस्तु दीपदानेन त्रयोदश्यां सधर्मराट ॥
मृत्युना पाशदण्डाभ्यां कालेन श्यामयेन च ॥ त्रयोदश्यां दीपदानात् सूर्यजः प्रीतये
मम ॥ धर्मराज नमस्तुभ्यं भवादुद्धरणक्षमः ॥ अज्ञानज्ञानदोषान्मे क्षमस्व त्वं कृपाकर ॥
ॐ तत्सत् ३ ॐ विष्णुः ३ ... मया यमप्रीतये कृतैतत् दीपदानसांगतासिद्ध्यर्थं इमां दक्षिणां
ब्राह्मणाय दास्ये तत्सन्नमम ॥ इति यमदीपदानविधानम् ॥

अथातो नरकचतुर्दश्यां कृत्यम् ॥ ब्रह्मपुराणे तत्रादौ स्नानम् ॥ ॐ विष्णुः ३ ... अद्येह मम सकलपापक्षयपूर्वकं श्रुतिस्मृतिकथितफलावाप्तये नरकचतुर्दश्यां तैलाभ्यङ्गपूर्वकं मलापकर्षणस्नानमहं करिष्ये ॥ अपामार्गमथोतुम्बो प्रपुन्नागमथापरम् । भ्रामयेत्स्नानमध्ये तु नरकस्य क्षयाय वै ॥ तथा च ॥ सकण्टक - पल्लवापामार्गाच्छिरस उपरि भ्रामयित्वा धर्मराजस्य नामभिस्तर्पयेत् ॥ तैले लक्ष्मीर्जले गङ्गा दीपावल्यां चतुर्दशी ॥ प्रातःस्नानन्तु यः कुर्यात् यमलोकं न पश्यति ॥ वत्सरादौ वसन्तादौ बलिराज्ये तथैव च ॥ तैलाभ्यंगमकुर्वाणो रौरवं नरकं व्रजेत् ॥ अपामार्गभ्रमणमन्त्रः ॥ सीतालोष्टसमायुक्तः सकंटकदलान्वितः ॥ भ्रामयं स्नानमध्येऽहं नरकस्य क्षयाय वै ॥ तर्पणन्तु जीवत्पितृकैरपि कर्तव्यम् ॥ अपसव्येन ॥ तर्पणमन्त्रः—यमाय धर्मराजाय मृत्यवे चान्तकाय च । वैवस्वताय कालाय सर्वभूतक्षयाय च ॥ औदुम्बराय दध्नाय नीलाय परमेष्ठिने ॥ वृकोदराय चित्राय चित्रगुप्ताय वै नमः ॥ ततस्तिलतैलेन दीपद्वयं प्रज्वाल्य संपूज्य निवेदयेत् ॥ तत्र मन्त्रः ॥ शुनकौ श्यामसबलौ भ्रातरौ यमसेवकौ ॥ तुष्येतां च चतुर्दश्यां दीपदानेन मृत्युजौ ॥

इति मन्त्रेण नद्यां प्रवाहयेत् ॥ तस्मिन्नेव दिने प्रातःकाले कथां श्रुत्वा शुने मांसोदनबलिमपि दित्सन्ति स्वाचारात् ॥ इति नरकचतुर्दशीकृत्यम् ॥

अथाऽमायां कृत्यम् । तस्यां रात्रौ लक्ष्मीपूजनम् ॥ उपोष्य सायंकाले स्नात्वा शुद्धवस्त्रं परिधाय गृहाट्टालिकांगणकोष्ठेषु गोष्ठे सर्वत्र दीपसात् कृत्वा पूजास्थानमागत्य अर्घ्यादिकं संस्थाप्य प्राणानायम्य सङ्कल्पं कुर्यात् । ॐ विष्णुः ३ ....अद्येहामुकोऽहं विविधमनोभीष्टितफलावाप्तये सुखरात्र्यां यथालिलितोपचारैः श्रीमहालक्ष्म्याः पूजनमहं करिष्ये ॥ आदौ दीप - कलश - गणेशादीन् पूजयित्वा ॥ ततः प्रथमं कुबेरं पूजयेत् ॥ सुखरात्र्यां प्रदोषे तु कुबेरं पुजयन्ति वै ॥ धनदाय नमस्तुभ्यं निधिपद्माधिपाय च ॥ भवन्तु त्वत्प्रसादान्मे धन-धान्यादिसंपदः ॥ इति कुबेरपुजा ॥ ततः इन्द्रपुजा ॥ आदित्यपुराणे ॥ ध्यानम् ॥ ऐरावत-समारूढो बज्रपाणिः पुरन्दरः ॥ शचीपतिश्च ध्यातव्यो नानाऽऽभरणभूषितः ॥ इति ध्यात्वा ॥ गन्धादिभिः सम्पुज्य प्रार्थयेत् ॥ विचित्रैरावतस्थाय भास्वत्कुलिशपाणये ॥ पौलाभ्यां लिङ्गिताङ्गाय सहस्राक्षाय ते नमः ॥ इति इन्द्रपजां विधाय ॥ श्रीमहालक्ष्मीं पुजयेत् ॥

स्वर्णप्रतिमां संस्थाप्य ॥ ॐ भूर्भुवः स्वः इति प्रतिष्ठाप्य ॥ श्रीसूक्तेन षोडशोपचारैः सम्पूज्य समापयेत् ॥ सुखरात्र्यां प्रार्थनामन्त्रः । विश्वरूपस्य भार्याऽसि पद्मे पद्मालये शुभे ॥ महालक्ष्मी-र्नमस्तूर्ध्वं सुखरात्रं कुरुष्व मे ॥ वर्षाकाले महाघोरे यन्मया दुष्कृतं कृतम् ॥ सुखरात्रप्रभावेण तन्मेऽलक्ष्मीर्व्यपोहतु ॥ या रात्रिः सर्वदेवानां देवानां सृष्टिसंभवा ॥ आख्याता भूतले देवि सुखरात्रिं नमोऽस्तु ते ॥ नमस्ते सर्वदेवानां वरदाऽसि हरिप्रिये ॥ या रात्रिस्त्वत्प्रपन्नानां सा मे भूयात्त्वदर्चनात् ॥ इति लक्ष्मीप्रार्थनामन्त्राः ॥ सुखरात्रिरुषः कालः प्रदोषो ज्वलितांगणे ॥ सर्वान्बन्धून्वधूश्चैव वाचा कुशलयार्चयेत् ॥ प्रदीपबन्धनं कार्यं लक्ष्मीमंगल-हेतवे ॥ गोरोचनाक्षताश्चैव दद्यादङ्गेषु सर्वतः ॥ इति लक्ष्मीपूजा ॥

ततः प्रतिपदि कृत्यम् ॥ गोवर्धनपूजा ॥ गोमयगोवर्धनपर्वतं निर्माय नानाविध-कुसुमफलपल्लव-पीत-हरित-रक्त-ध्वजादिभिरलंकृत्य पूजयेत् ॥ तद्यथा ॥ ॐ विष्णुः ३ अद्यो-हाऽमुकोऽहं सकलपापक्षयपूर्वकं श्रीपरमेश्वरप्रीत्यर्थं गोवर्धनं गोपालपूजनमहं करिष्ये ॥ गोमूर्तिं विधाय पञ्चामृतैः संस्नाप्य ॥ ॐ गोपालगोवर्धनौ इहागच्छेतामिह तिष्ठेतां सुप्रतिष्ठितौ

वरदौ भवेताम् ॥ ध्यानम् ॥ बलिराज्ञो द्वारपालोऽभवोऽनवनगप्पते ! निजवाक्यार्थसिद्धाय सगोवर्धन गोपते ॥ तत्रो आवाहनादिषोडशोपचारैः सम्पूज्य ॥ बलरामं नन्दं यशोदां गोपालाम् गोपिनीं गोकुलं सर्वाश्च पञ्चोपचारैस्संपूजयेत् ॥ पुष्पाञ्जलिः ॥ गोपालमूर्ते विश्वेश शक्रोत्सवविभेदक ॥ गोवर्धनकृतच्छत्रपूजां मे गृह्यतां प्रभो ॥ गोवर्धन धराधार गोकुलत्राणकारक ॥ विष्णुबाहुकृतच्छाय गवां कोटिप्रदो भव ॥ इति गोवर्धनपुजा ॥ तत्रैव गोपुजनम् ॥ विधिः ॥ ॐ विष्णुः ३ अद्येत्यामुकोऽहं सकलपापक्षयपूर्वकं गोकुलवर्धनार्थं श्रीपरमेश्वरप्रीत्यर्थं सवत्सानां गवां पूजनमहं करिष्ये ॥ तिल तैलयुक्तसौक्किहरिद्रादिभिः शृङ्गाण्यंगानि सम्पूज्य षोडशोपचारैः संपूज्य च प्रत्यंगान् पुजयेत् ॥ ॐ पादाभ्यां नमः ॥ आस्याय नमः ॥ शृङ्गाभ्यां नमः ॥ स्कन्धाय नमः ॥ पृष्ठाय नमः ॥ पुच्छाय नमः ॥ चरमपादाभ्यां नमः ॥ वत्साय नमः ॥ गवामङ्गेषु तिष्ठन्ति भुवनानि चतुर्दश ॥ यस्मात्तस्माच्छिवं मेऽस्तु इह लोके परत्र च ॥ इति संप्रार्थ्य ॥ गोग्रासं ददयादनेन मन्त्रे- ॥ सौरभेय्यास्सर्वहिताः पवित्राः पुण्यराशयः प्रतिगृह्णन्त्विमं ग्रासं गावस्त्रैलोक्यमातरः ॥ अथ महानीराजनम् ॥

लक्ष्मीर्या लोकपालानां धेनुरूपेण संस्थिता । घृतं वहति यज्ञार्थे मम पापं व्यपोहतु ॥
अथ प्रदक्षिणा—अग्रतः सन्तु मे गावो गावो मे सन्तु पृष्ठतः । गावो मे हृदये सन्तु गवां मध्ये
वसाम्यहम् ॥ इति ॥ ततो गोमतीं श्रावयेत् ॥ गावः सुरभयो नित्यं गावो गुग्गुलुगन्धिका ।
गावः प्रतिष्ठा भूतानां गावः सर्वफलप्रदाः ॥ अन्नमेव परं गावो देवानां हविरुत्तमः । पावनं सर्व-
भूतानां क्षरन्ति च वहन्ति च ॥ हविषा मन्त्रपूतेन तर्पयेदमरान्दिवि । ऋषीणामग्निहोतॄणां
गावो होमप्रतिष्ठिकाः ॥ सर्वेषामेव देवानां गावः शरणमुत्तमम् । गावः सर्वस्य लोकस्य गावो
धन्याः सवाहनाः ॥ नमो गोभ्यः श्रीमतीभ्यः सौरभेयीभ्य एव च । नमो ब्रह्मसुताभ्यश्च पवित्रा-
भ्यो नमो नमः ॥ ब्राह्मणाश्चैव गावश्च कुलमेकं द्विधाकृतम् । एकमन्त्राश्च तिष्ठन्ति हविरेकत्र
तिष्ठति ॥ गावो मामुपतिष्ठन्तु हेमशृंग्यः पयोमुचः । सुरभ्यः सौरभेयश्च सरितः सागरं यथा ॥
गावः पश्याम्यहं नित्यं गावः पश्यन्तु मां सदा । गावोऽस्माकं वयं तासां यत्रो गावस्ततो
वयम् ॥ एवं रात्रौ दिवा वापि समेषु विषमेषु च । महाभयेषु च नरः कीर्त्तयन् मुच्यते
भयात् ॥ घृतक्षीरप्रदा गावो घृतयोन्यो घृतोद्भवाः । घृतनद्यो घृतावर्ता गावः सन्तु सदा

गृहे ॥ घृतं मे हृदयं नित्यं घृतं नाभ्यां प्रतितिष्ठम् । घृतं मे सर्वतश्चापि घृतं मे नमसि स्थितम् ॥ गावो ममाऽग्रतो नित्यं गावः पृष्ठत एव च । गावो मे सर्वतः सन्तु गवां मध्ये वसाम्यहम् ॥ इत्याचम्य जपन् सायं प्रातश्च पुरुषः सदा ॥ यदह्नो कुरुते पापन्तत्सर्वं परिमुच्यते ॥ यं प्रातः कुरुते पापं तस्माच्चाऽपि विमुच्यते ॥ इति गोमतीं श्रावयित्वा विसर्जन विधाय ईश्वरार्पणं कुर्यात् ॥ ततो गाः वने विसृज्य कलपालिकां कृत्वा रात्रौ भोजयित्वा गोष्ठे दीपान्प्रज्वाल्य यथासुखं विहरेत् ॥ अस्यां प्रतिपदि षण्मुहूर्तव्यापिनी द्वितीया भवति ॥ तत्र चन्द्रदर्शनदोषात् पूर्वं प्रतिपदि एतत्कर्म कार्यम् । उक्तं च- ॥ गवां क्रीडादिने यत्र रात्रौ दृश्येत चन्द्रमाः ॥ सोमो राजा पशून्हन्ति सुरभी - पुजकाँस्तथा ॥ इति पुराणसमुच्चयोक्तेः ॥ अन्यच्च ॥ प्रतिपद्दर्शसंयोगे क्रीडनन्त गवां मतम । परविद्धां तु यः कुर्यात् पुत्रदारधनक्षयः ॥ इति देवलः ॥ गोवर्धनपुजनञ्च मुख्यगोवर्धनसन्निधौ तस्यैव कार्यं तदसन्निधौ चेत् गोमयेन गोवर्धनाकारं कृत्वा सर्वं कार्यं कर्तव्यम् ॥ ततो वलेर्गृहद्वारि स्थाप्यो गोमयमूर्तिमान् ॥ मुने श्रीबालगोपालः स्थाप्यो गोवर्धनो महान् ॥ इति पद्मोक्तेः ॥ इति गोपुजा ॥

अथ बलिपुजनविधानम् ॥ निर्णयामृते स्कान्दे ॥ कृत्वैतत्सर्वमेवेह रात्रौ दैत्यपतेर्बलेः ॥
पुजां कुर्यान्नरः साक्षात्भूमौ मण्डलकेशवे ॥ बलिनामाख्यदैत्येन्द्रं वर्णकैः पञ्चरङ्गकैरिति ॥
बलिं पञ्चवर्णसूत्रेण सपरिवारं वराभयकरं शालायां संलिख्य सुगन्धार्घ्यं दत्त्वा भूतोत्सादनादि
नित्य पुजावत् कृत्वा पुनरर्घ्यं संस्थाप्य प्राणानायम्य-ॐ विष्णुः ३ अद्येहामुकोऽहं
सवत्सरावच्छिन्नसुखकामः सपरिवारस्य बलेः पुजनमहं करिष्ये ॥ ॐ भुर्भुवः स्वः सपरिवार
बले इहागच्छेह तिष्ठ सुप्रतिष्ठितो भव वरदो भव ॥ ध्यानम् ॥ सर्वाभरण सम्पुर्ण विन्ध्या-
वल्यासहासितम् ॥ कूष्माण्डबाणजंभोरुमयदानवसंवृतम् ॥ सम्पूर्णहृष्टवदनं किरीटोत्कट-
कुण्डलम् ॥ द्विभुजं दैत्यराजानं ध्यायेद्वैरोचनं बलिम् ॥ ततः पाद्याद्युपचारैः पूजयेत ॥
बलये नमः ॥ विन्ध्यावल्यै नमः ॥ कूष्माण्डाय नमः ॥ बाणाय नमः ॥ जम्भाय नमः ॥ उरवे
नमः ॥ मयाय नमः ॥ इति प्रत्येकं सम्पूज्य ॥ आवाहनादि-नीराजनान्तं विधाय प्रार्थयेत् ॥
अर्चनाविधिस्तु मदनरत्ने ॥ गन्धपुष्पान्नन वैदयैरक्षतैर्गुणपूपकैः ॥ मधुमांससुरालेह्य दीपावल्युप-
हारकैः ॥ मन्त्रेणानेन राजेन्द्र समन्त्री सपुरोहितः ॥ सम्पूज्य विधिवत्पूर्वं तदनु प्रार्थना चरेद् ॥

मन्त्रश्च—बलिराज नमस्तुभ्यं वैरोचनसुत प्रभो ॥ भविष्येन्द्रसुरारातै विष्णुसान्निध्यकारक ॥ सुराभावे गोदुग्धसौन्धवमिश्रितं कृत्वा समर्पयेत । एवं विधिना सम्पूज्य विसर्जयेत् ॥ इति बलिपूजनम् ॥

अथ कार्तिकशुक्लनवम्यां कूष्माण्डदानम् ॥ ॐ विष्णुः ३ ... अद्येहामुकोऽहं कार्तिकशुक्लनवम्यां श्रीपरमेश्वरप्रीत्यर्थं सशैलभूदानजन्यफलावाप्तर्थं घृतयुक्तं वज्रवैदूर्यमणिमुक्ताप्रवालहाटकादिभिर्युक्तं इमं कूष्माण्डं विष्णुदैवत्यं ... सुपूजिताय ब्राह्मणाय दास्ये तत्सन्नममेति ॥ दानवाक्यम् ॥ कूष्माण्डं बहुबीजाढ्यं ब्रह्मणा निर्मितं पुरा । तस्मादस्य प्रदानेन सन्तनिर्वर्धतां मम ॥ इति ॥

अथ हरिबोधिनीविधानम् ॥ इक्षुदण्डैर्गृहं कृत्वा देशकालोद्भवः फलैः ॥ सम्पूर्णदीपावलिभिः कारयेद्धरिमन्दिरम् ॥ रात्रौ जागरणं कुर्यात्सूर्पडिण्डिमनिःस्वनैः ॥ एवं यः कुरुते मर्त्यो विष्णुलोकं स गच्छति । एकादश्यां प्रातः स्नात्वा संध्यावन्दनादि नित्यकर्म समाप्य ॥ शुक्लाम्बरधरं विष्णुमिति विष्णु सम्प्रार्थ्य ॥ ॐ विष्णुः ३ ... अद्येहामुकोऽहं सकलपापक्षय-

पूर्वकं श्रीमत्परमेश्वरप्रीतये अस्यामेकादश्यां शास्त्रोक्तनियमविधानेन निरवच्छिन्नोपवासमहं करिष्ये ॥ नियममन्त्रः ॥ एकादश्यां निराहारः सर्वभोगविवर्जितः ॥ कुर्वेऽहं पुण्डरीकाक्ष शरणं मे भवाच्युत ॥ अन्यच्च ॥ एकादश्यां निराहारे वर्जयिष्यामि वै जलम् ॥ केशवः प्रीणनार्थाय अन्यदाचमनादृते ॥ इति ब्रह्मवैवर्ते ॥ ततो मध्यान्हे पूर्ववत् स्नानं विधात कृतानित्यक्रियो मण्डपं यथाशक्त्याऽलंकृत्य पूजामारभेत् ॥ ॐ विष्णुः ३ अद्येहामुकोऽहं सकल-पापक्षयपूर्वकं यथोक्तफलावाप्तये अद्यैकादश्यां श्रीविष्णोः पूजनमहं करिष्ये ॥ शान्ताकारम्० इति ध्यानम् ॥ ततः पुरुषसूक्तेनावाहनादिषोडशोपचारैस्संपूजयेत् ॥ ततोऽङ्गपूजा ॥ मत्स्यदेवाय नमः पादौ पूजयामि ॥ कूर्मदेवाय० जंघे पू० ॥ वराहदेवाय० जानुनी पू० ॥ नृसिंह-देवाय० कटिं पू० ॥ वामनाय० उपरं पू० ॥ परशुरामदेवाय० बाहू पू० ॥ रामचन्द्रदेवाय कण्ठं पू० ॥ कृष्णदेवाय० मुखं पू० ॥ बौद्धदेवाय० नेत्रे पू० ॥ कल्किदेवाय०ललाटं पू० ॥ केशवदेवाय० शिरः पू० ॥ सर्वात्मने नमः सर्वाङ्गं पूजयामि ॥ ततोऽष्टाक्षरमन्त्रं जप्त्वा अर्घ्यं दद्यादनेन मन्त्रेण—जन्मान्तरसहस्रेषु यन्मया पातकं कृतम् ॥ तत्सर्वं नाशमायातु

प्रसादाच्च केशव ॥ ततो गीत-नृत्य-कथाश्रवणादिभिरहर्निशं च नीत्वा प्रभाते स्नानसंध्या
दिकं विधाय विष्णुः प्रबोधनं कार्यं द्वादश्याम् ॥ तत्र मन्त्रः ॥ ब्रह्मेन्द्र-रुद्राग्नि-कुबेर-मित्र-सोमा-
दिभिर्वन्दितधापादपद्मः ॥ बुध्यस्व देवेश जगन्निवास मन्त्रप्रभावेण सुखेन देव ॥ इयं च द्वादशी
देव प्रबोधार्थं विनिर्मिता ॥ त्वमेव सर्वलोकानां हितार्थं शेषशायिनी ॥ उत्तिष्ठोत्तिष्ठ गोविन्द
त्यज निद्रां जगत्पते ॥ त्वयि सुप्ते जगत सुप्तमुत्थिते चोत्थितं भवेत् ॥ गता मेघा वियच्चैव
निर्मलं निर्मला दिशः । शारदानि च पुष्पाणि गृहाण मम केशव ॥ इति शरद्कालोद्भवैः पुष्पैः
पुष्पाञ्जलिं दद्यात् । दन्तधावनार्थम् इक्षुदण्डानि विष्णवे समर्पयेत् ॥ इति ॥

अथ भीष्मपंचकव्रतम् ॥ तत्र प्रयोगः ॥ प्रातः स्नानसंध्यादि कर्म कृत्वा वारिपूर्ण-
ताम्रपात्रमादाय उदङ्मुखः पवित्रपाणिश्चम्य विष्णुं संप्रार्थ्य ॥ ॐ अद्येहामुकोऽहं
सकलापापक्षयपूर्वकं श्रुतिस्मृतिपुराणोक्तफलावाप्तये श्रीपरमेश्वरप्रीतये यथोक्तविधिना
भीष्मपञ्चकव्रतं करिष्ये ॥ ततो मध्यान्हे नद्यां गोमयेन स्नात्वा यवदर्भतिलैः पितॄन्
संतर्प्य पुनः स्नात्वा प्रजासमाप्तिपर्यन्तं मौनी भवेत् । धौते वाससी परिधाय तिलकं

वा० ९१८

का पु०

कृत्वा गन्धपुष्पादियुतमर्घ्यमुक्तमन्त्रेणोक्तरीत्या पञ्च कृत्वा यज्ञोपवीती सन् पितृतीर्थेन सतिलमुदकं भीष्माय तर्पयेत् ॥ भीष्मः शान्तनवो वीरः सत्यवादी जितेन्द्रियः ॥ आभिरद्भिः समाप्नोति पुत्रपौत्रोचितां क्रियाम् ॥ वैयाघ्रपदगोत्राय सांकृत्यप्रवराय च ॥ अपुत्राय ददाम्येतत् सतिलं भीष्मवर्मणे ॥ वसूनामवतराय शन्तनोरात्मजाय च अर्घ्यं ददामि भीष्माय आजन्मब्रह्मचारिणे ॥ इति तर्पणं विधाय ॥ ततो भीष्मं लक्ष्मीसहितं वासुदेवं यथामिलितोपचारैर्जले सम्पूज्य पञ्चरत्नानि ब्राह्मणाय दत्त्वा गृहं गत्वा समाहितो भूत्वा ॥ आवाहनादि षोडशोपचारैर्विष्णुं सम्पूज्य पञ्चसु दिनेष्वनवच्छिन्नो भवेत् ॥ पायसं निवेद्य पुजाशेषं समापयेत् ॥ ततो 'हरये नमः' इति कमलैर्विष्णोः पादौ पुजयेत् ॥ सहस्रनामस्तोत्रपाठादिना स्तुत्वा प्रणम्याऽष्टाक्षरमन्त्रं अष्टोत्तरशतं जपं कृत्वा स्वगृह्योक्तविधिनाऽग्निं संस्थाप्य घृताक्ततिलव्रीहियवान् 'विष्णवे नमः स्वाहा' इत्यष्टोत्तरशतं हुत्वा स्वर्णं दद्यात् ॥ ततो गन्धद्वारामितिगोमयमादाय त्रिः प्राश्योपविशेत् ॥ मुन्यन्नादिहविष्यान्नं भक्षयेत् ॥ सायं संध्यामुपास्य विष्णुं प्रणम्याऽष्टाक्षरं पुनर्जपित्वा भूमिशायी भवेत् ॥ एवं पञ्चस्वपि दिनेषु कुर्यात् ॥ तत्र विशेषः ॥ द्वितीये

प्रसादाच्च केशव ॥ ततो गीत-नृत्य-कथाश्रवणादिभिरहर्निशं च नीत्वा प्रभाते स्नानसंध्या
दिकं विधाय विष्णुः प्रबोधनं कार्यं द्वादश्याम् ॥ तत्र मन्त्रः ॥ ब्रह्मेन्द्र-रुद्राग्नि-कुबेर-मित्र-सोमा-
दिभिर्वन्दितपादपद्मः ॥ बुध्यस्व देवेश जगन्निवास मन्त्रप्रभावेण सुखेन देव ॥ इयं च द्वादशी
देव प्रबोधार्थं विनिर्मिता ॥ त्वमेव सर्वलोकानां हितार्थं शेषशायिनी ॥ उत्तिष्ठोत्तिष्ठ गोविन्द
त्यज निद्रां जगत्पते ॥ त्वयि सुप्ते जगत सुप्तमुत्थिते चोत्थितं भवेत् ॥ गता मेघा वियच्चैव
निर्मलं निर्मला दिशः । शारदानि च पुष्पाणि गृहाण मम केशव ॥ इति शरद्कालोद्भवैः पुष्पैः
पुष्पाञ्जलिं दद्यात् । दन्तधावनार्थम् इक्षुदण्डानि विष्णवे समर्पयेत् ॥ इति ॥

अथ भीष्मपंचकव्रतम् ॥ तत्र प्रयोगः ॥ प्रातः स्नानसंध्यादि कर्म कृत्वा वारिपूर्ण-
ताम्रपात्रमादाय उदङ्मुखः पवित्रपाणिश्चम्य विष्णुं संप्रार्थ्य ॥ ॐ अद्येहामुकोऽहं
सकलापापक्षयपूर्वकं श्रुतिस्मृतिपुराणोक्तफलावाप्तये श्रीपरमेश्वरप्रीतये यथोक्तविधिना
भीष्मपञ्चकव्रतं करिष्ये ॥ ततो मध्यान्हे नद्यां गोमयेन स्नात्वा यवदर्भतिलैः पितॄन्
संतर्प्य पुनः स्नात्वा प्रजासमाप्तिपर्यन्तं मौनी भवेत् । धौते वाससी परिधाय तिलकं

कृत्वा गन्धपुष्पादियुतमर्घ्यमुक्तमन्त्रेणोक्तरीत्या पञ्च कृत्वा यज्ञोपवीती सन् पितृतीर्थेन सतिलमुदकं भीष्माय तर्पयेत् ॥ भीष्मः शान्तनवो वीरः सत्यवादी जितेन्द्रियः ॥ आभिरद्भिः समाप्नोति पुत्रपौत्रोचितां क्रियाम् ॥ वैयाघ्रपदगोत्राय सांकृत्यप्रवराय च ॥ अपुत्राय ददाम्येतत् सतिलं भीष्मवर्मणे ॥ वसूनामवतराय शन्तनोरात्मजाय च अर्घ्यं ददामि भीष्माय आजन्मब्रह्मचारिणे ॥ इति तर्पणं विधाय ॥ ततो भीष्मं लक्ष्मीसहितं वासुदेवं यथाभिलितोपचारैर्जले सम्पूज्य पञ्चरत्नानि ब्राह्मणाय दत्त्वा गृहं गत्वा समाहितो भूत्वा ॥ आवाहनादि षोडशोपचारैर्विष्णुं सम्पूज्य पञ्चसु दिनेष्वनवच्छिन्नो भवेत् ॥ पायसं निवेद्य पुजाशेषं समापयेत् ॥ ततो 'हरये नमः' इति कमलैर्विष्णोः पादौ पुजयेत् ॥ सहस्रनामस्तोत्रपाठादिना स्तुत्वा प्रणम्याऽष्टाक्षरमन्त्रं अष्टोत्तरशतं जपं कृत्वा स्वगृह्योक्तविधिनाऽग्निं संस्थाप्य घृताक्ततिलव्रीहियवान् 'विष्णवे नमः स्वाहा' इत्यष्टोत्तरशतं हुत्वा स्वर्णं दद्यात् ॥ ततो गन्धद्वारामितिगोमयमादाय त्रिः प्राश्योपविशेत् ॥ मुन्यन्नादिहविष्यान्नं भक्षयेत् ॥ सायं संध्यामुपास्य विष्णुं प्रणम्याऽष्टाक्षरं पुनर्जपित्वा भूमिशायी भवेत् ॥ एवं पञ्चस्वपि दिनेषु कुर्यात् ॥ तत्र विशेषः ॥ द्वितीये

ऽहनि विल्वपत्रैः कटिदेशं पुजयेत् ॥ गोमूत्रं गायत्र्या प्राश्नीयात् ॥ तृतीयेऽह्नि भृङ्गारकेण नाभिं पुजयेत् ॥ आप्यायस्व० इति क्षीरं प्राश्नीयात् ॥ चतुर्थेऽह्नि बाणविल्वजयाभिः स्कन्धा-
वा० वर्चयेत् ॥ दधिक्राव्ण० इति दधि प्राश्नीयात् ॥ पञ्चमेऽह्नि मालत्या शीर्षं पुजयेत् ॥ घृतवतीति का.पु०
२१० घृतं प्राश्नीयात् ॥

अथ पापपुरुषदानम् ॥ सुवर्णप्रतीमां विधाय ॥ यमायत्वा० इति प्रतिमां पाद्यादिभिः पुजयित्वा ॥ पुष्पपूर्णमञ्जलिमादाय ॥ यदन्यजन्मनि कृतमिह जन्मनि वा कृतम् ॥ पापं विनाशमायातु तव पादप्रसादतः इति सम्पुज्य ॥ धर्मो मे प्रीयतामिति समर्प्य वाचकायान्य-स्मै वा प्रतिमां दत्त्वा ब्राह्मणान् पुजयित्वा यथाशक्त्या गोहिण्यादिकं तेभ्यो दद्यात् ॥ उक्तदा नाऽभावे वस्त्रं गोघृतं पायसं दद्यात् । ततः उक्तरीत्या प्रणवेन पंचगव्यं प्राश्य ताम्बूलवजनं सत्यभाषणं सत्कथालापादिना दिनं निगमयेत् ॥ इति भीष्मपंचकव्रतम् ॥

अथ कार्तिकस्नान-व्रतोद्यापन - तुलसीविवाह-प्रयोगः ॥ पुर्वदिने रात्रौ मासत्रयवर्द्धितायां-रतुलस्या उपरि मण्डलं विधाय ॥ सर्वतोभद्रं विलिख्य कदलीस्तम्भं संस्थाप्य नानाविधतिल-हरित-

रक्तकर्पुर-श्वेतपीतवर्णजपेत्रकरोरणादिभिरलंकृत्य पुनः तत्कालीयोद्भवैः पुष्पैः शतपत्र-कुमुदिनि-
मालती-जाती-प्रवाल-मल्लिका-कोविदार-पाटल - कुन्द-वकुल-चपक-पारिजात - दूर्वा - दमनादिभिः
समलंकृत्य पुनः कालोद्भवैः जम्बीरामलक-मातुलिङ्ग-बदर-नारिकेलकदल्यादिभिः फलैः सम्पूज्य
कर्पूरागरु - कंकोल - कुङ्कुमादि - सुगन्धद्रव्यैः सौगन्ध्य - गुग्गुल-कृष्णागरुकालिङ्गादि-धूपादिभि
सन्धूप्य पंचरत्नयुतकलशं संस्थाप्य ॥ तत्र सुवर्णप्रतिमायां दामोदरं पूजयेत् ॥ मण्डपस्य चतुर्द्वारेषु
पुण्यशील - सुशील - जय - विजयसंज्ञकान् द्वारपालान् पञ्चोपचारैः पूजयेत् । सर्वतोभद्रे पूर्वपद्धत्या
देवतादीन् पूजयेत् ॥ अर्घ्यं संस्थाप्य ॥ प्राणानायम्य संकल्पं कुर्यात् ॥ ॐ विष्णुः ३ अद्य हा-
मुकोऽहं सकलपापक्षयपूर्वकं रम्भा - उर्वशी - तिलोत्तमा - सुकेशी - मंजुघोषाद्यप्सरोभिः स्वर्णदण्ड-
युक्तव्यजनैः शीतलायमानानेकब्रह्मतुल्यब्राह्मणैः सेव्यमानविमानाधिरोहणपूर्वकं शतवर्षावच्छि-
न्ननन्दनवनोद्यानविहरण - तदनन्तर - विष्णुसायुज्यपदप्राप्तिकामः राधादामोदरपूजनमहं करिष्ये ॥
प्रतिष्ठां पूर्ववत् कृत्वा ॥ ध्यानम्—दक्षिणाधस्तनकरादारभ्यैतत् प्रदक्षिणम् ॥ शंखचक्रगदा-
शार्ङ्गपद्मैर्दामोदरो भवेत् ॥ तत्रादौ द्वारपालान् पूजयेत्—पुण्यशीलाय नमः ॥ सुशीलाय नमः ॥

जयाय नमः ॥ विजयाय नमः ॥ ततो दिक्पालान् पूर्वादिक्रमेण पू० ॥ इन्द्राय नमः ॥ अग्नये नमः ॥ यमाय नमः ॥ निर्ऋतये नमः ॥ वरुणाय नमः ॥ वायवे नमः ॥ कुबेराय नमः ॥ ईशानाय नमः ॥ ततो दामोदरं पुरुषसूक्तेन आवाहनादिषोडशोपचारैः पूजयेत् ॥ ततोऽर्घ्यदानम् ॥ नमः सहस्रशीर्षाय सहस्राक्षाय ते नमः ॥ नमः सहस्रपादाय पुरुषाय नमो नमः ॥ सहस्रनाम्ने देवेश प्रसीद त्वं ममाऽच्युत ॥ अर्घ्यं गृहाण देवेश सर्वकामप्रदो भव ॥ अक्षया सन्ततिर्मेऽस्तु दामोदर नमोऽस्तु ते । इत्यर्घ्यं दत्त्वाऽष्टदिक्षु अष्टौ दीपान् प्रज्वाल्य ॥ रात्रौ सत्कथालापगीत-वाद्यादि—मंगलैर्जागरणं कृत्वाऽधिवासयेत् ॥ ततः प्रातः कृतनित्यक्रियः त्रिंशत्संख्याकान् ब्राह्मणान्निमन्त्र्य स्वगृह्योक्तविधिनाऽग्निं संस्थाप्य होमसंकल्पं कुर्यात् ॥ अद्येहाऽमुकोऽहं कार्तिकस्नानव्रतोद्यापनतुलसीविवाहहोमकर्मणि आद्याराज्यदेवताभ्य इदमाज्यं विष्णवे तिल-पायसद्रव्यं मया परित्यक्तं यथादैवतम् अस्तु न मम । चतुःस्वस्त्यादिपर्यन्तं होमं कृत्वा ॥ ॐ राधा-दामोदराभ्यां स्वाहा इदं राधादामोदराभ्याम् न मम इति ॥

अथ विशेषः ॥ ॐ अतोदेवाऽअवन्तुनो अतोविष्णुर्विचक्रमे पृथिव्याःसप्तधामभिः स्वाहा । ॐ इदं विष्णुर्विचक्रमे त्रेधानिदधे पदम् ॥ समूढमस्य पाꣳ सुरे स्वाहा ॥ इतिमन्त्राभ्यां लक्षं वा सहस्रम् अष्टोत्तरशतं वा हुत्वा । पूर्णपात्रदानं विधाय ॥ उत्तराङ्गपूजाञ्च विधाय ॥ अद्येहामुकोऽहं कार्तिकव्रतस्योद्यापनकर्मणि श्रीविष्णोः प्रीतये आश्विनशुक्लैकादशीमारभ्य कार्तिकपौर्णमासीपर्यन्तं कृतस्य व्रतनियमस्य साङ्गतासिध्यर्थम् इमां सुपूजितां सौवर्णीराधादामोदरप्रतिमां सपरिच्छदाम् अमुक गोत्रायाऽऽचार्याय तुभ्यमहं संप्रददे ॥ ततो दानप्रतिष्ठादानप्रतिष्ठासिद्ध्यर्थम् इदं सुवर्णं तत्प्रत्याम्नायद्रव्यं वा ब्राह्मणाय दास्ये ॥इति॥ शक्तिश्चेत्समलंकृतां गां दद्यात् ॥ त्रिंशत्संख्याकान् ब्राह्मणान् सम्पूज्य प्रार्थयेत् ॥ युष्मत्प्रसादाद्देवेश प्रसन्नो भव सर्वदा ॥ व्रतादस्माच्च यत्पापं सप्तजन्मकृतं मया ॥ तत्सर्वं नाशमायातु स्थिरा मे चाऽस्तु संततिः ॥ मनोरथाश्च सफलाः सन्तु नित्यं नवार्चनात् ॥ देहान्ते वैष्णवं स्थानं प्राप्नुयामतिदुर्लभम् ॥ इति संप्रार्थ्य -ॐ अद्येह न्यूनातिरिक्तपरिपूर्णार्थम् इमां भूयसीं दक्षिणां नानानामगोत्रेभ्यो ब्राह्मणेभ्यो यथाभागं विभज्य दास्ये इति संकल्पः ॥

ततः कलशोदकेनाऽभिषेकमन्त्रपाठः ॥ तिलक - रक्षा - बन्धन त्र्यायुषकरणं घृतच्छाया-निरीक्षणादीन् कुर्युः ॥ ब्राह्मणान् भोजयित्वा दक्षिणादिना ब्राह्मणान् सन्तोष्य अचिद्वाक्यानि पठित्वा पारणं कृत्वा बन्धुभिः सह भुञ्जीत ॥

ततो धात्रीच्छायायां भोजनम् ॥ धात्रीच्छायान्तु यः कुर्यात्पितॄणामर्थं विप्रभोजनम् ॥ मुक्तिं प्रयान्ति पितरः प्रसादान्माधवस्य तु । धात्रीफलविलिप्तांगो धात्रीफलविभूषितम् ॥ धात्रीफलकृताहारो नरो नारायणो भवेत् ॥ धात्रीच्छायां समासृत्य योऽर्चयेच्चक्रधारिणम् ॥ पुष्पेऽश्वमेधस्य फलमाप्नोति मानवः ॥ अतो धात्रीपूजा कार्तिक्यमावस्यायामेव कार्या ॥ ब्राह्मणभोजनञ्च कुर्यात् ॥

॥ इति कार्तिकव्रतोद्यापनं समाप्तम् शुभम् ॥

* २२–यमद्वितीयायां भ्रातृपूजाविधिः *

अथ प्रयोगः। शुद्धासने उपविश्यार्घ्यं संस्थाप्य ॥ प्राणानायम्य दीपं प्रज्वाल्याऽऽचम्य अद्ये त्यादि अमुकगोत्रस्य मम आयुरारोग्यैश्वर्योदयप्राप्तिकामो भ्रातृपूजनपूर्वाङ्गत्वेन दीप-कलश-शणेश- पूजनपूर्वकं यम-यमुना-यमदूत-सर्यादिनवग्रह-मार्कण्डेयाद्यष्टचिरञ्जीविनां च पूजनमहं करिष्ये ॥ नमोस्त्वनन्ताय० इति दीपं सम्पूज्य ॥ गणानान्त्वा० इति मंत्रेण गणेशं पूजयेत् ॥ वक्र-तुण्ड० इति प्रार्थयेत्। अथ कलशस्थापनम् ॥ भूरसीसि भूमिशोधनम् ॥ धान्यमसीति धान्यम् ॥ आजिघ्रकलशमिति कलशस्थापनम् ॥ तत्त्वायामीति ॥ जलेनाऽऽपूर्य याः फलिनीरिति पूगिफलम् ॥ हिरण्यगर्भेति पंचरत्नानि ॥ या ओषधीरिति सर्वौषधीः ॥ यवोसीति यवान् ॥ काण्डात्काण्डादिति दूर्वा। स्योनापृथिवीति सप्तमृदः ॥ अम्बे अम्बिकेति आम्रपल्लवैस्तन्मुखमा-च्छाद्य बृहस्पते इति वस्त्रम् ॥ तत्त्वायामीति वरुणमावाह्य पूजयेत् ॥ कलशे गंगादींश्च ॥ सर्वे समुद्राः सरितस्तीर्थानि जलदा नदाः आयान्तु यजमानस्य दुरितक्षयकारकाः ॥ कलशाभि-मन्त्रणम् ॥ कलशस्य मुखे विष्णुः कंठे रुद्रः समाश्रितः ॥ मूले तस्य स्थितो ब्रह्मा मध्ये मातृगणः

स्मृताः ॥ कुक्षौ तु सागराः सप्त सप्तद्वीपा वसुन्धरा ॥ ऋग्वेदोऽथ यजुर्वेदः सामवेदोऽप्यथर्वणः ॥
अङ्गैश्च सहिताः सर्वे कलशन्तु समाश्रिताः ॥ पटदलवसुपत्रपृथिव्यात्मकं पीठं निर्माय तन्मध्ये
यममावाह्य पूजयेत् ॥ मनोजूतिरिति प्रतिष्ठाप्य ध्यायेत् ॥ मेघश्यामं प्रसन्नास्यं नानालङ्कार-
संयुतम् ॥ महिषस्थं दण्डधरं संस्तुतं पितृभिर्वृतम् ॥ नानारूपधरैर्दूतैः श्वेतवस्त्रं भजेद्यमम् ॥
भो यम इहागच्छेह तिष्ठेत्यावाह्य ॥ अथाऽऽसनम् ॥ नानारत्नसमायुक्तं कार्तस्वरविभूषितम् ॥ आसनं
देवदेवेश प्रीत्यर्थं प्रतिगृह्यताम् । अथ पाद्यम् ॥ पाद्यं गृहाण देवेश सर्वक्षेमसमर्थ भोः ॥ भक्त्या
समर्पितं देव लोकनाथ नमोऽस्तु ते ॥ अथाऽर्घ्यम् ॥ एष हि मार्तण्डज पाशहस्त यमान्तकालो-
कधरामरेश । भ्रातृद्वितीयाकृतदेवपूजां गृहाण चार्घ्यं भगवन्नमस्ते ॥ त्वं कर्मसाक्षी भूतानां
शुभाशुभविचक्षकः । गृहाणाऽर्घ्यं धर्मराज वैवस्वत नमोऽस्तु ते । अथ आचमनीयम् ॥ कर्पूरवासितं
तोयं मदाकिन्याः समाहृतम् । आचम्यतां जगन्नाथ मया दत्तं हि भक्तितः ॥ अथ स्नानम् ॥
गङ्गा-सरस्वती-रेवा-पयोष्णी-नर्मदाजलैः ॥ स्नापितोऽसि मया देव अतः शान्तिं कुरुष्व मे ॥
पयःस्नानम् ॥ कामधेनु-समुद्भूतं देवर्षितृप्तिसम् ॥ पयो ददामि देवेश स्नानार्थं प्रतिगृह्य-

ताम् ॥ दधि ॥ चन्द्रमण्डलसंकाशं सर्वदेवप्रियं दधि ॥ स्नानार्थं ते मया दत्तं प्रीत्यर्थं प्रतिगृह्यताम् ॥ घृतम् ॥ रसानामुत्तमं त्वाज्यं देवानां च सदा प्रियम् ॥ तेन त्वं स्नापितो देव निधिकान्तिप्रदो भव ॥ मधु ॥ यस्य धारणमात्रेण तृप्तिं यान्ति पितामहाः ॥ मधुना स्नापितो देव नित्यं शोकहरो भव ॥ अथ शर्करास्नानम् ॥ यमलोकभयात्त्रस्तश्शरणं त्वामतः प्रभो ॥ खण्डस्नानेन देवश मां कुरुष्व सुखान्वितम् ॥ जलेन ॥ कर्पूरेलासमायुक्तं सुगन्धिद्रव्यसंयुतम् ॥ गन्धोदकेन स्नपनं स्नानार्थं प्रतिगृह्यताम् ॥ अथाऽऽचमनीयम् ॥ कर्पूरवासितं तोयं मन्दाकिन्याः समाहृतम् ॥ आचम्यतां जगन्नाथ मया दत्तं हि भक्तितः ॥ वस्त्रम् ॥ सर्वभूषाधिके सौम्ये लोकलज्जानिवारणे ॥ मयोपपादिते तुभ्यं वाससी प्रतिगृह्यताम् ॥ अथ यज्ञोपवीतम् ॥ देवदेव नमस्तेऽस्तु त्राहि मां भवसागरात् । ब्रह्मसूत्रं सोत्तरीयं गृहाण पुरुषोत्तम ॥ गंधम् ॥ श्रीखण्डचन्दनं दिव्यं गन्धाढ्यं सुमनोहरम् ॥ विलेपनं सुरश्रेष्ठ गृहाण परमेश्वर । यवाक्षताः ॥ तण्डुलाश्च तथा शुभ्राः कुंकुमाक्तास्सुशोभनाः ॥ मया निवेदिता भक्त्या गृहाण परमेश्वर ॥ अथ पुष्पम् ॥ सेवन्तिकाबकुलचंपकपाटलाब्जैः पुन्नागजातिकरवीर-रसालपुष्पैः ॥ बिल्वप्रवा-

लतुलसीदलमालतीभिस्त्वां पूजयामि जगदीश्वर मे प्रसीद ॥ ततो यमदूतान् पूजयेत् ॥ प्रार्थना ॥
नमोऽस्तु यमदूतेभ्यो बलिनां ये महाबलाः ॥ मनोनिलाक्रान्तवेगाः पाशमुद्गरधारिणः ॥ मम
सौख्यकराः सन्तु पीडयन्तु न मां क्वचित् ॥ ममा ऽपचरितं सर्वं विस्मयन्तु दयालवः ॥ यमुनां
पूजयेत् ॥ प्रार्थना ॥ यमस्वसुर्नमस्तेऽस्तु सूर्यपुत्रि नमोऽस्तु ते ॥ लोकमातर्नमस्ते ऽस्तु नमस्ते
विष्णुवल्लभे ॥ वरदा भव मे नित्यं यमुने लोकपूजिते ॥ ततो यमुनापरिचारिकां पूजयेत् ।
पूजयामि नमस्तुभ्यं यमुनापरिचारिकाम् । त्वमस्व मम कल्याणि यमुनापरिचारिके ॥ आकृष्णेति
सूर्यम् ॥ गणानान्त्वेति गणेशम् । तद्विष्णोरिति विष्णुम् ॥ नमः शंभवायेति शिवम् ॥ ब्रह्मय-
ज्ञानमिति ब्रह्माणम् पूजयेत् । यथामिलितोपचारैर्मार्कण्डेयाद्यष्टचिरञ्जीविनः पूजयेत् ॥
धूपम् ॥ वनस्पतिसोद्भूतो गन्धाढ्यो गन्ध उत्तमः ॥ आघ्रेयः सर्वदेवानां धूपोऽयं प्रतिगृह्यताम् ॥
दीपम् ॥ आज्यञ्च वर्तिसंयुक्तं वह्निना योजितं मया दीपं गृहाण देवेश त्रैलोक्यामितिरापहम् ॥
नाभ्याऽआसीदीति नैवेद्यम् ॥ याःफलिनीरिति फलम् ॥ ताम्बूलम् ॥ हिरण्यगर्भेति दक्षिणाम् ॥
प्रार्थना ॥ धर्मराज नमस्तुभ्यं नमस्ते यमुनाग्रज ॥ पाहि मां किङ्करैः सार्द्धं सूर्यपुत्र नमोऽस्तु ते ॥

सौम्यानां सौम्यरूपाय पापिनां क्रूररूपिणे ॥ अखर्वगर्वशमन कालकाल नमोऽस्तु ते ॥ मार्कण्डे-
याद्यष्टचिरजीवनः प्रार्थयेत् ॥ मार्कण्डेय महाभाग सप्तकल्पान्तजीवन । चिरजीवी यथाऽसि त्वं
तथा मे भ्रातरं कुरु ॥ बलिराज नमस्तुभ्यं नमस्ते विष्णुवल्लभ ॥ भविष्येन्द्रसुराराते वरदो भव
सर्वदा ॥ अज्ञानतिमिरे मग्नं जगद्ज्ञानैकचक्षुषा ॥ उद्धृतं येन मुनिना तस्मै व्यासाय
ते नमः ॥ रामभक्तैकमुकुटरत्नज्योतिःस्वरूपिणे ॥ भविष्यन् ब्रम्हणे तुभ्यं नमो हनुमते नमः ॥
विभीषण नमस्तुभ्यं नमस्ते सुरसत्तम ॥ रामभक्त नमस्तुभ्यं पाहि मां सर्वदाऽनघ ॥ सप्तर्षिप्रवरं
देवं तेजो विप्रस्वरूपिणम् ॥ कृपं नमामि सततं वरदो भव सुव्रत ॥ सर्वोपकरणे शक्तं रामं
शस्त्रभृतां वरम् ॥ पितृचित्तानुगं विप्र पूजयामि नमोऽस्तु ते ॥ मार्कण्डेयो बलिर्व्यासो हनुमाँश्च
विभीषणः ॥ कृपो द्रौणिः परशुरामो ह्यष्टैते चिरजीविनः ॥ पुष्पाञ्जलिं दत्त्वा लोमशं पूजयेत् ॥
लोमशम् सततं नौमि पूजयामि पुनः पुनः ॥ हल्लोमदर्शनात्तस्य ब्रम्हसंख्याऽनुमीयते ॥ बकदाल्भ्य-
मुनिं नौमि शान्तं सङ्गतमानसम् ॥ यस्योदासीन्यलेशान्तं गतिं कालत्रयं सदा ॥ संपूज्य
सर्वान्प्रार्थयेत्—जटिलाः श्मश्रुला दक्षास्त्वग्धमन्यस्थिरूपिणाः । मम पापहराः सन्तु सोमसूर्याग्नि-

वर्चसः ॥ यथाऽस्ति यमुना देवी यमेया भ्रातृशालिनी ॥ तथा मे भ्रातरः सन्तु प्रतिजन्मसु सुव्रताः ॥ तत उक्तरीत्या भ्रातरं समभ्यर्च्य प्रार्थयेत् ॥मार्कण्डेय नमस्तेऽस्तु नमस्ते महदायुषे ॥ चिरायुस्त्वं यथा लोके तथा भ्राता भवेन्मम ॥ आयुःप्रद महाभाग सोमवंशसमुद्भव ॥ महामते मुनिश्रेष्ठ मार्कण्डेय नमोऽस्तु ते ॥ प्रातस्तवानुजाताहम् भुक्ष्व भोज्यमिदं शुभम् ॥ प्रीतये यमराजस्य यमुनाया विशेषतः ॥ यत्प्राप्ता च यमुनया यमराजस्य पूजनात् । तथा ममापि सकलं भवेज्जन्मनि जन्मनि ॥ आयुर्लक्ष्मीर्यशोधैर्यनिर्भयत्वमरोगिता ॥ वाक्पटुत्वमजात्यञ्च जायतां मम सर्वदा ॥ सर्वाभगिन्यः सम्पूज्य ज्येष्ठानुक्रमतः सदा । यथामिलितोपचारैर्भगिनीं पूजयेत् । प्रार्थना—॥ त्वं लक्ष्मीस्त्वमपर्णाऽसि ब्राह्मी त्वं च सरस्वती ॥ त्वत्पूजनात्भवेयुस्ताः पूजिता मम सर्वदा ॥ आयुर्लक्ष्मीर्धनं धान्यं पश्वादिकमरोगिता ॥ सर्वं त्वदर्चनादाप्तं भवेज्जन्मनि जन्मनि ॥ इदं फलं मया देवि स्थापितं पुरतस्तव ॥ तेन मे सफलावाप्तिर्भवेज्जन्मनि जन्मनि ॥ पति-पुत्र-धनैश्वर्य सौभ्रात्रं जन्मजन्मनि । अक्षयं जायतां देवि धर्मराज-प्रसादतः ॥ कन्या-भगिनीपूजने त्वयं विशेषः—दयानिधिस्तुल्यवयस्वरूपो गुणौघपूर्णः कुशलः शतायुः ॥

क्षितीन्द्रनाथो निजधर्मबुद्धिश्चित्तानुगस्ते पतिरस्तु कन्ये ॥ इति भगिनीपूजनम् ॥ अथ यम-
स्तुतिः ॥ त्वमेव वैवस्वतविश्वमूर्तिस्त्वमेव कालः कलनान्तरात्मा । त्वमेव मृत्युः पुरुषस्त्वमेव प्रसीद
देवेश नमो नमस्ते ॥ संसारसागरे मग्नं सदाचारविवर्जितम् ॥ अज्ञानपङ्के सीदन्तं मामुद्धर
दयानिधे ॥ मत्समो नास्ति पापिष्ठस्त्वत्समो नास्ति पापहा । इति विज्ञप्तिरेवात्र त्वदग्रे स्फुटते
मुखात् ॥ दयैव तव लोकानां सेतुभूता भवार्णवात् ॥ मामुद्धर दयासिन्धो निरयादवतारक ॥
यथातवार्चनाद्देवी यमुना भ्रातृशालिनी ॥ तथा तवार्चनाद् देव भ्रातरस्सन्तु मे सदा । अपराध-
सहस्राणि क्रियन्तेऽहर्निशं मया । दासोऽयमिति मां ज्ञात्वा प्रसीद परमेश्वर ॥ यस्य स्मृत्येति०,
कायेन वाचेत्यादिना परमेश्वरे समर्प्य ॥ यान्तु देवगणाः सर्वे पूजामादाय मामिकाम् ॥ इष्टकाम-
प्रसिध्यर्थं पुनरागमनाय च ॥ इति यमपूजनविधिस्सम्पूर्णः समाप्त ॥

* २३–अथ तुलसी-पूजाविधिः *

आचमनम् ॥ ॐ केशवाय नमः ॥ नारायणाय नमः ॥ माधवाय नमः ॥ ततः गोविन्दाय नमः ॥ इति करं प्रक्षाल्य 'विष्णवे नमः' इति नेत्रयोरुदकस्पर्शनं मंगलोच्चारणम् ॥ श्रीमन्महागणाधिपतये नमः ॥ श्रीलक्ष्मीनारायणाभ्यां नमः ॥ श्रीउमामहेश्वराभ्यां नमः ॥ वाणीहिरण्यगर्भाभ्यां नमः ॥ शचीपुरन्दराभ्यां नमः ॥ कुलदेवताभ्यो नमः ॥ ग्रामदेवताभ्यो नमः ॥ स्थानदेवताभ्यो नमः ॥ वास्तुदेवताभ्यो नमः ॥ मातापितृचरणकमलेभ्यो नमः ॥ पतिचरणारविन्दाभ्यां नमः ॥ सर्वेभ्यो देवेभ्यो नमः ॥ सर्वेभ्यो ब्राह्मणेभ्यो नमो नमः ॥ निर्विघ्नमस्तु । पुण्यं पुण्याहं दीर्घमायुरस्तु ॥ मंगल - देवता - प्रार्थना ॥—सुमुखश्चैकदन्तश्च कपिलो गजकर्णकः ॥ लंबोदरश्च विकटो विघ्ननाशो गणाधिपः ॥१॥ धूम्रकेतुर्गणाध्यक्षो भालचन्द्रो गजाननः । द्वादशैतानि नामानि यः पठेच्छृणुयादपि ॥ २ ॥ विद्यारम्भे विवाहे च प्रवेशे निर्गमे तथा । संग्रामे संकटे चैव विघ्नस्तस्य न जायते ॥ ३ ॥ शुक्लाम्बरधरं देवं शशिवर्णं चतुर्भुजम् ॥ प्रसन्नवदनं ध्यायेत्सर्वविघ्नोपशान्तये ॥ ४ ॥ अभीप्सितार्थसिध्यर्थं पूजितो यः सुरासुरैः ॥ सर्वविघ्नहस्तस्मै गणाधि-

पतये नमः ॥ ५ ॥ सर्वमंगलमाङ्गल्ये शिवे सर्वार्थसाधिके ॥ शरण्ये त्र्यंबके गौरि नारायणि नमोऽस्तु ते ॥ ६ ॥ सर्वदा सर्वकार्येषु नास्ति तेषाममङ्गलम् । येषां हृदिस्थो भगवान्मङ्गलायतनो हरिः ॥ ७ ॥ तदेव लग्नं सुदिनं तदेव ताराबलं चन्द्रबलं तदेव ॥ विद्याबलं दैवबलं तदेव लक्ष्मीपते तेऽङ्घ्रियुगं स्मरामि ॥८॥ लाभस्तेषां जयस्तेषां कुतस्तेषां पराजयः ॥ येषामिन्दीवरश्यामो हृदयस्थो जनार्दनः ॥ ९ ॥ विनायकं गुरुं भानुं ब्रह्मविष्णुमहेश्वरान् ॥ सरस्वतीं प्रणम्यादौ सर्वकार्यार्थसिद्धये ॥ १० ॥ यत्र योगेश्वरः कृष्णो यत्र पार्थो धनुर्धरः ॥ तत्र श्रीर्विजयं लक्ष्मीर्ध्रुवा नीतिर्मतिर्मम ॥ ११ ॥ सर्वेष्वारम्भकार्येषु त्रयस्त्रिभुवनेश्वराः ॥ देवा दिशन्तु तत्सिद्धिं ब्रह्मेशानजनार्दनाः ॥ १२ ॥ सङ्कल्पः—ॐ विष्णुर्विष्णुर्विष्णुः ३ श्रीमद्भगवतो महापुरुषस्य विष्णोराज्ञया प्रवर्तमानस्य अद्य ब्रह्मणो द्वितीतपरार्धे श्रीश्वेतवाराहकल्पे अष्टाविंशतितमे कलौ कलिप्रथमचरणे भारतवर्षे भरतखण्डे जम्बूद्वीपे अमुकदेशे संवत्सरायन - ऋतु - मास - पक्ष - तिथि - वासर - नक्षत्र-योग करण - कालादीन्संकीर्त्य सुखसौभाग्य - सन्ततयायुरारोग्यैश्वर्याभिवृद्धिद्वारा श्रीतुलसीदेवताप्रीत्यर्थं तुलसीपूजनमहं करिष्ये । ततः कलशपूजनम् । गंगे च यमुने चैव गोदावरि सरस्वति ॥

नर्मदे सिन्धु - कावेरी जलेऽस्मिन्सन्निधिं कुरु ॥ कलशे वरुणदेवतायै नमः ॥ कलशपूजापरि-
पूर्णार्थं गन्धाक्षतपुष्पाणि समर्पयामि नमस्करोमि अस्मिन्कलशे सर्वाणि तीर्थानि आवाहयामि
संकल्पयामि नमस्करोमि ॥ पूजाद्रव्यप्रोक्षणम्–॥ अपवित्रः पवित्रो वा सर्वावस्थांगतोऽपि वा ॥
यः स्मरेत्पुण्डरीकाक्षं स बाह्याभ्यन्तरः शुचिः ॥ घण्टापूजनम् ॥ आगमार्थं तु देवानां गमनार्थं तु
रक्षसाम् ॥ कुरु घण्टे महानादं देवतार्चनसन्निधौ ॥ घण्टास्थ - गरुडदेवतायै नमः ॥ सकल-पूजा-
परिपूर्णार्थं गंधाक्षतपुष्पाणि समर्पयामि नमः करोमि ॥ दीपपूजनम् । दीपस्त्वं ब्रह्मरूपोऽसि ज्योतिषः
प्रभुरव्ययः ॥ सौभाग्यं देहि पुत्राँश्च सर्वान् कामाँश्च देहि मे ॥ दीपदेवतायै नमः सकल-पूजा-परिपूर्णार्थं
गंधाक्षतपुष्पाणि समर्पयामि नमस्करोमि ॥ श्रीतुलसीध्यानम् ॥ ध्यायेच्च तुलसीं देवीं श्यामां कमल-
लोचनाम् ॥ प्रसन्नां पद्मवदनां वराभयचतुर्भुजाम् ॥ किरीटहारकेयूरकुण्डलादिविभूषणाम् । धवलाङ्-
कुशसंयुक्तां पद्मासननिवेसिताम् ॥ प्रिया हि सर्वदा विष्णोः सर्वदेवनमस्कृताम् ॥ श्रीतुलस्यै
नमः स्नापयामि ॥ आवाहनम् ॥ देवि त्रैलोक्यजननि सर्वलोकैकपावनि ॥ आगच्छ वरदे
मातः प्रसीद तुलसी प्रिये ॥ श्रीतुलस्यै नमः आवाहयामि आसनम् ॥ सर्वदेवमये

देवि सर्वदा विष्णुवल्लभे। देवि स्वर्णमयं दिव्यं गृहाणासनमव्यये। श्रीतुलस्यै नमः॥ आसनार्थे अक्षतान् समर्पयामि॥ पाद्यम्॥ सर्वे देवा स्तथा स्वर्गे तथा त्वं भुवि सर्वदा॥ दत्तं पाद्यं गृहाणेमं तुलसि त्वं प्रसीद मे॥ श्रीतुलस्यै नमः पाद्यं समर्पयामि॥ अर्घ्यम्॥ गन्धपुष्पसमायुक्तं सर्वेषां प्रीतिदायकम्॥ अर्घ्यं गृहाण त्वं देवि दैत्यान्तकरणप्रिये। श्रीतुलस्यै नमः॥ अर्घ्यं समर्पयामि॥ कर्पूरवासितं तोयं सुवर्णकलशे स्थितम्॥ दत्तमाचमनीयञ्च गृहाण हरिवल्लभे॥ श्रीतुलस्यै नमः। आचमनं समर्पयामि॥ स्नानम्॥ गङ्गा-सरस्वती रेवा पयोष्णी नर्मदाजलैः॥ स्नापितोऽसि मया देवि तथा शान्ति कुरुष्व मे। श्रीतुलस्यै नमः स्नानं समर्पयामि॥ मलापकर्षणस्नानम्॥ गङ्गा गोदावरी कृष्णा पयोष्ण्याद्यापगास्तथा॥ आयान्तु ताः सदा देव्यः तुलसीस्नानकर्मणि। श्रीतुलस्यै नमः मलापकर्षस्नानं समर्पयामि॥ पञ्चामृतस्नानम्॥ पञ्चामृतं मयाऽऽनीतं पयो दधि घृतं मधु॥ सहशर्करया देवि स्नानार्थं प्रतिगृह्यताम्। श्रीतुलस्यै नमः पञ्चामृतं समर्पयामि पञ्चामृतस्नानान्ते शुद्धोदक-स्नानं सम०। शुद्धोदकस्नानान्ते आचमनं समर्पयामि॥ सकलपूजापरिपूर्णार्थं गन्धाक्षतपुष्पाणि

समर्पयामि ॥ (निर्माल्यं विसृज्य पुनश्च गन्धाक्षतपुष्पाण्यर्पयित्वाऽनन्तरमभिषेकं कुर्यात् ॥)
अभिषेकः ॥ कृष्णा सरस्वती काली तुङ्गभद्रा शची तथा ॥ भागीरथी पार्वती च रमा
नारायणी मता । सुभद्रा द्रौपदी साध्वी माता चैवाऽप्यरुन्धती । सावित्री कालिकाऽहल्या
स्नापयिष्यन्तु सर्वदा ॥ ताभिः कृताभिषेका त्वं ददासि गुरुसौभगम् । अतस्त्वां स्नापयिष्यामि
तुलसि विष्णुवल्लभे ॥ ॐ शान्तिः शान्तिः सुशान्तिर्भवतु ॥ अमृताभिषेकोऽस्तु ॥ श्रीतुलस्यै
नमः अभिषेकं सम० ॥ अभिषेकान्ते आचमनं सम० ॥ इति क्षेपकम् ॥ वस्त्रम् ॥ क्षीरोदमथ-
नोद्भूते चन्द्रलक्ष्मीसहोदरे ॥ गृह्यतां परिधानार्थमिदं पीताम्बरं शुभम् ॥ श्रीतुलस्यै
नमः ॥ वस्त्रं सम० ॥ कञ्चुकीमुपवस्त्रञ्च नानारत्नैः समन्वितम् ॥ गृहाण त्वं मया दत्तं
तुलसि भयहारिणि ॥ श्रीतुलस्यै नमः ॥ कञ्चुकीमुपवस्त्रञ्च सम० ॥ (वस्त्राद्यभावे अक्षतान्समर्प्य)
कुङ्कुमम् ॥ केशरागरुसंयुक्तं चन्दनादिसमन्वितम् ॥ कस्तूरिकासमायुक्तं कुङ्कुमं प्रति-
गृह्यताम् ॥ श्री तुलस्यै नमः ॥ कुङ्कुमं सम० ॥ क्षेपकम् ॥ अक्षतान् ॥ अक्षताश्च महादेवि
तुलसी-सौख्यदायिकाः । अर्पयामि सदा भक्त्या सुखसन्ततिलब्धये । श्रीतुलस्यै नमः ॥

अक्षतान् स० ॥ सौभाग्यद्रव्यम् ॥ हरिद्रां कुङ्कुमं चैव सिन्दूरं कज्जलान्वितम् ॥ मया
निवेदितं भक्त्या गृहाण परमेश्वरि ॥ श्रीतुलस्यै नमः सौभाग्यद्रव्यं स० ॥ इति क्षेपकम् ॥
पुष्पाणि ॥ माल्यादीनि सुगंधीनि मालत्यादीनि सत्तमे ॥ मयाऽऽहृतानि पूजार्थं पुष्पाणि
प्रतिगृह्यताम् ॥ श्रीतुलस्यै नमः ॥ पुष्पं स० ॥ धूपम् ॥ वनस्पतिरसोद्भूतो गन्ध्याढ्यो गन्ध
उत्तमः ॥ आघ्रेयः सर्वदेवानां धूपोऽयं प्रतिगृह्यताम् ॥ श्रीतुलस्यै नमः ॥ धूपं स० ॥
दीपम् ॥ वैश्वानरप्रज्वलितं घृतकार्पासनिर्मितम् ॥ दीपं भक्त्या गृहाणेदं त्रैलोक्य
ध्वान्तनाशके ॥ श्रीतुलस्यै नमः ॥ दीपं स० ॥ नैवेद्यम् ॥ अन्नं चतुर्विधं स्वादु
रसैः षड्भिः समन्वितम् ॥ नैवेद्यार्थेऽर्पयामि त्वां तुलसि माधवप्रिये ॥
श्रीतुलस्यै नमः ॥ नैवेद्यं स० ॥ प्राणाय नमः ॥ अपानाय नमः ॥ व्यानाय नमः ॥ समा-
नाय नमः ॥ उदानाय नमः ॥ इति मन्त्रैः ग्रासमुद्राः प्रदर्श्य श्रीतुलस्यै नमः । नैवेद्यान्ते
आचमनीयं स० ॥ मध्ये पानीयं उत्तरापोशानं हस्तप्रक्षालने करोद्वर्त्तनार्थे चन्दनं स० ॥
क्षेपकम् ॥ फलम् ॥ इदं फलं मया देवि स्थापितं पुरतस्तव ॥ तेन मे सफलाऽऽवाप्तिर्भवे-

ज्जन्मनि जन्मनि ॥ श्रीतुलस्यै नमः, फलं स० ॥ इति क्षेपकम् ॥ ताम्बूलम् ॥ पूगीफलं महद्दिव्यं नागवल्लीदलैर्युतम् ॥ कर्पूरैलादिसंयुक्तम् ताम्बूलं प्रतिगृह्यताम् ॥ श्रीतुलस्यै नमः ताम्बूलं स० ॥ दक्षिणां ॥ हिरण्यगर्भगर्भस्थं हेमबीजं विभावसोः ॥ अनन्तपुण्यफलदमतः शान्तिं प्रयच्छ मे ॥ श्रीतुलस्यै नमः दक्षिणां स० ॥ कर्पूरार्तिक्यम् ॥ नीराजयामि सततं हरिवल्लभे वै कर्पूरवर्त्तिभिरलं सुखदायके त्वाम् ॥ पादौ भजाम्यविरतं तव देवि माये वंशाय सौख्यमपि देहि बलं च पूर्णम् ॥ श्रीतुलस्यै नमः कपूरार्तिक्यम् स० ॥ इति क्षेपकम् ॥ प्रदक्षिणा ॥ यानि कानि च पापानि जन्मान्तरकृतानि च ॥ तानि सर्वाणि नश्यन्ति प्रदक्षिणपदे पदे ॥ नमस्ते गार्ह्यपत्याय नमस्ते दक्षिणाग्नये ॥ नमः आहवनीयाय तुलस्यै ते नमो नमः । श्रीतुलस्यै नमः प्रदक्षिणां स० ॥ मन्त्रपुष्पयुक्तो नमस्कारः ॥ विष्णुप्रियकरे देवि तुलसि सुखदायके ॥ पुष्पाञ्जलिं प्रयच्छामि पतेरायुष्यवर्द्धये । श्रीतुलस्यै नमः ॥ मन्त्रपुष्पाञ्जलिं स० ॥ क्षेपकम् । विशेषार्घ्यः ॥ गन्धप्रसूनसंयुक्तं फलमुद्रादिशोभितम् ॥ अर्घ्यं ददामि तुलसि तव प्रीत्यै नमो नमः ॥ श्रीतुलस्यै नमः ॥ विशेषार्घ्यं स० ॥ प्रार्थना ॥

सौभाग्य सन्ततिं देहि धनं धान्यं च मे सदा ॥ आरोग्यं शोकशमनं कुरु मे माधवप्रिये ॥ अभीष्टफलसिद्धिञ्च सदा देहि हरिप्रिये ॥ देवैस्त्वं निर्मिता पूर्वमर्चिताऽसि मुनीश्वरैः ॥ अतो मां सर्वदा भक्त्या कृपादृष्ट्या विलोकय ॥ पतेरायुश्च भाग्यं च सदा देवि हरिप्रिये ॥ पूतनाभयसंत्रासाद्रक्षितश्च यथा हरिः ॥ तथा संसारसंत्रासाद्रक्ष मे वंशमुत्तमम् ॥ श्रीतुलस्यै नमः प्रार्थनां स० ॥ इति क्षेपकम् ॥ अर्पणम् ॥ अनेन मम यथाशक्त्या पूजन - कर्मणा तुलसी देवता प्रीयतां न मम ॥

॥ इति तुलसीपूजाविधिः समाप्तः ॥

* २४–अथ पौषरविवारव्रतपूजाविधिः *

श्रीसूर्याय नमः ॥ आचम्य कर्मपात्रं कृत्वा ततः संकल्पः ॥ मम समस्तरोग निवारणार्थं आयुष्यादि सकलकामनासिद्ध्यर्थं श्रीसूर्य्यनारायणप्रीत्यर्थं रविवारव्रताङ्गत्वेन दीप - कलश-गणेशपूजनमहं करिष्ये । दीपं प्रज्वाल्य ॥ अर्घं संस्थाप्य गणपतिस्मरणपूर्वकं कलशादि-पूजनम् ॥ वक्रतुण्डेति गणेशं संप्रार्थ्य ताम्रपात्रे रक्तचन्दनेन अष्टदलं लिखित्वा तत्र देवं पूजयेत् ॥ तेजोरूपं सहस्रांशुं सप्ताश्वरथगं वरम् ॥ द्विभुजं वरदं पद्मलाञ्छनं सर्वकामदम् ॥ ध्यानम् ॥ आगच्छ भगवन्सूर्य्य मण्डले च स्थिरो भव ॥ यावत्पूजा समाप्येत तावत्त्वं सन्निधौ भव ॥ हेमासनं महद्दिव्यं नानारत्नविभूषितम् ॥ दत्तं मे गृह्यतां देव दिवाकर नमोऽस्तु ते ॥ पाद्यम् ॥ गङ्गाजलं मया नीतं परमं पावनं महत् ॥ पाद्यं गृहाण देवेश धाम-रूप नमोऽस्तु ते ॥ अर्घ्यम् ॥ भो भो सूर्य्य महद्भूत ब्रह्मविष्णुस्वरूपिणे ॥ अर्घ्यमञ्जलिना दत्तं गृहाण परमेश्वर ॥ इत्यर्घ्यम् ॥ आचमनीयम्—गङ्गादितीर्थजं तोयं जातिपुष्पेण वासितम् ॥ ताम्रपात्रे स्थितं दिव्यं गृहाणाचमनीयकम् ॥ इत्याचमनम् ॥ जाह्नवी जलम-

त्यन्तं पवित्रकरणं परम् ॥ स्नानार्थं च मया नीतं स्नानं कुरु जगत्पते । पञ्चामृतम् ॥ पयो दधि घृतं चैव शर्करामधुसंयुतम् ॥ कृतं मया चोष्णपनं प्रीयतां परमेश्वरः ॥ स्नानम् ॥ गंगा-
वा० गोदावरी चैव यमुना च सरस्वती ॥ नर्मदा सिन्धु - कावेरी ताभ्यः स्नानार्थमाहृतम् ॥ इति सु-पू०
२४ शुद्धोदकस्नानम् ॥ वस्त्रम् - वस्त्रपट्टयुगं देव सूक्ष्मतन्तुविनिर्मितम् । शुद्धं चैव मया दत्तं गृहाण कमलाकर ॥ उपवीतम् ॥ नमः कमलहस्ताय विश्वरूपाय ते नमः ॥ उपवीतं मया दत्तं तत् गृहाण दिवाकर ॥ चन्दनम् ॥ कुंकुमागरु - कस्तूरी - सुगन्धैः चन्दनादिभिः ॥ रक्तचन्दनयुक्तन्तु गंधमेतं प्रगृह्यताम् ॥ पुष्पम् ॥ जपाकदम्बकुसुमरक्तोत्पलयुतानि च ॥ पुष्पाणि गृह्यतां देव सर्वकामप्रदो भव ॥ अथाऽक्षताः ॥ रक्तचन्दनसंमिश्रा अक्षताश्च सुशोभनाः ॥ मया दत्ता गृहाण त्वं वरदो भव भास्कर ॥ ततोऽङ्गपूजा ॥ ॐ मित्राय नमः पादौ पू० ॥ रवये० जङ्घे पू० ॥ सुर्य्याय०
२१ जानुनी० । खगाय० उरू० ॥ पूष्णे० गुह्यम्० ॥ हिरण्यगर्भाय० कटिं ॥ मरीचये० नाभिं० आदित्याय० जठरं० ॥ सवित्रे० हृदयं० ॥ अर्काय० स्तनौ० ॥ भास्कराय० कण्ठं ॥ अर्यम्णे० स्कन्धौ० ॥ भास्कराय हस्तौ० ॥ अहस्कराय० मुखं० ॥ अग्नये नासिकाम्० ॥ जगदेकचक्षुषे०

नेत्रे० ॥ सवित्रे कर्णौ ॥ त्रिगुणात्मधारिणे नमः ललाटम् ॥ विरञ्चिनारायणशंकरात्मने० शीर्ष० ॥ तिमिरनाशने० ॥ सर्वांगं पूजयामि० ॥ धूपम् ॥ वनस्पतिरसोद्भूतः कालागरुसमन्वितः ॥ आघ्रेयः सर्वदेवानां धूपोऽयं प्रतिगृह्यताम् ॥ दीपम् ॥ कार्पासवर्तिकायुक्तं गोघृतेन समन्वितम् ॥ दीपं गृहाण देवेश त्रैलोक्यतिमिरापहम् ॥ नैवेद्यम् ॥ पायसं घृतसंयुक्तं नानापक्वान्नसंयुतम् ॥ नैवेद्यं च मया दत्तं शान्तिं कुरु जगत्पते ॥ जलम् ॥ कर्पूरवासितं तोयं मन्दाकिन्यास्समाहृतम् ॥ आचम्यतां जगन्नाथ मया दत्तं हि भक्तितः ॥ करोद्वर्तनम् ॥ मलयाचलसंभूतं सुगन्धन समन्वितम् ॥ करोद्वर्तनकं चारु गृह्यतां च जगत्पते ॥ नारिकेलम् ॥ ताम्बूलम् ॥ एलालवङ्गकर्पूरखादिरैश्च सपूगकैः ॥ नानवल्लीदलैर्युक्तं ताम्बूलं प्रतिगृह्यताम् ॥ दक्षिणा-दक्षिणाम् काञ्चनीं देव स्थापितां च तवाऽग्रतः ॥ गृहाण सुमुखो भत्वा प्रभाकर नमोऽस्तु ते ॥ इति दक्षिणा ॥ नीराजनम् ॥ पञ्चवर्ति समायुक्तं सर्वमंगलदायकम् ॥ नीराजननं गृहाणेदं सर्वसौख्यकरो भव ॥ प्रदक्षिणा ॥ यानि कानि च पापानि जन्मान्तरकृतानि च ॥ विलयं यान्ति तानीह प्रदक्षिणपदे पदे ॥ नमस्कारः ॥ नमः पङ्कजहस्ताय

नमः पङ्कजधारिणे ॥ नमः पङ्कजनेत्राय भास्कराय नमो नमः ॥ अथ वायनम् (पूर्णपात्रम्) ॥ तण्डुलैः पूरितं पात्रं हिरण्येन समन्वितम् । रक्तवस्त्रयुगं चैव वायनाय नमोऽस्तु ते ॥ अथ नमस्कारः ॥ यस्योदयः स्याज्जगतः प्रबोधो यः कर्मसाक्षी भुवनस्य गोप्ता ॥ कुष्ठादिक-व्याधिविनाशको यः स भास्करो मे दुरितं निहन्यात् ॥ ततो ब्राह्मणान् भक्ष्य - भोज्य-दक्षिणादिभिस्संतोष्य विसर्जयेत् ॥

॥ इति पौषमासाऽऽदित्यवारपूजा-विधिः समाप्तः ॥

* २५—अथ गणेशचतुर्थी-पूजाविधिः प्रारम्भः *

यद्यथा मध्याह्नव्यापिनी कार्या ॥ प्रातः शुक्लतिलैः स्नात्वा मध्याह्ने पूजयेदिति निर्दिष्टत्वान्मध्याहनव्यापिन्यामेव कार्यमिति । मध्याह्ने यथाविधि स्नात्वा पूजास्थाने उपविश्य कुशहस्तो भक्तियुक्तः पुरुष आचम्य प्राणानायम्य पूर्वसंकल्पः सिद्धिरस्तु ममेह जन्मनि जन्मान्तरे वा पुत्र-पौत्र - धन - विद्या - जय - यशः - स्त्रीकाम आयुष्याभिवृद्ध्यर्थं सिद्धिविनायकप्रीत्यर्थं यथाज्ञानं पुरुषसूक्तै-पुराणोक्तमंत्रैर्ध्यावाहनादि - षोडशोपचारैः अस्यां मूर्तौ श्री सिद्धिविनायक - पूजनमहं करिष्ये ॥ सिद्धिमूर्तिपूजने प्राणप्रतिष्ठादिकं न भवति ॥ पार्थिव मूर्तिपक्षे प्राणप्रतिष्ठादिकं कर्तव्यम् ॥ तद्यथा पार्थिवमूर्तौ देवस्थापनम् ॥ ॐ हेरम्बाय नमः इति मृदाहरणम् । ॐ सुमुखाय नमः इति संघट्टनम् ॥ ॐ गौरीसुताय नमः इति स्थापनम् । एवं क्रमेण संस्थाप्य ततः प्राणप्रतिष्ठां कुर्यात् । ॐ अस्य श्री प्राणप्रतिष्ठामंत्रस्य ब्रह्म - विष्णु - महेश्वरा ऋषयः ऋग्यजुःसामाथर्वच्छन्दांसि क्रियामयवपुः प्राणाख्यादेवता आँ बीजं ह्रीं शक्तिः क्रौँ कीलकम् अस्यां मूर्तौ प्राणप्रतिष्ठापने विनियोगः ॥ ततो मूर्तिं स्पृष्ट्वा मन्त्रयेत् ॐ आँ ह्रीँ क्रौँ यँ रँ लँ

वँ शँ षँ सँ हँ डँ क्षँ अँ अस्यां मूर्तौ प्राणास्तिष्ठन्तु । पुनः पूर्ववत् सर्वं पठित्वा ॐ आँ ह्रीं क्रौं अँ० अस्यां मूर्तौ सर्वेन्द्रियाणि श्रोत्र - त्वक् - चक्षुः - जिह्वा - घ्राण - वाक् - पाणि - पाद - पायू-

पस्थानि इहैवागत्य सुखं चिरं तिष्ठन्तु स्वाहा ॥ इति प्राणप्रतिष्ठां विधाय दीप-

कलश - गणेश - पूजनञ्च कृत्वा ध्यायेत् ॥ ध्यानम् ॥ ॐ एकदन्तं शूर्पकर्णं गजवक्त्रं चतु-भुजम् ॥ पाशांकुशधरं देव ध्यायेत् सिद्धि - विनायकम् ॥ ध्यायेद्देवं महाकायं तप्तकाञ्चनसन्नि-भम् ॥ दन्ताक्षमाला - परशु - पूर्णा - मोदकहस्तकम् ॥ मोदकासक्तशुण्डं तमेकदन्तं विनायकम् ॥ आवाहनम् ॥ ॐ सहस्रशीर्षा० ॥ ॐ आवाहयामि विघ्नेश सुरराजार्चितेश्वर ॥ अनाथनाथ सर्वज्ञ पूजार्थं गणनायक ॥ आसनम् ॥ ॐ पुरुष एवे० ॥ ॐ विचित्ररत्नरचितं दिव्यास्तर-णसंयुतम् ॥ स्वर्णसिंहासनं चारु गृहाण सुरपूजित ॥ पाद्यम्—ॐ एतावानस्य० ॥ ॐ सर्व-तीर्थसमुद्भूतं पाद्यगन्धादिसंयुतम् ॥ विघ्नराज गृहाणेदं भगवन् ! भक्तवत्सल ॥ अर्घ्यम् ॥ ॐ त्रिपादूर्ध्व ॥ ॐ अर्घ्यं च फलसंयुक्तं गन्धपुष्पाक्षतैर्युतम् ॥ गणाध्यक्ष नमस्तेऽस्तु गृहाण करुणानिधे ॥ मधुपर्कम् ॥ ॐ तमो विराड्० ॥ ॐ दध्याज्यमधुसंयुक्तं मधुपर्कं मयाऽऽहृतम् ॥

गृहाण सर्वलोकेश गणनाथ नमोऽस्तु ते ॥ आचमनम् ॥ ॐ ततो विराट् ॥ ॐ विनायकनम-
स्तुभ्यं त्रिदशैरभिवन्दित ॥ गंगोदकेन शुद्धेन शीघ्रमाचमनं कुरु ॥ पञ्चामृतस्नानम् ॥ ॐ
यस्माद्यज्ञा० ॥ ॐ पयो दधि घृतं चैव शर्करामधुसंयुतम् ॥ पञ्चामृतेन स्नपनात्प्रीयतां गण-
नायकः ॥ स्नानम् ॥ ॐ तस्माद्दश्वा० ॥ ॐ गंगादिसर्वतीर्थेभ्य आनीतं तोयमुत्तमम् ॥
भक्त्या समर्पितं तुभ्यं गृहाणाभीष्टदायक ॥ वस्त्रम् ॥ ॐ तं यज्ञं व० ॥ ॐ रक्तवस्त्रमिदं देव
दिव्यं काञ्चनसंभवम् ॥ सर्वप्रदं गृहाणेदं लम्बोदर हरात्मज ॥ यज्ञोपवीतम् ॥ ॐ यत्पुरुष० ॥
ॐ राजतं ब्रह्मसूत्रञ्च काञ्चनं चोत्तरीयकम् ॥ गृहाण चारु सर्वज्ञ भक्तानां वरदो भव ॥ सिन्दूरम् ॥
ॐ उद्यद्भास्करसंकाशं सन्ध्यावदरुणं प्रभो ॥ वीरालंकरणं दिव्यं सिन्दूरं प्रतिगृह्यताम् ॥
आभरणानि ॥ ॐ नानाविधानि दिव्यानि नानारत्नोज्ज्वलानि च ॥ भूषणानि गृहाणेश
पार्वतीप्रिय नन्दन ॥ चन्दनम् ॥ ॐ ब्राह्मणोऽस्य० ॥ ॐ कस्तूरी कुंकुमं चैव घनसारसम-
न्वितम् ॥ विलेपनं सुरश्रेष्ठ चन्दनं प्रतिगृह्यताम् । अक्षताः । ॐ चन्द्रमामनसो० । ॐ
रक्ताक्षताञ्च देवेश गृहाण द्विरदानन । ललाटपटले चन्द्रस्तस्योपर्यवधार्यताम् । पुष्पम् । ॐ

नाम्या० । ॐ करवीरैर्जातिपुष्पैश्चम्पकैर्बकुलैः शुभैः । शतपत्रैश्च कह्लारैरर्चयेत् गणनायकम् ॥
अथाङ्गपूजा । ॐ गणेश्वराय नमः पादौ पूजयामि । ॐ विघ्नराजाय० जानुनी० पू० । ॐ
आखुवाहनाय० उरू पू० । ॐ हेरम्बाय० कटिं पू० । ॐ कामारिसूनवे० नाभिं पू० । ॐ
लम्बोदराय० उदरं पू० । ॐ गौरीसुताय० स्तनौ पू० । ॐ गणनायकाय० हृदयं पू० । ॐ
स्थूलकर्णाय० कण्ठं पू० । ॐ विघ्नहर्त्रे० ललाटं पू० । ॐ सर्वेश्वराय० शिरः पू० । अथ
पत्रपूजा । ॐ सुमुखाय नमः । नलिनीपत्रं समर्पयामि । ॐ गणाधिपाय० भृङ्गराजपत्रं
सम० । ॐ उमापुत्राय० बिल्वप० सम० । ॐ गजकर्णाय० तुलसीप० समर्पयामि । ॐ वक्रतुण्डाय०
शमीप० सम० । ॐ गुहाग्रजाय० अपामार्गप० सम० । ॐ विकटाय० करवीरप० सम० । ॐ
कपिलाय० अर्कप० समर्पयामि । ॐ जगदन्ताय० अर्जुनप० सम० ॥ ॐ विघ्नराजाय० विष्णु-
क्रान्ताप० सम० । ॐ वटवे० दाडिमप० स० ॥ ॐ सुराग्रजाय० देवदारुप० स० । ॐ भालच-
न्द्राय० मरुप० सम० । ॐ हेरम्बाय० अश्वत्थप० सम० ॥ ॐ चतुर्भुजाय जातिप० समर्पयामि ।
ॐ विनायकाय० केतकीप० समर्पयामि । ॐ सर्वेश्वराय० अगस्तिप० समर्पयामि ॥ २१ ॥ अथ

धूपम्। ॐ यत्पुरुषेण० ॥ ॐ दशाङ्गगुग्गुलैर्धूपैः सुगन्धैश्च मनोहरम् ॥ गृहाण सर्वदेवेश उमासुत। नमोऽस्तु ते। दीपम्—ॐ समस्या० ॐ सर्वज्ञ सर्वलोकेश त्रैलोक्यतिमिरापहम् ॥ गृहाण मंगलं दीपं रुद्रप्रिय नमोऽस्तु ते ॥ नैवेद्यम् ॐ यज्ञेन यज्ञ० ॥ ॐ नानास्वाद्यमयं दिव्यं तुष्ट्यर्थं ते निवेदितम् ॥ मया भक्त्या शिवापुत्र गृहाण गणनायक। नैवेद्यान्ते पानीयम्। ॐ विनायकाय नमः इत्यादिक्रमेण उत्तरापोशानं मुखप्रक्षालनं करोद्वर्त्तनं च समर्पयेत्। एवं पूगीफलं चामरं दर्पणं च समर्पयेत्। मोदकार्पणम्—ॐ एकविंशति संख्याकान् मोदकान् घृतपाचितान्। नैवेद्य सफलं दद्याम् नमस्ते विघ्ननाशिने ॥ दक्षिणा- ॐ हिरण्यगर्भ - गर्भस्थं हेमबीजं विभावसोः। अनन्तपुण्यफलदमतः शान्तिं प्रयच्छ मे ॥ दूर्वा। ॐ दूर्वायुग्मं गृहाणेदं गन्धपुष्पाक्षतैर्युतम्। पूजयेत् सिद्धिविघ्नेशं प्रत्येकं पूर्वनामभिः ॥ गणाधिप नमस्तेऽस्तु उमापुत्राघनाशन। विनायकेश पुत्रेति सर्वसिद्धिप्रदायक। एकदन्तेभ वक्त्रेति तथा मूषकवाहन। कुमारगुरवे तुभ्यं पूजयामि प्रयत्नतः। नीराजनम्—ॐ चन्द्रादित्यौ च धरणी विद्युदग्निस्तथैव च। त्वमेव सर्वतेजांसि आर्तिक्यं प्रतिगृह्यताम्।

प्रदक्षिणा—ॐ विघ्नेश्वर विशालाक्ष सर्वाभीष्टफलप्रद । प्रदक्षिणां करोमि त्वां सर्वान् कामान्प्रयच्छ मे ॥ नमस्कारः । ॐ नमस्ते विघ्नसंहर्त्रे नमस्ते ईप्सितप्रद । नमस्ते देवदेवेश नमस्ते गणनायक ॥ पुष्पाञ्जलिम् । ॐ विनायकेश पुत्रेति गणराज सुरोत्तम । देहि मे सकलान कामान् वन्दे सिद्धिविनायक । ततः एकविंशतिमोदकेषु एकं मोदकं गणाधिपाय दद्यात्, दश मोदकान् स्वयं गृह्णीयात्, दशमोदकान् दशब्राह्मणाय फलवस्त्र-दक्षिणासमन्वितान् कृत्वा दापयेदनेन मन्त्रेण । ॐ दशानां मोदकानाञ्च फलदक्षिणया युतम् । फलं विप्राय तुष्ट्यर्थं वायनं ते ददाम्यहम् । प्रतिमादानम् । ॐ विनायकस्य प्रतिमां वस्त्रयुग्मेन वेष्टितम् । तुभ्यं संप्रददे देव प्रीयतां मे जनार्दन । अथ प्रार्थना । ॐ विनायक गणेशान सर्वदेव-नमस्कृत ॥ पार्वतीप्रिय विघ्नेश मम विघ्नं विनाशय । ततो विसर्जयेत् । कायेन वाचा मनसेन्द्रियैर्वा बुध्यात्मना वा प्रकृतिः स्वभावात् ॥ करोमि यद्यत्सकलं परस्मै नारायणायेति समर्पये तत् ॥

॥ इति गणेश-चतुर्थी-पूजाविधिः ॥

* २६–अथ गणेशचतुर्थी-व्रतकथा-प्रारम्भः *

नन्दिकेश्वर उवाच ॥ शृणुष्वैकाग्रचित्तस्सन् गणेश्वरव्रतं शुभम् ॥ चतुर्थ्यां शुक्लपक्षे तु सदाकार्य्यम्प्रयत्नतः ॥ १ ॥ सनत्कुमारयोगीन्द्र यदीच्छच्छुभमात्मनः ॥ नारी वा पुरुषो वापि यः कुर्य्यात् व्रतमुत्तमम् ॥ २ ॥ मोचयत्याशु विप्रेन्द्र संकष्टाद व्रतिनं नरम् ॥ अपवादहरञ्चैव सर्व्वविघ्न - प्रणाशनम् ॥ ३ ॥ कान्तारे विपिने वाऽपि गृहे राजकुले तथा ॥ सर्वसिद्धिकरं चैव व्रतानामुत्तमोत्तमम् ॥ ४ ॥ गजाननप्रसन्नार्थं त्रिषु लोकेषु

नैमिषारण्य क्षेत्रमा रहने अठासी हजार ऋषिहरूलाई सम्बोधन गर्दै सूतजीले भन्नुभयो–हे ऋषीश्वरहो ! नन्दिकेश्वरले सनत्कुमारलाई सुनाउनुभएको भनी व्यासले स्कन्दपुराणमा लेख्नुभएको गणेशको माहात्म्य अब म तपाईंहरूलाई सुनाउँछु–नन्दिकेश्वरले भन्नुभयो–हे सनत्कुमार ! सधैं शुक्लपक्षको चतुर्थीमा तन्देही भएर गर्नुपर्ने गणेशजीको कल्याणकारी व्रत सावधान भएर सुन ! ॥१॥ हे योगीहरूमा श्रेष्ठ, सनत्कुमार, यदि आफ्नू कल्याण चाहने भए नारी होस् अथवा पुरुष होस् अपवाद मेटाउने, सबै विघ्न नाश गर्ने यो उत्तम व्रत गऱ्यो भने यसले हे ब्राह्मणश्रेष्ठ, व्रत लिने मनुष्यलाई तुरुन्तै संकटबाट मुक्त गर्छ ॥२-३॥ ठूलो जंगलमा अथवा घरमा या राजकुलमा पनि व्रतहरूमध्ये अति उत्तम यो व्रत सब कामना सिद्ध गर्नेवाला छ ॥४॥ गणेशजीलाई खुशी पार्न तीनै लोकमा विख्यात छ । हे ब्राह्मण श्रोता, सारा संकष्ट नाश्नका लागि

विश्रुतम् ॥ अतो न विद्यते ब्रह्मन् सर्वसंकष्टनाशनम् ॥ ५ ॥ नन्दिकेश्वर उवाच ॥ चक्रे व्रतञ्जगन्नाथो वासुदेवः प्रतापवान् ॥ आदिष्टं नारदेनैव वृथालाञ्छनशान्तये ॥ ६ ॥ सनत्कुमार उवाच ॥ वासुदेवो जगद्व्यापी प्राप्तवान् लाञ्छनं कथम् ॥ एतदाश्चर्य्यमाख्याहि ब्रूहि त्वं नन्दिकेश्वर ॥ ७ ॥ नन्दिकेश्वर उवाच ॥ भुवो भारावतारार्थं वसुदेवसुतावुभौ ॥ रामकृष्णौ समुत्पन्नौ पद्मनाभ-हलायुधौ ॥ ८ ॥ जरासन्धभयात्कृष्णो द्वारकां समकल्पयत् ॥ विश्वकर्माणमाहूय पुरी हाटकनिर्मिताम् ॥ ९ ॥ तत्र षोडशसाहस्रं स्त्रीणां चैव वराधिकम् ॥ भवनानि मनोज्ञानि तेषामध्ये व्यकल्पयत् ॥ १० ॥

योभन्दा अर्को व्रत छैन ॥ ५ ॥ नन्दिकेश्वरले अझै भन्नुभयो—बेकारमा लागेको कलंक मेटाउन नारदले नै बताउनुभएको यो व्रतलाई प्रतापशाली जगन्नाथ वासुदेवले गर्नुभएको थियो ॥ ६ ॥ तब सनत्कुमारले भन्नुभयो—जगद्व्यापी वासुदेवले कलंक कसरी पाउनुभो ? हे नन्दिकेश्वर, यो अचम्मलाग्दो इतिहास तपाईं बताउनुहोस ॥७॥ फेरि नन्दिकेश्वरले भन्नुभयो—विष्णु र बलराम दुवै द्यौता पृथ्वीको भार उतार्नका लागि कृष्ण र बलराम भन्ने नामले वसुदेवका छोरा भए पृथ्वीतलमा उत्पन्न भएका थिए ॥८॥ दुष्ट जरासन्धको आतङ्कले गर्दा कृष्णले विश्वकर्मलाई बोलाएर सुनैसुनले बनाइएको द्वारिकापुरी तयार गराउनुभयो र ॥९॥ त्यस द्वारकामा राम्रा-राम्रा घरहरू बनाउन लाउनुभयो र ती घरहरूमध्ये आपना सोह्र हजार

पारिजात - तरुश्चैव सुखाय च व्यकल्पयत् ॥ यादवानां गृहास्तत्र षट्पञ्चाशत्तु कोटयः ॥ ११ ॥ अन्येऽपि बहवो लोका वसन्ति विगतज्वराः ॥ यत्किञ्चित्त्रिषु लोकेषु सुन्दरस्तत्र दृश्यते ॥ १२ ॥ सत्राजितप्रसेनाख्यौ पुत्रावुग्रस्य विश्रुतौ ॥ सम्बोधि - तीरमासाद्य तन्मनस्कतया च सः ॥ १३ ॥ सत्राजितः तपस्तेपे सूर्य्यमुद्दिश्य बुद्धिमान् ॥ व्रतान्निरशनं गृह्य सूर्य्यसम्बद्धलोचनः ॥ १४ ॥ ततः प्रसन्नो भगवान् सत्राजित्पुरतस्थितः । सत्राजितोऽपि तुष्टाव दृष्ट्वा देवं दिवाकरम् ॥ १५ ॥ तेजोराशे नमस्तेऽस्तु नमस्ते विश्वरूपिणे ॥

स्त्रीहरूका लागि अति वेस भवन निर्माण गराइयो ॥ १० ॥ पारिजातको वृक्ष पनि आनन्दका लागि त्यहीं लगाइयो । त्यस द्वारकामा यादवहरूका लागि छप्पन्न करोड घरहरू बनाइए ॥ ११ ॥ अरू पनि धेरै मानिसहरू आनन्दपूर्वक त्यस पुरीमा रहन्थे । तीनै लोकमा जो कुछ सुन्दर वस्तु थियो त्यो त्यस पुरीमा देखिन्थ्यो ॥ १२ ॥ उग्रसेन राजाका सत्राजित र प्रसेन नामका अति प्रसिद्ध दुइटा छोरा थिए । तीमध्ये बुद्धिमान् सत्राजितले समुद्रको किनारमा गएर एकाग्रचित्तले सूर्यलाई प्रसन्न पार्नें उद्देश्यले सूर्यलाई एकटकले हेदा छँदा भोकै रहेर तपस्या गरे ॥ १३-१४ ॥ तब प्रसन्न भएका भगवान् सूर्य सत्राजितको अगाडि खडा हुनुभयो । सत्राजितले पनि भगवान् सूर्यलाई देखेर स्तुति गरे—॥१५॥ हें तेजका राशि ! तपाईंलाई नमस्कार छ, हे विश्वरूपी तपाईंलाई नमस्कार छ, हे कश्यपपुत्र तपाईंलाई नमस्कार छ, हे हरिदश्व ! तपाईंलाई नमस्कार छ,

काश्यपेय नमस्तेऽस्तु हरिदश्व नमस्तेऽस्तु ते ॥१६॥ ग्रहराज नमस्तेऽस्तु नमस्ते चन्द्रशोचिषे ॥ वेदत्रय–नमस्तेऽस्तु सर्वदेव नमोऽस्तु ते ॥ १७ ॥ प्रसीद पाहि देवेश सुदृष्ट्या मां दिवाकर । स्निग्ध–गम्भीर–मधुरं सत्राजितमुवाच ह ॥ १८ ॥ वरं ब्रूहि प्रसन्नोऽस्मि यत्ते मनसि कांक्षितम् ॥ सत्राजित महाभाग तुष्टोऽहं तव निश्चयात् ॥ १९ ॥ सत्राजित उवाच ॥ स्यमन्तकमणिं देहि परितुष्टोऽसि भास्कर ॥ ददौ तस्मै च तद्रत्नं स्वकण्ठादवतार्य्य च ॥ २० ॥ सूर्य्य उवाच ॥ भाराष्टकं शातकौम्भं स्रवतेऽसौ महामणिः । शुचिष्मता सदा धार्य्यं रत्नमेतन्महोत्तमम् ॥ २१ ॥ सत्राजित क्षणैनैतदशुचिं हन्ति मानवम् ॥ इत्युक्त्वाऽन्तर्दधे देवो

वा० २५१ गण०क०

॥१६॥ हे ग्रहहरूका राजा तपाईंलाई नमस्कार छ, हे चन्द्रमालाई प्रकाशित पार्नें तिमीलाई नमस्कार छ, हे तीनै वेदले स्तुति गरिने ! तपाईंलाई नमस्कार छ, हे सारा घौताका घौता तपाईंलाई नमस्कार छ ॥१७॥ हे देवेश प्रसन्न हुनुहोस्, हे दिवाकर ! असल हेराइले मलाई रक्षा गर्नुहोस् । तब सूर्यले मीठो-गम्भीर-मधुर वचन सत्राजितलाई भन्नुभयो–॥१८॥ हे भाग्यमानी सत्राजित ! तिम्रा उपर म निश्चय खुशी छू, प्रसन्न छु, तिम्रो मनमा जो इच्छा छ वर माँग ॥१९॥ तब सत्राजितले भने–हे सूर्य भगवान् ! यदि मदेखि खुशी हुनुहुन्छ भने स्यमन्तक मणि दिनुहोस् । तब सूर्य भगवान्ले पनि आपनू घाँटीबाट उतारेर त्यो रत्न उनलाई दिनुभयो ॥२०॥ तब सूर्यले भन्नुभयो—यो महामणि दिनहुँ आठ भारी सुन

२२

तेजोराशिर्दिवाकरः ॥ २२ ॥ तत्कण्ठरत्नज्वलमानरूपी पुरीं स कृष्णस्य विवेश सत्वरम् । दृष्ट्वा तु लोका मनसा दिवाकरं सञ्चिन्तयन्तः स्तिमिताक्षदृष्टयः ॥ २३ ॥ समागतोऽयं हरिदश्वदीधितिर्जनार्दनं द्रष्टुमसंशयेन ॥ नाऽयं सहस्रांशुरितीहलोकाः सत्राजितोऽयं मणिकण्ठमण्डलः ॥ २४ ॥ स्यमन्तकमहारत्नं दृष्ट्वा तत्कण्ठमण्डले ॥ स्पृहाञ्चक्रे गजन्नाथो न जहार मणिन्ततः ॥ २५ ॥ सत्राजितो जातभयो याचयिष्यति मां हरिः ॥ प्रसेनाय ददौ भ्रात्रे घार्य्योऽयं शुचिना त्वया ॥ २६ ॥ एकदा कण्ठदेशे तु क्षिप्त्वा तन्मणिमुत्तमम् ॥ मृगया

पैदा गर्छ । यो अति उत्तम रत्न सधैं पवित्र रहनेले मात्र पहिनु पर्दछ ॥२१॥ हे सत्राजित ! अशुद्ध अपवित्र मानिसलाई यसले तुरुन्तै मारिदिन्छ । यति भनेर तेजका राशि भगवान् सूर्य अन्तर्धान हुनुभयो ॥२२॥ कण्ठमा रहेको त्यो रत्नले अति उज्ज्वल रूप भएका सत्राजित तुरुन्तै कृष्णको द्वारिका पुरीमा प्रवेश गरे । तिनलाई देखेर आँखा तिरमिराएर मानिसहरूले मनले सूर्य नै हुन् भनिठाने ॥२३॥ कति त पक्कै कृष्णलाई हेर्न यी सूर्य आएका हुन् भन्थे । कति मानिसचाहिं यी सूर्य होइन, गलामा मणि लाएका यी सत्राजित हुन् भन्थे ॥२४॥ सत्राजितको कण्ठमा स्यमन्तक नामको महारत्न देखेर जगन्नाथ कृष्णले पनि चाहनुभयो, तर त्यो मणि लिनुभएन ॥२५॥ हरिले मसित माँग्नुहोला भनी डराएका सत्राजितले पनि (तैले पवित्र रहेर यो धारण गर्नू) भनी भाइ प्रसेनलाई दिए ॥२६॥ कुनै दिन त्यो उत्तम मणि घाँटीमा लगाएर कृष्णजीका

क्रीडनार्थाय ययौ कृष्णेन संयुतः ॥ २७ ॥ अश्वारूढो ऽशुश्चिाऽसौ हतःसिंहेन तत्क्षणात् ॥
रत्नमादाय सिंहोऽपि गच्छन् जाम्बवता हतः ॥ २८ ॥ नीत्वा स विवरे रत्नं ददौ
पुत्राय जाम्बवान् ॥ पुरीं विवेश कृष्णोऽपि स्वकैः सर्वैः समावृतः ॥ २९ ॥ प्रसेनो
ऽद्यापि नायाति हतः कृष्णेन निश्चितम् ॥ मणिलोभेन हा कष्टम्बान्धवः पाप्मना हतः ॥ ३० ॥
द्वारिकावासिनः सर्वे जना ऊचुः परस्परम् ॥ वृथापवादसन्तप्तः कृष्णोऽपि नगराच्छनैः ॥ ३१ ॥
सहायात् तैर्य्यथारण्ये दृष्ट वा सिंहेन पातितम्। प्रसेनं वाहनयुतं तत्पादानुसरं गतः ॥ ३२ ॥

साथै प्रसेन शिकार खेल्नका लागि गए ॥२७॥ घोडामा चढ्नाले अपवित्र भएको त्यो प्रसेन तुरन्तै सिंहद्वारा मारियो र रत्न लिएर जाने भएको सिंह पनि जाम्बवान् नामको भालुद्वारा मारियो ॥२८॥ ती जाम्बवान्ले त्यो रत्न आफ्नू गुफामा लगेर छोरालाई दिए। कृष्ण पनि सबै आपना बन्धुहरूले युक्त भएर द्वारिका पुरीमा प्रवेश गर्नुभयो ॥२९॥ 'सबै आए, प्रसेन अझै पाउँदैन, पक्का कृष्णद्वारा मारियो। बडो दुःखको कुरो छ, मणिको लोभले गर्दा त्यस पापीले बन्धुलाई पनि मार्‍यो ॥३०॥ सबै द्वारिकावासी जनहरू परस्परमा यही भन्थे। बेकारको कलंकले पिरिएका कृष्ण पनि बिस्तारै शहरबाट ॥३१॥ ती अत्तो लाउनेहरूको साथै जङ्गलमा जानुभयो र उहाँ सवारीसहितै प्रसेनलाई सिंहले लडाएको (मारेको) देखेर त्यसै सिंहको गोहो पैल्याउँदै जानुभयो ॥३२॥ जाँदा सिंहलाई भालुले मारिएको देखेर अनि भालुको गोहैगोहो श्रीकृष्ण

ऋक्षेण निहतं दृष्ट्वा कृष्णश्च तद्बिलं गतः । विवेश योजनशतमन्धकारं स्वतेजसा ॥ ३३ ॥
निवारयन् ददर्शाऽग्रे प्रासादं वद्धभूमिकम् ॥ कुमारं तस्य ऋक्षस्य दोलायाममितद्युतिम् ॥३४॥
माणिक्यं लम्बमानञ्च ददर्श भगवान् हरिः ॥ रूपयौवनसम्पन्नां कन्यां जाम्बवतीम्पुनः ॥३५॥
दोलां दोलायमानाञ्च ददर्श कमलेक्षणः । विस्मयञ्च महच्चक्रे दृष्ट्वा तां चारुहासिनीम् ॥३६॥
सिंहः प्रसेनमवधीत् सिंहो जाम्बवता हतः ॥ सुकुमारक मा मोदीस्तव ह्येष स्यमन्तकः ॥ ३७ ॥
मदनज्वरदाहार्त्ता दृष्ट्वा तं कमलेक्षणम् ॥ उवाच ललितं वाक्यं गम्यतां गम्यतामिति ॥ ३८ ॥

जाँदा त्यो गोहो गुफाभित्र गयो । त्यहाँको अन्धकारलाई आफ्ना तेजले हटाउँदै चार चय कोश भित्र पस्नुभयो त सामने पक्का षिटेको दरवार देख्नुभयो । अनि कोक्रामा त्यस भालुको अति तेजस्वी छोरोलाई र ॥३३-३४॥ कोक्रामा झुन्ड्याइएको मणिलाई पनि भगवान् हरिले देख्नुभयो अनि फेरि कमलका कोस जस्ता आँखावाला भगवान्ले । रूप र जवानीले मस्त भएकी जाम्बवती छोरीलाई ॥३५॥ पनि 'सिंहले प्रसेनलाई मार्‍यो, जाम्बवान्द्वारा सिंह मारियो हे नानी ! नरोऊ ! यो स्यमन्तक तिम्रो चाचा हो ।' भन्दै ॥३६-३७॥ कोक्रो हल्लाइरहेकी देख्नुभयो र मुस्कुराइरहेकी ती तरुनीलाई देखेर बडो अचम्ममा पनि पर्नुभयो तब कमलका कोसजस्ता आँखा हुने भगवान्लाई देखेर कामज्वरका तातोले छटपटाएकी जाम्बवतीले–'जाम्बवान् सुतेकै वेलामा यो रत्न लिएर कुद्दै जानुहोस्' गइसहाल्नुहो यस्तो सुन्दर वचन भनिन् । यस्तो

रत्नं गृहत्वा वेगेन यावच्छेते तु जाम्बावान् ॥ इत्याकर्ण्य हसन्सौरिश्शंखं दध्मौ प्रतापवान् ॥३९॥
आकर्ण्य सहसोत्थाय ऋक्षःसंयुयुधे ततः ॥ तयोर्युद्धमभूद्घोरं हरिजाम्बवतोस्तदा ॥ ४० ॥
द्वारिकावासिनः सर्व्वे गतास्ते सप्तमे दिने ॥ मृतः कृष्णो रक्षितो वा निस्सन्दिग्धं
विचार्य्य च ॥ ४१ ॥ परलोकक्रियां चक्रुः परेतस्य तु ते तदा ॥ एकविंशाहिनं यावद्बाहु-
प्रहरणो विभुः ॥ ४२ ॥ युयुधे तेन ऋक्षेण युद्धकर्म्मणि तोषितः ॥ जाम्बवान् प्राक्तनं
स्मृत्वा दृष्ट्वा दैवबलम्महत् ॥ ४३ ॥ जाम्बवानुवाच ॥ अजेयोऽहं सुरैस्सर्व्वैर्यक्षराक्षसदानवैः

सुनेर प्रतापी प्रभुले हाँस्तै शंख वजाउनुभयो ॥ ३८-३९ ॥ तब शंखको ध्वनि सुन्नासाथ जाम्बवान् जन्याकजुरुक उठेर लडाइँ गर्न भिड्यो । अनि कृष्ण र जाम्बवान् ती दुइको घोर लडाइँ भयो ॥ ४० ॥ कृष्णका साथ गएका ती सबै द्वारिकाका वासिन्दाहरू कृष्ण मरे कि बाँचेकै छन्, पक्कै मरे क्यारे भन्ने सोचेर सातौं दिन फर्के ॥४१॥ तब उनीहरूले मरेका कृष्णको काजक्रिया पनि गरे। एक्काईस दिनसम्म मुक्का वजार्नै प्रभुजीले ॥४२॥ त्यस भालुका साथ युद्ध गर्नु भयो, लडाईंको काममा खुशी भएको जाम्बवान्ले भगवान्को भयंकर दैवी बल देख्ने पहिलेको कुरो संझेर भने--॥४३॥ जाम्बवान्ले भने--म समस्त द्यौता, यक्ष-राक्षस-दानवद्वारा नजितिने छु, हे देवेश ! तपाईंद्वारा म जितिएँ, तपाईं जस्तै

त्वया जितोऽहं देवेश देवस्त्वमसि निश्चितम् ॥ ४४ ॥ जाने त्वां वैष्णवन्तेजो नान्यथा बलमीदृशम् ॥ इति प्रसाद्य देवेशं ददौ माणिक्यमुत्तमम् ॥ ४५ ॥ सुताञ्जाम्बवती-ञ्चाथ भार्यार्थं वरवर्णिनीम् ॥ पाणिञ्च ग्राहयामास देवदेवस्य जाम्बवान् ॥ ४६ ॥ मणिमादाय देवोऽपि जाम्बवत्यापि संयुतः ॥ तद्वृत्तान्तं समाचष्टे द्वारिकावासिनां ततः ॥ ४७ ॥ सत्राजितस्य माणिक्यं दत्तवान्सदसि स्थितः ॥ मिथ्यापवादसंशुद्धिः प्राप्तवान्मधुसूदनः ॥ ४८ ॥ सत्राजितोऽपि सम्त्रस्तः कृष्णाय प्रददौ सुताम् ॥ सत्यभामां महाबुद्धिर्ददौ सर्व्वगुणान्विताम् ॥ ४९ ॥ शतधन्वा क्रूरमुखा यादवा दुष्टमानसाः ॥ सत्राजितेन ते

वा० २५८

भगवा[illegible] हुनुहुन्छ ॥४४॥ हजूरलाई मैले विष्णुकै तेज हुनुहुन्छ भन्ने ठानें, नत्र यस्तो बल हुने थिएन । भगवानलाई यस्तो बिन्ती चढाएर त्यो उत्तम मणि दिंदा भए ॥४५॥ अनि जाम्बवान्ले अ यन्तै सुन्दरी छोरी जाम्बवतीको पनि भगवान्की भार्या हुनका लागि हात पक्राइदिए ॥४६॥ मणि लिएर जाम्बवती पनि साथै रहेका भगवान्ले तब त्यो सारा वृत्तान्त द्वारिकावासीहरूलाई भन्नुभयो ॥४७॥ अनि सभामा रहेका भगवान्ले सत्राजितलाई मणि दिनुभयो । बेकारका कलंकको शुद्धशान्ति भगवान्ले यसरी गर्नुभयो ॥४८॥ डराएका महाबुद्धिमान् सत्राजितले पनि सारा गुणले युक्त भएकी सत्यभामा नामकी युवति छोरी कृष्णलाई दिए ॥४९॥ अनि त्यस रत्नमा लोभिएका शतधन्वा र क्रूरमुख-दुष्ट मन भएका ती

वैरञ्चक्रूरत्नाभिलाषिणः ॥ ५ ॥ दुरात्मा शतधन्वाऽपि गते कृष्णेऽपि कुत्रचित् ॥ सत्राजितं निहत्याशु मणिं जग्राह पापधीः ॥ ५१ ॥ कृष्णस्य पुरतः सत्या समाचष्टे विचेष्टितम् ॥ अन्तस्तुष्टो बहिः कोपी कृष्णः कपटनायकः ॥ ५२ ॥ बलदेवः पुरोवाक्यमुवाच धरणीधरः ॥ हत्वा सत्राजितं दुष्टो मणिमादाय गच्छति ॥ ५३ ॥ निहत्य शतधन्वानं गृहीत्वा रत्नमावयोः ॥ मम भाग्यञ्च तद्रत्नं भविष्यति न संशयः ॥५४॥ एतच्छ्रुत्वा भयत्रस्तो शतधन्वाऽपि यादवः ॥ आहूयाऽक्रूरनामानं माणिक्यम्प्रददौ च सः ॥ ५५ ॥ आरुह्य वडवां वेगान्निर्गतो दक्षिणान्दिशम् ॥ रथस्थावनुगच्छेतां तदा रामजनार्दनौ ॥ ५६ ॥

वा० १५६ (१०क)

यादवहरूले सत्राजितसित वैरत्व गरे ॥ ५० ॥ दुष्ट आत्मा भएको पापबुद्धिको शतधन्वाले पनि कृष्ण कतै गएको वेलामा तुरन्तै सत्राजितलाई मारेर मणि लियो ॥५१॥ कृष्णजी आएपछि सत्यभामाले उनको साम्रु सबै घटना भनिन्। अनि भित्र खुशी, बाहिर क्रोधी कपटका नायक अर्थात् कपटी कृष्णले ॥५२॥ बलदेवका साम्रु शेषावतार बलरामलाई यो कुरो भन्नुभो—दुष्ट शतधन्वा सत्राजितलाई मारेर मणि लिएर जाँदैछ ॥५३॥ शतधन्वालाई मारेर त्यो उत्तम रत्न लिऊँ! भाग्यले त्यो रत्न मेरो हुनेछ, यसमा क्यै शंसय छैन ॥५४॥ त्रस्तो कुरो सुनेर भयले डराएको शतधन्वा उस यादवले पनि अक्रूर नामको यादवलाई बोलाएर त्यो मणि दिए र ॥५५॥ घोडीमा चढेर दक्षिण दिशातिर सुइँकुच्चा ठोक्यो। तब बलराम र कृष्णले पनि रथमा चढेर उसको पीछा गरे ॥ ५६ ॥ शतयोजन (चार सय कोश) मात्र घुगेका थिए

शतयोजनमात्रेण ममार वडवा तदा ॥ पलायमानो हि तदा पदातिस्तु पदातिना ॥ ५७ ॥ रथस्थे बलदेवे तु हरिणा रत्नलोभिना ॥ अदृष्टं तत्र तद्रत्नं बलदेवं पुरोऽवदत् ॥ ५८ ॥ तदाकर्ण्य महारोषादुवाच वचनं बली ॥ कपटी त्वं सदा कृष्ण लोभी पापी सुनिश्चितम् ॥ ५९ ॥ अर्थाय स्वजनं हंसि कस्त्वां बन्धुस्समाश्रयेत् ॥ अनेकशपथैः कृष्णो बलदेवमतोषयत् ॥ ६० ॥ सोऽपि धिक्कष्टमित्युक्त्वा ययौ वैदर्भमण्डलम् ॥ कृष्णोऽपि रथामारुह्य द्वारिकां प्रययौ पुनः ॥ ६१ ॥ तथैवोचुर्ज्जनाः सर्वे न साधु कृतवान् हरिः ॥ निष्का-

वा० २६०

कि तब घोडी मरी । अनि पैदलै दौडने शतधन्वालाई दाजूलाई रथैमा रहन दिएर पैदलै पीछा गर्ने रत्नका लोभी हरिले मारिदिनुभो र शतधन्वाका शरीरमा त्यो रत्न नदेखिएको अर्थात् नभेटिएको कुरो बलदेवको साम्नु भन्नुभयो ॥ ५७-५८ ॥ त्यो कुरो सुनेर अत्यन्त क्रोधपूर्वक बलिया बलरामले—हे कृष्ण ! तिमी सधैंका असाध्यै कपटी लोभी पापी छौ—मतलबका लागि आफ्ना बन्धुलाई मार्छौ, यस्तो गर्न लाग्यौ भने कुन बन्धु तिमीसित आश्रय गर्ला ? —यस्तो कुरो भन्नुभो । बलरामको यस्तो कुरो सुनेर अनेक प्रकारका किरिया खाएर कृष्णले बलरामलाई सन्तोष गराउनु-भयो ॥५९-६०॥ तैपनि बलरामजी 'धिक्कार' बडो दुःखको कुरो छ, यस्तो भनेर विदर्भ देशतिर लाग्नुभयो । कृष्ण पनि फेरि रथमा चढेर द्वारिकातिर प्रस्थान गर्नुभयो ॥६१॥ फेरि द्वारकावासी सबै जनाहरूले त्यस्तै कुरो गर्न थाले—हरिजे

शितो रत्नलोभाज्ज्येष्ठो भ्राता बलो बली ॥ ६२ ॥ तच्छ्रुत्वा दीनवदनः पापेनैव हि भाति च ॥ वृथाभिशापसन्तप्तो बभूव स जगत्पतिः ॥ ६३ ॥ अक्रूरोऽपि विनिष्क्रम्य-तीर्थयात्रा-निमित्ततः ॥ काशीं गत्वा सुखेनाऽसौ ईजे यज्ञपतिम्प्रभुम् ॥ ६४ ॥ तोषमुत्पा-दयामास तेन द्रव्येण बुद्धिमान् ॥ सुरालयगृहैश्चित्रैर्नगरं समकल्पयत् ॥ ६५ ॥ न दौर्भिक्षं नैव रोगा ईतयो न च विप्लवम् । शुचिता धार्य्यते तत्र मणिस्सूर्य्यस्य निश्चितम् ॥ ६६ ॥ जानन्नपि हि सर्व्वज्ञो मानुषम्भावमाश्रितः ॥ लोकाचारं तथा मायामज्ञानञ्च समाश्रितः

वा० २६१

गं० क०

असल काम गर्नुभएन । रत्नका लोभले बलिया दाजु बलरामलाई निकालिदिनुभयो ॥६२॥ नगरवासीहरूको त्यस्तो कुरो सुनेर पापीले पिरिएजस्तो मलिन मुख लाएका जनगत्का पति श्रीकृष्ण बेकारको कलङ्कले दुःखी हुनुभयो ॥६३॥ त्यो तमाशा देखेर अक्रूर पनि तीर्थयात्राका बहानाले निकिलएर काशी गएर आनन्दले यज्ञपति प्रभु विश्वनाथको पूजा गर्न थाले र ॥६४॥ बुद्धिमान् अक्रूरले उहाँ रत्नबाट प्राप्त भएको धनले सारालाई दङ्दास पार्दा भए । चित्र-विचित्र मन्दिर र घरहरूले शहरलाई झकिझकाउ पारे ॥६५॥ त्यो सूर्यको मणि सावधानीपूर्वक पवित्र रहने अक्रूरले धारण गर्दा काशीमा कहिल्यै अनिकाल परेन, कुनै रोग फैलिएन, कुनै महामारी आएन, कुनै आपत्ति परेन ॥६६॥ सर्वज्ञ (सारा जान्ने) भगवान्ले सबै कुरो जान्दाजान्दै पनि साधारण मान्छेको छाँट लिएर लोकको व्यवहार-मायामोह-अज्ञानमा डुबेर ॥६७॥

॥ ६७ ॥ बन्धुवैरं समुत्पन्नं लाञ्छनं समुपस्थितम् ॥ वृथापवादं बहुलं जायमानं कथं सहे ॥ ६८ ॥ इति चिन्तातुरं कृष्णं नारदः समुपस्थितः ॥ गृहीत्वा तत्कृताम्पूजां सुखासीन-स्ततोऽब्रवीत् ॥ ६९ ॥ नारद उवाच ॥ किमर्थं खिद्यसे देव किंवा ते शोककारणम् ॥ यथावृत्तं समाचष्टे नारदाय च केशवः ॥ ७० ॥ नारद उवाच ॥ जानामि कारणं देव यदर्थं लाञ्छनं तव ॥ त्वया भाद्रपदे शुक्ले चतुर्थ्याम् चन्द्रदर्शनम् ॥ ७१ ॥ कृतं तेन समुत्पन्नं लाञ्छनं तु वृथैव हि ॥ ७२ ॥ श्रीकृष्ण उवाच ॥ वद नारद मे शीघ्रं को दोष-

वा० २६२ ग० क०

बन्धुका साथ वैरभाव उत्पन्न भो, कलङ्क आइलाग्यो । वेकार आइलागेको यत्रोविघ्न खाइ-न-पाइको कलङ्क कसरी सहने ! ॥६८॥ यस्तै प्रकारका चिन्ताले आकुल भएका कृष्णभाठौं नारद मुनि टुप्लुक्क आइपुग्नुभो र भग ान्ले गरेको सत्कार स्वीकार गरिसकेपछि अनि आनन्दसित बस्नुभएको नारदले भन्नुभयो–॥६९॥ नारदले भन्नुभो––हे भगवान्, केका लागि तपाईं खिन्न हुनुहुन्छ ? अथवा तपाईंका शोकको कारण के छ ? भगवान्ले पनि जस्तो-जस्तो घटना घटेको थियो नारदलाई वेलिविस्तार लाउनुभयो ॥७०॥ नारदले भन्नुभयो–हे भगवन् ! जेले गर्दा तपाईंलाई यो कलङ्क आइलाग्यो, त्यो कारण म जान्दछु । तपाईंले भदौको शुक्लपक्षको चतुर्थीमा चन्द्रमाको दर्शन ॥७१॥ गर्नुभयो, त्यसैकारण वेकारको यो कलङ्क आइलागेको हो ॥७२॥ तब श्रीकृष्णले भन्नुभो–हे नारद ! चन्द्रमाको दर्शनमा के दोष छ ! किन द्वितीयामा

श्चन्द्रदर्शने ॥ किमर्थन्तु द्वितीयायां यस्य कुर्वन्ति दर्शनम् ॥ ७३ ॥ नारद उवाच ॥ गणनाथेन संशप्तश्चन्द्रमा रूपधर्षितः ॥ तद्दर्शनं नराणां हि बृथा निन्दा भविष्यति ॥ ७४ ॥ श्रीकृष्ण उवाच ॥ किमर्थं गणनाथेन सप्तश्चन्द्रः सुधामयः । इदमाख्यानकं श्रेष्ठं तथावद्वक्तु-मर्हसि ॥ ७५ ॥ नारद उवाच ॥ गणानामाधिपत्येन रुद्रेण ब्रह्मणा पुरा । अणिमा लघिमा चैव महिमा गरिमा तथा ॥ ७६ ॥ प्राप्तिः प्राकाम्यमीशित्वं वशित्वं चाष्टसिद्धिकान् । तथैव अर्थकामौ च ब्रह्मणा शापितास्तदाः । भाय्यार्थम्प्रददौ देवो गणेशस्य प्रजापतिः ॥ ७७ ॥ पूजयित्वा

चन्द्रमाको दर्शन गर्छन् ? यो कुरो मलाई चाँडै बताउनुहोस् ॥७३॥ तब नारदले भन्नुभयो—आफ्नू रूपमा घमण्ड गर्ने चन्द्रमालाई गणेशजीले सराप्नुभएको छ । त्यसैकारण, उनको दर्शनले मनुष्यहरूलाई बेकारको निन्दा हुने गर्छ ॥७४॥ अनि श्रीकृष्णले भन्नुभयो—अमृत वर्षाउने शान्त चन्द्रमालाई गणेशजीले केका लागि सराप्नुभो । यो राम्रो कहानी तपाईं जस्ताको तस्तै भन्ने कृपा गर्नुहोस् ॥७५॥ नारदले भन्नुभो—उहिले गणेश, शिव, ब्रह्माले स्वतन्त्र अणिमा (भुसुनु जस्तो हुन सकिने), लघिमा (हलूँ हुन सकिने), प्राप्ति (जो चाह्यो त्यो मिल्न सकिने), त्यस्तै महिमा-गरिमा ॥७६॥ प्राकाम्य-ईशित्व-वशित्व यी अष्टसिद्धि र अर्थ कामलाई छाडा हुन नपाउने श्राप दिएर भगवान् ब्रह्माले आफ्ना अधीनमा रहने भार्या हुनका लागि गणेशजीलाई दिएर ॥७७॥ गणेशजीको पूजा गरेर स्तुति गर्न थाले—॥७८॥ ब्रह्माजी बोल्नुभो—

गणाध्यक्षं स्तुतिं कर्तुं प्रचक्रमे ॥ ७८ ॥ ब्रह्मोवाच ॥ गजवक्त्र गणाध्यक्ष लम्बोदर वरप्रद ॥ विद्याधीश च देवेश सृष्टिसंहारकारका ॥ ७९ ॥ यः पूजयेद् गणाध्यक्षम्मोदकाद्यैः प्रयत्नतः । तेषां प्रजायते सिद्धिर्निर्विघ्नं नाऽत्र संशयः ॥ ८० ॥ असम्पूज्य गणाध्यक्षं ये वाञ्छन्ति सुराऽसुरः । न तेषाञ्जायते सिद्धिः कल्पकोटिशतैरपि ॥ ८१ ॥ त्वद्भक्त्या तु गणाध्यक्ष विष्णुः पालयते सदा ॥ रुद्रोऽपि संहरत्याशु त्वच्छक्त्यैव करोम्यहम् ॥ ८२ ॥ इत्थं संस्तूयमानोऽसौ देवदेवो गजाननः ॥ उवाच परमप्रीतो ब्रह्माणं जगताम् पतिम् ॥ ८३ ॥ श्रीगणेश उवाच ॥ वरं ब्रूहि प्रदास्यामि यत्ते मनसि वर्त्तते ॥ ८४ ॥ ब्रह्मोवाच ॥ क्रियमाणस्य मे

हे हात्तीसुँडे ! हे गणनायक ! हे तोंदुमल ! हे वर दिने ! हे विद्याका मालिक ! हे द्यौताका पनि द्यौता ! हे सृष्टि र संहार गर्ने ! ॥७९॥ हजूर गणेशलाई जो जन लड्डूहरूले मिहिनेतसाथ पूजा गर्दछ तिनीहरूलाई विघ्न-बाधारहित भएर सिद्धि मिल्दछ, यसमा संशय छैन ॥८०॥ गणेशको पूजा नगरीकनै जो द्यौता-दैत्य सिद्धि चाहन्छन्, तिनीहरूलाई अरबौं कल्प समय बिते पनि सिद्धि मिल्दैन ॥८१॥ हे गणेशजी ! तपाईंकै भक्तिले विष्णु सधैं जगत्को पालना गर्दछन्, शिवजी पनि चटाचट नाश गर्दछन्, यस्तै म पनि हजूरकै शक्तिले सृष्टि गर्दछु ॥८२॥ यस्ता किसिमले स्तुति गरिएका ती हात्तीमुखे देव-देव गणेशले अत्यन्त खुशी भएर जगतका पति ब्रह्माजीलाई भन्नुभो ॥८३॥ श्री गणेशजीले भन्नुभयो—तिम्रो मनमा

सृष्टिर्निर्विघ्नो जायताम्प्रभो ॥ एवमस्त्विति देवोऽसौ गृहीत्वा मोदकान्करे ॥ ८५ ॥ सत्यलोका-
त्समागच्छत् स्वेच्छया गगने शनैः । चन्द्रलोकं समासाद्य पतितो गणनायकः ॥ ८६ ॥
वा० अथ हासम्महच्चक्रे सोमो रूपमदान्वितः ॥ तं दृष्ट्वा कोपताम्राक्षो गणनाथश्शशाप ह ॥८७॥ गा०क०
२६५ दर्शनीयस्वरूपोऽहं सुन्दरश्चाहमित्यथ ॥ गर्वितोऽसि शशाङ्कस्त्वं फलम्प्राप्स्यसि सत्वरम् ॥ ८८ ॥
अद्यप्रभृतिलोकास्त्वां नहि पश्यन्ति पापिनम् ॥ ये पश्यन्ति प्रमादेन त्वं नरा मृग-
लाञ्छनम् ॥ ८९ ॥ मिथ्याभिशापसंयुक्ता भविष्यन्ति हि वै ध्रुवम् ॥ हाहाकारो महाञ्जातः

जो इच्छा छ, वर माँग, दिन्छु ॥८४॥ तब ब्रह्माजीले भन्नुभयो—हे जगत्का प्रभु ! मैले गरिने र गरिएको सबै सृष्टि
निर्विघ्नतापूर्वक रहोस् । गणेशले पनि 'यस्तै होस्' यस्तो भनेर हातमा लड्डूहरू लिएर ॥ ८५ ॥
सत्यलोकबाट इच्छापूर्वक विस्तारै ढलकँदै आकाशमा आउन थाले । आउँदा चन्द्रलोकमा
आइपुगेपछि गणेशजी पच्छारिए ॥ ८६ ॥ गणेशजीलाई लडेको देखेर रूपका घमण्डले उन्मत्त भएका
२३ चन्द्रमाले ठूलो हाँसो हाँसे । हाँस्ने ती चन्द्रमालाई देखेर क्रोधले राता राता आँखा भएका गणेश-
जीले उनलाई सरापे ॥ ८७ ॥ हे चन्द्रमा ! हेरिन लायक रूपको छु, अनि म खूब राम्रो छु भन्ने घमण्डले युक्त छौ,
तुरन्तै यसको फल पाउनेछौ ॥८८॥ आजदेखि लिएर मनुष्यहरू तिमी पापीलाई नहेरून्, जो जन प्रमादले यत्रैसिति भनेर
जरायोटाटे तिमीलाई हेर्लान् ॥८९॥ ती जन निश्चयै झूटो कलंक लागेका हुनेछन् । यस्तो भयंकर श्राप सुनेर ठूलो हाहाकार

श्रुत्वा शापञ्च भीषणम् ॥ ९० ॥ अत्यन्त-ग्लानवदनश्चन्द्रो वारिं समाशित। कुमुदं कुमुदीनाथं स्थाप्य तत्र कृतालयः ॥ ९१ ॥ ततो देवर्षिगन्धर्वा निराशा दीनमानसाः ॥ तुरासाहम्पुरोधाय जग्मुस्ते तु पितामहम् ॥ ९२ ॥ दृष्ट्वा पितामहं देवं शशंसुश्चन्द्र-चेष्टितम् ॥ दत्तशापो गणेशेन कथयामासुरादरात ॥ ९३ ॥ विचार्य्य भगवान् ब्रह्मा तान् सुरान्निदमब्रवीत् ॥ गणेशशापो देवेन्द्राः शक्यते केन वाऽन्यथा ॥ ९४ ॥ कर्तुं रुद्रेण न मया विष्णुना वाऽपि निश्चितम्। तमेव देवदेवेशं व्रजध्वं शरणं सुराः ॥ ९५ ॥ स एव शापमोक्षञ्च करिष्यति न संशयः ॥ ९६ ॥ देवा ऊचुः ॥ केनोपायेन वरदो गजवक्त्रो गणेश्वरः ॥ पितामह

भयो ॥९०॥ यस्तो श्रापले अत्यन्तै मलिन मुख भएका चन्द्रमा पनि पानीमा पसेर उहाँ ठूलठूला कमलिनी कमल थुपारेर घर बनाए अर्थात् उहीं अखाडा जमाए ॥९१॥ त्यसरी चन्द्रमा बेपत्ता भएपछि मलिन मुख भएका निराश द्यौता-ऋषि-गन्धर्वहरू इन्द्रलाई अगि लाएर ती सबै ब्रह्माजीभाठौं गए ॥९२॥ भगवान् ब्रह्माजीलाई दर्शन गरेर चन्द्रमाको हालत बखान गरे। गणेशले सराप दिएको पनि विनयपूर्वक विन्ती चढाए ॥९३॥ तब भगवान् ब्रह्माले खूब विचार गरेर ती देवताहरूलाई यो कुरो भन्नुभयो—हे देवेन्द्र ! गणेशको श्रापलाई न शिवले, न मैले, न बिष्णुले कसैले यताउति (बेकार) गर्न सक्छ र ? पक्का पनि कसैले हटाउन सक्तैन ! त्यसकारण हे द्यौताहो ! द्यौताका पनि द्यौता उनैको शरणमा जाओ ! ॥९४-९५॥ उनी नै पापबाटछुट्कारा गर्नेछन्, यसमा कुनै शंका छैन॥९६॥द्यौताहरूले भने—हे बुद्धिमान् ब्रह्माजी, कुन उपायले हात्तीमुखे गणेशजी

महाप्राज्ञ तदस्माकं वद प्रभो ॥ ९७ ॥ पितामह उवाच ॥ चतुर्थ्यां देवदेवोऽसौ पूजनीयः प्रयत्नतः ॥ कृष्णपक्षे विशेषेण नक्ते कुर्याच्च तोषयेत् ॥९८॥ अपूपैर्घृतसंयुक्तैर्मोदकैः परियोषयेत् ॥ मधुरान्नं हविष्यञ्च स्वयम्भुञ्जीत कामतः ॥ ९९ ॥ स्वर्णरूपं गणेशस्य दातव्यं द्विजसत्तमम् ॥ शक्त्या च दक्षिणाम् दद्याद्वित्तशाठ्यं न कारयेत् ॥ १०० ॥ एवं समेत्य ते सर्वे प्रेषयामास गीष्पतिम् ॥ स गत्वा कथयामास वचो ब्रह्मोदितं तु तत् ॥ १०१ ॥ व्रतञ्चक्रे ततश्चन्द्रो यथोक्तं ब्रह्मणा पुरा ॥ आविर्बभूव भगवान् गणेशो व्रततोषितः ॥ १०२ ॥ तं क्रीडमानं गणनायकञ्च

वा० १६७

ग०क०

वर दिनेवाला हुनुहोला ? हे प्रभु ! त्यो कुरो हामीलाई कहनुहोस् ॥९७॥ तब ब्रह्माजीले भन्नुभयो—द्यौताका पनि द्यौता ती गणेशलाई चतुर्थीमा मिहिनेतसाथ पूजा गर्नुपर्छ। उसमा पनि कृष्णपक्षको चतुर्थीका रातमा पूजा गर्नाले गणेशजी विशेष प्रकारले खुशी हुनुहुन्छ॥९८॥घिउले लबालब भएको पूवा र लड्डहरूले गणेश जीलाई सन्तुष्ट गराउनू। आफूले पनि मीठो हविष्य अन्न पेटभर खानू॥९९॥ पूजा सकेपछि गणेशको सुवर्ण-प्रतिमा उत्तम ब्राह्मणलाई दान दिनू, सावगास-अनुसार दक्षिणा पनि दिनू। कञ्जूस्याइँ नगर्नू॥१००॥ब्रह्माजीको यस्तो वचन सुनेपछि ती सबै द्यौताहरू भेला भएर बृहस्पतिलाई चन्द्रमाभाठौं पठाए। उनी उहाँ गएर ब्रह्माजीले कुरो चन्द्रमालाई भने ॥१०१॥ तब चन्द्रमाले पहिले ब्रह्माजीले भनेजस्तै गरी व्रत गरे। अनि व्रतले सन्तुष्ट भएका भगवान् गणेशजी चन्द्रमाका सामु प्रकट हुनुभयो ॥ १०२ ॥ आफ्ना

तुष्टाव दृष्ट्वा तु कलानिधानः । त्वं कारणं कारणकारणानां वेत्ताऽसि वेद्यश्च विभो प्रसीद ॥१०३॥ प्रसीद देवेश जगन्निवास गणेश लम्बोदर वक्रतुण्ड ॥ विरञ्चि - नारायण - पूज्यमान क्षमस्व मे गर्वकृतञ्च हास्यम् ॥ १०४ ॥ यस्त्वामसम्पूज्य गणेश नूनं वाञ्छन्ति मूढा विदिता- र्थसिद्धिम् ॥ ते दैवनष्टा निभृतञ्च लोके ज्ञातो मया ते सकलप्रभावः ॥१०५॥ ये चाप्युदासीनन- रास्तु पापास्ते यान्ति पापान्नरके सदैव ॥१०६॥ एवं संस्तूयमानोऽसौ चन्द्रेणाऽथ गजाननः ॥ श्रीगणेश उवाच ॥ तुष्टोऽहं तव दास्यामि वरम्ब्रूहि निशाकर ॥ १०७ ॥ चन्द्र उवाच ॥ लोकानां

वा० २६८ गा०क०

अगाडि खेल खेल्ने ती गणेशजीलाई देखेर चन्द्रमा स्तुनि गर्न लागे—कारणका कारणको पनि कारणलाई तपाई जान्ने हुनुन्छ, जानिनेवाला पनि हुनुहुन्छ, हे प्रभु ! प्रसन्न हुनुहोस् ॥१०३॥ हे देवेश ! हे जगन्निवास, हे गणेश ! हे लम्बोदर ! हे वक्रतुण्ड, हे ब्रह्मा-विष्णुले पूजिने प्रभु, घमण्डले गरेको मेरो हास्यकन क्षमा गर्नुहोस ॥ १०४ ॥ हे गणेशजी, जो मूर्ख जनहरू हजूरलाई नपूजीकन कार्य सिद्ध गर्न चाहन्छन्, निश्चयै ती संसारमा अत्यन्तै अभागी हुन्, मैले तपाईंको सारा प्रभाव जानें ॥१०५॥ तपाईंको वास्ता नराख्ने जो मनुष्यहहरू तपाईंको पूजा नगरीकनै काम सिद्धिको फल चाहन्छन्, अत्यन्त मूर्ख, बुद्धि नभएका ती पापीहरू त्यस पापले सधैं नरकमा नै जान्छन् ॥ १०६ ॥ चन्द्रमाले यसरी स्तुति गरिएका गणेशले भने—हे चन्द्रमा ! तिम्रो पूजा र स्तुतिले म खुशी छु, वर दिन्छु, भन ॥१०७॥

दर्शनीयोऽहं भवामि पुनरेव हि । विपापोऽहं विशापोऽहं त्वत्प्रसादाद् गणेश्वर ॥१०८॥ श्रीगणेश उवाच ॥ वरमन्यत्प्रदास्यामि नैतद्देयम्मया तव ॥ विपापं कुरु देवेश प्रार्थयामो वयं तव ॥ १०९ ॥ विपापमकरोच्चन्द्रं कमलासन - गौरवात् ॥ शुक्लपक्षे चतुर्थ्यां ये त्वां पश्यन्ति सदैव हि ॥ ११० ॥ मिथ्यापवादमायान्तं ते प्राप्स्यन्ति न संशयः ॥ मासादिपूर्वमेव त्वां ये पश्यन्ति सदा जनाः ॥ १११ ॥ भाद्र्यां शुक्लपक्षस्य तेषां दोषो न जायते ॥ तदा प्रभृति लोकोऽयं द्वितीयायां कृताऽऽदरः ॥ ११२ ॥ चन्द्रस्य दर्शनार्थाय गणनाथेन भाषितम् ॥

तब चन्द्रमाले भने—हे गणेश्वर ! तपाईंका अनुग्रहले फेरि म मनुष्यहरूले देखिन सक्ने हूँ, पाप सखापिएको हुँ, श्राप सकिएको हूँ ॥१०८॥ तब गणेशजीले भन्नुभयो—'हे चन्द्रमा ! मैले तिमीलाई यो वर दिन ठीक छैन, अरू नै वर दिन्छु। तब फेरि चन्द्रमाले भने—हे देवेश ! तपाईंलाई म प्रार्थना गर्छु, प्रभु ! मलाई पापरहित बनाइबक्सियोस् ॥१०९॥ तब गणेशजीले ब्रह्माजीका गौरवका प्रभावले चन्द्रमालाई पाप-रहित गराइदिनुभो र भन्नुभो—शुक्लपक्षको चतुर्थीमा जो जन तिमीलाई हेर्लान् सधैं ॥११०॥ ती झूटो कलंक आइलागेको पाइनेछन्, यसमा कुनै संशय छैन ॥ चान्द्र महीनाको शुरूको दिन शुक्लपक्षको द्वितीयामा पहिले जो जन सधैं तिमीलाई हेर्नेछन् तिनीहरूलाई दोष लाग्दैन। त्यहाँदेखि लिएर यो सारा जनसमूह द्वितीयामा चन्द्रमाको आदर गर्छ ॥ १११-११२ ॥ चन्द्रमाको दर्शनका लागि

भाद्रशुक्लचतुर्थ्यां तु यस्त्वां पश्यति पापधीः ॥ ११३ ॥ मिथ्यापवादमलिनमावर्षम् तस्य जायते ॥ पुनरेव तु पप्रच्छ कलावान् गणनायकम् ॥ ११४ ॥ केनोपायेन देवेश तुष्टो भवसि तद्वद ॥ ११५ ॥ श्रीगणेश उवाच ॥ सदा कृष्णचतुर्थ्यां तु मोदकाद्यैः प्रपूज्य माम ॥ रोहिणीसहितं माञ्च समभ्यर्च्य विधानतः ॥ ११६ ॥ यथाशक्त्या च मद्रूपं स्वर्णेन परिकल्पितम् ॥ दत्त्वा द्विजाय भुक्त्वाऽथ कथां श्रुत्वा विधानतः ॥ ११७ ॥ सदा तस्य करिष्यामि संकष्टस्य निवारणम् । भाद्रशुक्लचतुर्थ्यां तु मृण्मयी प्रतिमा शुभा ॥ ११८ ॥

वा० २७०

सु० क०

गणनाथले भन्नुभएको छ—भाद्रशुक्ल चतुर्थीमा जुन पापबुद्धि भएको जन तिमीलाई हेर्छ ॥११३॥ त्यसको त्यो वर्षभरि नै झूठो कलंकले मलिन-नूर हुन्छ । गणेशको यस्तो उक्ति सुनेर फेरि चन्द्रमाले गणेशलाई सोधे—॥११४॥ हे देवेश कुन उपायले तपाईं खुशी हुनुहुन्छ ? त्यो आज्ञा होस् ॥११५॥ अनि गणेशजीले भन्नुभयो—सधैंको कृष्णपक्षको चतुर्थीमा लड्डू आदिले मलाई पूजा गरेर, अथवा रोहिणीसहित मलाई विधिपूर्वक पूजेर ॥११६॥ शक्ति-अनुसार सुनले बनाइएको मेरो रूप बाहुनलाई दिएर, विधिपूर्वक मेरो कथा सुनेर, मीठो हविष्यान्न खाएर जो मेरो व्रत गर्छ ॥११७॥ त्यसको म सधैं संकट हटाउने काम गर्छु । भाद्रशुक्ल चतुर्थीमा सुनको, नसके माटैको पनि मेरो सुन्दर प्रतिमा बनाउनू र किसिम-किसिमका फूलहरूले मलाई पूजा गरेर ब्राह्मणहरूलाई भोजन गराउनू, अनिपछि विशेष तरहले राति

हेमाभवे तु कर्त्तव्या नानापुष्पैः प्रपूज्य माम् ॥ ब्राह्मणान् भोजयेत् पश्चात् जागरञ्च विशेषतः ॥ ११९ ॥ स्थापयेदन्नणं कुम्भं धान्यस्योपरि शोभितम् । यथाशक्त्या तु मद्रूपं शातकुम्भेन निर्मितम् ॥ १२० ॥ वस्त्रद्वयसमाच्छन्नं मोदकाद्यैः प्रपूज्य माम् । रक्ताम्बरधरो मर्त्यो ब्रह्मचर्यरतः शुचिः ॥ १२१ ॥ रोहिणी - सहितं मां च पूजाम्प्रस्थाप्य मत्पुरः ॥ रजतस्य तु शूर्पन्तु यथाशक्त्या विनिर्मितम् ॥ १२२ ॥ वस्त्रं शिवप्रियायेति गणाधिप नमोऽस्तु ते ॥ गन्धं लम्बोदरायेति पुष्पसिद्धिप्रदाय च ॥ १२३ ॥ धूपं गजमुखायेति दीपम्मूषकवाहने । विघ्ननाथाय नैवेद्यं फलं सर्व्वार्थसिद्धिदे ॥ १२४ ॥ ताम्बूलं कामरूपाय दक्षिणां

वा० २७१ पु०क०

जाग्राम गर्नू ॥११८-११९॥ नकुच्चिएको नचुहुने राम्रो घडा धानको माथि स्थापना गर्नू । सावगास-अनुसार सूनले बनाइएको मेरो रूपलाई ॥१२१॥ पवित्र रातो लुगा लगाएको, ब्रह्मचर्यमा रहेको मानिस दुइटा वस्त्रले ढाकिएको मलाई लड्डू आदिले पूजा गरोस् ॥१२१॥ शक्ति-अनुसार चाँदीले बनाइएको नाङ्लो–रोहिणीसहित मलाई पूजा गर्दा–मेरो अगाडि राखेर ॥१२२॥ शिवप्रियाय वस्त्रं समर्पयामि, भो गणाधिप नमोऽस्तु ते । लम्बोदराय गन्धं समर्पयामि, भो गणाधिप ! ० । सिद्धिप्रियाय पुष्पं समपयामि, भो रणाधिप ! ० ॥१२३॥ गजमुखाय धूतं समर्पयामि, भो गणाधिप ! । मूषकवाहने दीपं समर्पयामि, भो गणाधिप ! ० । विघ्नगाथाय नैवेद्यं समर्पयामि, भो गणाधिप ! ० । सर्वार्थसिद्धिदे फलं

भाद्रशुक्लचतुर्थ्यां तु यस्त्वां पश्यति पापधीः ॥ ११३ ॥ मिथ्यापवादमलिनमावर्षम् तस्य जायते ॥ पुनरेव तु पप्रच्छ कलावान् गणनायकम् ॥ ११४ ॥ केनोपायेन देवेश तुष्टो भवसि तद्वद ॥ ११५ ॥ श्रीगणेश उवाच ॥ सदा कृष्णचतुर्थ्यां तु मोदकाद्यैः प्रपूज्य माम ॥ रोहिणीसहितं माञ्च समभ्यर्च्य विधानतः ॥ ११६ ॥ यथाशक्त्या च मद्रूपं स्वर्णेन परिकल्पितम् ॥ दत्त्वा द्विजाय भुक्त्वाऽथ कथां श्रुत्वा विधानतः ॥ ११७ ॥ सदा तस्य करिष्यामि संकष्टस्य निवारणम् । भाद्रशुक्लचतुर्थ्यां तु मृण्मयी प्रतिमा शुभा ॥ ११८ ॥

गणनाथले भन्नुभएको छ—भाद्रशुक्ल चतुर्थीमा जुन पापबुद्धि भएको जन तिमीलाई हेर्छ ॥११३॥ त्यसको त्यो वर्षभरि नै झूटो कलंकले मलिन-नूर हुन्छ । गणेशको यस्तो उक्ति सुनेर फेरि चन्द्रमाले गणेशलाई सोधे—॥११४॥ हे देवेश कुन उपायले तपाईं खुशी हुनुहुन्छ ? त्यो आज्ञा होस् ॥११५॥ अनि गणेशजीले भन्नुभयो—सधैंको कृष्णपक्षको चतुर्थीमा लड्डू आदिले मलाई पूजा गरेर, अथवा रोहिणीसहित मलाई विधिपूर्वक पूजेर ॥११६॥ शक्ति-अनुसार सुनले बनाइएको मेरो रूप बाहुनलाई दिएर, विधिपूर्वक मेरो कथा सुनेर, मीठो हविष्यान्न खाएर जो मेरो व्रत गर्छ ॥११७॥ त्यसको म सधैं संकट हटाउने काम गर्छु । भाद्रशुक्ल चतुर्थीमा सुनको, नसके माटैको पनि मेरो सुन्दर प्रतिमा बनाउनू र किसिम-किसिमका फूलहरूले मलाई पूजा गरेर ब्राह्मणहरूलाई भोजन गराउनू, अनिपछि विशेष तरहले राति

हेमाभवे तु कर्त्तव्या नानापुष्पैः प्रपूज्य माम् ॥ ब्राह्मणान् भोजयेत् पश्चात् जागरञ्च विशेषतः ॥ ११९ ॥ स्थापयेदव्रणं कुम्भं धान्यस्योपरि शोभितम् । यथाशक्त्या तु मद्रूपं शातकुम्भेन निर्मितम् ॥ १२० ॥ वस्त्रद्वयसमाच्छन्नं मोदकाद्यैः प्रपूज्य माम् । रक्ताम्बरधरो मर्त्यो ब्रह्मचर्यरतः शुचिः ॥ १२१ ॥ रोहिणी - सहितं मां च पूजाम्प्रस्थाप्य मत्पुरः ॥ रजतस्य तु शूर्पन्तु यथाशक्त्या विनिर्मितम् ॥ १२२ ॥ वस्त्रं शिवप्रियायेति गणाधिप नमोऽस्तु ते ॥ गन्धं लम्बोदरायेति पुष्पसिद्धिप्रदाय च ॥ १२३ ॥ धूपं गजमुखायेति दीपम्मूषकवाहने । विघ्ननाथाय नैवेद्यं फलं सर्व्वार्थसिद्धिदे ॥ १२४ ॥ ताम्बूलं कामरूपाय दक्षिणां

वा० २७१

सु०क०

जाग्राम गर्नू ॥११८-११९॥ नकुच्चिएको नचुहुने राम्रो घडा धानको माथि स्थापना गर्नू । सावगास-अनुसार सूनले बनाइएको मेरो रूपलाई ॥१२१॥ पवित्र रातो लुगा लगाएको, ब्रह्मचर्यमा रहेको मानिस दुइटा वस्त्रले ढाकिएको मलाई लड्डू आदिले पूजा गरोस् ॥१२१॥ शक्ति-अनुसार चाँदीले बनाइएको नाड्लो–रोहिणीसहित मलाई पूजा गर्दा–मेरो अगाडि राखेर ॥१२२॥ शिवप्रियाय वस्त्रं समर्पयामि, भो गणाधिप नमोऽस्तु ते । लम्बोदराय गन्धं समर्पयामि, भो गणाधिप ! ० । सिद्धिप्रियाय पुष्पं समपयामि, भो रणाधिप ! ० ॥१२३॥ गजमुखाय धूतं समर्पयामि, भो गणाधिप ! । मूषकवाहने दीपं समर्पयामि, भो गणाधिप ! ० । विघ्नगाथाय नैवेद्यं समर्पयामि, भो गणाधिप ! ० । सर्वार्थसिद्धिदे फलं

धनदाय च ॥ इक्षुण्डदैस्तदा पूज्यो नाम्ना शोभाकरं शुभम् ॥ १२५ ॥ विसर्जनसमारम्भैः सर्व्वसिद्धिप्रदायकम् । एवं संपूज्य विघ्नेशं कथां श्रुत्वा विधानतः ॥ १२६ ॥ मन्त्रेणाऽनेन तत्सर्वं ब्राह्मणाय निवेदयेत् । दानेनाऽनेन देवेश प्रीतो भव गणेश्वर । सर्वत्र सर्वदा देव निर्विघ्नं कुरु सर्वदा ॥ १२७ ॥ मानोन्नतिञ्च राज्यञ्च पुत्रपौत्रान् प्रदेहि मे । गावो धान्यञ्च वासांसि दद्यात सर्वं स्वशक्तितः ॥ १२८ ॥ दत्त्वा तु ब्राह्मणे सर्वं स्वयम्भुञ्जीत कामतः । मोदका पूपमधुरं लवणं क्षारवर्जितम् ॥ १२९ ॥ एवं करोति यश्चन्द्र ! तस्याऽहं सर्वदा जयम् ।

समर्पयामि, भो गणाधिप ! ० ॥१२४॥ कामरूपाय ताम्बूलं समर्पयामि, भो गणाधिप ! ० । धनदाय दक्षिणां समर्पयामि, भो गणाधिप ! ० । तब ऊखुका लाक्राँहरूले सुन्दर कल्याणकारी नाम भन्दै पूजा गर्नू ॥१२५॥ यसरी सारा सिद्धि दिने गणेशलाई विसर्जन-समारम्भ आदिले पूजा गरेर, विधिपूर्वक गणेशको कथा सुनेर ॥ १२६ ॥ यस मन्त्रले त्यो सब सामग्री ब्राह्मणलाई अर्पण गर्नू—'हे गणेश्वर, देवेश, खुशी हौ यस दानले । निर्विघ्न गर हे देव, सधैं सर्वत्र शानले ॥१२७॥ मान उन्नति औ राज्य छोरा नाति मलाई द्यौ ॥' यस मन्त्रले ब्राह्मणलाई पूजाका सामान अर्पेर शक्ति-अनुसार गाई धान लुगा आदि सब दान दिनू ॥१२८॥ त्यसरी दान गरिने सबै चीज ब्राह्मणलाई दिएर आफू पनि नून र नुनिलो पदार्थ छोडेर अघाउन्जेल मीठा-मीठा लड्डू पूवा खानू ॥ १२९ ॥ हे चन्द्रमा, जो यस्तो गर्दछ,

सिद्धिञ्च धनधान्यं च ददामि विपुलाम् प्रजाम् ॥ १३० ॥ इत्युक्त्वाऽन्तर्दधे देवो गणनाथो विनायकः ॥ तद्व्रतं कुरु कृष्ण त्वं ततश्शुद्धिमवाप्स्यसि ॥ १३१ ॥ नारदेनैवमुक्तश्च व्रतञ्चक्रे हरिः स्वयम् । मिथ्यापवादसंशुद्धिर्द्वितीयं कृष्णयाचितम् ॥ १३२ ॥ ये शृण्वन्ति तवाऽऽख्यानं स्यमन्तकमणीयकम् ॥ चन्द्रस्य चरितं सर्वं तेषां दोषो न जायते ॥ १३३ ॥ भाद्रशुक्लचतुर्थ्यां तु चन्द्रस्य दर्शनं क्वचित् । जातं तत्परिहारार्थं श्रोतव्यं सर्वमेव तु ॥ १३४ ॥ यदा यदा मनः कष्टं सन्देहमुपजायते ॥ तदा तदा च श्रोतव्यमाख्यानं कष्टनाशनम् ॥ एवमुक्त्वा गतो देवो

वा० २७१

त्यसलाई म सधैं जय, सिद्धि र धन-धान्य प्रशस्त छोरा-नाति दिन्छु ॥१३०॥ चन्द्रमालाई यति भनेर गणहरूका स्वामी भगवान् सिद्धिविनायक अलप हुनुभयो । हे कृष्ण ! तपाईं त्यही व्रत गर्नुहोस्, तब यस कलङ्कबाट शुद्धि (मुक्ति) पाउनुहुनेछ ॥१३१॥ नारदले यस्ता प्रकारले बताइएका कृष्णले मिथ्या अपवादको शुद्धिका लागि स्वयं यो व्रत भर्नुभयो र दोस्रो वर कृष्णले माँग्नुभयो ॥१३२॥ तब गणेशले भन्नुभयो—हे कृष्ण ! स्यमन्तक मणिसम्बन्धी तिम्रो कहानी जो सुन्दछन् र चन्द्रमाको सबै वृत्तान्त सुन्दछन् तिनीहरूलाई चौथीको चन्द्रमा हेरेको दोष लाग्दैन ॥ १३३ ॥ भाद्रशुक्ल चौथीमा कहीं चन्द्रमाको दर्शन भइहाल्यो भने त्यसको दोष मेटाउन स्यमन्तक मणि र चन्द्रमाको सबै वृत्तान्त सुन्नुपर्छ ॥१३४॥ जब जब मनमा कष्ट सन्देह उत्पन्न हुन्छ, तब-तब यो कष्ट नाश गर्ने कहानी सुन्ने गर्नुपर्छ ॥ कृष्णजीलाई

प० क०

गणेशः कृष्णतोषितः ॥ १३५ ॥ यदा यदा पश्यति कार्यमुत्थितं नारी नरश्चाथ करोति सत्व्रतम् । सिद्ध्यन्ति कार्य्याणि समीप्सितानि किं दुर्लभं विघ्नहरे प्रसन्ने ॥१३६॥ श्रावणं याऽसिते पक्षे चतुर्थ्यामेकभुग्व्रती । व्रतं कुर्य्याद् गणेशस्य यावन्मासचतुष्टयम् ॥ १३७ ॥

॥ इति श्रीस्कन्दपुराणो स्यमन्तकोपाख्यानम् समाप्तम् ॥

खुशी पारेका भगवान् गणेशजी यति भनेर जानुभो ॥१३५॥ जब-जब संकट निवारण गर्नुपर्ने काम आइलागेको देखिन्छ, तब-तब नारी होस् अथवा पुरुष होस् जसले पनि यो असल व्रत गऱ्यो भने चाहेका सबै कामहरू सिद्ध हुन्छन्, विघ्नहरण गर्ने गणेशजी प्रसन्न भएपछि के दुर्लभ हुन्छ र ? अर्थात् हुने क्यै रहँदैन ॥१३६॥ श्रावणको कृष्णपक्षको चौथीदेखि एकछाक खाने व्रत बसेको व्यक्तिले चार महीनासम्म गणेशको व्रत गर्ने गरोस् ॥१३७॥ गणेशले चन्द्रमालाई र कृष्णलाई भनेको भनी नन्दिकेश्वरले सनत्कुमारलाई सुनाएको, व्यासले मलाई सुनाउनुभएको भनी सूतजीले शौनकादिहरूलाई सुनाउनुभएको कथा यथामति मैले तपाईं श्रोताहरूलाई सुनाएँ ॥ मङ्गलमूर्ति गणेशको जय होस् । भगवान् श्रीकृष्णको जय होस् ॥ पुष्पाञ्जलि–उपनयस्तु० ॥

॥ इतिस्कन्दपुराणान्तर्गतस्यमन्तकोपाख्यानं समाप्तम् ॥

सरस्वतीप्रतिमां सज्जीकृत्य, यथास्थानं संस्थाप्य, पुष्पमालाभिरलंकृत्य परितः स्वस्वस्थानस्थितेषु अन्यजनेषु वाद्यवादकेषु च कर्ता पजास्थानमुपविश्य सर्वविध-पूजासामग्रीं प्राध्वं निधाय आचम्य सयव-कुशखण्डत्रयं जलं दक्षिणहस्तेन संगृह्य—'ॐ तत्सत् ३, ॐ विष्णुः ३,... अद्य हे... अहं सरस्तीप्रीतिद्वारा विविधविधशास्त्रज्ञानोत्तीर्णपूर्वकं बुद्धिजीविभवनानन्तरं राजपत्राङ्कितप्रतिष्ठितपदप्राप्त्यर्थं तत्पदप्रभावात् मूर्खजीविश्रमिककृषकजनान् नानाविधप्रलोभनकारिवञ्चनाऽश्वासनवचनैः प्रत्यक्षाऽप्रत्यक्षकरभारेण शोषितं राजस्वं-योजनापूर्ति-कृषिविकासवस्तुसुलभव्यापारव्याजेन वञ्चकान् तथा उत्कोचजीविकान् कुटिलकर्मणा श्रमिककृषकशोषिणश्च शोषकान् नियन्त्रणकारिबुद्धिप्राप्त्यर्थम् दीप-कलश-गणेश-पूजन-पूर्वकं प्रधानदेवतायाः सरस्वतीदेव्याः सविधि पूजां करिष्ये इति संकल्प्य ध्यानम्—आरूढा श्वेतहंसे भ्रमति च गगने दक्षिणे चाक्षसूत्रं, वामे हस्ते च दिव्यां वरकनकमयं पुस्तकं ज्ञानगम्या। सा वीणां वादयन्ती स्वकरकरजपैः शास्त्रविज्ञानशब्दैः, क्रीडन्ती दिव्यरूपा करकमलधरा भारती सुप्रसन्ना ॥ इति ध्यानान्ते चन्दनाक्षतदक्षिणहस्तेन सरस्वतीं स्पृशन् आवाहयेत्-'ॐ आवाहयाम्यहं देवीं कुन्देन्दुधवलद्युतीम्। सरस्वतीं भव्यरूपां वाङ्मालिन्यहरां शुभाम् ॥ अत्राऽगच्छ जगद्वन्द्ये सर्वलोकैकपूजिते। मया कृताम् इमां पूजां गृहाण जगदीश्वरि ॥ ॐ भूर्भुवः स्वः भोः सरस्वति ! इह आगच्छ इह तिष्ठ यावत् पूजां करोमि तावत् त्वं सुस्थिरा भव' इति आवाह्य जलं समर्प्य—चन्दनाक्षतकुसुमहस्तेन सरस्वतीं पृशन्—अनेकरत्नसंयुक्तं सुवर्णेन विराजितम्। मुक्तामण्यङ्कितं चारु चासनं ते ददाम्यहम् ॥ आसनं समर्पयामि सरस्वत्यै नमः ॥एवं पर्वत्र॥ अथ पाद्यम् (जल)—गन्धपुष्पाक्षतैः सार्धं शुद्धतोयेन संयुतम्। शुद्धस्फटिकतुल्याङ्गि पाद्यम् मे प्रतिगृह्यताम् ॥ अर्घ्यम् (दधि-

दुग्ध-शर्करामिश्रितजलम्)–भक्ताऽभीष्टप्रदे देवि देवदेवादिवन्दिते । आधारादिजगद्धात्री ददाम्यर्घ्यं गृहाण मे ॥ आचमनीयम् (जलम्)–पूर्णचन्द्रसमास्ये त्वं कोटिसूर्यसमप्रभे । भक्त्या समर्पितं वारि गृहाणाचमनीयकम् ॥ मधुपर्कम् (दधिमधुघृतशर्करायुतजलम्) कमलभवनजाये कोटिसूर्यप्रकाशे, शिवदशुचिविलासे कोमलाहारयुक्ते । दधिमधुघृतयुक्तं क्षीररम्भाफलाढ्यम् ,शुचि रुचि मधुपर्कम् गृह्यतां देववन्द्ये ॥ पञ्चामृत (दुग्ध-दधिघृतमधुमिश्रितजल) स्नानम्–दधि-क्षीर-घृतोपेतं शर्करा-मधुसंयुतम् । पञ्चामृतस्नानमिदं स्वीकुरुष्व महेश्वरि ॥ कुंकुममिश्रितजलेन स्नानम्—सुवर्णकलशानीतैर्नानागन्धसुवासितैः । शुद्धोदकस्नानमिदं स्वीकुरुष्व सुरेश्वरि ॥ प्रोक्षणम्–शुभ्रवस्त्रेण प्रोक्षामि शुभ्रां बुद्धिं ददातु मे । दुष्टो धूर्तो वञ्चकोऽहं न भवेयम् कदाचन ॥ शाटीकादिवस्त्रयुग्मम्–शुक्लवस्त्रद्वयं देवि कोमलं कुटिलालके । भक्त्या मयाऽर्पितं वाणि ! ब्रह्माणि प्रतिगृह्यताम् ॥ चन्दनम्–चन्दनाऽगरुकस्तूरीकर्पूराद्यश्च संयुतम् । गृहाण चन्दनं देवि ! मया दत्तं नमोऽस्तु ते ॥ अक्षताः—अक्षतान् धवलान् दिव्यान् शलितण्डुलनामकान् । गृहाण वरदे देवि ! ब्रह्मशक्ति शुभाक्षतान् ॥ पुष्पाणि–विविधविधपत्राणि माल्यादीनि च–नत्यावर्तादिपुष्पैश्च मल्लिकाभिर्मनोहरैः । करवीरगनीरम्यैर्बकुलैः केतकैः शुभैः॥पुन्नागैर्जातिकुसुमैर्मन्दारैश्च सुशोभितैः । नीलोत्पलैः शुभैश्चान्यैस्तत्कालतरुसम्भवैः ॥ प्रकल्पितानि माल्यानि गृहाणाऽमरवन्दिते ॥ आभूषणम्–कटक-मुकुटहारैरंगदाद्यै विचित्रैः, विविधसुमणियुक्तैर्मेखलायुक्तहारैः । कमलदलविलासे कामदात्रि गृहीत्वा,प्रकटितकरुणाद्रे भूरिशो भूषणानि ॥ हरिद्रा(बेसार)चूर्णम्-हरिद्रा कुंकुमं चैव सिन्दूरं कज्जलान्विताम् । सौभाग्य द्रव्य संयुक्तं गृहाण परमेश्वरि ! ॥ अङ्गपूजा–१ ब्रह्माण्यै नमः पादौ पूजयामि ।२ ब्रह्माण्डमूर्तये नमः गुल्फौ पूजयामि । ३ जगत्स्वरूपायै नमःजंघे पूजयामि ।४ जगदादयेनमः जानुनी पूजयामि।५ चारुविलासिन्यै नमःउरू पूजयामि।६ कमलभूतये

नमः कटिं पूजयामि । ७ जन्महीनाय नमः जघनं पूजयामि । ८ गंभीरनाभये नमः नाभिं पूजयामि । ९ वारिपूज्यायै नमः उदरं पूजयामि । १० लोकमात्रे नमः स्तनौ पूजयामि । ११ विशालवक्षसे नमः वक्षःस्थलं पूजयामि । १२ सुविपश्चिते नमः कण्ठं पूजयामि । १३ स्कन्दप्रपूज्यायै नमः स्कन्धौ पूजयामि । १४ दीर्घसुबाहवे नमः बाहू पूजयामि । १५ पुस्तकधारिण्यै नमः हनुं पूजयामि । १६ श्रोत्रियजभवे नमः श्रोत्रे पूजयामि । १७ वेदस्वरूपायै नमः वक्त्रं पजयामि । १८ सुनासायै नमः नासिकां पूजयामि । १९ बिम्बसमानोष्ठयै नमः ओष्ठौ पूजयामि । २० कमलचक्षुषे नमः नेत्रे पूजयामि । २१ तिलकधारिण्यै नमः भालं पजयामि । २२ चन्द्रमूर्तये नमः केशान् पूजयामि । २३ सर्वैश्वर्यै सरस्वत्यै नमः शिरः पूजयामि । २४ ब्रह्मरूपिण्यै नमः सर्वांगं पूजयामि । धूपम्—दशाङ्गं गुग्गुलोपेतं सुगन्धं च मनोहरम् । धूपं गृहाण कल्याणि भक्तिं मय्यचलां कुरु ॥ दीपम्—घृताक्तवर्तित्रितयैर्दीपितं दीपमम्बिके । गृहाण चित्स्वरूपे त्वं कमलासनवल्लभे ॥ विविधविध-व्यञ्जन-फलादि-नैवेद्यम—मृदुलान् गुडसंमिश्रान् सजीरकमरीचकान् । कदलीपनसाभ्राणां सुपक्वानि फलानि च ॥ कन्दमूलव्यञ्जनादि सोपदंश मनोहरम् । अन्नं चतुर्विधोपेतं क्षीरान्नं सघृतं दधि ॥ पेयपानीयम्—शीतोदकं च सुस्वादुकर्पूरैलादिवासितम् । मध्ये मध्ये गृहाणेदं कामधेनु-शताधिके ॥ उत्तरापोशानम्—उत्तरापोशनार्थेऽहमिदं वारि समर्पये । आचम्यतां ततो गण्डषार्थमन्यत्र गम्यताम् ॥ हस्तमुखादि-प्रक्षालनजलम्—प्रक्षालनार्थं ते हस्तौ मुखं च सुमनोहरम् । मया धारीकृतं वारि गण्डूषं क्षालनं कुरु ॥ हस्तमुख-प्रोक्षणम्—समर्पये वस्त्रखण्डं मुखं हस्तौ च प्रोक्षय सदा रक्षम हे देवि ! शोषकैः शोषितान् जनान् ॥ हस्तलेपनार्थं चन्दनम्—गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम् । ईश्वरी सर्वभूतानां तामिहोपह्वयेश्रियम् ॥ ताम्बूलम्—ताम्बूलं च सकर्पूरं पूगनागदलैर्युतम् । गृहाण देवि देवेशि तत्वरूपे नमोऽस्तु ते ॥ दक्षिणा—हिरण्यगर्भगर्भस्थं हेमबीजं विभावसोः । अनन्तपुण्य-फलदमतः शान्तिं प्रयच्छ मे ॥ नीराजनम्—नीराजनं गहाण त्वं जगदानन्ददायिनि । जगत्तिमिरमार्तण्डमण्डले ते नमो

नमः ॥ पुष्पाञ्जलिः-शारदे लोकपालस्त्वमाश्रिताभीष्टदायिनि । पुष्पांजलिं गृहाणेमं मया भक्त्या समर्पितम् ॥ प्रदक्षिणा-
यानि कानि च पापानि ब्रह्महत्यासमानि च । तानि तानि प्रणश्यन्तु प्रदक्षिणपदे पदे ॥ अर्घ्यम्-कर - व्यापारव्याजेन
न्यायकारिच्छलेन च । कृषकान् वञ्चना बुद्धिर्मा मे देहि कदाचन ॥ अञ्जलिं बद्ध्वा नमस्कारम्-पाहि पाहि
जगद्वन्द्ये नमस्ते भक्तवत्सले । नमस्तुभ्यं नमस्तुभ्यं नमस्तुभ्यं नमो नमः ॥ प्रार्थना-शुक्लां ब्रह्मविचार - सारपरमामाद्यां
जगद्व्यापिनीम्, वीणापुस्तकधारिणीमभयदां जाड्यान्धकारापहा । हस्ते स्फाटिकमालिकां विदधतीं देवीं
सदा संस्तुतां वन्दे तां परमेश्वरीं भगवतीं बुद्धिप्रदां शारदाम् ॥ या कुन्देन्दु-तुषारहार-धवला या शुभ्रवस्त्रावृता, या वीणा
वरदण्डमण्डितकरा या श्वेतपद्मासना । या ब्रह्माच्युतशंकरप्रभृतिभिर्देवैः सदा वन्दिता, स मां पातु सरस्वती भगवती
निःशेषजाड्यापहा ॥ सरस्वति महादेवि ज्ञानमार्गप्रदर्शिनि । ज्ञानवन्तं कुरुष्व त्वमविलम्बेन सर्वतः ॥ इति सम्प्रार्थ्य पुष्पजलं
गृहीत्वा मूर्तिं स्पृशन् पूजाऽर्पणम्-अनेन मया कृतेन आवाहनादिषोडशोपचारपूजनेन भो सरस्वति त्वं प्रीयताम् । ततः
चन्दनाक्षताः परितो विकिरन् विसर्जयेत्-न्यूनातिरिक्तकर्माणि मया यानि कृतानि च । क्षमस्व तानि सर्वाणि हे देवि हे
सरस्वति ! ॥ ततः कुशखण्डजलान्यादाय-कायेन वाचा० कृत्वा ततः अञ्जलिं बध्वा-प्रमादात्०, ॐ चतुर्भिश्च०, ॐ
यस्य स्मृत्या च नामोक्त्या तपोयज्ञक्रियादिषु । न्यूनं सम्पूर्णतां याति सद्यो वन्दे तमच्युतम् ॥ अपराधसहस्राणि क्रियन्तेऽ
हर्निशं मया । दासोऽयमिति मां मत्वा क्षमस्व परमेश्वरि ॥ ॐ अच्युताय नमः ३ ॥ अनेन मया कृतेन पूजनेन सरस्वती
प्रियताम् ॥ तत कलशजलेन अभिषेकः—ॐ द्यौः शान्ति०, ॐ तच्चक्षु०, ॐ स्वस्तिनऽ० । ततः अबीरादिकं प्रसादं
धारयित्वा नैवेद्यं च भक्षयित्वा वीणावादनादि-अनेक-विधोत्सवैः तद्दिनं व्यतीत्य अपरदिने मूर्तिं सोत्सवं जले
प्रवाहयेत् ॥ इति सरस्वती-पूजा ॥

अथ कृताऽकृतं रतिकामदेवपूजनम् ॥ तत्रादौ यजमानः कृतनित्यक्रिय उपलिप्ते प्राङ्गणे दीपं प्रज्वाल्याऽऽचम्य मण्डलस्येशानभागे कलशमेकं स्थापयेत् । तत्र कलशस्थापनमन्त्राश्च ॥ ॐ भूरसीति भूमिशोधनम् ॥ ॐ धान्यमसीति धान्यं स्थापयेत् ॥ ॐ आजिघ्रेति कलशं स्थापयेत् ॥ ॐ वरुणस्योत्तंभनमसीति जलं प्रक्षिप्य ॥ ॐ या ओषधिरिति सर्वौषधिः । ॐ याः फलानीरिति पूगाफलम् ॥ ॐ ओषधय० इति यवान् ॥ ॐ हिरण्यगर्भेति हरिण्यम् ॥ पञ्चरत्नञ्च ॥ ॐ गन्धद्वारामिति गन्धम् ॥ ॐ काण्डात्काण्डादिति दूर्वां ॥ ॐ अम्बेऽअम्बिकेति आम्रपल्लवैस्तन्मुखमाच्छाद्य ॥ ॐ बृहस्पतेति वस्त्रेण वेष्टयित्वा ॥ तत्वायामीति वरुणमावाह्य पूजयेत् ॥ ततः कलशे गंगादींश्च ॥ सर्वे समुद्रा० इति मन्त्रेण आवाहयेत् ॥ ततः कलशाभिमन्त्रणम् ॥ कलशस्कन्धप्रदेशे—गणपत्यादिदेवान्, नवग्रहाँश्च स्वस्मन्त्रैरावहनपूर्वकं पूजयेत् ॥ तत्रैव संकल्पः ॥ ॐ अद्येत्यादि देशकालौ स्मृत्वा करिष्यमाण - रतिकाम - रागरागि - पूजनकर्मनिर्विघ्नपरिसमाप्त्यर्थं नवग्रह - गणपति - दुर्गावाग्वाकाशाश्विनिकुमारपूजनमहं करिष्ये ॥ ॐ गणानान्त्वेति गणपतिम् ॥ १ ॥ ॐ अम्बेऽअम्बिके० इति दुर्गाम् ॥ २ ॥ वायोयेते० इति

वा० २७

व. पू०

वायुम् ॥ ३ ॥ ॐ ऊर्द्धाऽअस्येति आकाशम् ॥ ४ ॥ ॐ अश्विनाभैषज्येनेति अश्विनिकुमारम् ॥ ततो नवग्रहानपि स्वस्वनामभिः पूजयेत् ॥ ॐ आकृष्णेनेति सूर्यम् । ॐ इमन्देवेति सोमम् ॥ ॐ अग्निमूर्द्धेति भौमम् ॥ ॐ उद्बुध्यस्वेति बुधम् । ॐ बृहस्पतेऽअतीति ॐ बृहस्पतिम् ॥ अन्नात्परिस्रुतमिति शुक्रम् ॥ ॐ शन्नोदेवीति शनिश्चरम् ॥ ॐ कयानश्चित्रेति राहुम् ॥ ॐ केतुं कृण्वन्नेति केतुम् । एतान्पूजयित्वा ॥ सानुनयं विसृज्य ॥ तस्य कलशस्य वामभागे - स्वपूर्वाभिमुख उत्तरपाठकायां श्वेतवस्त्रेऽष्टदलपद्मं विलिख्याऽनुक्रमेण इन्द्रादि - दिक्पालान्स्वस्वमंत्रेण पूजयेत् तन्मत्राश्च क्रमेण- पूर्वाष्टदलकोणादारभ्य पूर्वे—ॐ त्रातारमिन्द्रेति इन्द्रम् ॥ आग्नेये—ॐ अग्निन्दूतमित्यग्निम् । दक्षिणे ॐ यमायेति यमम् । नैर्ऋत्ये ॐ अशुन्वन्तमयजमानमिति निर्ऋतिम् ॥ पश्चिमे ॐ तत्वायामीति वरुणम् । वायव्ये—ॐ वायो यतेति वायुम्, उत्तरे—सोमोधेनुमिति सोमम् ॥ ईशाने—त्वं ॐ सोम व्रतेति ईशानम् ॥ ततोऽष्टदलमध्ये कामदेवरतिं पूजयेत् षोडशोपचारैः ॥ तत्पूजने तु अक्षतान् गृहीत्वा ॥ ॐ क्लीं ह्रीं काम इहागच्छ इह तिष्ठ ॥ ॐ ह्रीं रते इहागच्छेह तिष्ठ ॥ ॐ ह्रीं रतिकामाभ्यां नमः इति मन्त्रेण पा

प्रर्घ्यमाचनीयं चन्दनमक्षतान, पुष्प, धूपं, दीपं, नैवेद्यं धूप दक्षिणाम्, ताम्बूल, अबीरकं, सुगन्धि-द्रव्यं, नानाप्रकारम् वस्त्रञ्च समर्प्य ॥ तौ सानुनयं विसृज्य ॥ तत्रैव ब्राह्मणं पूजयेत् तञ्च विसृज्य ॥ वस्तुसंभारं ब्राह्मणाय निवेदयेत् ॥ एवं पूजां विधाय ॥ ततो ब्राह्मणमुखेन वसन्तरागं श्रुत्वा ॥ तं ब्राह्मणं वस्त्रादिभिः संतोष्य अथ—द्यौः शान्तिः, स्वस्तिनऽइन्द्रेत्यादिभिर्मन्त्रैः कलशस्थ-जलेनाऽऽम्रपल्लवेनाऽभिषिञ्चेत् ॥ ततः दक्षिणा—ॐ अद्येत्यादि रतिकामपूजनकर्मप्रतिष्ठा-सिद्ध्यर्थं दक्षिणां यद्द्रव्यं तद्दैवतं यथानामगोत्रायेत्यादि ॥

॥ इति वसन्तपंचमी पूजाविधिः समाप्तः ॥

* २८–अथ स्वस्थानीव्रतपूजाविधिः *

सा च कर्मणो यस्य यः कालस्तत्कालव्यापिनी तिथिरिति विष्णुधर्मोक्तेर्मध्याह्नव्यापिनी ग्राह्या। पूर्वाऽभिमुखो भूत्वाऽऽचम्य दीपं प्रज्वाल्य संकल्पं कुर्यात् ॐ अद्येहामुकगोत्राऽमुकनाम्नी अहं मम कायिक-वाचिक-मानसिक-पातक दूरीकरण, शत्रु-चौर-सिंह-सर्पादि-भयनिवारण' ब्रह्म राक्षस-बेताल-कूष्माण्ड-भूत-प्रेत-क्षेत्रपाल-शाकिन्यादिकीलन, मृत्युसन्निपात-राजयक्ष्म विषम ज्वर-ज्वरातिसारादि आदित्यादिदुर्ग्रह-दुर्योगिनी-दुःस्वप्नादि-पीडा-विवृत्ति, पुत्र मित्र-भृत्यगजाश्वक्षेत्रधनधान्यरत्नादि सम्पद्भोगान्तरं गन्धर्वाप्सरोगणसंगीतादि जातिमञ्जरी-मालादि शोभित-विमानारोहणपूर्वकं भगवतः श्रीमद्ज्योतिर्लिङ्गस्वरूपिणः सदाशिवस्य परमसायुज्यमुक्तिकामा श्रीस्वस्थानी देवताप्रीत्ये एभिर्यथामिलितोपचारैः तद्व्रतांगभूत-देवतायाश्च पूजनमहं करिष्ये॥ श्रीसूर्याय अर्घ्यम् - अद्य स्वस्थानीव्रतं कर्तुं तदङ्गत्वेन जगत्साक्षिणे श्रीसूर्याय एषोऽर्घ्यः समर्पयामि॥ वामे अर्घ्यस्थापनम्॥ दक्षिणे शङ्खस्थापनं च॥ नमोऽस्त्वनन्तायेति दीपं सम्पूज्य गणानात्वेति गणपतिं सम्पूज्य अथ कलश-पूजा॥ भूरसीति भूमिशोधनम्॥ धान्यमसीति धान्यम्॥ आजिघ्रकलशम् इति अव्रणं कलशं

संस्थाप्य वरुणस्योत्तम्भनमिति निर्मलतीर्थादि जलं प्रक्षिप्य याऽओषधीरिति सर्वौषधीः ॥ हिरण्यगर्भेति पञ्चरत्नानि ॥ याः फलिनीति फलम् ॥ ओषधयःसमिति यवान् ॥ गन्धद्वारामिति चन्दनम् ॥ काण्डात्काण्डादिति दुर्वाम् ॥ स्योनापृथिवीति पञ्चमृदः ॥ अश्वत्थेवेति पञ्चपल्लवैस्तन्मुखमाच्छाद्य बृहस्पतेति वस्त्रयुग्मेन कलशं संवेष्ट्य तत्त्वायामीति वरुणमावाह्य पूजयेत् ॥ ततः कलशे गङ्गादींश्च ॥ सर्वे समुद्राः सरितस्तीर्थानि जलदा नदाः ॥ आयान्तु यजमानस्य दुरितक्षयकारकाः ॥ इति मंत्रेणावाहयेत् ॥ ततः कलशाभिमन्त्राम् ॥ कलशस्य मुखे विष्णुः कण्ठे रुद्रः समाश्रितः ॥ मूले त्वस्य स्थितो ब्रह्मा मध्ये मातृगणाः स्मृताः ॥ कुक्षौ तु सागराः सर्वे सप्तद्वीपा वसुन्धरा । ततः ऋग्वेदोऽथ यजुर्वेदः सामवेदो ह्यथर्वणः ॥ अङ्गैश्च सहिताः सर्वे कलशन्तु समाश्रिताः ॥ कलशे देवद्वारपूजा ॥ ॐ गणपतये नमः । ॐ गुरुभ्यो नमः ॥ ॐ क्षेत्रपालाय नमः ॥ ॐ नन्दिने नमः ॥ ॐ महाकालाय नमः ॥ ॐ भृङ्गिणे नमः ॥ ॐ विनायकाय नमः ॥ ॐ स्कन्दाय नमः ॥ ॐ चण्डाय नमः ॥ ॐ देव्यै नमः ॥ इति मन्त्रैः पाद्यादीनि समर्पयेत् ॥ ततः कुन्दशाखाभिः कलशमुखमाच्छाद्य पूजयेत् ॥ इति शिष्टाः ॥ ॐ ब्रह्मणे नमः ॥ ॐ विष्णवे नमः ॥ ॐ महेश्वराय नमः ॥

ॐ गङ्गायै नमः ॥ ॐ यमुनायै नमः ॥ ॐ सरस्वत्यै नमः ॥ ॐ गण्डक्यै नमः ॥ ॐ जाह्नव्यै नमः ॥ ॐ नर्मदायै नमः ॥ ॐ सप्तसागरेभ्यो नमः । ॐ मार्कण्डेयादिसप्तर्षिभ्यो नमः ॥ ॐ आदित्यादि नवग्रहेभ्यो नमः ॥ ॐ अश्वत्थामाद्यष्टचिरंजीविभ्यो नमः ॥ ॐ अश्विन्यादि सप्तविंशतिनक्षत्रेभ्यो नमः ॥ विष्कुम्भादि सप्तविंशतियोगेभ्यो नमः ॥ मेषादिद्वादश-राशिभ्यो नमः । मृत्युञ्जयाय माहेश्वरीसहिताय नमः ॥ सम्पूर्णकलशाय नमः ॥ इति मन्त्रैः पाद्यादीनि श्वेतसूत्रं श्वेतपुष्पं समर्पयेत् ॥ ततो गणेशपूजा ॥ ॐ गणपतये नमः ॥ ॐ विश्वेश्वराय नमः ॥ ॐ एकदन्ताय नमः ॥ मूषकवाहनाय नमः ॥ ॐलम्बोदराय नमः ॥ ॐगजवक्त्राय नमः ॥ ॐपृथुहस्ताय नमः ॥ॐसिद्धिविनायकाय नमः ॥ पार्वतीनन्दनाय नमः ॥ मनोरथदायिने नमः ॥ इति मन्त्रैः रक्तसूत्रं रक्तपुष्पं च समर्पयेत् ॥ ततो गोग्रासपूजा—ॐ नन्दायै नमः ॥ ॐ सुभद्रायै नमः ॥ ॐ सुमनसे नमः ॥ ॐ सुशीलाय नमः ॥ ॐ सुभगायै नमः ॥ पंचगोमातृभ्यो नमः ॥ इति मन्त्रैः कपिलसूत्रं कपिलपुष्पं च समर्पयेत् ॥ ततः कौमारीपूजा ॥ ॐ ब्रह्माण्यै नमः ॥ ॐ माहेश्वर्यै नमः ॥ ॐ कौमार्यै नमः ॥ ॐ वैष्णव्यै नमः ॥ ॐ वाराह्यै नमः ॥ ॐ इन्द्राण्यै नमः ॥ ॐ चामुण्डायै नमः ॥ ॐ महालक्ष्म्यै नमः ॥ ॐ

शक्तिहस्तायै नमः ॥ ॐ मयूराशनायै नमः ॥ ॐ रक्तलोचनायै नमः ॥ ॐ पराशक्त्यै नमः ॥ ॐ
कुमारीमूर्त्यै नमः ॥ इति मंत्रैः पाद्यादीनि रक्तसूत्रं रक्तपुष्पं च समर्पयेत् ॥ मोहिनीपूजा ॥ ॐ सर्व-
जनमोहिन्यै नमः ॥ ॐ जगन्मोहिन्यै नमः ॥ ॐ सर्वमोहिन्यै नमः ॥ इति मंत्रैः पाद्यादीनि पीत-
सूत्रं पीतपुष्पं च समर्पयेत् ॥ ततोऽष्टचिरञ्जीविपूजा ॥ ॐ अश्वत्थाम्ने नमः ॥ ॐ बलये नमः ॥ ॐ
हनुमते नमः ॥ ॐ विभीषणाय नमः ॥ ॐ कृपाचार्याय नमः ॥ ॐ परशुरामाय नमः ॥ ॐ
मार्कण्डेयाय नमः ॥ ॐ उमापतये नमः ॥ इति मन्त्रैः ॥ पाद्यादीनि श्वेतसूत्रं श्वेतपुष्पं च समर्पयेत् ॥
ततः पंचबलिपूजा ॥ जलार्द्रत्रिपिष्टान्नेन पंचबलिं निर्माय सिंदूरमस्तकं कृत्वा पूजयेदिति शिष्टाः ॥
ॐ गणपतये नमः ॥ ॐ वटुकाय नमः ॥ ॐ योगिनीभ्यो नमः ॥ ॐ क्षेत्रपालाय नमः ॥ ॐ एत-
त्स्थानाधिपतये नमः ॥ ॐ असिताङ्गाद्यष्टभैरवेभ्यो नमः ॥ वृकोदरक्षेत्रपालाय नमः ॥ ॐ
रक्तकेशक्षेत्रपालाय नमः ॥ ॐ लम्बोदर क्षेत्रपालाय नमः ॥ ॐ सर्वक्षेत्रपालेभ्यो नमः ॥ ॐ सर्व-
पिशाचेभ्यो नमः ॥ ॐ सर्वभूतेभ्यो नमः ॥ इति मन्त्रैः पाद्यादीनि कृष्णसूत्रं कृष्णपुष्पं च समर्पयेत् ॥
ततः सूर्यादिपूजा ॥ ॐ सूर्याय नमः ॥ ॐ सदाशिवाय नमः ॥ ॐ गृहलक्ष्म्यै नमः ॥ ॐ इष्ट-

देवतायै नमः ॥ ॐ नागेभ्यो नमः ॥ इति मंत्रैः पाद्यादीनि पंचवर्णसूत्रं पंचवर्णपुष्पं च समर्पयेत् ॥ ततो देवाग्रे सनकादिपूजा ॥ ॐ सनकादिसर्वेभ्यः ऋषिभ्यो नमः ॥ ॐ ऋषिपुत्रेभ्यो नमः ॥ इति मंत्रैः पाद्यादीनि श्वेतसूत्रं श्वेतपुष्पं च समर्पयेत् ॥ ततो देवाग्रे गोमयोद्भवब्राह्मणो वृद्धब्राह्मणं पूजयेत् ॥ ॐ दिव्यरूपायै नमः ॥ ॐ दिव्याम्बरायै नमः ॥ ॐ देवभक्तिन्यै नमः ॥ ॐ सुभूषायै नमः ॥ ॐ जटालायै नमः ॥ ॐ बधिरायै नमः ॥ ॐ अदितिकुब्जायै नमः ॥ ॐ अदितिदीर्घायै नमः ॥ इति मन्त्रैः पाद्यादीनि श्वेतसूत्रं श्वेतपुष्पं च समर्पयेत् ॥ पुनस्तत्रैव नवराजपूजा ॥ ॐ नवराजाय नमः ॥ ॐ मातृवत्सलाय नमः ॥ ॐ सुजनप्रियाय नमः ॥ ॐ सुचरित्राय नमः ॥ ॐ सुमतये नमः ॥ ॐ प्रियंवदाय नमः ॥ इति मन्त्रैः पाद्यादीति श्वेतपुष्पं च समर्पयेत् ॥ ततः पापिनीपूजा ॥ कृतदोलारोहणीं पापिनीं कुण्डे निमज्य पूजयेदिति शिष्टाचारः ॥ नवराजपत्न्यै नमः ॥ पापमूर्त्यै नमः ॥ कुशीलायै नमः ॥ कभाषिण्यै नमः ॥ धर्मद्वेषिण्यै नमः ॥ इति मन्त्रैः पाद्यादीनि कृष्णपुष्पं च समर्पयेत् ॥ ततो देवाग्रे अप्सरसम् पूजा ॥ ॐ उर्वश्यै नमः ॥ ॐ मेनकायै नमः ॥ ॐ रम्भायै नमः ॥ ॐ चन्द्रलेखायै नमः ॥ ॐ तिलोत्तमायै नमः ॥ ॐ वपुष्मत्यै नमः ॥ ॐ कान्तिमत्यै नमः ॥ ॐ लीलावत्यै नमः ॥

ॐ उत्पलशत्यै नमः ॥ ॐ घृताच्यै नमः ॥ ॐ चन्द्रवदनायै नमः ॥ ॐ धर्मसत्यै नमः ॥ ॐ चकोराक्ष्यै
नमः ॥ इति मन्त्रैः ॥ पाद्यादीनि पीतसूत्रम् पीतपुष्पाँश्च समर्पयेत् ॥ ततो भास्वाहपूजा ॥ ॐ धर्म-
शीलाय नमः ॥ ॐ धर्मकरणे नमः ॥ ॐ धर्मपतये नमः ॥ ॐ धर्मराजाय नमः ॥ इति श्वेतसूत्रं श्वेतपुष्पं
च समर्पयेत् ॥ ततः नागनदीपूजा ॥ सप्तसमुद्रेभ्यो नमः ॥ अष्टनागराजराजेभ्यो नमः ॥ नदीभ्यो
नमः ॥ इति मन्त्रैः पाद्यादीनि हरितसूत्रं हरितपुष्पं च समर्पयेत ॥ ततो चिरञ्जीविपूजा ॥ ॐ अश्वत्थाम्ने
नमः ॥ ॐ बलये नमः ॥ ॐ व्यासाय नमः ॥ ॐ हनुमते नमः ॥ ॐ विभीषणाय नमः ॥ ॐ कृपाचार्याय
नमः ॥ ॐ परशुरामाय नमः ॥ ॐ मार्कण्डेयाय नमः ॥ ॐ प्रजापतये नमः ॥ इति मन्त्रैः ॥ श्व सूत्रं
श्वतपुष्पं च समर्पयेत ॥ ॐ अश्वत्थामादयश्चिरञ्जीविनः सुप्रतिष्ठिता सुप्रसन्नावरदा भवन्तु इति मन्त्रेण
लाजान् क्षिपेत ॥ ततः सिन्दूरभाण्डे पूजा । ॐपार्वत्यै नमः ॥ ॐ गौर्यैनमः ॥ॐसौभाग्यवृद्धिकर्त्र्यै नमः ॥
इति रक्तसूत्रं रक्तपुष्पं च समर्पयेत ॥ ॐ शिवपूजा ॥ महेश्वराय नमः॥ ॐ ईश्वराय नमः ॥ ॐसदाशिवाय
नमः ॥ इति श्वेतसूत्रं श्वेतपुष्पञ्च समर्पयेत ॥ अथ मूलदेवतापूजा ॥ ध्यानम्-मन्दारमाला कुलि-
तालकायै कपालमालाकृतशेखराय ॥ दिव्याम्बरायै च दिगम्बराय ॥ नमः शिवायै च नमः शिवाय ॥

सहस्रशीर्षेत्यावाहनम् ॥ पुरुषऽएवेत्यासनम् ॥ ॐ आधारशक्तये नमः ॥ अनन्ताय नमः ॥ ॐ स्कन्दाय
नमः ॥ ॐनारायणाय नमः ॥ ॐ पद्माय नमः ॥ ॐ पत्रेभ्यो नमः ॥ ॐ कर्णिकायै नमः ॥ ॐ केशरेभ्यो
नमः ॥ ॐ वृषाय नमः ॥ ॐ सिंहाय नमः ॥ इति मन्त्रैः पाद्यादीन समर्पयेत् ॥ एतावानस्येति पाद्यम् ॥
त्रिपादूर्ध्वेत्यर्घ्यम् ॥ ततो विराडित्याचमनम् ॥ पयःपृथिव्यां, दधिकाब्णो, घृतमिमिक्षे, मधुव्वाता,
अग्नाऽरस इति मन्त्रैः दुग्ध-दधि-घृत-मधु-शर्कराभिः संस्नाप्य आपोऽअस्मानिति शुद्धोदकस्नानम् ॥
प्रकृतिपुरुषस्वरूपाभ्यां शक्तिशिवाभ्यामिदं मधुपर्कं समर्पयामीती मधुपर्कम् ॥ बृहस्पते इति वस्त्रं ॥
तस्माद्यज्ञात्सर्वहुतः संभृतमिति रक्तसूत्रं श्वेतसूत्रञ्च ॥ तस्मादश्वा इति यज्ञोपवीतम् ॥ देवीर्द्वारेति
सिन्दूरं देवीद्वाराय नमः ॥ शिवाय इति मन्त्राभ्यामादर्श-चामर-व्यजनानि । तं यज्ञमिति चन्दनम् ॥
अक्षन्नमीत्यक्षताः ॥ यत्पुरुषमिति पुष्पाणि ॥ ततः पुष्पम् ॥ कालोचितं यथापुष्पम् पञ्चवर्णैः
सुगन्धिभिः ॥ विचित्रग्रथितां मालां गृह्यताम्परमेश्वरौ ॥ ततो बिल्वपत्रम् ॥ पद्मानाञ्च सहस्रस्य
सम्यग्दत्तस्य यत्फलम् ॥ तत्फलं लभते पत्रं दत्त्वा बिल्वस्य शोभनम् ॥ धत्तूरम् ॥ एकधत्तूरपुष्पेण
योऽर्चयेत्स सदाशिवम् ॥ सर्वपापनिर्मुक्तः शिवलोके महीयते ॥ दूर्वा ॥ दूर्वाकुराँस्तु यः शम्भोः

पूजाकाले प्रयच्छति ॥ पूजाफलं शतगुणं सदा प्राप्नोति मानवः ॥ कमलम् ॥ नमः शंभवाय इति
मन्त्रेण नीलकमलम् ॥ देवीर्द्वा रेति मन्त्रेण जातिपुष्पम् ॥ नमः शंभवायेति मन्त्रेण च दमनपुष्पम् ॥
वा० कन्दर्पभस्मसंजातं पवित्रं दमनं शुभम् ॥ गृह्यतां श्रीमहेशानौ ॥ भक्त्या दत्तं मया शिवौ ॥ सहस्रं स्व.पु०
२८९ सूत्रत् ॥ कार्पासनिर्मितं सूत्रं पवित्रं सुमनोहरम् ॥ सर्वपापं विनाशाय शिवेशाभ्यां नमो नमः ॥
नमस्ते देवदेवश सुरासुर-नमस्कृत ॥ नमस्ते जगतां माताः पार्वतीवरदायिनी ॥ इति मन्त्रेणाष्टवारं
सदूर्वाङ्कुरकुन्दपुष्पं-पार्वतीशंकराभ्यां नमः ॥ शंभवे गिरिजासहिताय नमः ॥ महेश्वराय उमा-
सहिताय नमः ॥ ॐ महादेवाय गौरीसहिताय नमः । ॐ स्थाणवे विशालाक्षीसहिताय नमः ॥ ॐ
शिवाय श्रीमुखीसहिताय नमः । पशुपतये नारायणी-सहिताय नमः ॥ उग्राय माधवीसहिताय नमः ॥
ॐ शुभसत्त्वाय श्रीसहिताय नमः । ईश्वराय मङ्गलसहिताय नमः ॥ रुद्रायाम्बिकासहिताय नमः ॥
वृषध्वजाय महिषसहिताय नमः ॥ ॐ पार्वत्यै नमः ॥ ॐ शर्वाण्यै नमः ॥ ॐ अम्बिकायै नमः ॥ सर्व-
२५ भूतदमन्यै नमः ॥ स्वस्थानीपमेश्वर्यै नमः ॥ इति मन्त्रैः पाद्यादीनि समर्पयेत् ॥ ब्राह्मणोस्यति
धूपम् ॥ चन्द्रमामनस इति दीपम् ॥ नाभ्याऽआसीदिति नैवेद्यम् ॥ पुनराचनं ताम्बूलादिद्रव्यं च

निवेदयेत् ॥ हिरण्यगर्भ इति द्रव्यम् ॥ यानि कानि च पापानि जन्मान्तरकृतानि च ॥ तानि तानि प्रणश्यन्ति प्रदक्षिण-पदे-पदे ॥ इति प्रदक्षिणा ॥ अग्निर्देवतेति नीराजनम् ॥ अथ कर्पूरम् ॥ सूर्येन्दुतारका-वह्नितेजः-पुञ्जविराजितम् ॥ कर्पूरदीपं देवेश गृहाण परमेश्वर ॥ अथ पुष्पाञ्जलिः ॥ नमोऽस्तु ते उमादेवी स्वास्थानी परमेश्वरी ॥ त्रैलोक्य-जननी नित्या सत्त्वानां पापहारिणी ॥ त्रिपुरघ्नं महादेव भक्तवत्सल विश्वकृत् ॥ नमस्करोमि देवेश ब्रह्ममाधववन्दितः ॥ इति नमस्कारः अन्यथा शरणं नास्ति युवां वै शरणं मम ॥ तस्मात्कारुण्यभावेन रक्षतां परमेश्वरौ ॥ विसर्जनम् आवाहनं न जानामीति० ॥ पुनः सूर्य्यायार्घ्यः ॥ स्वस्थानीव्रतस्य संपूर्णफलप्राप्तये जगत्साक्षिणे श्रीसूर्य्याय इदमर्घ्यं समर्पयामि नमः ॥ अथ दक्षिणासंकल्पः ॥ अद्येह अनेकजन्म-कृतपापक्षयार्थं सांवत्सरिक-स्वस्थानी-व्रतपूजा-साङ्गतासिद्ध्यर्थमिमां दक्षिणां ताम्रखण्डं श्रीसूर्यदैवतं यथानाम-गोत्रायेत्यादि ॥

॥ इति पद्मपुराणोक्तः माघशुक्लपौर्णमास्यां स्वस्थानी-व्रतपूजाविधिः समाप्तः ॥

—:❀:—

* २९—अथ शिवरात्रि-पूजाविधिः *

फाल्गुनस्याऽसिते पक्षे कृष्णा चैव चतुर्दशी ॥ निशार्धव्यापिनी ग्राह्या हत्याकोटि-विनाशिनी ॥ इति शिवमहापुराणे ज्ञानसंहितायाम् ॥ अथ संकल्पः ॥ ॐ तत्सत् ३ ॐ तिष्णु-र्विष्णुर्विष्णुः श्रीमद्भगतोमहापुरुषस्य श्रीविष्णोराज्ञया प्रवर्तमानस्य अद्य ब्रह्मणो द्वितीय-परार्द्धे श्रीश्वेतवाराहकल्पे वैवस्वतमन्वन्तरे अष्टाविंशतितमे कलिप्रथमचरणे बौद्धावतारे जम्बुद्वीपे भारतवर्षे भरतखण्डे श्रीगंगादेव्या उत्तरे अमुकदेशे अमुकनाम-संवत्सरे अमुकायने अमुकऋतौ चन्द्रतः सूर्यतो वा माघ मासे वा फाल्गुने मासे कृष्णे पक्षे चतुर्दश्यां पुण्यतिथौ अमुकराशिस्थिते चन्द्रे अमुकराशिस्थिते सूर्ये अमुकराशिस्थिते बृहस्पतौ शेषेषु ग्रहेषु यथाय-थास्थानस्थितेषु सत्सु एवं ग्रहगणविशेषेण विशिष्टायां शुभपुण्यतिथौ ममात्मनः श्रुतिस्मृति पुराणोक्त - फलप्राप्त्यर्थं मम ऐश्वर्याभिवृद्ध्यर्थं अप्राप्तलक्ष्मी - प्राप्त्यर्थं प्राप्तलक्ष्म्या-श्चिरकालसंरक्षणार्थं सकल - मन - ईप्सित - कामनासिद्ध्यर्थं मम पापक्षय - मोक्षभोग-प्राप्त्यर्थं दीप - कलश - गणेश - पूजनपूर्वकमद्य शिवरात्रौ गौरीसहित - सदाशिव - पूजन

मद्दं करिष्ये इति संकल्प्य तत्रादौ दीपपूजा—ॐ नमोस्त्वनन्ताय सहस्रमूर्तये सहस्रपादाक्षि-शिरोरुबाहवे ॥ सहस्रनाम्ने पुरुषाय शाश्वते सहस्रकोटि - युगधारिणे नमः ॥ दीपाय नमः, पाद्यम्, अर्घ्यम्, आचमनीयं, स्नानीयम्, इदमनुलेपनं, रक्तचन्दनं, अक्षतान्, पुष्पं समर्पयामि दीपनारायणाय नमः ॥ दक्षिणां समर्पयामि भो दीप पूजितोऽसि क्षमस्व ।

अथ कलशपूजा—भूरसीति भूमिं शोधयेत् ॥ ॐ धान्यमसीति धान्यं स्थापयेत् ॥ ॐ आजिघ्रकलशमिति धान्योपरि अब्रणं कलशं स्थापयेत् । ॐ वरुणस्योत्तम्भनमिति तीर्थादिकजल कलशे प्रक्षिपेत् । ॐ याऽओषधीरिति सर्वौषधीः ॥ ॐ हिरण्यगर्भ इति पञ्चरत्नानि ॐ याः फलिनीरिति पूगीफलादीनि । ॐ ओषधय इति यवान् । ॐ गन्धद्वारामिति गन्धम् । ॐ काण्डात्काण्डादिति दूर्वा ॥ ॐ स्योनापृथिवीति सप्तमृदः । ॐ अश्वत्थेव इति पञ्चपल्लवै-स्तन्मुखमाच्छाद्य । ॐ बृहस्पतेति वस्त्रयुग्मेन कलशं वेष्टयेत् ॥ अम्बेऽअम्बिक इति आम्रपल्ल-वैस्तन्मुखमाच्छाद्य । ॐ तत्त्वायामीति कलशे वरुणमावाह्य पूजयेत् । ततः कलशे गङ्गादितीर्था-न्यावाह्य पूजयेत् । ॐ सर्वे समुद्राः सरितस्तीर्थानि जलदा नदाः । आयान्तु यजमानस्य

दुरितक्षयकारकाः। ततः कलशं स्पृश्याऽभिमन्त्रयेत् । ॐ कलशस्य मुखे विष्णुः कण्ठे रुद्रः समाश्रितः। मूले त्वस्य स्थितो ब्रह्मा मध्ये मातृगणाः स्मृताः॥ कुक्षौ तु सागराः सप्त सप्तद्वीपा वसुन्धरा। ऋग्वेदोऽथ यजुर्वेदः समावेदोऽप्यथर्वणः। अङ्गैश्च सहिताः सर्वे कलशन्तु समाश्रिताः। ततः कलशप्रार्थना—ॐ देवदानवसंवादे मथ्यमाने महोदधौ। उत्पन्नोऽसि तदा कुम्भ विधृतो विष्णुना स्वयम्॥ त्वत्तोये सर्वतीर्थानि देवाः सर्वे त्वयि स्थिताः। त्वयि तिष्ठन्ति भूतानि त्वयि प्राणाः प्रतिष्ठताः। शिवः स्वयं त्वमेवाऽसि विष्णुस्त्वं च प्रजापतिः। आदित्या वसवो रुद्रा विश्वेदेवाः सपैतृकाः। त्वयि तिष्ठन्तिः सर्वेऽति यतः कामफल प्रदाः॥ त्वत्प्रसादादिमं यज्ञं कर्तुमीहे जलोद्भव॥ सान्निध्यं कुरु देवेश प्रसन्नो भव सर्वदा। इति कलशं सम्पूज्य॥ अथ गणेशपूजा॥ ॐ भूर्भुवःस्वः गणानान्त्वेति आवाहनादि षोडशोपचारैः पूजयेत्—ॐ वक्रतुण्ड महाकाय कोटिसूर्यसमप्रभा। अविघ्नं गुरु मे देव सर्वकार्येषु सर्वदा : ॐ श्रीसिद्धि - बुद्धिसहिताय महागणाधिपतये नमः। ताम्रपात्रेऽष्टदलं लिखित्वा पूर्वादिक्रमेण पूर्वदले—ॐ इन्द्र, इहागच्छेति इन्द्रं पूजयामि। आग्नेये—ॐ अग्ने,

इहागच्छेत अग्निं पूजयामि। दक्षिणे—ॐ यम, इहागच्छेति यमं पूजयामि। नैर्ऋत्ये-ॐ निर्ऋते, इहागच्छेति निर्ऋतिं पूजयामि। पश्चिमे—ॐ वरुण इहागच्छेति वरुणं पूजयामि। वायव्ये—वायो, इहागच्छेति वायुं पूजयामि। उत्तरे—ॐ धनद, इहागच्छति धनदं पूजयामि। ईशाने—ॐ रुद्र, इहागच्छेति रुद्रं पूजयानि। मध्ये—ॐ ब्रह्मन्. इहागच्छेति ब्रह्माणं पूजयामि॥ निर्ऋतिवरुणयोर्मध्ये—ॐ अनन्त, इहागच्छेति अनन्तं पूजयामि। तत्स्थालीमध्ये सुवर्णमयीं वा रौप्यमयीं पार्थिवीं मूर्तिं संस्थाप्य ध्यायेत्—ध्यायेन्नित्यं महेशं रजतगिरिनिभं चारुचन्द्रावतंसं रत्नाकल्पोज्ज्वलाङ्गं परशुमृगमदाभीतिहस्तं प्रसन्नम्। पद्मासीनं समन्तात् स्तुतममरगणैर्व्याघ्रकृत्तिं वसानम्, विश्वाद्यं विश्ववन्द्यं निखिलभयहरं पञ्चवक्त्रं त्रिनेत्रम्॥ ॐ नमस्ते रुद्र०॥ ॐ आगच्छ देवदेवेश मर्त्यलोकहितेच्छया। पूजयामि विधानेन प्रसन्नः सुमुखो भव। ॐ सहस्रशीर्षेत्यावाहनम्। ॐ पादासनं कुरु प्राज्ञ निर्मलं स्वर्णनिर्मितम्॥ भूषितं विविधैः रत्नैः कुरु त्वं पादुकासनम्॥ ॐ पुरुषऽएवेदमित्याऽऽसनम्। ॐ गङ्गादि - सर्वतीर्थेभ्यो मया प्रार्थनया हृतम्। तोयमेतत्सुखस्पर्शं पाद्यार्थं प्रतिगृह्यताम्।

ॐ एतावानस्येति पाद्यम् । ॐ गन्धोदकेन पुष्पेण चन्दनेन सुगन्धिना । अर्घ्यं गृहाण देवेश भक्तिं मय्यचलां कुरु । ॐ त्रिपादूर्ध्व इत्यर्घ्यम् । ॐ कर्पूरशीरसुरभि - शीतलं निर्मलं जलम् । गंगायास्तु समानीतं गृहाणाचमनीयकम् । ॐ ततोविराडित्याचमनीयम् । ॐ मन्दाकिन्याः समानीतं हेमांभोरुहवासितम् । स्नानाय ते मया भक्त्या नीरं स्वीकीयतां विभो । ॐ तस्माद्यज्ञात्सर्वहुतः स्नानम्, ॐ मधुपर्कं महादेव ब्रह्माद्यैः परिकल्पितम् । मया निवेदितं भक्त्या गृहाण परमेश्वर ॥ इति मधुपर्कम्, ॐ आपोऽअस्मान्मातरेति पुनराचमनीयम् । पयःस्नानम्—ॐ कामधेनुसमुद्भूतं सर्वेषां जीवनं परम् ॥ पावनं यज्ञहेतुश्च पयःस्नानार्थमर्पितम् । ॐ पयः पृथिव्याम्पयऽओषधीषु पयोदिव्यन्तरिक्षे पयोधाः पयस्वतीः प्रदिशः सन्तु मह्यम् । पयःस्नानान्ते शुद्धोदकस्नानम् । ॐ पयसस्तु समुद्भूतं मधुराम्लं शशिप्रभम् । दध्यानीतं मया देव स्नानाय प्रतिगृह्यताम् । ॐ दधिक्राव्णोऽअकारिषञ्जिष्णोरश्वस्य वाजिनः ॥ सुरभिनो मुखाकरत्प्रणऽआयूꣳषितारिषत् ॥ दधिस्नानान्ते शुद्धोदकस्नानम् । ॐ नवनीतसमुत्पन्नं सर्वसन्तोषकारकम् । घृतं तुभ्यं प्रदास्यामि स्नानार्थं प्रतिगृह्यताम् ॥

ॐ घृतम्मिमिक्षे घृतमस्ययोनिर्घृते श्रितो घृतम्वस्य धाम ॥ अनुष्वधमावहमादयस्व स्वाहा घृतं व्वृष-
भव्वक्षिहव्यम्। घृतस्नानान्ते शुद्धोदकस्नानम्। मधुना—ॐ तरुपुष्पसमुद्भूतं सुस्वादु मधुरं मधु।
तेजः पुष्टिकरं दिव्यं स्नानार्थं प्रतिगृह्यताम्। ॐ मधुव्वाताऽऋतायते मधुक्षरन्ति सिन्धवः।
माद्ध्वीर्नः सन्त्वोषधीः, ॐ मधुनक्तमुतोषसोमधुमत्पार्थिवꣳ रजः। मधुद्यौरस्तु नः पिता। मधु-
मान्नोवनस्पतिर्म्मधुमाँऽअस्तुसूर्य्यः माध्वीर्गावो भवन्तु नः। मधुस्नानान्ते शुद्धोदकस्नानम्।
शर्करया—ॐ इक्षुसारसमुद्भूता शर्करा पुष्टिकारिका। मलापहारिका दिव्या स्नानार्थं प्रति-
गृह्यताम्। ॐ अपाꣳरसमुद्द्वयसꣳ सूर्य्येसन्तꣳ समाहितम् ॥ अपाꣳरसस्य योरसस्तम्बो
गृह्णाम्युत्तममुपयामगृहीतोसीन्द्रायत्वा जुष्टं गृह्णाम्येषते योनिरिन्द्रायत्वा जुष्टतमम् ॥
शर्करास्नानान्ते शुद्धोदकस्नानम् ॥ अथ गन्धोदकस्नानम्। ॐ मलयाचलसंभूतं चन्दनागरु-
मिश्रितम्। चन्दनं देवदेवेश स्नानार्थं प्रतिगृह्यताम्। ॐ गन्धद्वारां दुराधर्षां नित्यपुष्टां
करीषिणीम्। ईश्वरीं सर्वभूतानां तामिहोपह्वयेश्रियम्। अथ उद्वर्त्तनम् ॥ ॐ नाना-
सुगन्धिद्रव्यं च चन्दनं रजनीयुतम्। उद्वर्त्तनं मया दत्तं स्नानार्थं प्रतिगृह्यताम् ॥ अथ

शुद्धोदकेन स्नानम् । ततो दुग्धेन—शिवोपरि शतरुद्रीयमन्त्रेणाऽथर्वशीर्षेण वा शिवमन्त्रेण वा स्नानं समर्पयेत् । अथ वस्त्रम् । ॐ वस्त्रं सूक्ष्मं दुकूलं च देवानामपि दुर्लभम् । गृहाण त्वमुमाकान्त प्रसन्नो भव सर्वदा । ॐ तस्माद्यज्ञात्सर्वहुतऽऋचः सा० ॥ अथ यज्ञोपवीतम् । ॐ यज्ञोपवीतं सहजं ब्रह्मणा निर्मितं पुरा । आयुष्ये भव वर्चस्वमुपवीतं गृहाण मे । ॐ तस्मादश्वाऽअ० ॥ अथाऽलङ्करणम् ॥ ॐ दिव्यरत्नसमायुक्ता वह्निभानुसमप्रभाः ॥ गात्राणि शोभयिष्यन्ति अलङ्कारास्सुरेश्वर ॥ अथ चन्दनम् ॥ ॐ श्रीखण्डचन्दनं दिव्यं गन्धाढ्यं सुमनोहरम् । विलेपनं सुरश्रेष्ठ गृहाण परमेश्वर ॥ तं यज्ञं व० ॥ अथाऽक्षताः । ॐ श्वेता कुंकुमसंयुक्ता ऊत्तमाश्शालितण्डुलाः । मया निवेदिता भक्त्या गृहाण परमेश्वर ॥ ॐ अक्षन्नमीमदन्तह्यवप्रियाऽअधूषत । अस्तोषत स्वभानवो विप्रानविष्टया मती योजान्विन्द्रते हरी ॥ पुष्पाणि—ॐ माल्यादीनि सुगन्धीनि मालत्यादीनि वै प्रभो । मयाऽऽनीतानि पुष्पाणि गृहाण परमेश्वर । ॐ यत्पुरुषं० ॥ अथ बिल्वपत्रम् । ॐ त्रिपत्रं त्रिगुणाकारं त्रिनेत्रं च शिवप्रियम् । त्रिजन्मोत्थं हरेत्पापं बिल्वपत्रं शिवार्पणम् । अथ धूपम् ।

ॐ वनस्पतिरसो दिव्यो गन्धाढ्यो गन्ध उत्तमः। आघ्रेयः सर्वदेवानां धूपोऽयं प्रतिगृह्यताम्। ॐ ब्राह्मणोस्य० ॥ अथ दीपम् ॥ आज्यं च वर्तिसंयुक्तं वह्निना योजितं मया। दीपं गृहाण देवेश त्रैलोक्यतिमिरापहम् ॥ ॐ चन्द्रमामनसो० ॥ नैवेद्यम्। ॐ अन्नं चतुर्विधं स्वादुरसैः षड्भिः समन्वितम्। भूतानां जीवनञ्चैव नैवेद्यं प्रतिगृह्यताम्। ॐ नाभ्याऽआ० ॥ ॐ अमृतैरर्चितं दिव्यं नानारूपं विनिर्मितम्॥ पिष्टकम् विविधं देव गृहाण मम भावतः ॥ मोदकं स्वादु संयुक्तं शर्करादिविमिश्रितम्। सुरम्यं भोजनं दिव्यं मया दत्तं च गृह्यताम्। अथ जलम्—ॐ जलं च शीतलं स्वच्छं सुगंधिं सुमनोहरम्। मया निवेदितं भक्त्या गृहाण परमेश्वर ॥ अथ करोद्वर्तनम्। ॐ गंधकर्पूरसंयुक्तं कस्तूर्यादिविमिश्रितम। करोद्वर्तनकं दिव्यं गृहाण जगदीश्वर ॥ ताम्बूलम्—ॐ पुङ्गीफलं महद्दिव्यं नागवल्लीदलैर्युतम्। एलाचूर्णादिसंयुक्तं ताम्बूलं प्रतिगृह्यताम्। ॐ यत्पुरुषेण० ॥ ॐ इदं फलं मया देव स्थापितं पुरतस्तव। तेन मे सफलावाप्तिर्भवेज्जन्मनि जन्मनि। ॐ याः फलिनीर्याऽअफलाऽअपुष्पा याश्च पुष्पिणीः ॥ बृहस्पतिप्रसूतास्तानो मुञ्चन्त्वꣳ हसः। अथ द्रव्यम्। ॐ हिरण्यगर्भगर्भस्थं हेमबीजं विभावसोः। अनंतपुण्यफलदमतश्शान्तिं प्रयच्छ मे। ॐ हिरण्यगर्भः

समवर्तताग्रे भूतस्य जातः पतिरेकऽआसीत् ॥ स दाधारपृथिवीं द्यामुते मां कस्मै देवाय हविषा विधेम ॥ अथ पुष्पमाला । ॐ नानासुगंधसंयुक्त नानापुष्पविनिर्मिता । मया निवेदिता माला ग्रह्या तव महेश्वर। अथ बिल्वपत्रमाला—ॐ सत्रेण ग्रथितं माल्यं नानापुष्पविमिश्रितम् । श्रीयुक्तं बिल्वमाल्यं च गृहाण परमेश्वर॥ अथ पुष्पाञ्जलिः। ॐ नमः शिवाय शान्ताय कारणत्रयहेतवे। निवेदयामि चात्मानं त्व गतिः परमेश्वर। अपराधसहस्राणि मयि तेऽहर्निशं मया। दासोऽयमिति मां मत्वा प्रसीद परमेश्वर॥ अथ नीराजनम् ॥ॐ पञ्चवर्तिसमायुक्तं गोघृतेन च पूरितम् ॥ नीराजनं मया दत्तं गृहाण भगवन् हर ॥ अथ कर्पूरार्तिक्यम्—ॐ कदलीगर्भसंभूतं घनसारं शशिप्रभम्। आरार्तिक्यमहं कुर्वे पश्य मे वरदो भव॥ अथ प्रदक्षिणा—ॐयानि कानि च पापानि ब्रह्महत्यासमानि च॥ तानि तानि प्रणश्यन्ति प्रदक्षिणपदे पदे॥ ॐ सप्तास्या० ॥ मंत्रपुष्पाञ्जलिः— ॐ नानासुगंधि-पुष्पाणि यथाकालोद्भवानि च पुष्पाञ्जलिं मया दत्तं गृहाण परमेश्वर ॥ ॐ यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन्। तेहनाकं महिमानःसचन्त यत्रपूर्वे साध्याःसन्ति देवाः॥

श्रूयतां धर्मसर्वस्वं शिवरात्रौ शिवार्चनम् । व्रतज्ञानविधानेन स्वर्गपुण्यन कर्मणा। कृत्वा स्नानं शुचिर्भूत्वा धौतवस्त्रसमन्वितः॥ स्थापयेद्देवदेवेशं मंत्रैर्वेदसमुद्भवैः । ततः पूजा प्रकर्तव्या पूर्वोक्त

विधिना ततः॥ ॐ नमोयज्ञ जगन्नाथ नमस्त्रिभुवनेश्वर। पूजां गृहाण मद्दत्तां महेश प्रथमे पदे॥ अनेन बिल्वयुक्तं विशेषार्घ्यं दद्यात् ॥ इति प्रथमप्रहरे॥ द्वितीयप्रहरेऽपि षोडशोपचारैः पूजयेत् अनेनैव विधिना। पूर्वे नन्दिमहाकालौ शृङ्गिभृङ्गी च दक्षिणे। वृषस्कन्दौ पश्चिमे च देशकालौ तथोत्तरे। गंगा च यमुना चैव पार्श्वे चैव व्यवस्थितौ॥ पूजान्ते बीजपूरेण अर्घ्यं दद्यादनेन मंत्रेण। ॐ नमोऽव्यक्ताय सूक्ष्माय नमस्ते त्रिपुरान्तक। पूजां गृहाण देवेश यथाशक्त्योपपादिताम्। अथ तृतीयप्रहरे। रम्भाफलेन। ॐ बद्धोऽहं विविधैः पाशैः संसारभवबन्धनैः॥ पतितं मोहजाले मां त्वं समुद्धर शंकर। चतुर्थप्रहरे आद्यवत् पूजां कुर्यात्। ॐ नमः शिवाय शान्ताय सर्वपापहराय च। शिवरात्रौ मया दत्तं गृहाणार्घ्यं नमोऽस्तु ते। ततः प्रभाते स्नात्वा विधिवत् पूजां कुर्यात्। ततो विशेषार्घ्यं दद्यात् अनेन मंत्रेण—ॐ दुःखदारिद्र्यभावैश्च दग्धोऽहं पार्वतीपते। मां वै त्राहि महादेव किं न जानासि शंकर॥ किं च जानासि देवेश तावद् भक्तिं प्रयच्छ मे। स्वपादाग्रतले देव दास्यं देहि जगत्पते॥ इत्यर्घ्यं दत्त्वा पूजां समाप्य दक्षिणां दद्यात्, ब्राह्मणान् भोजयेत् च।

॥ इति शिवरात्रिपूजाविधिः समाप्तः ॥

* ३०—अथ शिवरात्रि व्रतकथा प्रारम्भः *

सूत उवाच ॥ स कारणमशेषस्य जगतस्सर्वदा शिवः गोब्राह्मणनृपाणाञ्च शिवं भवतु सर्वदा ॥१॥ कैलासशिखरासीनं देवदेव जगद्गुरुम्। पञ्चवक्त्रं दशभुजं त्रिनेत्रं शूलपाणिनम् ॥२॥ पिनाकशोभितकरं खड्गखेटकधारिणम्। कपालखट्वाङ्गधरं शशाङ्कवृतशेखरम् ॥ ३ ॥ कपाल-धारिणं भीमं वरदञ्चाभयप्रदम् ॥ भस्माङ्गं व्यालशोभाढ्यमस्थिमालाविभूषितम् ॥ ४ ॥ नील-

शि.प.

३०१

पार्वतीलाई शिवजीले बताउनुभएको भनी व्यासले भलाई कहनुभएको शिवरात्रिको महिमा हे शौनकादि ऋषीश्वरहो! म तपाईहरूलाई सुनाउँछु भन्दै नैमिषारण्यक्षेत्रमा रहने अट्ठासी हजार ऋषिहरूलाई सूतजीले भन्नुभयो— सधैं समस्त संसारको कल्याण गर्ने शिवजी सधैंभरि गाई-ब्राह्मण र राजाहरूको कारणसहित रक्षा गर्नेहुन् ॥१॥ कैलासको टाकुरामा बस्ने, धौताका पनि धौता, जगत्का गुरु, पाँच मुख हुने, दश बाहु हुने, तीन आँखा हुने, त्रिशूल हातमा लिने ॥२॥ पिनाक धनुले हात शोभिने, खड्ग खेटक धारण गर्नेँ, खप्पर र खट्वाङ्ग लिने, शिरमा चन्द्रमा धर्ने ॥३॥ जटाधारी, भयङ्करस्वरूप भएका, वर दिने, अभय दिने, शरीरभर भस्म लेपन गरेका सर्पका गहनाले अत्यन्त शोभिएका, हड्डीका मालाले सुन्दर ॥४॥ नीलो मेघको जस्तो वर्ण भएका, कोटिन् सूर्यसमान तेज भएका, आपना गणहरूले घेरिएर

२६

जीमूतसंकाशं सूर्यकोटिसमप्रभम् । क्रीडन्तञ्च शिवं तत्र गणैश्च परिवारितम् ॥ ५ ॥ विसृज्य देवतास्सर्वास्तिष्ठन्तम्परमेश्वरम् । तं दृष्ट्वा देवदेवेशं प्रहस्योत्फुल्ललोचना ॥६॥ पार्वती परिपप्रच्छ विनयावनता स्थिता । गौरी प्रपच्छ भर्तारं विस्मयोत्फुल्लोचना ॥ ७ ॥ पार्वत्युवाच ॥ कथयस्व प्रसादेन यद्गोप्यं व्रतमुत्तमम् । श्रुता त्वयोक्ता देवेश व्रतानां निर्णयाश्शुभाः ॥ ८ ॥ तथा वै दानधर्म्माश्च तीर्थधर्म्मास्त्वयोदिताः । नास्ति मे निश्चयो देव भ्रान्ताऽहं तु पुनः पुनः ॥ ९ ॥ तस्माद्वदस्व मे देव एकं निस्संशयं प्रभो । व्रतानामुत्तमं देव मुक्ति- मुक्तिप्रदायकम ॥ १० ॥

३०२ शि.व.

कल्याणकारी खेल खेल्ने ॥५॥ सबै द्यौताहरूलाई त्यागेर रहने, परमेश्वर, द्यौताका पनि द्यौता ती महादेवलाई देखेर क्यै मुस्कुराउँदा बड़े-बड़े आँखा भएकी ॥ ६ ॥ विनयले झुकेकी गौरी पार्वतीले चकितपनाले ट्वाल्ल हेर्दी छँदी पतिलाई बारम्बार सोधिन् ॥ ७ ॥ पार्वतीले भनिन्—हे प्रभु ! आजसम्म कसैले नजानेको त्यो उत्तम व्रत कृपा गरेर बताउनोस् । यद्यपि तपाईंले बताउनुभएका कल्याणकारी व्रतका निर्णयहरू सुनिसकेकी छु ॥८॥ हजूरले बताइबक्सेका त्यस्तै दानका, धर्म र तीर्थका धर्महरू पनि सुनिसकेकी छु । हे भगवन् ! तिनमा कुनचाहिं अति उत्तम हो ? मलाई निश्चय भएको छैन, म बारम्बार भ्रान्तिमै छु ॥ ९ ॥ त्यसकारण हे प्रभु ! हे भगवन् ! हे देव ! भुक्ति मुक्ति दुवै दिने, व्रतहरूमा अति उत्तम व्रत शंका नरहने गरी मलाई बताइबक्सियोस् ॥१०॥ हे प्रभु ! म सबै त्यो सुन्न चाहन्छु कहिबक्सियोस् ॥ ११ ॥

तदहं श्रोतुमिच्छामि कथयस्व मम प्रभो ॥ ११ ॥ ईश्वर उवाच ॥ शृणु देवि परं गुह्यं व्रतानामुत्तमं व्रतम् ॥ यन्नकस्यचिदाख्यातं रहस्यं मुक्तिदायकम् ॥ १२ ॥ येनैव कथ्यमानेन यमो विलयताम्व्रजेत् । तदहं कीर्तयिष्यामि शृणुष्वाग्र मुमा प्रिये ॥१३॥ माघान्ते कृष्णपक्षे तु अविद्धा या चतुर्दशी । शिवरात्रिः समाख्या सर्वयज्ञोत्तमोत्तमा ॥ १४ ॥ दानैर्यज्ञैस्तपोभिश्च व्रतैश्च विविधैरपि । न तीर्थैर्यद्भवेत्पुण्यं तत्पुण्यं शिवरात्रितः ॥ १५ ॥ शिवरात्रिसमं नास्ति व्रतानामुत्तमं व्रतम् ॥ अज्ञानात् ज्ञानतो वापि कृत्वा मोक्षमवाप्नुयात् ॥ १६ ॥ मृतास्ते निरयं त्यक्त्वा गतास्ते शिव-

---

तब ईश्वर महादेवले भन्नुभयो—हे प्रिये ! व्रतहरूमा उत्तम, अझसम्म कसैलाई नबताइएको, मुक्ति दिने, जो रहस्यमय अति गोप्य, व्रतहरूमा अति उत्तम व्रत छ त्यो सुन ॥ १२ ॥ जुन व्रतलाई भन्नाले मात्रै पनि यमराज लापता हुन्छन्, हे प्रिये ! त्यही व्रत म भन्छु, मन दिएर सुन ॥ १३ ॥ माघपछिको कृष्णपक्षको जुन अविद्धा चतुर्दशी हुन्छ त्यो शिवरात्रि कहिन्छ, त्यसमा गरेको व्रत सबै यज्ञभन्दा पनि अति उत्तम हुन्छ ॥१४॥ समस्त दानहरूले यज्ञहरूले, तपस्याहरूले, नाना प्रकारका व्रतहरूले, तीर्थहरूले जुन पुण्य हुँदैन त्यो पुण्य शिवरात्रिको व्रत गर्नाले हुन्छ ॥१५॥ शिवरात्रिसमान व्रतहरूमा उत्तम व्रत अर्को छैन जुन व्रत जानी जानी गरेर अथवा अज्ञानले गरिएर पनि मोक्ष पाइन्छ ॥१६॥ यस शिवरात्रिका व्रतका प्रभावले ती मरेकाहरू नरक त्यागेर ती सब शिवका नगीच पुगेका छन । यो

सन्निधौ ॥ सर्वमङ्गल-शीला च सर्वाऽमङ्गलनाशिनी । भुक्तिमुक्तिप्रदा चैषा सत्यं सत्यं वरानने ॥ १७ ॥ देव्युवाच ॥ कथं यमपुरी-मार्गं त्यक्त्वा देवं व्रजेन्नरः । एतन्मे महदाश्चर्य्यं प्रत्यक्षं कुरु शङ्कर ॥ १८ ॥ शङ्कर उवाच । शृणु देवि यथावृत्तं कथाम्पौराणिकीं शुभाम् । यमशासनहन्त्रीश्च शिवशासनदायिकाम् ॥ १९ ॥ कश्चिदासीत्पुरा देवि निषादस्त्वामिषप्रियः । प्रत्यन्त-देशवासी च भूधरासन्निकेतनः ॥ २० ॥ सीमान्ते स सदा तिष्ठेत्कुटुम्बपरिपालकः । तन्वा पीनो धनुर्धारी श्यामाङ्गः कृष्णकञ्चुकः ॥ २१ ॥ बद्धगोधांगुलित्राणस्सदैव मृगया रतः ।

१०४ शि.प्र.

शिवरात्रिको व्रत सबै मंगल दिने, सबै अमङ्गल नाश गर्नेवाला छ । हे वरानने ! साँच्चै-साँच्चै यो शिवरात्रि भुक्ति-मुक्ति दिनेवाला हो ॥१७॥ तब पार्वतीले भनिन्—यमराजको पुरीको बाटो छोडेर मनुष्य कसरी प्रभुभाठौं पुग्यो ? मलाई त्यो ठूलो आश्चर्य लाग्यो । हे शंकर ! यसलाई प्रत्यक्ष पारी बताउनोस् ॥१८॥ तब शंकरले भन्नुभयो—हे प्रिये ! यमराजको शासनलाई खतम पारेर शिवजीको शासन दिलाउने कल्याणकारी पौराणिक कथा जस्ताको तस्तै सुन ॥१९॥ हे प्रिये ! उहिले सीमान्तदेशमा बस्ने, पहाडको नजीकै घर हुने मासुमा हिरिक्क हुने व्याधा थियो ॥२०॥ शरीरले मोटो, काला, काले कमीज लाउने उ सधैं जहान बच्चालाई पालेर सीमान्त (सीमा प्रदेश) मा रहने गर्थ्यो ॥ २१ ॥ गोहोरोका छालाको पञ्जा लगाएको उ सधैंभरि शिकारमा तल्लीन रहन्थ्यो । यस किसिमको त्यो निषाद फाल्गुनकृष्ण चतुर्दशीको

एवंविधो निषादोऽसौ चतुर्दश्यां दिने शुभे ॥ २२ ॥ व्यवहारैश्च द्रव्येऽर्थे देवागारे प्ररुन्धितः ।
तेनाऽपि देवता दृष्टा जनानां वचनं श्रुतम् ॥ २३ ॥ उपवासव्रतीनाञ्च शिवशिवशिवेति च ।
दिनान्ते तैस्तदा मुक्तपातद्रव्यम्प्रदीयताम् ॥ २४ ॥ ततोऽसौ धनुरादाय दक्षिणेन गतस्स्वयम् ।
आगच्छन्सवलोद्देशे जनहासञ्चकार सः ॥ २५ ॥ शिवश्शिवः किमेतद्वै कुर्वन्ति नगरे जनाः ।
वनेचरान्निरीक्षस्तु चतुर्दिक्षु इतस्ततः ॥ २६ ॥ पदञ्च पदमार्गं च आश्रये शूकरान्मृगान् ।
इतश्चेतश्च धावन्स आमिषे लुब्धमानसः ॥ २७ ॥ वनं च पर्वतान् सर्वान् भ्रमन् तस्य
दिनङ्गतम् ॥ सम्प्राप्तं तेन नो किञ्चिन्मृग - शूकर - तित्तिराः ॥ २८ ॥ निराशो लुब्धको

शुभ दिनमा ॥२२॥ शिकारमा जाँदा साहूहरूले पैसाका लागि मन्दिरमा रोकियो । तब उसले पनि देवता देख्यो, त्यहाँ रहेका जनहरूको पूजा कीर्तनका वचन पनि सुन्यो ॥२३॥ पक्रिएकोले व्रतीहरूमध्ये उसको पनि उपवास भयो, 'शिव-शिव' यस्तो भनाइयो पनि । अनि भोलि पैसा दिन् भनेर साँझमा साहूहरूले उ छोडियो ॥२४॥ साहूहरूबाट हुड्कारा पाएपछि उ धनु लिएर खुद दक्षिणको बाटोले गएको थियो । उ वनतिर आउँदाखेरिकिन आज नगरमा मानिसहरू यो शिव-शिव गर्छन् भनी उसले जनहास गऱ्यो अर्थात् मानिसलाई देखेर हँस्सी उडायो र जंगली जनावरहरूलाई यताउति चारैतिर हेर्दै ॥२५-२६॥ मासुमा लोभिएको उ आश्रममा यताउति दौडिदै बदेल - मृगका पाइला र गोहो पैल्याउँदै ॥२७॥ सारा वन-पर्वत घुम्दाघुम्दै उसको त्यो दिन बित्यो । किन्तु उसले उस दिन कुनै मिर्ग-बँदेल-तित्रा पाएन ॥२८॥

जातस्तदा चास्तंगतो रविः । चिन्तयित्वा जलोपान्ते जागरं जीव - घातनम् ॥
॥ २९ ॥ संविधास्याम्यहं रात्रौ विचिन्त्य मम जीवनम् । गतोऽसौ जलसामीप्यं तीरस्थो
जालिमध्यतः ॥ ३० ॥ उटजं कर्तुमारेभे आत्मनो गुप्तिकारणात् । जालिमध्ये महालिङ्गम-
स्ति स्वायम्भुवं शुभम् ॥ ३१ ॥ बिल्ववृक्षो महादिव्यो जालिमध्येन संस्थितः । गृहीत्वा
तस्य पत्राणि मार्गशुद्ध्यर्थमक्षिपत् ॥ ३२ ॥ क्षिप्तानि दक्षिणे भागे गतानि लिङ्गमूर्द्धनि ।
न दिवा भोजनं तस्य आमिषे लोलुपस्य वै ॥ ३३ ॥ ततश्चिन्तयमानस्य निद्रा न समवाप्तवान्

तब त्यो व्याधा निराश भयो, यत्तिकैमा सूर्य अस्ताए । 'रात्रि पक्कै पनि मेरो जीवन (शिकार) जलको छेउमा पानी पिउन आउनेछ, त्यसकारण म यहीं जागै रहेर जीवहत्या गर्छु' यस्तो सोचेर उ जलको नगीचै गयो र तीरमा रहेको झाङको बीचमा ॥२९-३०॥ आफू लुक्नका लागि छाप्रो बनाउन थाल्यो । त्यसै झाङको बीचमा शिवजीको कल्याणकारी महालिङ्ग थियो ॥ ३१ ॥ त्यसै झालको बीचमा बडो राम्रो बेलको रूख पनि रहेको थियो । बाटो साफ गर्नका लागि त्यस बेलका पातहरू सबातेर अर्थात् चुँडेर फ्याँक्यो ॥३२॥ दक्षिण भागतिर फ्याँकिएका ती पात शिवलिङ्गमाथि परे । दिनभरि साहूले भोकै बस्नुपर्छ एकै, बेलुकापछि मासुमा हिरिक्क रहको उसको दिउँसोको भोजन (खाना) भएको थिएन ॥३३॥

तस्य गन्धं समासाद्य लुब्धकस्य वरानने ॥ ३४ ॥ न तिष्ठन्ति मृगास्सर्व शरघातभयात्तदा । मृगान्निरीक्षतस्तस्य निद्रा नाशोऽप्यजायत ॥ ३५ ॥ बिल्वजालिङ्गतस्याऽस्य प्रथमप्रहरो गतः । ततो जलार्थमायाता हरिणी गर्भसंयुता ॥ ३६ ॥ यौवनस्था सुरूपा च स्तनपीना सुशोभना ॥ निरीक्षन्ती दिशस्सर्वा भृशमुत्फुल्ललोचना ॥ ३७ ॥ लुब्धकेनाऽपि सा दृष्टा बाणगोचरमागता । बाणश्च सन्जितस्तेन एकदृष्टेन चेतसा ॥ ३८ ॥ त्रोटयित्वाऽथ पत्राणि प्रक्षिप्तानि शिवोपरि ॥ शिवं देवं सदा ध्यायन् शीतेन परिपीडितः ॥ ३९ ॥

तब त्यहीं पिरिएर रहेको उसलाई निद्रा पनि लागेन । हे वरानने ! त्यस व्याधाको गन्ध पाएर ॥ ३४ ॥ त्यस वेला बाणका चोटको डरले सबै मृगहरू पनि त्यहाँ रहेका थिएनन् । त्यसै कारण मृगलाई हेरिरहने भएका उसको निद्रा पनि नाश भयो अर्थात् जागै रहनुपऱ्यो ॥ ३५ ॥ यस्तै प्रकारले बेलको झालमै रहेको प्रथम प्रहर रात बित्यो । अनि दोस्रो प्रहरमा पानी पिउनका लागि पेट बोकेकी, तरुनी, राम्री, फाँचा बढेकी, सुहाउँदी हरिणी ठूला-ठूला आँखाले सबै दिशातिर पल्याक-पुलुक हेर्दै उहाँ आइपुगी ॥ ३६-३७ ॥ व्याधाले पनि उसलाई देख्यो र उ बाणको ताक पर्ने ठाउँमा आइपुगी । उस व्याधाले पनि एकटक लाएर तनमनले धनुमा बाण चढायो ॥३८॥ अनि आँखा-अगि परेको बेलको पात चुँडेर जाडाले लुगलुगिएको उसले भगवान् शिवलाई निरन्तर कार्यसिद्धिका लागि ध्यान गर्दै शिवजीमाथि फ्याँक्यो ॥ ३९ ॥ तब यसै बीचमा हरिणीले व्याधालाई देखी । त्यस वेला यमराज जस्तै रूपले व्याधा

एतस्मिन्नन्तरे दृष्टो हरिण्या लुब्धकस्तदा ॥ लुब्धकस्तु स्वरूपेण कृतान्त इव तिष्ठति ॥ ४० ॥ दृष्ट्वा तु तस्य सन्धानं यमदंष्ट्रसमप्रभम् । सा मृगी दिव्यया वाचा लुब्धकं वाक्यमब्रवीत् ॥ ४१ ॥ स्थिरो भव महाव्याध सर्वजीवनिकृन्तन । किमर्थं हन्तुमुद्युक्तः कथयस्व मम प्रभो ॥ ४२ ॥ लुब्धक उवाच ॥ कुटुम्बः पीडितम्मेऽद्य क्षुधया च मया सह । धनञ्च मद्गृहे नास्ति तेन त्वां हन्मि शोभने ॥ ४३ ॥ सूत उवाच ॥ जातपूजाप्रभावेण जातरो पोषणेन च । चतुर्थामेन पापानां विमुक्तो लुब्धकस्तदा ॥ ४४ ॥ लुब्धकस्त ततो

३०८ [शि.प्र.]

रहेको थियो ॥ ४० ॥ धनुमा चढाइएको त्यसको बाणलाई यमराजको दाह्रातुल्य प्रभा भएको देखेर उस हरिणीले दिव्य वचनले व्याधालाई कुरो भनी ॥ ४१ ॥ सबै जीवलाई कर्दल पार्ने हे ठूला व्याधा पर्ख ! हे प्रभु ! केका लागि मार्न तम्सिनुभो मलाई कहनुहोस् ॥ ४२ ॥ तब व्याधाले भन्यो–'हे सुन्दरी हरिणी ! मेरो घरमा धन छैन, मेरै साथ आज भोकले मेरा जहान बच्चाले दुःख पाए, त्यसैकारण तँलाई मार्छु' ॥४३॥ सूतजीले भन्दै जानुभो— काकतालीले हुन गएका पूजाका प्रभावले र जाग्राम उपवासका प्रभावले गर्दा त्यस वेलासम्म त्यो व्याधा चार खण्डको एक खण्ड पापबाट छुटिसकेको थियो ॥४४॥ तब मनुष्यको बोली बोल्ने हरिणीलाई देखेर केही धर्मले युक्त भैसकेको

दृष्टवा मृगी मानुष-भाषिणीम् । आश्चर्यम्परमं मत्वा किञ्चिद्धर्म्मसमन्वितः ॥ ४५ ॥ लुब्धक उवाच ॥ मया हि पतिता जीवा उत्तमाधममध्यमाः । न श्रुता ईदृशी वाणी श्वापदानां कदाचन ॥४६॥ कस्मिन्देशे त्वमुत्पन्ना कस्मात्स्थानादिहागता । कथयस्व प्रयत्नेन परं कौतूहलं हि मे ॥ ४७ ॥ मृग्युवाच ॥ शृणु त्वं लुब्धकश्रेष्ठ कथयामि तवाऽखिलम् । आसम्पूर्वम्महारम्या स्वर्गे शक्रस्य चाप्सरा ॥ ४८ ॥ अनन्तरूपलावण्या सौभाग्येन विगर्विता ॥ सौभाग्यमद-पुष्टाङ्गो दानवो मदगर्वितः ॥ ४९ ॥ मयैव स कृतो भर्ता हिरण्याक्षो महासुरः ॥ तेन सार्द्धं मया भुक्तं चिरकालं यथेप्सितम् ॥ ५० ॥ अन्यस्मिन्दिवसे व्याध क्रीडन्त्या मेऽसुरेण

१०९

शि.व.

व्याधाले बडो आश्चर्य मान्यो ॥ ४५ ॥ व्याधाले भन्यो—मैले उत्तम मध्यम अधम कैयन् जीवहरूलाई मारें, चारखुट्टे पशुहरूको यस्तो बोली कहिल्यै सुनेको थिइनँ ॥४६॥ तँ कुन देशमा जन्मिएकी होस्, कुन ठाउँबाट यहाँ आएकी ? साँच्चै नै मलाई अति आश्चर्य भएको छ, यसबारे विस्तारपूर्वक भन् ॥४७॥ तब हरिणीले भनी—हे व्याधाहरूमा श्रेष्ठ व्याधा ! तिमीलाई म सारा वृत्तान्त कहन्छु, तिमी सुन ! पहिले म स्वर्गमा इन्द्रकी अत्यन्त राम्री, असाध्यै रूप र सुन्दरता भएकी, आफ्ना सौभाग्यले घमण्डिएकी अप्सरा थिएँ । त्यसै बेला असल भाग्य र जवानीका मदले सबै अङ्ग पुष्टिएको, त्यस्तै मदले घमण्डिएको हिरण्याक्ष नाउँको ठूलो असुर उस दानवलाई मैंले नै पति बनाएकी थिएँ । त्यसका साथ मैले धेरै समयसम्म अघाउञ्जेल भोग गरें ॥ ४८-५० ॥ व्याधा ! रोजै मेरो नाच-गान शंकर हेर्नुहुन्थ्यो, दिनहुँ

च ॥ नृत्यञ्च प्रेक्षते नित्यं शंकरश्च ततस्तदा ॥ ५१ ॥ यावद्गच्छाम्यहं तत्र तावन्मां शंकरोऽब्रवीत् । क्व गता त्वं वारारोहे केन वा सङ्गता शुभे ॥ ५२ ॥ किंवा सौभाग्यगर्वेण नायाता मम मन्दिरम् । सत्यं कथय शीघ्रं त्वं नो वा शापं ददामि ते ॥ ५३ ॥ शापभीत्या मया तत्र इत्युक्तं शंकराऽग्रतः । शृणु देव प्रवक्ष्यामि शापाऽनुग्रहकारक ॥ ५४ ॥ ममाऽस्ति भर्ता विश्वेश दानवेन्द्रो महाबलः । तेन सार्द्धम्मया देहक्रीडितं निजमन्दिरे ॥ ५५ ॥ तेनाऽहं नाऽऽगता शीघ्रं सृष्टिसंहारकारक । रुद्रस्तद्वचनं श्रुत्वा सकोपो वाक्यमब्रवीत् ॥ ५६ ॥

वि.प.

३१०

म ठीक वेलामा उहाँ पुग्थें, एक दिन त त्यस दानवका साथ इन्द्रिदाइन्द्रिदै मेरो समय वितेछ, अनि महादेवकहाँ म ठीक वेलामा पुग्न सकिनँ, तब ॥५१॥ हतारिंदै जसै म उहाँ पुगें तसै शंकरले मलाई भन्नुभो—हे सुन्दरी! तिमी कहाँ गएकी थियौ? हे कल्याणी! कसका साथ तिम्रो लसपस छ? ॥ ५२ ॥ अथवा के सौभाग्यका घमण्डले मेरो मन्दिरमा न आएकी? चाँडै नै साँचो-साँचो भन, नत्र तिमीलाई श्राप दिन्छु ॥५३॥ श्रापका डरले उहाँ शंकरका अगाडि मैले यस्तो भनें—श्राप नदिन कृपा गर्नुहुने हे भगवन्! साँचो भन्दछु, सुनिबक्सियोस्—॥५४॥ हे विश्वका मालिक! अत्यन्तै बलिया दानवश्रेष्ठ मेरा पति हुनुहुन्छ, हे भगवन्! उसैका साथ म आफ्नै घरमा इन्द्रिरहेकी थिएँ ॥ ५५ ॥ हे सृष्टिको संहार गर्नें प्रभु! त्यसैकारण म चाँडै न आएकी हुँ। रुद्रले त्यो कुरो सुनेर क्रोधपूर्वक बोली बोल्नुभो—॥५६॥

मृगः कामातुरो नित्यं हिरण्याक्षो भविष्यति। त्वं मृगी तस्य भार्या वै भविष्यसि न संशयः ॥ ५७ ॥ त्यक्त्वा स्वर्गं तथा देवान् दानवम्भोक्तुमिच्छसि ॥ द्वादशाब्दानि भो भद्रे भविता शाप एव ते ॥ ५८ ॥ परस्परस्य शोकेन शापान्तोऽपि भविष्यति। अनुग्रहः पुनस्त्वेष शंकरेण कृतस्स्वयम् ॥ ५९ ॥ कदाचिद् व्याधप्रवरस्तव सान्निध्यमाश्रितः। वधार्थं तव सम्प्राप्तः पूर्वजन्म स्मरिष्यसि ॥ ६० ॥ अत उर्ध्वं तदा रुद्रं दृष्ट्वा मोक्षमवाप्स्यसि। शंकरो न मया दृष्टो वसत्यस्मिन् महावने ॥ ६० ॥ ततो दुःखमनुप्राप्ता मांसमेदविवर्जित।

सधैं कामले आतुर हिरण्याक्ष्य नामको मृग हुनेछ, तँ त्यसैकी स्वास्नी मृगी हुनेछेस, यसमा सन्देह छैन ॥५७॥ स्वर्ग तथा द्यौताहरूलाई त्यागेर तँ दानवसित भोग गर्न चाहन्छेस, त्यसैकारण हे कल्याणी! बाह्र वर्षसम्म तँलाई यो श्राप हुनेछ ॥५८॥ तिमी दम्पतीमा जब परस्परमा शोक पर्ला त्यसै शोकले श्राप समाप्त पनि हुनेछ। फेरि यो कृपा पनि शंकरले स्वयं गर्नुभयो ॥५९॥ कुनै वेला ठूलो व्याधा तेरो नजीकैमा रहेको भएर तँताई मार्नका लागि तयार हुनेछ त्यसै वेला आफ्नू पूर्वजन्म सम्झनेछेस ॥ ६० ॥ त्यसका बाद तब महादेवको दर्शन पाएर मात्र मृगी-जन्मबाट मोक्ष हुनेछेस्। तर, हे व्याधा! यस ठूलो बनमा यतिका वर्ष बस्ता पनि मैले शंकरलाई देखेकी छुइनँ ॥६१॥ त्यसकारण हे व्याधा! दुःख पाएकी, भारी जीउकी हुनाले मासु बोसो घटेकी पनि छु। फेरि धर्मशास्त्रहरूमा पेट

गर्भाक्रान्ता विशेषेण न वध्या चेति निश्चितम् ॥ ६२ ॥ तत्कुम्बस्य ते नूनं भोजनं न भविष्यति । आयास्यति मृगी त्वन्या मार्गेणाऽनेन लुब्धक ॥ ६३ ॥ पीना यौवनसम्पन्ना बहुमांसा मदोद्धता । भोजनं सकुटुम्बस्य तव सद्यो भविष्यति ॥ ६४ ॥ अथवाऽन्यो मृगो व्याध पानार्थन्तु जलाशये । आगमिष्यति प्रत्यूषे क्षुधार्तस्य न संशयः ॥ ६५ ॥ गर्भं त्यक्त्वा पुनः प्रातर्बालान् सन्दिश्य बन्धुषु । शपथैरागमिष्यामि सन्दिश्य च सखीजनम् ॥ ६६ ॥ तस्यास्तद्वचनं श्रुत्वा व्याधो विस्मयमागतः । क्षणमेकं तथा स्थित्वा व्याधो वचनमब्र-

---

बोकेकीलाई मार्नु हुन्न भनी विशेष तरहले भनिएको छ ॥६२॥ तिम्रा जहान बच्चाको र तिम्रा लागि पनि पक्कै खाना होइन होला ! हे व्याधा ! यसै बाटोबाट अर्की मोटी मस्त थसुल्ले छचण्डिएकी मृगी आउनेछ, जहान बच्चासहित तिम्रो भोजन तुरुन्तै हुनेछ ॥६३-६४॥ अथवा हे व्याधा ! यस जलाशयमा पानी पिउनका लागि बिहानीपख अर्को मृग आउनेछ, उही भोकाएका तिम्रो भोजन हुनेछ, यसमा संशय छैन, पक्कै आउँछ ॥६५॥ मलाई नै माछौं भने हामी खर्कने ठाउँमा गर्भ त्यागेर अर्थात् बच्चा पाएर, बन्धुहरूलाई बच्चाहरू सुम्पेर सखीहरूलाई भनसुन गरी सत्ते-सत्ते बिहान फेरि आउनेछु ॥६६॥ त्यस मृगीको त्यस्तो कुरो सुनेर व्याधा छक्क पऱ्यो । एकछिन घोरिएर व्याधाले यस्तो कुरो

वीत् ॥ ६७ ॥ नागमिष्यति चेदन्यो जीवस्त्वमपि गच्छसि । क्षुधया पीडितोऽहं वै कुटुम्बाश्च विशेषतः ॥ ६८ ॥ प्रातस्त्वया मम गृहमागन्तव्यम् यथातथम् । शपथैश्च व्रज त्वं हि यथा मे प्रत्ययो भवेत् ॥ ६९ ॥ पृथिवी वायुरादित्यस्सत्ये तिष्ठन्ति देवताः । तस्मात्सत्येन गन्तव्यं भवत्या स्वगृहम्प्रति ॥ ७० ॥ तस्य तद्वचनं श्रुत्वा गर्भार्ता सा मृगी तदा ॥ चक्रे सत्यप्रतिज्ञां वै व्याधस्याऽग्रे पुनः पुनः ॥ ७१ ॥ मृग्युवाच ॥ द्विजो भूत्वा तु यो व्याध वेदभ्रष्टोऽभिजायते ॥ स्वाध्यायसन्ध्यारहितस्सत्यशौचविवर्जितः ॥ ७२ ॥ अविक्रयाणां विक्रेता

भन्यो—॥६७॥ म र अझ ज्यादा मेरा कुटुम्बहरू भोकले व्याकुल छौं, तिमी पनि जान्छयौ, अर्को प्राणी पनि आएन भने के गर्ने ? ॥ ६८ ॥ त्यसकारण, जसरी भए पनि बिहान तिपीले मेरो घरमा आउनैपर्छ । मलाई जसरी विश्वास हुन्छ तिमी त्यसरी नै किरिया खाएर जाऊ ॥ ६९ ॥ पृथिवी, वायु, सूर्य र सबै द्यौताहरू सत्यमै रहेका छन्, त्यसकारण तिमी अप्सराले पनि आफ्नू खर्कमा सत्य प्रतिज्ञा गरेर नै जानुपर्छ ॥ ७० ॥ त्यस व्याधाको त्यो कुरो सुनेर सुत्केरी हुन तयार त्यस मृगीले तब उस व्याधाको अगाडि बारम्बार सत्य प्रतिज्ञा गरी ॥ ७१ ॥ मृगीले भनी—हे व्याधा ! यदि म फेरि अइनि भने ब्राह्मण भएर जो वेदभ्रष्ट, पूजा-पाठ र सन्ध्यावन्दनले रहित, सत्य र शुद्धता नभएको, बेच्न निषेध गरिएका वस्तु बेच्ने, पुजाउन नहुने ठाउँमा पुजाउने हुन्छ, त्यस्ता ब्राह्मणको पापले म लिपिऊँ अर्थात् त्यस्तो ब्राह्मणलाई जो

अयाज्यानाञ्च याजकः ॥ तस्य पापेन लिप्स्यामि यद्यहं नागमं पुनः ॥ ७३ ॥ दुष्टबुद्धौ तु यत्पापं धूर्त्ते वा ग्रामकण्टके ॥ नास्तिके च विशीले च परदारस्ते तथा ॥ ७४ ॥ वेदविक्रयिणे चैव शवसूतक—भोजने ॥ मृतशय्याप्रतिग्राहे मातापित्रोरपालके ॥ तस्य पापेन लिप्स्यामि यद्यहं नागमं पुनः ॥ ७५ ॥ दानं दातुम्प्रवृत्तस्य ह्यन्तरायकरो नरः ॥ तस्य पापेन लिप्स्यामि यद्यहं नागमं पुनः ॥ ७६ ॥ देवद्रव्यं गुरुद्रव्यं ब्रह्मद्रव्यं हरेत तु यः ॥ तस्य पापेन लिप्स्यामि यद्यहं नागमं पुनः ॥ ७७ ॥ दीपं दीपेन यः कुर्य्यात् पादम्पादेन धावयेत् ॥ तस्य पापेन लिप्स्यामि यद्यहं नागमं पुनः ॥ ७८ ॥ भर्त्तारं स्वामिनं मित्रं आत्मानम्बालमेव च ॥ गां

पाप लाग्छ, त्यो मलाई लागोस् ॥ ७२-७३ ॥ दुष्ट बुद्धि भएका, धूर्त (ठग), गाउँ-फिराउ ईश्वर नमान्ने, बेसोहपर्ती अनि परस्त्री ताक्ने, वेद बेच्ने, जूठो परेका घरमा खाने, एकादशाहको शय्या दान लिने, आमा-बाबुलाई नपालनेलाई जो पाप लाग्छ, यदि म फेरि आइनँ भने त्यसैको पापले लिपिऊँ अर्थात् त्यस्ताको पाप मलाई लागोस् ॥ ७४-७५ ॥ दान दिन लागेकोलाई जो जन विघ्न गर्छ, यदि म फेरि आइनँ भने त्यसैका पापले लिपिऊँ अर्थात् त्यस्ता पापीको पाप मलाई लागोस् ॥ ७६ ॥ देवस्व, ब्रह्मस्व र गुरुको धन जो हरण गर्छ यदि म फेरि आइनँ भने त्यसैका लिपिऊँ अर्थात् त्यस्ताको पाप लगोस् ॥७७॥ जो दीयोबा दीयो बाल्छ, जो गोडाले गोडा धुन्छ, यदि म फेरि आइनँ भने त्यसैका पापले पोतिऊँ अर्थात् त्यस्तालाई लाग्ने पाप लागोस् ॥ ७८ ॥ लोग्नेलाई, मालिकलाई, मित्रलाई, आफूलाई, बालकलाई,

विप्रञ्च गुरुं नारीं यो मारयति दुर्म्मतिः । तस्य पापेन लिप्स्यामि यद्यहं नागमं पुनः ॥ ७९ ॥
अवैष्णवे च तत्पापं यत्पापं दाम्भिके जने ॥ अजितेन्द्रियधूर्ते च परदोषानुकीर्तने ॥ ८० ॥
कृतघ्ने च कदर्ये च परदाररते तथा । सदाचारविहीने च परपीडाप्रदायके ॥ ८१ ॥
परपैशुन्ययुक्ते च कन्याविक्रयकारके ॥ परापवादसन्तुष्टे सर्वधर्म्मविवर्जिते ॥ ८२ ॥
वृषलिङ्गे वार्द्धषिके पित्रोरन्तरदायके ॥ हेतुके वकवृत्तौ च कूटसाक्षिप्रदे तथा ॥ एतेषाम्पातकं
मह्यं यदि नायामि ते गृहम् ॥ ८३ ॥ यत्पापं ब्रह्महत्यायां पितृमातृवधे तथा ॥ तस्य पापेन

गाईलाई, ब्राह्मणलाई, गुरुलाई, नारीलाई जो दुष्ट क्रूर मार्दछ, यदि म फेरि आइनँ भने त्यस्ताको पापले पोतिऊँ ॥ ७९ ॥
विष्णुधर्म नमान्नेलाई जो पाप लाग्छ, घमण्डी जनलाई जो पाप लाग्छ, इन्द्रिय जित्न नसक्ने र धूर्तलाई अनि अर्काको
निन्दा गरिहिड्नेलाई जो पाप लाग्छ ॥ ८० ॥ उपकारको बदला अपकार गर्नेलाई, कञ्जूसलाई त्यस्तै अर्काकी स्वास्नीको
पछि पर्नेलाई, सदाचार नमान्नेलाई, अरूलाई पिर्नेलाई ॥ ८१ ॥ अरूको चुकुलखोरी गर्नेलाई, छोरी बेच्नेलाई अर्काको
निन्दामा आनन्द मान्नेलाई, कुनै धर्म नमान्ने पाखण्डीलाई ॥ ८२ ॥ बाहुन भई शुद्रिणी स्वास्नी राख्नेलाई, ब्याजमा
रुपियाँ लगाएर सूद खानेलाई, आमा-बाबुमा झगडा गराउनेलाई अकर्तव्यशील मतलबीलाई, बकुल्लाभगतलाई, त्यस्तै
झूटो गवाही दिनेलाई जो पाप लाग्छ, यी सबैको पाप यदि म तिम्रो घरमा आइनँ भने मलाई लागोस् ॥८३॥ ब्रह्महत्या गर्दा

लिप्स्यामि यदि नायामि ते गृहम् ॥ ८४ ॥ यत्पापं लुब्धकानां च यत्पापं गरदायिनाम् । तस्य पापेन लिप्स्यामि यदि नायामि ते गृहम् ॥ ८५ ॥ द्विभार्य्यः पुरुषो यस्तु समदृष्ट्या न पश्यति ॥ तस्य पापेन लिप्स्यामि यदि नायामि ते गृहम् ॥ ८६ ॥ सकृद्दत्वा ततः कन्या द्वितीयाय प्रयच्छति । तस्य पापेन लिप्स्यामि यदि नायामि ते गृहम् ॥ ८७ ॥ कथायां कथ्यमानायामन्तरं कुरुते नरः ॥ तस्य पापेन लिप्स्यामि यदि नायामि ते गृहम् ॥ ८८ ॥ पतिनिन्दापरो नित्य देवनिन्दापरो हि यः ॥ तस्य पापेन लिप्स्यामि० ॥ ८९ ॥ यस्य संग्रहणी भार्य्या ब्राह्मणी च

४१० ३१६ चि.र०

जो पाप लाग्छ अनि आमा-बाबुको वध गर्दा जो पाप लाग्छ, यदि म तिम्रो घरमा आइनँ भने त्यस्ताको पापले पोतिऊँ अथ त् त्यस्तालाई लाग्ने पाप मलाई लागोस् ॥ ८४ ॥ जो पाप लोभीहरूलाई लाग्छ र जो पाप विष खुवाउनेलाई लाग्छ, यदि म तिम्रो घरमा आइनँ भने त्यस्ताको पापले लिपिऊँ ॥ ८५ ॥ दुइटी स्वास्नी हुने जो पुरुष दुइटैलाई समान दृष्टिले हेर्दैन, यदि तिम्रा घरमा आइनँ भने त्यसैको पापले लिपिऊँ अर्थात् त्यस्ताको पाप लागोस् ॥ ८६ ॥ जो जन कन्यालाई एकपल्ट पोटालाई दिएर फेरि अर्कोलाई दिन्छ, यदि तिम्रो घरमा आइनँ भने यस्ताको पापले लिपिऊँ यानी त्यस्तै पाप मलाई लागोस् ॥८७॥ भनिइरहन लागेको कथामा जो मनुष्य विघ्न गर्दछ, यदि म तिम्रो घर आइनँ भने त्यस्ताको पापले पोतिऊँ ॥ ८८ ॥ मालिकको निन्दामा लागिपरेको र सधैं वेदको निन्दामा लागिपरेको जो जन छ, यदि म तिम्रो घरमा आइनँ भने उसैको पापले लिपिऊँ ॥८९॥ जसको त्याइते स्वास्नी होस् उसमा पनि झन् ब्राह्मणी होस् त त्यस्तालाई जो

विशेषतः । तस्य पापेन० ॥ ९० ॥ प्रेतश्राद्धे तु यो भुङ्क्ते पतिते बहुयाजके ॥ असच्छा-
स्त्रार्थनिरते पुराणञ्च विवर्जिते ॥ ९१ ॥ मूर्खे पाखण्डनिरते क्रयाविक्रयके द्विजे ॥ एतेषाम्पातकं
महयं यदि नायामि ते गृहम् ॥ ९२ ॥ एकाकी मिष्टमश्नाति भार्य्यापुत्रविवर्जितः ॥ आत्मजां
गुणसम्पन्नां समानसदृशे वरे ॥ ९३ ॥ न प्रयच्छति यः कन्यां नरो वै ज्ञानदुर्बलः ॥ तस्य पापेन०
॥ ९४ ॥ मृगी वाक्यं ततः श्रुत्वा लुब्धको हृष्टमानसः ॥ संसृत्य वाणं सन्यासं मुमोच
हरिणीं तदा ॥ ९८ ॥ तस्य भक्तिप्रभावेण लिङ्गस्यार्चा प्रपूजनात् ॥ तस्मिन्नेव क्षणे प्राप्तेऽ

पाप लाग्छ यदि म तिम्रो घरमा आइनँ भने त्यही पाप मलाई लागोस् ॥ ९० ॥ जो बाहुन एकादशाहको श्राद्धमा खान्छ, जो धर्मकर्म छाडेको पतित छ, जो धेरै जजमानी गर्छ, जो अश्लील साहित्यलाई प्रिय मान्ने, पुराण सुन्न पटवक मन नगर्ने ॥ ९१ ॥ मूर्ख, पाखण्डधर्म (मनपरी गर्नै धर्म) मा लागेको, वन्द-व्यापार गर्ने बाहुन यस्तालाई जो पाप लाग्छ, यदि म तिम्रा घर आइन भने त्यही पाप मलाई लागोस् ॥ ९२ ॥ स्वास्नी छोरा-छोरीलाई नदिई जो एकलै मीठो खान्छ, गुणले उमेरले सम्पन्न भएकी आफ्नो छोरीलाई तुल्य गुण उमेर भएको वरलाई जो अज्ञानी मनुष्य सुम्पदैन, यदि म तिम्रो घरमा आइनँ भने त्यस्ताको पापले पोतिऊँ ॥ ९३-९४ ॥ मृगीको यस्तो कुरो सुनेर खुशी मन भएको व्याधाले तब धनुबाट वाण झिकेर ठोक्रामा राख्यो र अनि हरिणीलाई छोडिदियो ॥९५॥ त्यस मृगीका भक्तिका प्रभावले र शिवलिङ्गमा हुन गएको पूजाको प्रभावले गर्दा तब उत्तिनै खेर डराएकी, डरमा डुबेकी बारम्बार पतिलाई पल्याकपुलुक यताउति

परा प्राप्त मृगो तदा ॥ ९६ ॥ संत्रास्ता भयसंमग्ना पतिमन्वेष्यती मुहुः ॥ जालिमध्ये स्थितेनाऽथ दृष्टा सा लुब्धकेन तु ॥ ९७ ॥ पुनर्वृक्षस्य पत्राणि त्रोटयित्वा करेण तु ॥ क्षिप्तानि दक्षिणे भागे लिङ्गोपरि दिदृक्षया ॥ ९८ ॥ तस्या वधार्थं तेनाऽथ बाणो धनुषि सन्धितः ॥ तिष्ठन्स्तत्रैकचित्तेन कुटुम्बार्थं जिघांसया ॥ ९९ ॥ निरीक्ष्य लुब्धको यावद्बाणं तस्यां विमुञ्चति ॥ तावन्मृग्या च सो दृष्टो भीता च विह्वलाऽभवत् ॥ १०० ॥ अद्यैव भगिनी मेऽपि लुब्धकेन विनाशिता । मम किञ्जीवितव्येन तस्या दुःखेन पीडिता ॥ १०१ ॥ वरम्मृत्युर्न शोको वै पृष्टं व्याधं विशेषतः ॥ एवं सञ्चिन्त्य हरिणी लुब्धकं वाक्यमब्रवीत ॥ १०२ ॥ धनुर्धर वरव्याध

खोज्दै अर्की मृगी उहाँ आइपुगी । अनि झालको बीचमा लुकेर बसेको व्याधाले ऊ देखिई पनि ॥९६-९७॥ राम्ररी मृगीलाई हेर्नें इच्छाले फेरि बेलका वृक्षको पात हातले चुँडेर दक्षिणतिर शिवलिङ्गमाथि फ्याँक्यो ॥ १८ ॥ जहान बच्चाका लागि हत्या गर्न चाहने उसले अनि मृगीको वधका लागि एकचित्तले उहाँ रहेर धनुमा बाण चढायो ॥९९॥ जसै व्याधाले ताकेर बाण छोड्न चाहेथ्यो, उसै बेला डराएकी विह्वल मृगीद्वारा त्यो व्याधा देखियो ॥ १०९ ॥ आजै मेरी बहिनी पनि व्याधाद्वारा मारिई, उसका दुःखले पिरिएकी मेरो बचाइले के मतलब ॥ ११० ॥ पिरिनुभन्दा त मर्नु नै निको, भलै व्याधा पनि देखियो, यस्तो सोच्तै त्यस हरिणीले व्याधालाई कुरो भनी–॥ १११ ॥ हे सारा जीवलाइ कत्तल गर्नें धनु-

सर्वजीवनिकृन्तन ॥ देहि मे वचनं चैकं पश्चात् त्व मां निपातय ॥ १०३ ॥ आयात हरिणी चैका मार्गेणाऽनेन लुब्धक । समायाताऽथवाऽन्यैव सत्यं कथय सुव्रत ॥ १०४ ॥ तत्स्रुत्वा लुब्धकस्तत्र विस्मितेक्षणमैक्षत ॥ तस्यास्तु तादृशी वाणी, अस्याश्चैव तु यादृशी ॥१०५॥ सा चैषा चागता नूनं ममाज्ञां पालनाय च ॥ अथवाऽन्या समायाता तया या कथिता पुरा ॥ १०६ ॥ लुब्धक उवाच ॥ अहोरात्रकृतं कष्टं कुटुम्बार्थे मया मृगी ॥ अधुना त्वां हनिष्यामि देवानां स्मरणं कुरु ॥ १०७ ॥ व्याधोक्तं वचनं श्रुत्वा हरिणी दुःखिता भृशम् ॥ व्याधम्प्राह रुदित्वा वै भो मां व्याध निपातय ॥ १०८ ॥ तेजो बलं तथा सर्वं निर्दग्धं विरहाग्निना ॥ अहम्प्राणान्प्र-

---

धारी ठला व्याधा ! यौटा कुरो मलाई भनिद्यौ अनि तिमा मलाई मार ! ॥११३॥ हे व्याधा ! यस बाटोबाट यौटी हरिणी आएकी थिई ? आएकी थिई अथवा थिइन, हे महाशय ! साँचो भनिद्यौ ॥११४॥ व्याधाले त्यहाँ त्यस्तो सुनेर आश्चर्य-चकित हेराई हेऱ्यो । त्यसको त्यस्तो वाणी थियो, यसको चाहिं यस्तो छ ॥ ११५ ॥ पक्का यो उही मृगी प्रतिज्ञा पालनका लागि आएकी हो कि ? अथवा उसले अघि जो-जो भनिएकी थिई उही अर्की आएकी हो ॥ ११६ ॥ लुब्धकले भन्यो—हे मृगा ! आफ्ना बालबच्चाका लागि मैले दिनभरी रातभरि कष्ट गरें । अब म तँलाई मार्छु आफ्ना इष्ट देवताको स्मरण गर् ॥ ११७ ॥ व्याधाले भनेको कुरो सुनेर हरिणी अत्यन्तै डराई र व्याधालाई रुँदै भनी—हे व्याधा! मलाई मार ॥ ११८ ॥ विरहरूपी अग्निले तेज अनि बल डढाइसकोकी छु, म पाण त्याग्दछु, तर हे व्याधा ! मलाई

मोक्ष्यामि भोजनं च न जायते ॥ १०९ ॥ बलवाँश्च महातेजो मेदमांससमन्वितः । अन्यश्च पीनगौराङ्गो मृगो ह्यत्राऽऽगमिष्यति ॥ ११० ॥ अहं च दुर्बला नूनं मेदमांसविवर्जिता ॥ केवलं पापभाक् त्वं हि मम प्राणविमोचकः ॥१११॥ मार्गेणाऽनेन भो व्याध आगमिष्यति संस्फुटम् ॥ तं हन्वा तव भो व्याध तृप्तिं नूनम्भविष्यति ॥ ११२ ॥ तथोक्तं लुब्धकश्श्रुत्वा किं करोमीति चिन्त्य च । मृगीम्प्राह स मुक्तार्थ एष मे निश्चयो हृदि ॥ ११३ ॥ सञ्चिन्त्य लुब्धकः प्राह मृगीं शोकातुरां कृशीम् ॥ सत्यं वद महाभागे प्रत्ययो म यथा भवेत् ॥ ११४ ॥ तस्य तद्वचनं श्रुत्वा हरिणी दुःखकर्षिता ॥ चक्रे सत्यप्रतिज्ञां तु व्याधस्याऽग्रे पुनः पुनः ॥ ११५ ॥

मारेर तिम्रो भोजन परा हुँदैन ॥१०९॥ बलियो, तेजस्वी, बोसो-मासुले मिसिएको, मोटो, गोरो, अर्को मृग यहाँ आउनेछ ॥११०॥ म त हेर ! बोसो मासु नभएकी दुब्ली छु, मेरो प्राण हर्ने तिमी केवल पापका भागी मात्र हुन्छौ ॥ १११ ॥ हे व्याधा ! यसै बाटोबाट पक्कै अर्को मृग आउनेछ, त्यसलाई मारेर निश्चे तिम्रो तृप्ति (मनग्गे) हुनेछ ॥ ११२ ॥ उसको भनाइ व्याधाले सुन्यो र 'के गरू' भन्ने सोचेर 'मेरो हृदयमा निश्चय भएको यही योग्य कुरो म भन्छु' ॥ ११३ ॥ व्याधाले यस्तो सोचेर शोकाएकी दुब्ली मृगीलाई भन्यो—हे भाग्यमानी हरिणी ! जसरी मलाई विश्वास हुन्छ त्यसै गरी साँचो भन ॥ ११४ ॥ त्यस व्याधाका त्यस्तो कुरो सुनेर दुःखले दुब्लाएको हरिणीले व्याधाको अगाडि बारम्बार साँचो प्रतिज्ञा गरी ॥११५॥ मृगीले भनी—जो क्षत्रिय लडाइँ सुनेर पनि संग्राममा जाँदैन, यदि तिम्रो घरमा आइनँ भने

मृग्युवाच ॥ क्षत्रियस्तु रणं श्रुत्वा संग्रामे यो न गच्छति ॥ तस्य पापेन लिप्स्यामि यदि नायामि ते गृहम् ॥ ११६ ॥ भेदयन्ति तडागानि वापीनाञ्च गवामपि । मार्गस्थादञ्च ये घ्नन्ति सर्वसत्त्वभयंकराः ॥ ११७ ॥ तेषां वै पातकम्मह्यं यदि नायामि ते गृहम् ॥ एतच्छ्रुत्वा तु व्याधेन साऽपि मुक्ता मृगी तदा ॥११८॥ जलम्पीत्वा तु बहुशो गता सद्यो यथागतम् । जालिमध्ये स्थितस्याऽस्य द्वितीयः प्रहरो गतः ॥ ११९ ॥ त्रुटित्वा बिल्वपत्राणि पुनर्देवे त्वयोजयत् ॥ पीडितोऽतीव शीतेन क्षुधया गृहचिन्तया ॥ १२० ॥ शिवशिवेति जल्पन् वै न निद्रामुपलब्धवान् ॥ कृतं सुरार्चनं तेन प्रहरे प्रहरे गते ॥ १२१ ॥ वीक्ष्य चैव दिशास्सर्वास्सत्त्वमार्गं

त्यस्ताका पापले म लिपिऊँ ॥११६॥ पोखरी, वापी (गहिरा घाटे पोखरी), गोचर, बाटाघाटा जो भस्काउँछन्, जो प्राणी मार्छन, सारा प्राणी मार्नाले भयंकर आकृतिका छन् ॥ ११७ ॥ यदि म तिम्रो घरमा आइनँ भने तिनीहरूको पाप मलाई होस् । यो कुरो सुनेर तब त्यस व्याधाले उस मृगीलाई पनि छोडिदियो ॥ ११८ ॥ र त्यो मृगी खूब पानी पिएर जसरी आएका थिई उसै गरी तुरुन्तै गई । यत्तिकैमा झालका बीचमा रहने भएका उसको दोस्रो पहर पनि गयो ॥११९॥ तब उसले बेलका पात तोडेर फेरि भगवान्माथि चढायो । जाडाले, भोकले र घरको चिन्ताले असाध्यै दुःखी भएको उसले ॥१२०॥ शिव-शिव यस्तो भन्दाभन्दै निदाउन पाएन । प्रहर-प्रहर जाँदा उसद्वारा भगवान्को पूजा गरियो ॥ १२१ ॥ शिकारमै ध्यान भएको व्याधाले यस्ता पकारले पाणीको बाटो हेर्दै सारा दिशा निहार्दा तब ठला-ठला आँखा भएको,

निरीक्षयन् ॥ लुब्धकेनाऽथ दृष्टोऽसौ हरिणः स्फुरितेक्षणः ॥ १२२ ॥ विलोक्यन्दिशस्सर्वा मार्गमाणो मृगीपदान् ॥ सौभाग्यबलदर्पाढ्यो मदनोन्मत्तपीवरः ॥ १२३ ॥ तं दृष्ट्वा बाण-मुद्यम्य आकर्णं तुष्टचेतसा ॥ बाणम्मुञ्चति यावद्वै तावद्दृष्टो मृगेण तु ॥ १२४ ॥ कालरूपं तु तं दृष्ट्वा मृगश्चिन्तितवान् भृशम् ॥ निश्चयो भविता मृत्युर्गोचरोऽस्य गतो यतः ॥ १२५ ॥ भार्या प्राणसमा मेऽद्य व्याधेनेह निपातिता ॥ तया विरहितस्याऽद्य न नं मृत्युर्भविष्यति ॥ १२६ ॥ हाहा कालकृतं पापं यद्भार्य्या दुःखमागतम् ॥ भार्य्यया न समं सौख्यं गृहेऽपि च वनेऽपि च ॥ १२७ ॥ तया विना न धर्मोऽस्ति नार्थकामौ विशेषतः ॥ वृक्षमूलेऽपि दायता तत्र तिष्ठति

मृगीका गोडोको अनुसरण गर्नें, चारैतिर हेर्दै आइरहेको, सुन्दरता बल र घमण्डले चूर भएको, रतिको इच्छाले उन्मत्त मोटो उस हरिणलाई पनि देख्यो ॥ १२२-२३ ॥ त्यस मृगलाई देखेर खूब खुशी दिलले कानसम्म बाण खिचेर जसै काण छोड्न आँटेथ्यो त्यत्तिकैमा उस मृगले त्यसलाई देख्यो ॥ १२४ ॥ साक्षात् यमराज जस्तै त्यस व्याधालाई देखेर मृग अत्यन्तै पिरियो र सोच्यो–यस व्याधाद्वारा म देखिएँ, यसकारण अवश्यै अब मेरो मृत्यु हुन्छ ॥ १२५ ॥ प्राणतुल्य प्यारी भार्यालाई पनि आज यस व्याधाले मार्‍यो होला । उसले बिछोडिएको मेरो आज अवश्यै मरण हुनेछ ॥ १२६ ॥ हाय ! कुनै समयमा गरिएका पाप्ले गर्दा यो स्त्रीविरहरूपी दुःख आइपर्‍यो । घरमा र वनमा पनि स्त्रीका साथ रहनुसमान अर्को छैन ॥ १२७ ॥ स्त्री-विना कुनै धर्म छैन, झन् धन र काम (रति) त बेकारै छ । रूखमनि पनि त्यहाँ स्त्री साथमा छ

तद्गृहम् ॥ १२८ ॥ प्रासादोऽपि तया हीनः कान्तारादतिरिच्यते ॥ धर्म्मकामार्थकार्य्ये च भार्य्या पुंसस्सहायिनी ॥ १२९ ॥ विदेशे च गते वाऽपि सा वै विश्वासकारिणी ॥ नास्ति भार्य्या समा बन्धुर्नास्ति भार्य्यासमं सुखम् ॥ १३० ॥ नास्ति भार्य्यासमम् लोके नरस्यार्त्तस्य भेषजम् ॥ यस्य भार्य्या गृहे नास्ति साऽपि च प्रियवादिनी ॥ १३१ ॥ अरण्यं तेन गन्तव्यं तथारण्यं यथा गृहम् ॥ एका प्राणसमा मे ऽभूद्द्वितीया प्राणदा मम ॥ १३२ ॥ इत्येवञ्चिन्तयित्वा तु लुब्धकम्वाक्यमब्रवीत् ॥ १३३ ॥ मृग उवाच । शृणु व्याध नरश्रेष्ठ आहारामिषभोजन ॥ यत्ते पृच्छाम्यहं वीर तद्युक्तं

भने त्यो घरमै रहेजस्तो हुन्छ ॥ १२८ ॥ स्त्रीले हीन छ भने दरवार महल पनि भयंकर जंगलभन्दा ज्यादे हुन्छ । धर्म, सन्तान उत्पादन, द्रव्य उपार्जनमा पनि स्त्री पुरुषका सहायिका हुन्छे ॥ १२९ ॥ परदेश गएको वेलामा पनि त्यो विश्वास गरिने हुन्छे । भार्यावरावर अर्को बन्धु छैन, भार्याका साथ रहनु बरावर अर्को सुख छैन ॥ १३० ॥ संसारमा दुःखी मनुष्यको दुःखको औषधि स्त्रीबरावर अर्को छैन, पिय बोल्ने त्यस्ती भाया घरमा जसको छैन ॥ १३१ ॥ त्यसले जंगलमा गए हुन्छ, उसका लागि जंगल र घर जस्तै हो । यौटी त मेरो प्राणतुल्य प्यारी थिई र अर्की मलाई प्राणै दिनेवाली अर्थात् मभन्दा हुरुक्क हुनेवाला थिई ॥ १३२ ॥ यसरी यस्तो चिन्ता गरेर उस मृगले व्याधालाई क्यै कुरो भन्यो—॥ १३३ ॥ मृगले भन्यो—मासुको आहारा नै भोजन गर्नें, व्याधा मान्छेमा श्रेष्ठ ! अर्थात् अति ठूला व्याधा !

वद मे प्रभो ॥ १३४ ॥ आगतं हरिणी - युग्मं केन मार्गेण तद्गतम् ॥ त्वया विनाशितं वाऽद्य सत्यं कथय मेऽधुना ॥ १३५ ॥ तस्य तद्वचनं श्रुत्वा लुब्धको विस्मयङ्गतः ॥ असावपि न सामान्यो देवता कोऽप्यनुत्तमः ॥ १३६ ॥ उवाच लुब्धकस्सत्यं तस्याऽग्र वाक्यमुत्तमम् ॥ ते गते तेन मार्गेण कृत्वा तु शपथं मम ॥ १३७ ॥ ताभ्यां दत्तोऽसि भुक्त्यर्थं मम त्वमधुनाऽनघ ॥ सम्प्रति त्वां हनिष्यामि नैव मोक्ष्यामि कर्हिचित् ॥ १३८ ॥ मृग उवाच ॥ तत्सत्यं कीदृशं ताभ्यां वाक्यमुक्तं तवाऽथनः ॥ १३९ ॥ येन ते प्रत्ययो जातो मुक्तं तत् हरिणीद्वयम् ॥

पा० ३२०

चि.प्र०

सुन ! हे वीर ! तिमीलाई म जो सोद्धछु, हे पभु ! त्यो मलाई ठीक-ठोक भनिद्यौ ॥ १३४ ॥ जोडा हरिणी आएका थिए, तो कुन बाटोबाट गए ? अथवा आज तिमीले नै खराप पाऱ्यौ ? यतिखेर मलाई साँचोसित भनिद्यौ ॥ १३५ ॥ त्यस मगको त्यो कुरो सुनेर व्याधा छक्क पऱ्यो ! पक्कै यो पनि सामान्य मृग होइन. कुनै अति उत्तम देवता नै हो ॥ १३६ ॥ भनिठानेर व्याधाले उस मृगको साम्नु साँचो उत्तम कुरो भन्यो–ती दुवै त्यस बाटोबाट मेरो लागि किरिया हालेर गए ॥ १३७ ॥ हे छलकपट नभएका मग ! अहिले भरखरै ती दुइले मेरो भोजनका लागि तिमीलाई दिएका छन्, अब म तिमीलाई बाणले हान्छु, क्यै गरे पनि छोड्दिनँ ॥ १३८ ॥ तब मृगले भन्यो–त्यो साँचो किरिया कस्तो थियो ? ती दुइले तिम्रो साम्नु कस्तो कुरो भने ? ॥ १३९ ॥ जुन सत्य किरियाले तिमीलाई पत्यार पऱ्यो र ती दुवै हरिणीलाई तिमीले

ते गते केन मार्गेण ये मुक्ते व्याध तेऽधुना ॥ १४० ॥ व्याध उवाच ॥ ते गते तेन मार्गेण स्वमाश्रमपदं प्रति ॥ व्याधेन कथितास्ताभ्यां शपथा ये कृतास्तदा ॥ १४१ ॥ तच्छ्रुत्वा वचनं तस्य हरिणो हृष्टमानसः ॥ १४२ ॥ मृग उवाच ॥ ताभ्यां व्याध यदुक्तन्तु तत्करोमि न चान्यथा ॥ प्रभाते त्वद्गृहं नूनमागमिष्यामि निश्चितम् ॥ १४३ ॥ भार्या ऋतुमतीमस्ति कामार्ताऽप्यधुना भृशम् ॥ गत्वा गृहेषु भुक्त्वा तामापृच्छ्य च सुहृज्जनान् ॥ १४४ ॥ शपथैरागमिष्यामि गृहं ते नाऽत्र संशयः ॥ मद्गेहं स्वगृहानद्य नेतुं शक्तः कथञ्चन ॥ १४५ ॥ लुब्धक उवाच । असत्यम्भाषसे

तिमीले छोडिदियौ ! हे व्याधा ! तिमीद्वारा अहिले जो हुई हरिणी छोडिए ता हुवै कुन बाटोबाट गए ? ॥ १४० ॥ तब व्याधाले भन्यो—ती हुवै त्यसै बाटोबाट आफू रहने ठाउँतिर गए । त्यतिखेर ती हुइले जो किरिया हालेका थिए, व्याधाले त्यो सब भनिदियो ॥१४१॥ त्यसको त्यो वचन सुनेर खुशी मन भएको हरिणले भन्यो–॥ १४२ ॥ हे व्याधा ! ती हुइले जो भने त्यो म पनि गर्छु, फरक पर्नेछैन । विहान तिम्रो घरमा म एकदम पक्का आउनेछु ॥ १४३ ॥ किनकि स्वास्नी परसरेकी छ, त्यसकारण यतिखेर असाद्धै रतिका लागि छटपटाएको छ, यसउसले म घरमा गएर, उसको छटपटाइ हरेर, मित्रहरूलाई सोधीवरा विदावारा भएर ॥ १४४ ॥ सत्ते-सत्ते तिम्रो घर म आउनेछु, यसमा शंका नमान । फेरि मलाई आज यहाँ मारेर मेरो भारी शरीर आफ्नू घरमा कसरी लान सक्लाउ ? ॥ १४५ ॥ तब व्याधाले भन्यो–अरे ठग !

धूर्त्त प्रतारयसि मां वृथा ॥ ज्ञात्वा मृत्युं स्थितं तत्र तदा गच्छति कोऽल्पधीः ॥ १४६ ॥
व्याधस्य वचनं श्रुत्वा हरिणो वाक्यमब्रवीत् ॥ शपथैरागमिष्यामि यथा ते प्रत्ययो भवेत्
॥ १४७ ॥ व्याध उवाच ॥ मृग त्वं शपथान्ब्रूहि विश्वासो मे भवेद्यथा ॥ यथाहि प्रेषयामि त्वां
स्वगृहम्प्रतिकामुकम् ॥ १४८ ॥ मृग उवाच ॥ भर्तारं वञ्चयेद्यास्त्री गुरुद्रोहं करोति यः ॥ १४९ ॥
विरसन्तु रसन्दद्यात् प्रेमभंगं करोति यः ॥ भेदयेद्यस्तडागानि प्रसादम्पातयेत्तु यः ॥ १५० ॥
प्रवादशीलो यो विप्रः क्रयविक्रयकारकः ॥ सन्ध्या - स्नानविहीनश्च वेदशास्त्रविवर्ज्जितः ॥ १५१ ॥

तँ झूठो बोलिरहेको छस्, मलाई बेकार छक्याइरहेको छस ! मृत्युलाई खडा रहेको जानी-जानीकन त्यहाँ तब कुन मूर्ख आउँछ ? ॥१४६॥ व्याधाको कुरो सुनेर 'जेले तिमीलाई पत्यार पर्छ त्यो किरिया हालेर म अवश्यै आउनेछु' भन हरिणले कुरो भन्यो ॥ १४७ ॥ तब व्याधाले भन्यो—जसरी कामुक तिमीलाई तिम्रो आफ्नू घरतिर म पठाइरहेको छु, त्यसै गरी हे मृग ! जसरी मलाई तिम्रो अवाइमा विश्वास हुन्छ, तिमी त्यस्ता किरियाहरू भन ! ॥ १४८ ॥ तब मृगले भन्यो—जो स्त्री लोग्नेलाई ठग्छे, जो मनुष्य मालिकलाई ठग्छ, जो विश्वासी मित्रलाई ठग्छ, जो गुरुसित द्रोह गर्छ ॥ १४९ ॥ जो खराब चीज लाई असल चीज भनेर दिन्छ, जो प्रेममा फाटो पार्ने गर्छ जो पोखराहरू भत्काउँछ, जो बडे-बडे महल गिराउँदछ ॥ १५० ॥ जो बाहुन फट्याइँ गर्छ, खराद-बिक्री गर्छ, पाठ-पूजा-सन्ध्या-स्नानले हीन छ, वेदशास्त्रको ज्ञान नभएको छ ॥ १५१ ॥ जो रक्सी पिउँछन्, स्त्रीमा लंपट छन, जो अर्काको निन्दा चियोचर्चामा लागिपर्छन, जो बाहुन

मद्यपास्स्त्रीषु रक्ता ये परनिन्दारताश्च ये ॥ परस्त्रीसेवका विप्राः परपैशून्यसूचकाः ॥१५२॥ शूद्रान्न-
भोजिनो ये च भार्य्यापुत्रान्त्यजन्ति ये ॥ वेदनिन्दापरा ये च वेदशास्त्रार्थनिन्दकाः ॥ तेषां वै
पातकम्मह्यं यदि नायामि ते गृहम् ॥ १५३ ॥ भार्य्यां संग्रहणी यस्य मृतशौच-विवर्जिता ॥
सर्वाशीः सर्वविक्रेता द्विजानामपि निन्दकाः ॥ १५४ ॥ त्रिषु वर्णेषु शुश्रूषां यश्शूद्रो न
करोति वै ॥ विप्रवाक्यम्परित्यज्य पाखण्डाभिरतास्सदाः ॥ १५५ ॥ ब्रह्मचर्यरताश्शूद्रा ये च
पाखण्डसंश्रिताः । तेषां व पातकं मह्यं यदि नायामि ते गृहम् ॥ १५६ ॥ तिलास्तैलं घृतं क्षौद्रं

अर्काका स्त्रीलाई हायपात गर्छन्, अर्काको चुगलखोरा गर्छन् ॥१५२॥ जो ब्राह्मणहरू शूद्रले छोएको सिद्ध अन्न खान्छन्, जो स्वास्नी छोरा-छोरालाई त्याग्छन्, जो वेदको निन्दामा लागेका छन्, वेद शास्त्रका अर्थको निन्दा गर्छन्, ती सबैको पातक अपराध यदि म तिम्रो घरमा आइनँ भने मलाई लागोस् ॥ १५३ ॥ ल्याइता स्वास्नी हुने, चोखीनिती नगर्ने, जे पन घिच्ने, जे पनि बेच्ने, ब्राह्मणहरूको निन्दा गर्ने ॥ १५४ ॥ जो शूद्र भैकन तीनै वर्ण ब्राह्मण-क्षत्रिय-वैश्यको सेवा गर्दैन, ब्राह्मणको वचन नमानेर, असल प्रिय कुरो बोल्न छाडेर सधैं नचाहिने, गर्नु नहुने काममा लाग्ने ॥ १५५ ॥ जो शूद्र भएर ब्रह्मचर्यव्रतमा रहने, मनपरी गर्न रमाउने हुन्छ, ती सबैको पातक अपराध यदि म तिम्रो घरमा आइनँ भने

लवणं सगुडं तथा ॥ लोहं लाक्षादिकं सर्वरङ्गाननानाविधानपि ॥ १५७ ॥ विक्रेयानीति शूद्रेण तत्र दोषो न विद्यते ॥ मद्यं मांसं विषं दुग्धन्नोलञ्च वृषभन्तथा ॥ १५८ ॥ मोनं क्षीरं सर्वकूटं चिन्तानकफलानि च ॥ मद्यादिविक्रयेद्यस्तु शूद्रोऽपि मदमोहितः ॥ १५९ ॥ आदित्य-विष्णुमीशानं गणाध्यक्षन्तु पार्वतीम् ॥ एताँस्त्यक्त्वा गृहे मूढो यो न पूजयते नरः । तस्य पापेन लिप्स्यामि यदि नायामि ते गृहम् ॥ १६० ॥ यो गाः स्पृशति पादेन उदितेऽर्के च सुप्यति ॥ एकाको मिष्टमश्नाति तस्य पापञ्चराम्यहम् ॥ १६१ ॥ मातापित्रोरपोष्टा च

मलाई लागोस् ॥१५६॥ तिल, तेल, घिउ, मह, नून, गुड, फलाम, सबै किसिमका लाहा, नाना प्रकारका रङ, ॥ १५७॥ शूद्रले बेच्न सक्छ, त्यसमा उसलाई कुनै दोष लाग्दैन । भलै जो मूद्र भएर पनि मद (घमण्ड)-ले मात्तिएर माछा, दूध, सबै प्रकारका मइन, चिन्तानक फलहरू, मात लाग्ने चीजहरू बेचोस् ॥ १५८-१५९ ॥ तर जो मूर्ख मानिस–सूर्य, विष्णु, महादेव, गणेश, पार्वती यिनीहरूलाई त्यागेर घरमा पूजा गर्दैन यदि म तिम्रा घर आइनँ भने त्यसैको पापले लिपिऊँ ॥ १६० ॥ जो गाईलाई लात्तले हान्छ या गोडाले छुन्छ, जो सूर्य उदाएको वेलामा सुतिरहन्छ, एकलै माठो खान्छ, त्यसको पाप म भोग्नेछु ॥ १६१ ॥ आमा-बाबूलाई नपाल्ने, कामको बिङ्गा लाएर माग्ने, कन्या बेचेर जीविका गर्ने, देउता

क्रियामुद्दिश्य याचकः ॥ कन्याशुल्कोपजीवी च देवब्राह्मणनिन्दकः ॥ १६२ ॥ गोग्रासं इन्तकारं
च अतिथीनाञ्च पूजनम् ॥ य न कुर्वन्ति गृहिणस्तेषां पापम्भवेन्मम ॥ १६३ ॥ वृन्ताकानि
पटोलानि कालिङ्गन्तुम्बकानि च ॥ मूलकं लशुनम् कन्दं कुसुम्भं कनशाकम् ॥ १६४ ॥
एतानि भक्षयेद्यस्तु नरो चै ज्ञानदुर्बलः ॥ तस्य वै जायते शुद्धिश्चान्द्रायणशतैरपि ॥ १६५ ॥
एतेषां पातकं मह्यं यदि नायामि ते गृहम् ॥ यः पठेत्स्वरहीनञ्च लक्षणेन विवर्जितम् ॥ १६६ ॥
रथ्यासु सञ्चरन्विप्रो वेदानुद्गारयेत् तु यः ॥ विप्रस्य पठतः क्वाऽपि शृणोति यदि वाऽन्त्यजः ॥
वेदोपजीविको विप्रोऽतिलोभान्छूद्रभोजनः ॥ तस्य पापेन० ॥ १६७ ॥ सन्ध्याहीने व्रतभ्रष्टे

र वाहुनको निन्दा गर्ने ॥१६२॥ गोग्रास नदिने अर्थात् गाईको भाग पर नसारी खाने, वलिवैश्वदेव नगर्ने, पाहुनाको स्वागत सम्मान नगर्ने जो गृहस्थीहरू छन् तिनीहरूको पाप मलाई लागोस् ॥ १६३॥ सेतो भन्टा, गोलभेडा, कोभी (काउली), डल्लो लौका, रातो मूला (गाजर), लशुन, प्याज, कुसुम, काने साग ॥१६४॥ यी वस्तुहरू जो मनुष्य पनि नजानेरै खान्छ, जुन यस दोषको शुद्धि सयकडौं चान्द्रायणले मात्रै हुन सक्छ, ॥१६५॥ यस्ता चीज खानेहरूको जो पातक अपराध छ, यदि म तिम्रो घरमा आइनँ भने ती पाप मलाई लागून् ॥ जो जन जुन पढाइ जसरी पढनुपर्ने हो त्यसै गरी स्वर नमिलाई पढ्छ ॥ १६६ ॥ जो वाहुन गल्लीमा, बाटामा हिंड्दा पनि वेद फलाक्छ, अथवा वाहुनले पढिन थालेको वेद कुनै उपायले शूद्र सुन्दछ, या जो वाहुन वेदलाई नै पेशा बनाएर जीविका चालाउँछ अथवा लोभले शूद्रको भोजन गर्छ, यदि म तिम्रो घरमा आइनँ भने त्यस्ताको पापले पोतिऊँ ॥१६७॥ जो वाहुन गायत्री जप्तैन, नियममा चल्दैन, वेद पढ्दैन यदि म तिम्रो घर आइनँ

विप्रे वेदविवर्जिते ॥ तेन पापेन० ॥ १६८ ॥ शूद्रान्नेषु च ये शक्ताश्शूद्रसम्पर्कदूषिताः ॥ तेषां पापेन० ॥ १६९ ॥ लेखकश्चित्रकर्ता च वैद्यो नक्षत्रसूचकः । कूटकर्ता द्विजो यश्च तस्य पापस्य भाग्यहम् ॥ १७० ॥ कूटसाक्षी मृषा वादी परद्रव्यस्य तस्करः ॥ परदाराभिगामी च य च विश्वास-घातकाः ॥ १७१ ॥ द्रव्य द्रव्यं विनिक्षिप्य पानकूटसमाश्रिताः ॥ वश्यारतास्सदा ये च दानं दातुर्निवारकाः ॥ १७२ ॥ भर्तारमर्थहीनञ्च कुरूपं व्याधिपीडितम् ॥ या न पूजयते नारी रूप-यौवनगर्विता ॥ १७३ ॥ एकादशीन्तथा माघ या सा शिवचतुर्दशी ॥ पूर्वविद्धाम्प्रकुर्वन्ति तेषां

भने त्यस्ताको पापले पोतिऊँ ॥ १६८ ॥ जो बाहुन भैकन शूद्रका भोजनमा हिरिक्क हुन्छन्, जो हमेशै शूद्रको सम्पर्कले अपवित्र भएका छन् यदि म तिम्रो घरमा आइनँ भने तिनको पापले पोतिऊँ ॥१६९॥ जो बाहुन लेखक भएर, चित्र बनाएर ओखती गर्नें वैद्य भएर, चिना टिप्पन बनाएर, अथवा भावी बताएर, जालसाजी गरेर जीविका गर्छ यदि म तिम्रो घर आइनँ भने त्यसैको पापको भागी होऊँ ॥ १७० ॥ झूटो गवाही दिने, झुट्टा बोल्ने, अर्काको धन चोर्नें, अर्कको स्वास्नी सञ्चाकसुटुक वा खुलेआम राख्ने र जो विश्वासघात गर्नें छन् ॥१७१॥ र जो यौटा धातुमा अर्को धातु मिसाएर खोटा टक्का बनाएर ठग्ने गर्छन, जो हमेशा वेश्यामा लम्पट रहन्छन्, दिन लागेको दान रोक्दछन् ॥ १७२॥ र जो नारी रूप र जवानाले उम्लिएर धन सकिएयो या नराम्रो अथवा रोगी पतिलाई पुज्दिन ॥ १७३ ॥ जो मानिसहरू हरेक एकादशी अनि माघमा

पापस्य भाग्यहम् ॥ १७४ ॥ अथ किं बहुनोक्तेन भो लुब्धक तवाग्रतः ॥ यदि नायामि ते गेहं मम सत्यं भवेद्धि तत् ॥ १७५ ॥ तेन वाक्येन सन्तुष्टो व्याधो वै वीतकल्मषः ॥ संहृत्य धनुषो बाणं मृगो मुक्तो गृहं प्रति ॥ १७६ ॥ जलं पीत्वा तु हरिणः प्रवृष्टो गहनं वनम् ॥ गतोऽसौ तेन मार्गेण यातं येन मृगीद्वयम् ॥ १७७ ॥ लुब्धकेन तदा तत्र जालमध्ये स्थितेन हि ॥ प्रत्यूषे बिल्वपत्राणि त्रोटयित्वा प्रतर्प्य च ॥ १७८ ॥ शिवशिवेति जल्पन् वै आशु यातो निजाश्रमम् ॥ यथोदिते सूर्यबिम्बे अकामाज्जागरे कृते ॥ पापान्मुक्तोऽप्यसौ सद्यश्शिव-

---

(पछले फागुन कृष्णमा) जो त्यो पूर्वविद्ध शिवचतुर्दशी (शिवरात्रि) को व्र। विधिपूर्वक गर्दैनन् यदि म तिम्रो घर आइनँ भने त पापीहरूका पापको भागी म हूँ ॥ १७४ ॥ हे व्याधा, तिम्रा अगाडि अब म धेरै के भनिरहूँ यदि म तिम्रो घरमा आइनँ भने मैले भनेका ती सबै किरिया मेरो उपर साँचा होउन ॥१७५॥ त्यसका कुराले सन्तुष्ट भएको, त्यस दिनको उपवास, जाग्राम, पूजा, मृगका धुमाउरा धर्मोपदेशहरूले पाप पखालिएको व्याधाले कमानबाट काण उतारे र घर जानका लागि त्यस मृगलाई छोडिदियो ॥ १७६ ॥ अनि त्यो हरिन पनि पानी पिएर घना जंगलमा पस्यो । उ त्यसै बाटोबाट गयो जुन बाटोबाट दुइटा मृगी गएका थिए ॥ १७७ ॥ तब त्यहाँ झाडको बीचमा रहेको व्याधाले बिहानपख बेलका पात चुँडेर, शिवलिङ्गमाथि चढाएर ॥१७८॥ शिव-शिव_यस्तो भन्दै चाँडै नै आफ्नो झोपडीतिर जाने सुरसार गर्न थाल्यो । यत्तिकैमा

पूजाप्रभावतः ॥ १७९ ॥ यावद्दिशो निरीक्षेत निराशो भोजनं प्रति ॥ तावच्छिशुवृता चान्या मृगी तत्र समागता ॥ १८० ॥ दृष्ट्वा मृगीन्तदा व्याधो बाणं धनुषि योजयन् ॥ यावन्मुञ्चत्यसौ बाणं तावदुक्तं तया तदा ॥ १८१ ॥ मा बाणं मुञ्च धर्मात्मन्धर्मम्मामुञ्च सुव्रत ॥ अहं न वध्या सर्वेषामिति शास्त्रे विनिश्चयः ॥ १८२ ॥ राजभिर्मिथुनासक्तः सबालो व्याधिपीडितः ॥ न हन्तव्यो मृगः सत्यं मृगी च शिशुनाऽऽवृता ॥ १८३ ॥ अथवा धर्म्ममुत्सृज्य मां हनिष्यसि मानव ॥ बालकं स्वगृहं मुक्त्वा सखीनां च निवेद्य वै ॥ १८४ ॥ शपथैर्गमिष्यामि व्याध

सूर्य उदाए । बिचराले बिना-काम जाग्राम गरियो । यी सब काकताली पर्दा र शिवमा हुन गएको पूजाका प्रभावले गदा उ तुरुन्तै पापबाट मुक्त भयो ॥ १७९ ॥ भोजनमा निराश भएर जब उसले चारै दिशातिर हेऱ्यो, त्यत्तिकैमा पाडा लिएकी अर्की मृगी त्यहाँ आइपुगी ॥ १८० ॥ मृगीलाई देखेर तब व्याधाले धनुमा बाण जोड्दै जसै उसले बाण छोड्न आँटेथ्यो तब त्यत्तिकैमा त्यसले भनी–॥ १८१ ॥ 'हे धर्मात्मा ! बाण नछोड, हे संयमी ! धर्म नछोड, म कसैले पनि मारिन योग्य छैन' भनी शास्त्रमा निश्चय गरिएको छ ॥ १८२ ॥ राजाहरूले पनि जोडा लाग्नमा आसक्त भएको, बालक बच्चा भएको, रोगले सताइएको मृगलाई साँच्चै नै मार्नु हुँदैन, त्यस्तै बालकबच्चावाली हरिणीलाई पनि मार्नु हुँदैन ॥ १८३ ॥ अथवा धर्म छाडेर हे मानव ! मलाई मार्छौ नै भने, बालकलाई आफ्नू घरमा छाडेर, सखीहरूलाई भनसुन गरेर ॥ १८४ ॥ हे व्याध ! ॥

शृणु वचो मम ॥ या स्वभर्तारमुत्सृज्य परपुंसि रता सदा ॥ तस्याः पापेन लिप्स्यामि यदि नायामि त गृहम् ॥ १८५ ॥ मद्यं मांसं विषं दुग्धं नीलं कुम्भफलानि च ॥ एतानि विक्रयेद्यस्तु नरो मोहसमन्वितः ॥ १८६ ॥ तस्यास्तद्वचनं श्रुत्वा व्याधो विस्मयमागतः ॥ ततो व्याधेन सा मुक्ता गता वै निजमन्दिरम् ॥ १८७ ॥ व्याधोऽपि तत्सरस्त्यक्त्वा जगाम स्वगृहं प्रति ॥ सर्वेषां वचनं न्याय्यं मृगाणां सत्यवादिनाम् ॥ १८८ ॥ एतेषां घातको नित्यमहङ्गच्छामि कां गतिम् ॥ क्रमाद् गृहं समायातो बालकाः क्षुधया वृताः ॥ १८९ ॥ नान्नं मांसं गृहे तस्य भोजनं येन

म मत्ते-सत्ते आउनेछु, मेरो कुरो सुन—जो नारी आफ्नू लोग्नेलाई त्यागेर सधैं परपुरुषमा रमाइरहन्छे, यदि तिम्रो घरमा आइनँ भने त्यस्ता स्त्रीको पापले म पोतिऊँ ॥ १८५ ॥ रक्सी-मासु-विष-दध-नीर-कुसुमफल यी चाज जो मान्छे अविवेकले बेच्तछ यदि म तिम्रो घर आइनँ भने त्यसका पापले पातिऊँ, अर्थात् त्यसलाई लाग्ने पाप मलाई लागोस् ॥ १८६ ॥ त्यसको त्यो कुरो सुनेर व्याधा छक्क पऱ्यो र व्याधाले उसलाई पनि छाडिदियो, तब, ऊ आफ्नू भर गई ॥ १८७ ॥ व्याधा पनि त्यो तलाउ त्यागेर आफ्नो घरतिर गयो—'साँचो बोल्ने ती सबै मृगहरूको कुरो ठीक हो ॥ १८८ ॥ यी सबैलाई रोन्ने मार्ने म कुन गतिमा प्राप्त हुँला' यस्तो सोच्तै विस्तार-विस्तार घर आइपुग्यो, बालकहरू भोकले आकुल थिए ॥१८९॥

जायते ॥ निरामिषन्तु नं दृष्ट्वा निराशास्तेऽभवँस्तदा ॥ १९० ॥ व्याधोऽपि च तदा तत्र तेषां वाक्यानि संस्मरन् ॥ न भोजनन्न निद्राञ्च लभत विस्मयान्वितः ॥ १९१ ॥ आगमिष्यन्ति त नूनं शपथैरपि यन्त्रिताः ॥ न तानहं वधिष्याम्ये सन्त व्रतमनुस्मरन् ॥ १९२ ॥ लुब्धकेन तदा मुक्तो हरिणश्शपथैर्गतः ॥ स्वमाश्रमं तु संप्राप्ते यत्र तद्-हरिणीद्वयम् ॥ १९३ ॥ सद्यः प्रसूता सा चैका द्वितीया रतिलालसा ॥ तृतीयाऽपि समायता बालकैर्बहुभिर्वृता ॥ १९४ ॥ सर्वास्समेता एकत्र मरणे कृतनिश्चयाः ॥ परस्परं प्रजल्पन्तो लुब्धकस्य विचेष्टितम

वा० २२.

शि. व्र०

त्यसको घरमा अन्न मासु केही थिएन नसले भोजन हास् । फर्किले बाबु आइपुग्लान् र खाना पाओला भना बाटो हेरिरहेका तो बालकहरू मासु नलिई आएको उसलाई देखेर तब निराश भए ॥ १९० ॥ तब घरमा आइपुगेपछि त्यस व्याधालाई पनि तिनीहरूको कुरो संझेर आश्चर्यचकित भई न भोक, ननिद्रा नै लाग्यो ॥ १९१ ॥ तब तर्क गर्न लाग्यो—किरियाहरूले जकडिएका ती मृगहरू अवश्यै आउनेछन्, सज्जनहरूको नियम सम्झेर अब म तिनीहरूलाई मार्नेछैन ॥ १९२ ॥ उता, उतिखेर व्याधाले छोडिएकोले किरिया हालेर गएको हरिण आफ्न् आश्रममा पुग्यो, जहाँ ती दुइटी हरिणीये ऊ यौटी तुरुन्तै ब्याई र अर्की रतिको इच्छा गरिरहेको थिई । यत्तिकैमा तेस्री पनि बच्चाहरूले घेरिएर उहीं आइपुगी ॥ १९३-१९४ ॥

॥ १९५ ॥ आयातां हरिणीं भुक्त्वा रूपाढ्यां रतिलालसाम् ॥ कृतकृत्योऽभवत्तत्र ताभ्यां वाक्यमथाऽब्रवीत् ॥ १९६ ॥ युष्माभिरिह संस्थेयं कर्त्तव्यं प्राणरक्षणम् । व्याघ्रादिभ्यो लुब्धकेभ्यो बालकानि प्रयत्नतः ॥ १९७ ॥ अहंमत्यानुगो भार्या यो न भोक्ष्यति सद्व्रतः । भ्रूणहा स तु विज्ञेयस्तस्य जन्म निरर्थकम् ॥ १९८ ॥ सन्तानात्स्वर्गमाप्नोति इह कीर्तिञ्च शाश्वतीम् ॥ सन्ततिर्यत्नतः पाल्या स्वर्गसौख्यप्रदायिका ॥ १९९ ॥ अपुत्रस्य गतिर्नास्ति इह लोके परत्र च ॥ येन केनाप्युपायेन पुत्रमुत्पादयेत्पुमान् ॥ २०० ॥ मया च तत्र गन्तव्यं यत्र व्याधस्य

बा० ३१५

शा. प्र०

थसरी सबै एकै ठाउँ सँगोटिएर व्याधाको घटना परस्परमा भन्दै सबैले मनें निश्चय गरे ॥१९५॥ अनि रतिमा लालसिएर आएकी अति राम्री हरिणीलाई भोगेर उहाँ उ कृतकृत्य (टन्न) भयो र ॥१९६॥ बाघ आदि हिंस्रक जन्तुहरू र व्याधाहरू-देखि सावधानीसँग बच्चाहरूलाई बचाउँदै तिमीहरूले यहीं रहेर प्राणको रक्षा गर्नू ॥१९७॥ पछि लागेकी पत्नीलाई घमण्डले जो मज्जन भोग गर्दैन उसलाई गर्भघाती जान्नु, यदि ऋतुदान दिदैन भने उसको जन्म बेकार छ ॥ १९८ ॥ सन्तान स्वर्ग मिल्दछ, यस लोकमा स्थायी कीर्ति पनि रहन्छ, त्यसकारण, स्वर्ग र सुख दिलाउने सन्तानलाई सावधानीसँग मिहिनेतपूर्वक पाल्नुपर्छ ॥१९९॥ यस लोकमा र परलोकमा पनि अपुताको गति छैन, त्यसकारण जुनकुनै उपायले पनि पुरुषले छोरो जन्माउनुपर्छ ॥२००॥ मैले त जहाँ व्याधाको घर छ उहाँ जानैपर्छ, त्यसलाई पालना गर्नुपर्छ नै, किनकि सत्यमा नै धर्म

मन्दिरम् ॥ सत्यन्तु पालनीयं स्यात्सत्ये धर्मः प्रतिष्ठितः ॥ २०१ ॥ एतच्छ्रुत्वा तु ता नार्य्यो वाक्यमूचुस्सदुःखिता ॥ वयमप्यागमिष्यामस्त्वया सार्द्धं मृगोत्तम ॥ २०२ ॥ तथा त विप्रियं कान्त न स्मरामः कदाचन ॥ पुष्पितेषु वनान्तेषु नदीनां सङ्गमेष च ॥ २०३ ॥ कन्दरेषु च शैलानां युष्माभी रक्षिता वयम् ॥ न कार्यमद्य चास्माकं पीडितेन त्वया विना ॥ २०४ ॥ नारीणां पतिहीनानाञ्जीवितैः किम्प्रयोजनम् ॥ मितं ददाति हि पिता मितं भ्राता मितं सुतः ॥ अमितस्य च दातारं भर्तारं का न पूजयेत् ॥ २०५ ॥

अडेको छ ॥ २०१ ॥ यो कुरो सुनेर असाध्यै दुःखित भएका ती नारीहरूले 'हे मृगश्रेष्ठ ! हामी पनि तपाईका साथ आउनेछौं, यस्तो कुरो भने ॥ २०२ ॥ अनि हे स्वामी, तपाईंको खराबी हामी कहिल्यै पनि चाहँदैनौं, फुलेका जंगलमा नदीका दोभानहरूमा ॥ २०३ ॥ पहाडका गुफाहरूमा तपाईंद्वारा हामी रक्षा गरियौं । उही तिमीलाई छाडेर आज दुःखी हामीहरूको यहाँ रहने काम छैन ॥ २०४ ॥ पति नभएका नारीहरूको बचाइले के प्रयोजन ! बाबु खटाएर दिन्छन्, दाजु-भाइ खटाएर दिन्छन्, छोरो खटाएर दिन्छ, तर नखटाईकन भएभर दिने पतिलाई कुन स्त्री पुज्दिन ॥ २०५ ॥ धनी

अपिक्ष्वयुता नारी बहुपुत्रसुहृद्वृता ॥ सा शोच्या बन्धुवर्गस्य पतिहीना कुलाङ्गना ॥ २०६ ॥
गन्धमाल्यैः स्त्रियो नित्यं प्रीयन्ते भर्तुरग्रतः ॥ ना तन्त्री वाद्यते वीणा नाऽचक्रो भ्रमते रथः
॥ २०७ ॥ नाऽपती सुखमाप्नोति नारीपुत्रशतैर्वृता ॥ नास्ति भर्ता समो धर्मो नास्ति भर्ता सम-
स्सुहृत् ॥ २०८ ॥ नास्ति भर्ता समो नाथस्त्रीणां भर्ता परा गतिः ॥ २०९ ॥ एवं विलप्य तास्सर्वा
मरणे कृतनिश्चयाः । बालकैस्तैस्समायुक्ता भर्तृशोकेन दुःखिताः ॥ २१० ॥ मृगस्तासां वचः
श्रुत्वा हृदि चिन्तापरोऽभवत् ॥ गन्तव्यं किं न गन्तव्यं मया व्याधस्य मन्दिरम् ॥ २११ ॥ एकतः

घेरै छोरा मित्रवर्गले युक्त भएको कुलिन पनि नारी विधवा छ भने बन्धुवर्गद्वारा शङ्किने हुन्छे ॥ २०६ ॥ मालै पात्र लाएका स्त्रीहरू पनि पतिको अगाडि अर्थात् पति भए सधैं प्रसन्न रहन्छन, अर्थात् गहनागुरिया नलाए पनि शोभिन्छन् । विना तारको वीणा बजाइन्न, पहियाँ नभएको रथ गुडदैन ॥ २०७ ॥ त्यस्तै सयकडौं सन्तानले घेरिए पनि पति-विनाकी नारी सुख पाउन्न । नारीका लागि लोग्ने समान धर्म छैन, लोग्ने बराबरको मित्र हुँदैन ॥२०८॥ लोग्ने बराबरको मालिक हुँदैन, स्त्रीहरूका लागि लोग्ने आखिरी गति हो ॥ २०९ ॥ यस्ता प्रकारले विलाप गरेर ती बच्चाहरूले युक्त भएका अनि लोग्नेका शोकले पिरिएका ती सबै स्त्रीहरूले मर्ने नै निश्चय गरे ॥ २१० ॥ ती मृगीहरूको कुरो सुनेर 'म व्याधाको घरमा जाऊँ कि न जाऊँ' भन्ने चिन्ताले मृग हृदयमा आकुल भयो ॥ २११ ॥ एकातिर धर्मको रक्षा गर्दा परिवारको नाश हुन्छ,

सुकृतं रक्षन् कुटुम्बस्य क्षयो भवेत् ॥ तदनिष्टकं न चेद्यामि मम सत्यं क्षयं व्रजेत् ॥ २१२ ॥ वरं पुत्रस्य मरणं भार्यायां आत्मनस्तथा ॥ सत्ये कृते क्षये नित्यमाकल्पं रौरवं व्रजेत् ॥ २१३ ॥ तस्मात्सत्यं पालनीयं नरैश्श्रेयोऽर्थिभिस्सदा ॥ एवं सञ्चिन्त्य हरिणो धर्मान् हृदि मनोरमान् ॥ २१४ ॥ ताभिस्सहैव शनकैः क्षणात्तस्याऽऽश्रमं ययौ ॥ तस्मिं सरसि संस्नाप्य कर्मन्यासञ्चकार ह ॥२१५॥ तल्लिङ्गम्प्रणिपत्याशु हृदि ध्यायन् सदाशिवम् ॥ मानं पानं परित्यज्य मैथुनं भोगमेव च ॥ २१६ ॥ कामं क्रोधं तथा लोभं मायां मोक्षविनाशिनीम् । वन्दयित्वा तु तं देवं लुब्धकोऽभिमुखो

वा० ३३८

त्यो भाठौं नजाऊँ भने मेरो सत्य धर्म नाशिन्छ ॥ २१२ ॥ छोराको मृत्यु निको, पत्नीको अनि आफ्नू समेत मरण वरु निको, तर सत्य नाश गनोले त कल्प नबितेसम्म सधैं रौरव नरकमा जानुपर्छ ॥ २१३ ॥ त्यसकारण कल्याण चाहने मनुष्यहरूले हमेशा सत्यको पालन गर्नैपर्छ भन्ने यस्तो सुन्दर धर्महृदयमा हरिणले सोचेर ॥ २१४ ॥ तुरुन्तै ती पत्नी र बालबच्चाहरूका साथै बिस्तार-बिस्तार त्यस व्याधाको आश्रममा गयो र त्यसै तलाउमा न्वाहेर सांसारिक कर्मको त्याग गऱ्यो ॥ २१५ ॥ अनि तुरुन्तै त्यसै शिवलिङ्गलाई प्रणाम गरेर हृदयमा सदाशिवलाई ध्यान गर्दै मान पान मैथुन भोगविलास, काम, क्रोध, लोभ अनि मोक्ष विनाश गर्ने माया सब

ययौ ॥२१७॥ तस्य भार्य्याश्च पुत्राश्च मरणे कृतनिश्चयाः ॥ अनशनं व्रतं गृह्य पृष्ठलग्नास्समाययुः ॥२१८॥ भार्या पुत्रैः परिवृतो मृगस्तद्देशमागतः ॥ क्षुधितैर्बालकैर्युक्तो लुब्धको यत्र तिष्ठति ॥२१९॥ अथ तं देशमागत्य कुटुम्बेन समन्वितः ॥ पालयन्सत्यवाक्यानि लुब्धकं वाक्यमब्रवीत् ॥२२०॥ मृग उवाच ॥ हन्या मां प्रथमं व्याध पश्चादेताः क्रमेण तु ॥ बालकान् हि ततः पश्चाद्धन्यन्ताम्मा विलम्बय ॥ २२१ ॥ लुब्धकैस्तु मृगा भक्ष्या नास्ति दोषः कदाचन ॥ वयं यास्याम स्वर्लोकं सत्यपूता न संशयः ॥ २२२ ॥ तथा ते सकुटुम्बस्य प्राणपुष्टिर्भविष्यति ॥ एतच्छ्रुत्वा तु

बा० ३९

त्यागेर ती भगवान् शिवलाई ढागी व्याधाका साम्नु गयो ॥ २१६-२१७ ॥ मर्ने निश्चय गरेका त्यसका स्त्री र पुत्रहरू पनि अब उपान्त उपवास लिने व्रत लिएर उसै मृगका पछि लागी व्याधाका घर गए ॥ २१८ ॥ आफ्ना स्त्री र छारा-छोरीले घेरिएको मृग त्यो ठाउँमा आइपुग्यो, जहाँ भोका बाल-बच्चाका साथ व्याधा रहन्थ्यो ॥ २१९ ॥ अनि जहान-बच्चाका साथै त्यस ठाउँमा आएर आफ्न सत्य वचन पालना गर्दै मृगले व्याधालाई यस्तो कुरो भन्यो ॥ २२० ॥ मृगले भन्यो— हे व्याधा ! पहिले मलाई, पछि यी स्त्रीहरूलाई मेलैसित मार ! त्यसपछि ई बच्चाहरूलाई मार, ढिलो नगर ॥ २२१ ॥ मृगहरू व्याधाका खाइने वस्तु हुन्, मृग मार्न उसलाई कहिल्यै दोष छैन। तिमीद्वारा मारियौं भने हामी सत्यले पवित्र भएर स्वर्ग जानेछौं, यसमा कुनै शंका छैन ॥ २२२ ॥ यता परिवार-सहित तिम्रो प्राण-रक्षा पनि हुनेछ। त्यस श्रेष्ठ

वचनं मृगेशपरिभाषितम् ॥ आत्मानं निन्दयित्वा तु लुब्धको वाक्यमब्रवीत् ॥ २२३ ॥
व्याध उवाच ॥ अहो मृग महासत्व गच्छ गच्छ स्वमाश्रमम् ॥ आमिषेण न मे कार्यं यद्वान्यं
तद्भविष्यति ॥ २२४ ॥ जीवानां घातने पापं बन्धने तर्ज्जने तथा ॥ नैव पापं करिष्यामि
कुटुम्बार्थे कदाचन ॥ २२५ ॥ त्वं गुरुर्मम धर्माणां उपदेष्टा मृगोत्तम ॥ गच्छ गच्छ मृगश्रेष्ठ
कुटुम्बेन समन्वितः ॥ २२६ ॥ मया त्यक्तानि शस्त्राणि सत्यधर्म्मसमाश्रितः ॥ २२७ ॥
मृग उवाच ॥ कर्म्मन्यासमहं कृत्वा त्वत्सकाशमिहागतः ॥ हन्यतां हन्यतां शीघ्रं न ते पापं भवि-
ष्यति ॥ २२८ ॥ मया दत्ता पुरा वाचा तया बद्धो न याम्यहम् ॥ एतच्छ्रुत्वा तु वचनं लुब्धको

मृगले भनेको यो कुरो सुनेर आफूलाई निन्दा गर्दै व्याधाले कुरो कह्यो—॥ २२३ ॥ व्याधाले भन्यो—अहो ! हे प्राणीहरूमा श्रेष्ठ मृग ! जाऊ, आपनू आश्रममा जाऊ ! मलाई अब मासुको काम छैन, जो हुने कुरो छ, त्यो भएरै छाड्छ ॥ २२४ ॥ जीवहरूलाई मार्नु, थुन्नु र हकार्नु, लखेट्नु पाप हो ! अब उपान्त परिवारका लागि कहिल्यै पनि पाप गर्ने छैन ॥ २२५ ॥ हे मृगश्रेष्ठ ! मलाई धर्मको उपदेश गर्ने तिमी गुरु भयौ ! हे मृगश्रेष्ठ जाऊ, आपना परिवारका साथै जाऊ ॥ २२६ ॥ अब उपान्त सत्य धर्ममा रहने भएर मैले शस्त्र-अस्त्र त्यागिदिएँ ॥ २२७ ॥ तब मृगले भन्यो—म सारा लौकिक कर्म त्यागेर तिमीभाठौं यहाँ आएको छु, मार ! चाडै मार, हामीलाई मारेर तिमीलाई पाप हुने छैन ॥ २२८ ॥ मैले पहिले म

वाक्यमब्रवीत् ॥ २२९ ॥ लुब्धक उवाच ॥ त्वं बन्धुस्त्वं गुरुः स्त्राता त्वम्मे माता पिता सुहृत् ॥
मया त्यक्तानि शस्त्राणि त्यक्तं मायादिकं बलम् ॥ २३० ॥ कस्य भार्य्या सुता कस्य कुटुम्बश्च
महामृग ॥ तैः स्वकर्म च भोक्तव्यं मृग गच्छ यथासुखम् ॥ २३१ ॥ इत्युक्त्वा स तदा तूर्णं
बभञ्ज सशरं धनुः ॥ मृगम्प्रदक्षिणीकृत्य नमस्कृत्य क्षमापयत् ॥ २३२ ॥ एतस्मिन्नन्तरे नेदु-
र्देवदुन्दुभयो दिवि ॥ आकाशात्पुष्पवृष्टिस्तु पपात सुमनोहरा ॥ २३३ ॥ तदा दूतस्समायातो

वा० ३४१

आउँला भनेर तिमीलाई वचन दिएको थिएँ, त्यसै वचनले बाँधिएको म फर्केर जान्नँ । मृगको यस्तो वचन सुनेर व्याधाले फेरि कुरो भन्यो–॥२२९॥ व्याधाले भन्यो–आजदेखि तिमी मेरा बन्धु हौ, तिमा नै गुरुहौ, तिमी नै रक्षक तिमी नै आमा हौ, तिमो नै मेरा पिता अनि मित्र हौ, मैले अब शस्त्र-अस्त्र त्यागिदिएँ, बलियो माया मोहलाई पनि त्यागिदिएँ ॥ २३० ॥ हे श्रेष्ठ मृग ! यस संसारमा को कसका स्त्री छन्, को कसका छोरा छन, को कसको परिवार छ ? कसैले कसैको कर्मको भोगलाई मेटाउन सक्तैन, ती सबैले आफ्ना कर्मको भोग भोग्नैपर्छ, त्यसकारण, हे मृग ! सुखपूर्वक जाऊ ॥ २३१ ॥ यति भनेर तब उसले तुरुन्तै काणसहितको कमान भाँचिदियो र मृगलाई प्रदक्षिणा गरेर बारम्बार नमस्कार गरेर क्षमा माँग्दो भयो ॥ २३२ ॥ यसै बीचमा अर्थात् व्याधाले धनु-काण भाँचेर मृगलाई प्रदक्षिणा गर्दा स्वर्गमा दौताका दमाहाहरू बजे । आकाशबाट असाढ्ँ राम्रोसित फूलको वृष्टि पनि बर्स्यो ॥ २३३ ॥ तब अति रामो विमानसहित देवदूतहरू उहाँ

विपानं गृह्य शोभनम् ॥ २३४ ॥ देवदूत उवाच ॥ अहो व्याध महासत्त्व सर्वसत्त्वक्षयंकर ॥
विमानमिदमारुह्य सदेहः स्वर्गमाविश ॥ २३५ ॥ शिवरात्रिप्रभावेण पातकं ते क्षयङ्गतम् ॥
उपवासस्तु संजातो निशि जागरणं कृतम् ॥ २३६ ॥ यामे यामे कृता पूजा अज्ञानेन शिवस्य च ॥
सर्वपापविनिर्मुक्तो गच्छ त्वं भद्र मन्दिरम् ॥ २३७ ॥ विमानञ्च समारुह्य सत्याच्चित्रपदं व्रज ॥
मृगराज महासत्त्व भार्य्यापुत्रसमन्वितः ॥ २३८ ॥ भार्य्यात्रितयसंयुक्तो नक्षत्रपदमाप्नुहि ॥
तव नाम्ना तु नक्षत्रं लोके ख्यातम्भविष्यति ॥ २३९ ॥ एतच्छ्रुत्वा तु वचनं लुब्धकेन सम-

---

आइपुगे ॥ २३४ ॥ देवदूतले भन्यो—सारा प्राणीलाई नाश गर्ने हे भयंकर व्याधा ! यस विमानमा चढेर यसै शरीरले स्वर्ग पुग ॥ २३५ ॥ शिवरात्रिका प्रभावले तिम्रो पातक अपराध नाश भयो । शिवरात्रिका दिन तिमीद्वारा उपवास हुन गयो रातमा जाग्राम गरियो ॥ २३६ ॥ नजानीकन नै प्रत्येक प्रहरमा शिवजीको पूजा गरियो, यिनै सब कारणले हे भलादमी ! सारा पापबाट छुटेका तिमी पवित्र ठाउँ शिवलोकमा जाऊ ॥ २३७ ॥ अनि मृगपट्टि हेर्दै हे श्रेष्ठ प्राणी मृगराज ! सत्यका प्रभावले तिमी पनि स्त्री पुत्रले सहितै यस विमानमा चढेर नक्षत्रलोकमा जाऊ ॥ २३८ ॥ तीनोटै भार्यासहितै भएर नक्षत्रको पद पाऊ । तिम्रै नामले संसारमा त्यो नक्षत्र प्रख्यात हुनेछ ॥ २३९ ॥ तब शिवजीले

न्वितम् ॥ विमानं तु तदारुह्य नक्षत्रपदमागतः ॥ २४० ॥ हरिणीद्वयमन्वेतं पृष्टतो मृगमेव च ॥ तारात्रितयसंयुक्तं मृगशीर्षं तदुच्यते ॥ २४१ ॥ बालकद्वितयं चाग्रे तृतीया पृष्ठतो मृगी ॥ पृष्ठतस्यस्य सम्प्राप्ता मृगशीर्षस्य सन्निधौ ॥ २४२ ॥ ऋक्षराट् दृश्यतेऽद्यापि ऋक्षव्योम्नि हयनुमत्तम् । उपवासं करिष्यन्ति जागरेण समन्वितम् ॥ १४३ ॥ यथोक्तं शास्त्रमार्गेण तेषां मोक्षो न संशयः ॥ शिवरात्रिसमं नास्ति व्रतं पापक्षयापहम् ॥ २४४ ॥ तत्कृत्वा सर्वपापेभ्यो मुच्यते नात्र

भन्नुभयो–देवदूतको यस्तो कुरो सुनेर व्याथाले सहितै तब त्यस विमानमा चढेर त्यो मृग नक्षत्रपदमा प्राप्त भयो ॥२४०॥ दुइ हरिणी अगाडि-पछाडि भई त्यो तीन तारा भएको मृगलाई मृगशिरा, कही तानतार, कतै छः आँख्ले, कतै-कतै डण्डी-तराजू भन्दछन् ॥ २४१ ॥ दुइ बालकहरू अगाडि - पछाडी रहेकी तेस्री मृगशिराको पछाडि नगीचै रहेकी छ ॥ २४२ ॥ आज पनि यो नक्षत्रराज नक्षत्रहरू भएको आकाशमा राम्रो तरहले देखिन्छ । त्यसकारण, जाग्राम सहित जो मानिसहरू शिवरात्रिमा उपवास गर्दछन् र ॥ २४३ ॥ शास्त्रमा बताए-अनुसार शिवरात्रिको व्रत गर्दछन् ती सब मुक्त हुन्छन्, यसमा कनै संशय छैन । पाप नाश गर्ने व्रतहरूमा शिवरात्रिको व्रत बराबर अर्को व्रत छैन ॥ २४४ ॥ जुन

संशयः ॥ २४५ ॥ अश्वमेधसहस्रसणि वाजपेयशतानि च ॥ प्राप्नोति तत्फलं सर्वं नात्र कार्य्या विचारणा ॥ २४६ ॥

॥ इति श्रीलिङ्गपुराणे उमामहेश्वरसम्वादे शिवरात्रिव्रतकथा समाप्ता ॥

शिवरात्रिको व्रत गरेपछि सबै पापहरूबाट मानिस मुक्त हुन्छ, यसमा शंका छैन ॥ २४५ ॥ यो शिवरात्रिको व्रत गऱ्यो भने हजार अश्वमेध यज्ञ र सय वाजपेय यज्ञ गरेको त्यो सब फलमानिसले पाउँछ, यसमा कुनै विचार्ने काम छैन ॥ २४६ ॥ भनी शिवजीले पार्वतीलाई, व्यासले सूतजीलाई, सूतजीले शौनकादिहरूलाई सुताउनुभएको कथा हे श्रोतागणहो ! मैले आफ्नू बुद्धि - अनुसार तपाईहरूलाई सुनाएँ ॥ भन्नुहोस् सबैले कैलासवासी - भाँग - धत्तूराशीर - पार्वतीविलासी महादेवको जय ! ॥

॥ इति श्रीलिङ्गपुराणे उमामहेश्वरसंवादे शिवरात्रिव्रतकथा समाप्ता ॥

* ३१—अथ श्रीसूर्यपूजाविधिः *

आचम्य सूर्यायार्घ्यं दद्यात् । अर्घ्यं संस्थाप्य द्वारपूजा कुर्यात् । ऊर्ध्वोदुम्बरके विघ्नाय नमः । महालक्ष्म्यै नमः ॥ सरस्वत्यै नमः ॥ दक्षिणशाखायां पार्श्वे गङ्गायै नमः ॥ पूर्वे माधवाय नमः ॥ दक्षिणे पिङ्गलाय नमः ॥ पश्चिमे दण्डाय नमः ॥ उत्तरे चण्डांशवे नमः ॥ मूलेन जलाभिमन्त्रणं कुर्यात । इति द्वारपूजा । श्रीसूर्ययूजा-प्रारम्भः । आचम्य । दीपं प्रज्वाल्य । कर्मपात्रं कृत्वा । अर्घ्यं संस्थाप्य । आत्मानं पूजासामग्रीं च संप्रोक्ष्य ॥ प्राणायामं विधाय । अक्षतान् गृहीत्वा । अपसर्पन्तु ते भूता ये भूता भुवि संस्थिताः । ये भूता विघ्नकर्तारस्ते नश्यन्तु शिवाज्ञया । इत्यक्षतान् विकिरेत् । उर्ध्वमधस्तात् त्रयण क्षोटिकाऽभिर्भूतानपसार्य संकल्पं कुर्यात् । हरिः ॐ ... संकल्पं कुर्यात् । अद्येत्यादि देशकालौ संकीर्त्य अमुक - नाम्नी देव्यहं मम श्रुति - स्मृति - पुराणोक्त-फलावाप्तये दीप-कलश-गणपति - पूजन - पूर्वक - श्रीसूर्यपूजनस्य पञ्चोपचारेण यथामिलितोपचारेण च पूजनमहं करिष्ये । तत्र पीठपूजा । दीप्तायै नमः ॥ सूक्ष्मायै नमः ॥ जयायै नमः ॥ भद्रायै नमः ॥ विभूत्यै नमः ॥ विमलायै नमः ॥ अमोघायै नमः विद्युतायै नमः ॥ सर्वतोमुखायै नमः ॥

ब्रह्म - विष्णुशिवात्मने नमः ॥ सौम्योग - पीठाय नमः ॥ तत्राष्टदले । पर्वे श्रीसूर्याय नमः ॥ आग्नेये श्वराय नमः ॥ दक्षिणे विवस्वते नमः ॥ पश्चिमे वरुणाय नमः ॥ वायव्ये मित्राय नमः ॥ उत्तरे आदित्याय नमः ॥ ईशाने विष्णवे नमः ॥ मध्ये भास्कराय नमः ॥ इति सम्पूज्य । पुनर्ध्यानम् । अरुणोरुणपङ्कजे निषण्णः कमले भीतिवरौ करैर्दधानः ॥ अनुवाहित - मण्डलश्चिनेत्रो रविरिषोऽवतु मां गृहीतपद्मः ॥ स्वागतं ते महाभाग स्वागतं लोकलोचन । मयाऽऽरब्धन्तु यत् कर्म तस्य साक्षी भव प्रभो । अथाऽऽवाहनम् । आवाहयामि देवेश पद्महस्त सुरार्चित । जपाकुसुमसंकाश पूजार्थं च शिवाय च । ॐ कारस्य ब्रह्माऋषिः परमात्मा देवता देवीगायत्र्युष्णिक्छन्दांसि श्रीसूर्याद्यावाहने विनियोगः ॥ अथाऽऽसनम् । चराचरस्य विश्वस्य आधारस्त्वं महीपते । मया प्रकल्पितं देव आसनं प्रतिगृह्यताम् । पाद्यम् । मयाहृतं तु सलिलं पाद्यार्थं विमलं विभो । कृपया तरणे स्वामिन् पाद्यं मे प्रतिगृह्यताम् ॥ अर्घ्यम् ॥ रक्तचन्दनगन्धाढ्यं गंधाक्षतयवैस्तिलैः । कुशदूर्वाफलैः पूर्णमर्घ्यं मे प्रतिगृह्यताम् । आचमनम् । त्वदर्थे कल्पितं देव पवित्रं स्वादु शीतलम् ॥ तदाचमस्व देवेश द्युमणे पंकजासन । मधुपर्कम् । मधुपर्कं शुभं पुण्यं दध्याज्य-

मधुसाधितम् ॥ सञ्जुषस्व विधानेन कृपया परमेश्वर । पुनराचमनम् । जलेनामृततुल्येन पुनराचमनं कुरु । जगतां शुद्धिहेतुस्त्वं त्राहि मां भवसागरात् । पञ्चामृतस्नानम् ॥ निजोदये च सर्वेषां संस्त्रायक दिने दिने । गङ्गोदकं गृहाणेदं स्नानीयं प्रतिगृह्यताम् । पुनराचमनीयं समर्पयामि श्रीसूर्याय नमः ॥ अङ्गप्रोक्षणं कृत्वा ॥ अथ वस्त्रम् । वस्त्रं सुरक्तं देवेश दृढशे नूतने शुभे । मयार्पितं सुखोदर्कं गृहाण तिमिरान्तक ॥ यज्ञोपवीतं समर्पयामि श्रीसूर्याय नमः ॥ चन्दनम् । सुगन्धैर्घनसाराद्यैर्निर्मितं देववल्लभम् । यक्षकर्दमसंज्ञेयं गृह्ण गन्धर्ववन्दित । अक्षतान् समर्पयामि श्रीसूर्य्याय नमः ॥ सिंदूरादीन् समर्पयामि श्रीसूर्य्याय नमः ॥ पुष्पाणि । करवीरजपादीनि पुष्पाणि विविधानि च ॥ जात्यादीनि सुगन्धीनि तानि देवेश गृह्यताम् । अथाऽऽभरणम्-भरणानि विचित्राणि बहुमूल्यानि भास्कर । किरीट कुण्डलादीनि मम दीनस्य गृह्यताम् ॥ अथाभरणपूजा । पूर्वादिक्रमेण - मित्राय नमः ॥ विष्णवे नमः ॥ वरुणाय नमः ॥ सहस्रकिरणाय नमः ॥ भानवे नमः ॥ तपनाय नमः ॥ इन्द्राय नमः ॥ रवये नमः ॥ गर्भस्तिने नमः ॥ यमाय नमः ॥ दिनकराय नमः ॥ हिरण्यरेतसे नमः ॥ पुनः । ॐ आदित्याय नमः ॥ प्रागादिक्वेवं ॐ रवये

नमः ॥ ॐ भानवे नमः ॥ ॐ भास्कराय नमः ॥ ॐ उषायै नमः ॥ प्रज्ञायै नमः ॥ संध्यायै
नमः ॥ ब्राह्मचै नमः ॥ माहेश्वर्यै नमः ॥ कौमार्यै नमः ॥ वैष्णव्यै नमः ॥ वाराह्यै नमः ॥ इन्द्राण्यै
नमः ॥ चामुण्डायै नमः ॥ महालक्ष्म्यै नमः ॥ अरुणाय नमः ॥ चन्द्राय नमः ॥ भौमाय नमः ॥
बुधाय नमः ॥ बृहस्पतये नमः शुक्राय नमः ॥ शनैश्चराय नमः ॥ राहवे नमः ॥ केतवे नमः ॥
इन्द्राय नमः ॥ अग्नये नमः ॥ यमाय नमः ॥ निर्ऋतये नमः ॥ वरुणाय नमः ॥ कुबेराय नमः ॥
ईशानाय नमः ॥ अयनाय नमः ॥ ब्रह्मणे नमः ॥ अनन्ताय नमः ॥ वृत्राय नमः ॥
शक्तये नमः ॥ कालदण्डाय नमः । खडगाय नमः ॥ पाशाय नमः ॥ अङ्कुशाय नमः ॥
गदायै नमः ॥ त्रिशूलाय नमः ॥ पद्माय नमः ॥ चक्राय नमः ॥ साङ्गाय सपरिवराय सायुधाय
नमः ॥ धूपम् । वनस्पतिरसोद्भूतो गन्धाढ्यः सुमनोहरः । उपादेयश्च देवानां धूपोऽयं
प्रतिगृह्यताम् ॥ दीपम् । पञ्चवर्तिसमायुक्तं सुदीप्तं घृतपूरितम् ॥ दीपञ्च मम दत्तं त्वं गृहाण
तिमिरान्तक । नैवेद्यम् । पक्वाऽपक्वरसोत्कृष्टं नैवेद्यञ्च चतुर्विधम् । तुष्टिदं सर्वलोकानां नैवेद्यम
प्रतिगृह्यताम् । ताम्बूलम् । प्रीतिदं शुभदं हृद्यं हृद्यवर्णं मुखमण्डनम् । दुर्लभं सर्वदेवानां

ताम्बूलं प्रतिगृह्यताम् ॥ द्रव्यं ॥ हिरण्यगर्भगर्भस्थं हेमबीजं विभावसोः । अनन्तपुण्यफल-
दमतः शान्तिं प्रयच्छ मे । पूगीफलं समर्पयामि श्रीसूर्याय नमः । छत्रचामरशय्यादि-
दानमन्त्रः । यत्किञ्चिद्वस्तु - जातं ते उपनीतं प्रभाकर । छत्रचामरशय्यादि तत्सर्वं प्रतिगृह्य-
ताम् । नीराजनम् । चन्द्रादित्यौ च धरणी विद्युदग्निस्तथैव च । त्वमेव सर्वज्योतींषि आरार्तिम्
प्रतिगृह्यताम् । अथ पुष्पाञ्जलिः । नमस्ते पूर्वरूपाय निलयायात्ममूर्तये ॥ नमः समाधिगम्याय
ब्रह्मविष्णुमहेश्वरैः ॥ अद्वैताय तथैकस्मै मायया बहुरूपिणे । नमः समस्तदीनान्तस्योद्धाराय
विवस्वते । अशेषव्याधिविध्वंसकारिणे करुणात्मने । जगतामादिवैद्याय वैद्यनाथाय ते नमः ।
नमः पद्मविकासेन प्रसृतं ब्रह्ममूर्तये । पुण्डरीक - विकासाय नमस्ते विश्वचक्षुषे । नमोऽस्तु
प्रणवाख्याय ऋग्यजुस्साममूर्तये । छन्दोवाहरथस्थाय श्रुतिघण्टावरूथिने । ज्योतिःशास्त्राय
सूत्राय शिक्षासारथि - वाहिने । कात्यायनप्रतीताय गृह्यरश्मिभृते नमः । नमो व्याकरणोद्गीत-
दृढकङ्कणधारिणे । निरुक्त - चापिने तुभ्यं यज्ञवाणिप्रवर्षिणे । नमो निदाघतोयेन सद्यः
शीतरसायने । नमः कमलकोशान्तधर्मीकृतजगत्त्रयः । श्रीप्रदाय प्रपन्नानामार्तिनाशनहेतवे ॥

नमः सहस्रदीनानामुद्धाराय विवस्वते । भास्वते विश्वसंपूर्तिस्थितिसंहारकारिणे । मनोवाक्काय-
जनितपापतापापहारिणे । विश्वतश्चक्षुरूपस्त्वं यो देवो विश्वतोमुखः । एको देवः स
जातोऽयं द्यावाभूमिं विरोचयत । इति पुष्पाञ्जलिः ॥ अथ नमस्कारः ॥ नमः सवित्र जगदेकचक्षुषे
जगत्प्रसूति - स्थितिनाशहेतवे । त्रयीमयाय त्रिगुणात्मधारिणे विरञ्चिनारायणशंकरात्मने ।
कलात्मसर्वभूतात्मन् वेदात्मन् सर्वतोमुख ॥ यस्मादग्नीन्दुरूपस्त्वमतः पाहि प्रभाकर । नमः
सवित्रे जगदेकचक्षषे त्रयीमयायाऽखिलदेवपूजिते । दीप्तप्रकाशाय सुवर्णचक्षषे सुघोरसंसारभय-
प्रणाशिने । सुघोरसंसारनिमग्नभूतान् जनान् प्रसन्नाँस्तु विवेकदायिने । कालोपमाच्छत्रुभयात्
विमोचयन् संत्राहि तुभ्यं प्रणतोऽस्मि देव । पुनरर्घ्यं दद्यात् । फलपुष्पचन्दनाक्षतदूर्वाभिः ।
एहि सूर्य सहस्रांशो तेजोराशे जगत्पते । अनुकम्पय मां भक्त्या गृहाणार्घ्यं दिवाकर ।
एतत्स्तोत्रादिभिः स्तुत्वा ॥ नमोऽस्तु सूर्याय नमोऽस्तु भानवे नमोऽस्तु वैश्वानरजातवेदसे ।
ममेदमर्घ्यं प्रतिगृह्ण देव देवाधिदेवाय नमो नमस्ते । नमः सहस्रकिरण सर्वव्याधिविनाशन ।
गृहाणार्घ्यं मया दत्तं संज्ञया सहितो रवे ॥ भूमौ दण्डवत् प्रणामं कुर्यात् ॥ एकचक्रो

रथो यस्य दिव्यःकनकभूषितः। स मे भवतु सुप्रीतः पद्महस्तो दिवाकरः। भानो भास्कर मार्तण्ड चण्डरश्मे दिवाकर। आरोग्यमायुर्विजयं विद्यां देहि नमोऽस्तु ते। अथ प्रदक्षिणा। यानि कानि च पापानि जन्मान्तरकृतानि च। तानि सर्वाणि प्रणश्यन्तु प्रदक्षिणपदे पदे। अथोत्तराङ्ग - पूजा। यान्तु देवगणाः सर्वे पूजामादाय पार्थिवीम्। इष्टकामप्रसिद्ध्यर्थं पुनरागमनाय च। गच्छ गच्छ सुरश्रेष्ठ स्वस्थानं परमेश्वर। यत्र ब्रह्मादयो देवाः सुरास्तिष्ठन्ति हर्षिताः। अपराधसहस्राणि क्रियन्तेऽहर्निशं मया। दासोऽयमिति मां मत्वा क्षमस्व परमेश्वर॥ अर्घ्यम् उत्थाप्य। आवाहनं न जानामि न जानामि विसर्जनम्। पूजां चैव न जानामि क्षमस्व परमेश्वर। मन्त्रहीनं क्रियाहीनं विधिहीनं च यद् भवेत्। तत्सर्वं परिपूर्णार्थं क्षमस्व परमेश्वर। संहारमुद्रया पुष्पं गृहीत्वा उत्तरं क्षिपेत्। अद्य ह पूर्वकृत-संकल्पसिद्धिरस्तु अमुकगोत्राय अमुकीनाम्नीदेव्याः सपरिवाराया दीपकलश - गणपति-आवाहनादि - देवपजनकृतस्य श्रीसूर्यस्य यथा मिलितोपचारैः कृतस्य पजनस्य कर्मणः

सांगतासिद्ध्यर्थमिमां दक्षिणां यथानामदवताकं यथा-नामगोत्राय सुपूजिताय ब्राह्मणाय तुभ्यमहं सम्प्रददे तत्सन्न मम। कायन वाचा मनसेन्द्रियैर्वा बुद्ध्यात्मना वा प्रकृतिस्वभावात्। करोमि यद्यत् सकलं परस्मै नारायणायेति समर्पयं तत्। ॐ तत्सत् श्रीसूर्यार्पणमस्तु।

॥ इति श्रीसूर्यनारायणपजाविधिः समाप्तः ॥

* ३२–अथ भौमव्रतपूजाविधिः *

मार्गशीर्षेऽथ वैशाखे भौमदिने व्रतप्रारम्भः ॥ व्रती भौमारुणोदयवेलायां उत्थायाऽऽवश्यकीयक्रियां कृत्वा मौनी भूत्वा अपामार्गकाष्ठैर्दन्तधावनं विधाय आचम्य नद्यादौ गत्वा स्नात्वा रक्तवस्त्रं परिधाय संध्यादि नित्यकर्माणि विधाय भौमाय नमः इति मन्त्रेण भौमायाञ्जलित्रयं दत्त्वा वेदविधिज्ञं ब्राह्मणमाहूय तदाज्ञया भौममर्चयेत् ॥ रक्तवर्णगोर्गोमयेन भूमिं विलिप्य रक्तासनमास्तीर्य तत्र पूर्वाभिमुख उपविश्य ॥ पृथ्वि त्वया धृता लोका देवि त्वं विष्णुना धृता ॥ त्वं च धारय मां देवि पवित्रं कुरु चासनम् ॥ अपसर्पन्तु ये भूता ये भूता भूमिसंस्थिताः ॥ ये भूता विघ्नकर्तारस्ते नश्यन्तु शिवाज्ञया ॥ अपक्रामन्तु भूतानि पिशाचाः सर्वतोदिशम् ॥ सर्वेषामविरोधेन ब्रह्मकर्म समारभे ॥ देवा इहायान्तु ॥ यातुधाना अपयान्तु ॥ विष्णो देवयजनं रक्षस्व ॥ आचम्य प्राणानायम्य ॐ तत्सत् एवं गुणविशेषेण विशिष्टायां इत्यादि अमुकतिथौ अमुक-गोत्रस्य, अमुकराशेः अमुकशर्मणो मम समस्तदुरितक्षयद्वारा

मम ऋणपरिहारार्थं लक्ष्मीप्राप्त्यर्थं भौमव्रतमहं करिष्ये ॥ तदंगतया कलशाराधनं गणाधि-
पतिपूजनं च करिष्ये ॥ दीपं प्रज्वाल्य रक्तवर्णद्वादशशक्तिसहिताय दीपनारायणाय नमः ॥
नमोस्त्वनन्तायेति संपूज्य ॥ कलशे गन्धपुष्पाक्षतैरभ्यर्च्य ॥ वरुणमावाह्य ॥ तत्त्वायामीति
सम्पूज्य ॥ मत्स्यमुद्रयावच्छाद्य । धेनुमुद्रां प्रदर्श्य । पूजाद्रव्याणि सम्प्रोक्ष्य आत्मानं
च संप्रोक्ष्य ॥ आगमार्थं तु देवानां गमनार्थं तु रक्षसाम् ॥ कुर्याद् घंटारवं तत्र देवतानां
समीपतः ॥ घंटानादं कुर्यात् ॥ देवस्य प्राणप्रतिष्ठापनं कुर्यात् ॥ ॐ अस्य श्रीअङ्गारक
प्राणप्रतिष्ठ - महामन्त्रस्य ब्रह्म-विष्णु - महेश्वरा ऋषयः ऋग्यजुः - सामाथर्वाणि छन्दांसि प्राणाः
शक्तिः परमो देवता ह्राँ बीजं ह्रीं शक्तिः क्रोँ कीलकम् अङ्गारक प्राणप्रतिष्ठासिद्ध्यर्थे जपे
विनियोगः ॥ ह्राँ अंगुष्ठाभ्यां ननः ॥ ह्रीं तर्जनीभ्यां नमः ॥ ह्रुँ मध्यमाभ्यां नमः ॥ ह्रैं
अनामिकाभ्यां नमः ॥ ह्रौं कनिष्ठिकाभ्यां नमः ॥ ह्रः करतलकरपृष्ठाभ्यां नमः ॥ एवं
हृदयादिन्यासः ॥ अथ ध्यानम् ॥ रक्ताम्भोधिस्थपीतोल्लसदरुणसरोजाधिरूढो कराब्जैः
शूलं कोदण्डमिक्षूद्भवमणिगुणमप्यंकुशं पञ्चबाणान् ॥ बिभ्राणासृक्कपालं त्रिनयनलसिता-

पीनवृत्तोरुहाढ्या, देवी बालार्कवर्णा भवतु सुखकरी प्राणशक्तिः परा नः ॥ ह्राँ ह्रीँ क्रौँ यँ रँ लँ वँ शँ षँ हँ सः अङ्गारक प्राणाः इह प्राणाः ॥ ह्राँ इत्यादि अङ्गारक जीव इह तिष्ठ ॥ ह्राँ इत्यादि अङ्गारकस्य सर्वेन्द्रियाणि वाङ्-मन-चक्षु-श्रोत्र-जिह्वाघ्राणानि इहैवागत्य सुखं चिरं तिष्ठन्तु स्वाहा । अमृतं वै प्राणा अमृतमापः प्राणाँश्चैव ॥ यथास्थानमुपह्वयते ॥ अश्रुतीते पुनरस्मासु चक्षुः पुनः प्राणमिह नो धेहि भोगम् । ॐ पश्येमसूर्यमुच्चरन्तमनुममतेमृडयानः स्वस्ति ॥ अङ्गारकं रक्तवर्णं रक्तमाल्याम्बरधरं रक्तगन्धानुलेपनं रक्तपुष्पं रक्तछत्रं ध्वजथ-पताकाशोभितं दिव्यरथसमारूढं मेरुप्रदक्षिणां कुर्वाणं भारद्वाजगोत्रं अवन्तिदेशीयं प्रवाला-भरणभूषितं गोधूमधान्यं सांगं सायुधं सवाहनं सशक्तिकं सपत्नीकं सपुत्रं सपरिवारसहित-मधिदेवता प्रत्यधिदेवतासहितमावाहयामि । अस्यां प्रतिमायां इहागच्छेह तिष्ठ ममाऽभिमुखो भव आवाहितो भव, स्थापितो भव, सन्निहितो भव, संनिरुद्धो भव, अवगुण्ठितो भव, मामभीष्टदो भव ॥ अथ ध्यानम् । जपाकुसुमसंकाशं शक्तिशूलं दगाधरम् ॥ मेषसंस्थं रक्तवस्त्रं तं वन्देऽहं धरात्मजम् ॥ ॐ अद्य ते देवदेवेश करिष्ये व्रतमुत्तमम् ॥ दुःखदारिद्र्यनाशाय पुत्रसंतानहेतवे ॥

इति मन्त्रेण भौमं संप्रार्थ्य ॐ अस्य भौममन्त्रस्य विरुपाक्ष ऋषिः, गायत्रीछन्दः, अङ्गारको देवता ममाऽभीष्टसिद्ध्यर्थे जपे विनियोगः ॐ विरूपाक्ष ऋषये नमः शिरसि ॥ ॐ गायत्रीछन्दसे नमः मुखे ॥ ॐ मंगलदेवाय नमः हृदये ॥ ॐ अः अंगुष्ठाभ्यां नमः ॥ ॐ ह्राँ तर्जनीभ्यां स्वाहा ॥ ॐ ह्रं मध्यमाभ्यां वषट् । ॐ सः अनामिकाभ्यां हुँ ॥ ॐ कनिष्ठिकाभ्यां वौषट् ॥ ॐ करतलकरपृष्ठाभ्यां फट् ॥ एवं हृदयादिन्यासः ॥ ॐ मङ्गलाय नमः ॥ पादयोः ॥ ॐ भूमिपुत्राय नमः ॥ जानुनोः ॥ ॐ ऋणहर्त्रे नमः ॥ उर्वोः ॥ ॐ धनप्रदाय नमः ॥ कट्याम् ॥ ॐ स्थिरासनाय नमः ॥ गुह्ये ॥ ॐ महाकालाय नमः ॥ हृदये ॥ ॐ सर्वकर्मावरोधकाय नमः ॥ वामबाहौ ॥ ॐ लोहिताय नमः ॥ दक्षिणबाहौ ॥ ॐ लोहिताक्षाय नमः ॥ गले ॥ ॐ सामगानां कृपाकराय नमः ॥ मुखे ॥ ॐ धरात्मजाय नमः ॥ नासिकायाम् ॥ ॐ कुजाय नमः ॥ नेत्राभ्याम् ॥ ॐ भौमाय नमः ॥ ललाटे ॥ ॐ भूमिदाय नमः ॥ भ्रुवोर्मध्ये ॥ ॐ भूमिनन्दाय नमः ॥ मस्तके ॥ ॐ अङ्गारकाय नमः ॥ शिखायाम् ॥ ॐ यमाय नमः ॥ सर्वशरीरे ॥ ॐ सर्वरोगापहारकाय नमः ॥ मस्तके अङ्गारकाय

नमः ॥ शिखायाम् ॥ ॐ यमाय नमः ॥ सर्वशरीरे ॥ ॐ सर्वरोगापहारकाय नमः ॥ स्तनद्वये ॥
ॐ सृष्टि - कर्त्रे नमः ॥ मूर्द्धादिपादपर्यन्तम् । ॐ पुष्टिकर्त्रे नमः ॥ चरणादि - मूर्द्धान्तम् ॥
ॐ सर्वकामफलप्रदाय नमः ॥ सर्वदिक्षु ॥ ॐ आराय नमः ॥ नाभौ ॥ ॐ वक्राय नमः ॥
वक्षसि ॥ ॐ भूमिजाय नमः ॥ मस्तके ॥ ॐ ह्राँ ह्रँ सः षं ख इति व्यापकं कुर्यात् ॥ ध्यानम् ॥
जपाभं शिवं स्वेदजं हस्तपद्मं गदामूलशक्तिं वरं धारयन्तम् ॥ अविस्थं समुत्थं शुभस्थानसंस्थं
धरानन्दनं रक्तवस्त्रं समीडे ॥ करुणमरुणवर्णं रक्तमाल्यांगरागं कनककमलमाला - मालिनं
विश्ववन्द्यम् ॥ अति - ललितकराभ्यां बिभ्रतः शक्तिकोणम् ॥ गणपतिमभिवन्दे मूषके
संवसन्तम् ॥ ताम्रमयं गणपति - मूर्तिं संस्थाप्य मूलेनानेन देवमावाह्य ॥ एह्येहि भगवन्भौम
अङ्गारक इह प्रभो । त्वयि सर्वं समायातं त्रैलोक्यं सचराचरम् । भौममावाहयिष्यामि तेजोमूर्तिं
दुरासदम् ॥ रुद्ररूपम् मतेर्दृश्यं कचं च रुधिरप्रियम् ॥ अग्निमूर्द्धति मन्त्रेण गायत्र्या मङ्गलस्य
वा ॥ ॐ अङ्गारकाय विद्महे शक्तिहस्ताय धीमहि ॥ तन्नो भौमः प्रचोदयात् ॥ अर्घ्यमादाय ॥
तन्मितान एकविंशतिगोष्ठेषु पूजयेत् ॥ आवाहनम् ॥ आसनम् ॥ पाद्यम् ॥ अर्घ्यम् ॥ आच-

मनीयम् ॥ पञ्चामृतस्नानम् ॥ प्रतिष्ठापनम् ॥ ॐ मंगलाय नमः पादौ पूजयामि ॥ ॐ
भूमिपुत्राय नमः जानुनि पूजयामि ॥ ॐ ऋणहर्त्रे नमः हस्तौ पूजयामि ॥ ॐ धनप्रदाय
नमः ॥ कटिं पूजयामि ॥ ॐ स्थिरासनाय नमः ॥ उरू पूजयामि ॥ ॐ महाकालायाय नमः
उरः पूजयामि ॥ ॐ सर्वकर्मावरोधकाय नमः ॥ वामबाहुं पूजयामि ॥ ॐ लोहिताक्षाय
नमः ॥ कण्ठं पूजयामि ॥ ॐ सामगानां कृपाकराय नमः ॥ मुखं पूजयामि ॥ ॐ धरात्मजाय
नमः नासिकां पूजयामि ॥ ॐ कुजाय नमः ॥ अक्षिणी पूजयामि ॥ ॐ भौमाय नमः ललाटं
पूजयामि ॥ ॐ भूतिदाय नमः ॥ भ्रूवोर्मध्यं पूजयामि ॥ ॐ भूमिनन्दाय नमः ॥ मस्तकं
पूजयामि ॥ ॐ अङ्गारकाय नमः ॥ शिखां पूजयामि ॥ ॐ यमाय नमः ॥ सर्वांगं
पूजयामि ॥ सर्वरोगापहारकाय नमः ॥ बाहुद्वयं पूजयामि ॥ ॐ पुष्टिकर्त्रे नमः ॥
मूर्द्धादिपादपर्यन्तं पूजयामि ॥ सृष्टिहर्त्रे नमः ॥ चरणादि - मस्तकपर्यन्तं पूजयामि ॥ ॐ
सर्वकामफलप्रदाय नमः ॥ दिशः पूजयामि ॥ इति सम्पूज्य ॥ अथेन्द्रान्सम्पूज्य ॥ इन्द्रेहागच्छ
इहा तिष्ठ ॥ पूर्वे इन्द्राय नमः ॥ वज्रायुधसहिताय नमः ॥ शक्त्यायुधसहिताय नमः ।

वा० ३।८

भो पू०

दक्षिणे यमेहागच्छेह तिष्ठ यमाय नमः ॥ दण्डायुधसहिताय नमः ॥ नैर्ऋत्ये निर्ऋते इहागच्छ इह तिष्ठ ॥ खड्गायुधसहिताय नमः ॥ पश्चिमे वरुणेहागच्छेह तिष्ठ वरुणाय नमः ॥ पाशायुधसहिताय नमः ॥ वायव्ये वायो, इहागच्छेह तिष्ठ अंकुशायुधसहिताय नमः ॥ उत्तरे कुबेरेहागच्छेह तिष्ठ ॥ गदायुधसहिताय नमः ॥ ईशाने ईशानेहागच्छेहतिष्ठ त्रिशूलायुधसहिताय नमः ॥ ईशान - पूर्वयोर्मध्ये ॥ ब्रह्मेहागच्छेह तिष्ठ ॥ अब्धायुधसहिताय ब्रह्मणे नमः । निर्ऋतिवरुणयोर्मध्येऽनन्तेहागच्छेह तिष्ठ चक्रायुधसहितायऽनन्ताय नमः ॥ पूर्वे ब्राह्मीमावाहयामि ॥ वायव्ये इन्द्राणीमावाहयामि ॥ उत्तरे चामुण्डामावाहयामि ॥ ईशाने महालक्ष्मीमावाहयामि ॥ इन्द्रादींश्च पूजयेत् ॥ अङ्गारकाय वस्त्र - यज्ञोपवीत आभूषण गन्ध पुष्पाऽक्षत धूप दीप नैवेद्य फल ताम्बूल कर्पूर नीराजन दक्षिणा मन्त्र पुष्पान्तं कुर्यात् ॥ ॐ अस्य अङ्गारकस्तोत्रमन्त्रस्य विरूपाक्ष ऋषिः त्रिष्टुप्छन्दो मंगलो देवता विष्णुः शक्तिः भौमप्रीत्यर्थे स्तोत्रपाठे विनियोगः ॥ मंगलो भूमिपुत्रश्च ऋणहर्ता धनप्रदः ॥ स्थिरासनो महाकायः सर्वकर्मावरोधकः ॥ १ ॥ लोहितो लोहिताक्षश्च सामगानां

कृपाकरः ॥ धरात्मजो कुजो भौमो भूतिदो भूमिनन्दनः ॥ २ ॥ अङ्गारको यमश्चैव सर्वरोगापहारकः ॥ वृष्टिकर्ताऽपहर्ता च सर्वकामफलप्रदः ॥ ३ ॥ एतानि कुजनामानि नित्यं यः प्रयतः पठेत् ॥ ऋणं न जायते तस्य सन्तानं वर्द्धते सदा ॥ ४ ॥ एकविंशति-नामानि पठितानि दिनान्तके ॥ रूपवान् धनवाँश्चैव जायते नात्र संशयः ॥ ५ ॥ एककालं द्विकालं वा त्रिकालं श्रद्धयान्वितः ॥ एवं कृते न संदेहो ऋणं हित्वा सुखी भवेत् ॥ ६ ॥ इति भौमस्तोत्रम् ॥ तथा ताम्रपात्रे जलं सम्पूर्य रक्तपुष्पाक्षतफलानि निक्षिप्य अर्घ्यं दद्यात् ॥ भूमिपुत्र महातेज श्वेतध्वज पिनाकिनः ॥ सुतार्थिने प्रसन्नस्त्वं च गृहाणार्घ्यं नमोऽस्तु ते ॥ इदमर्घ्यं समर्पयामि ॥ रक्त - प्रवालसंकाश जपाकुसुमसंभव ॥ महीसुत महाबाहो गृहाणार्घ्यं नमोऽस्तु ते ॥ इदमर्घ्यं समर्पयामि ॥ एकविंशतिनामभिः नमस्कारान् कुर्यात् ॥ धरणीगर्भसंभूतं विद्युत्कांचनसन्निभम् ॥ कुमारं शक्तिहस्तं च मंगलं प्रणमाम्यहम् ॥ इति पुष्पाञ्जलिं दत्त्वा ॥ प्रणम्य ॥ स्वग्रामभागे त्रिरेणुरेखां कृत्वा वामपादेन मार्जयेत् ॥ खादिराङ्गारकेनाथ कुर्यात् रेखासमत्रयम् ॥ वामपादेन मन्त्राभ्यामेताभ्यां तत्प्रमार्जयेत् ॥ दुःखदौर्भाग्यनाशाय पुत्रसंतानहेतवे ॥ कृतरेखात्रये वाम-

पादेनैव प्रमार्जयेत् ॥ ऋणदुःखविनाशाय नमोऽभीष्टार्थसिद्धये । मार्जयामि सितां
रेखां त्रिषु जन्मसु योद्भवः ॥ ततः पुष्पाञ्जलिं करौ सम्पुटीं कुर्वीत धरणीसुतम् प्रति ॥
ध्यायन्ति चरणाम्भोजं पूजासाङ्गत्व सिद्धये ॥ धरणीगर्भसम्भूतं विद्युत्ततेजः समप्रभम् ॥ कुमारं
शक्तिहस्तं च मंगलं प्रणमाम्यहम् ॥ ऋणहर्त्रे नमस्तुभ्यं दुःख – दारिद्र्य नाशिने ॥
नभसि द्योतमानाय सर्वकल्याणकारिणे ॥ देव – दानव – गन्धर्वाः यक्ष – राक्षस – पन्नगाः ॥
सुखं यान्ति यतस्तस्मै नमो धरणिसूनवे ॥ यो वक्रगतिमापन्नो नृणां कष्टं प्रयच्छति ॥
पूजितः सुखसौभाग्यं दत्ते तस्मै नमो नमः ॥ प्रसादं कुरु मे नाथ मंगलप्रद मंगल ॥ सर्व-
मंगल रुद्रात्मन् पुत्रान् देहि धनं यशः । एवं सम्पूज्य संस्तुत्य गृह्णीयात् ब्राह्मणाशिषः ॥ गुरवे
दक्षिणां दत्वा भुंजितान्नं निवेदयेत्। ब्राह्मणाय वायनं (पूर्णपात्रम्) दद्यात् । कृतस्य मंगलव्रत-
साङ्गतासिद्ध्यर्थं एकविंशतिलड्डुकदानम् अमुकगोत्रायऽमुकशर्म्मणे ब्राह्मणाय श्रीमंगलप्रीतिकामो
वायनं तुभ्यमहं सम्प्रददे न मम ॥ ॐ मंगलाय नमस्तुभ्यं सर्वमंगलकारक ॥ वायनेन च सन्तुष्टो
कुरु त्वं मे मनोरथम् ॥ दानसाङ्गतासिद्ध्यर्थं यथाशक्तिदक्षिणादानं तुभ्यमहं सम्प्रददे ॥

आवाहनं न जानामि न जानामि विसर्जनम् ।। पूजाभावं न जानामि त्वं गतिर्धरणीसुत ।। पुनः पूजां च करिष्ये ।। छत्रम् चामरम् नृत्यम् गीतम् अश्वारूढम् आनन्द-दोलिकां समस्तराजोपचार-देवोपचारैः पूजाम् समर्पयामि ।। यस्य स्मृत्या च नामोक्त्या तपो (पूजा) यज्ञक्रियादिषु । न्यूनं सम्पूर्णतां याति सद्यो वन्दे तमच्युतम् ।। मन्त्रहीनं क्रियाहीनं भक्तिहीनं च यद् भवेत् । यत्पूजितं मया देव परिपूर्णं तदस्तु मे ।। अनेन भौमव्रताङ्गपूजनेन कर्मणा भगवान् सर्वात्मकः श्री अंगारकः प्रीयताम् न मम ।।

।। इति भौमव्रतपूजाविधिः समाप्तः ।।

*

३३—अथ सत्यदुर्गापूजाविधिः

आकम्य कर्मपात्रम् कुर्यात् ।। कुशत्रयसहितं कर्मपात्रोदकमादाय—अपवित्रः पवित्रो वा सर्वावस्थांगतोऽपि वा ।। यः स्मरेत् पुण्डरीकाक्षं स बाह्याभ्यन्तरः शुचिः । प्रायश्चित्त गोदानम्—ॐ अद्येत्यादि देशकालादीन् सङ्कीर्त्य मम इहजन्मनि सत्यदुर्गाप्रीतिद्वारा सर्वापच्छान्तिपूर्वकं दीर्घायुः विपुल—पुत्रपौत्रादि अनवच्छिन्न-सन्ततिवृद्धिः स्थिर-लक्ष्मी कीर्तिलाभ-पराजय-सकल रोगक्षय सकलमनोरथ—सिद्ध्यर्थम् धर्म अर्थ—काम मोक्षादि प्राप्त्यर्थं श्रीसत्यदुर्गा—पूजन व्रतमहं करिष्ये । इति सङ्कल्पः ।। ॐ नमोस्त्वनन्ताय सहस्र० इति दीपं सम्पूज्य । ॐ भूरसीति मन्त्रेण कलशं पूजयेत् ।। ॐ गणानान्त्वेति गणपतिं पूजयेत् । धूपं दीपं च कुर्यात् । विघ्नेश्वराय० इति प्रार्थयेत् ।। अष्टदलेषु पूर्वादिक्रमेण पूजयेत् ।। पूर्वे-ॐ जयायै नमः । आग्नेये—ॐ विजयायै नमः ।। दक्षिणे—ॐ अजितायै नमः ।। नैर्ऋत्ये—ॐ अपराजितायै नमः ।। पश्चिमे—ॐ नित्यायै नमः ।। वायव्ये—ॐ विलासिन्यै नमः ।। उत्तरे—ॐ मगलायै नमः ।। ईशाने-ॐ अघोरायै नमः ।।

पुनः पूर्वादिक्रमेण पूजयेत्—ॐ जयन्त्यै नमः ॥ ॐ मंगलायै नमः ॥ ॐ महाकाल्यै नमः ॥ ॐ भद्रकाल्यै नमः ॥ ॐ कपालिन्यै नमः ॥ ॐ सत्यदुर्गायै नमः । ॐ क्षमायै नमः ॥ ॐ शिवायै नमः ॥ ॐ धात्र्यै नमः ॥ ॐ स्वाहायै नमः ॥ ॐ स्वधायै नमः ॥ पुनः पूर्वादिक्रमेण—पूर्वे-ॐ इन्द्राय नमः । आग्नेये—ॐ अग्नये नमः ॥ दक्षिणे ॐ यमाय नमः । क्रमेण ॐ निऋतये नमः ॥ ॐ वरुणाय नमः ॥ ॐ सोमाय नमः । ॐ ईशानाय नमः ॥ पुनः पूर्वेशानयोमध्ये-ॐ ब्रह्मणे नमः ॥ निऋतिवरुणयोमध्ये—ॐ अनन्ताय नमः ॥ पुनः अष्टदलयध्ये-ॐ वज्राय नमः ॥ आग्नये—ॐ शक्त्यै नमः ॥ दक्षिणे—ॐ दण्डाय नमः ॥ नैऋते—ॐ खड्गाय नमः ॥ पश्चिमे—ॐ पाशाय नमः ॥ वायव्ये—ॐ अंकुशाय नमः ॥ उत्तरे—ॐ गदायै नमः ॥ ईशाने—ॐ त्रिशूलाय नमः ॥ पूर्वेशानयोर्मध्ये—ॐ पद्मायै नमः ॥ निऋतिवरुणयोमध्ये—ॐ चक्राय नमः ॥ ततः सप्तमातृकां पूजयेत्—ॐ ब्राह्म्यै नमः ॥ ॐ माहेश्वर्यै नमः ॥ ॐ कौमार्यै नमः ॥ ॐ वैष्णव्यै नमः ॥ ॐ वाराह्यै नमः ॥ ॐ इन्द्राण्यै नमः ॥ ॐ चामुण्डायै नमः ॥ अष्टदलमध्ये सुवर्णप्रतिमां संस्थाप्य ॥ श्रीसत्यदुर्गाम् पूजयेत् ॥ तत्रादौ ध्यानम् ॥ दुर्गे

दुर्गस्वरूपासि सुरतेजो महाबले ॥ महानन्दकरी देवी प्रसीद परमेश्वरि ॥ एह्येहि भगवत्यम्ब शत्रुक्षय जयप्रदे ॥ भक्तितः पूजयामि त्वां दुर्गे देवी सुरचिंते ॥ ॐ सत्यदुर्गायै नमः ॥ भगवति सत्यदुर्गे, इहागच्छेह तिष्ठेत्यावाह्य—ॐ मनोजूतिर्जुषता-माज्यस्य बृहस्पतिर्यज्ञमिमन्तनो त्वरिष्टं यज्ञ ँ समिमन्दधातु ॥ ॐ विश्वेदेवासऽइहमाद-यन्तामों२॥ऽप्रतिष्ठ ॥ ॐ एतन्ते देवसवितर्यज्ञं प्राहुर्बृहस्पतये ब्रह्मणे ॥ तेन यज्ञम् यज्ञपतिं तेन तामव ॥ ॐ भूर्भुवः स्वः भगवति सत्यदुर्गायां वाङ्-मनश्चक्षुः श्रोत्रं जिह्वा-घ्राण-प्राणा इहागत्य सुख चिरं तिष्ठन्तु स्वाहा ॥ सुवर्णमौक्तिकं रम्यं रत्नगर्भसमन्वितम् ॥ सर्वेषां स्तम्भनं नित्यं सत्यदुर्गा नमोऽस्तु ते ॥ इत्यावाहनम् ॥ अथाऽऽसनम् ॥ नमस्ते सर्वसोभद्र सुखदं भव भूतले ॥ त्रैलोक्यविजये देवि सिंहासन नमोऽस्तु ते ॥ ॐ पुरुषऽएवेद ँ ॥ आसनं समर्पयामि ॥ ॐ सत्य-दुर्गायै नमः । अथ पाद्यम् ॥ ॐ एतावानस्य० ॥ सुखानन्दकरीं शान्तां सर्वदेवनमस्कृताम् ॥ सर्वभूतात्मिकां देवीं शाम्भवीं त्वां नमाम्यहम् ॥ पाद्यं समर्पयामि ॥ ॐ सत्यदुर्गायै नमः ॥ अथाऽर्घ्यम् ॥ ॐ त्रिपादूर्ध्वऽउ० ॥ जगत्पूज्ये जगद्वन्द्ये सर्वशक्तिस्वरूपिणि ॥ अर्घ्यम् गृहाण

कौमारी जगन्मातर्नमोऽस्तु ते ।। अर्घ्यं समर्पयामि ।। ॐ सत्यदुर्गायै नमः ।। अथाऽऽचमनम् ।। ॐ ततोऽविराडजाय० ।। विश्वेशीं विश्वजननीं चण्डिकां प्रणमाम्यहम् ।। सर्वदेवमयीं देवीं सर्वलोकाभयाम् शिवाम् ।। आचमनीयं समर्पयामि । ॐ सत्यदुर्गायै नमः । अथ स्नानम् ।। ॐ तस्माद्यज्ञात्सर्व्व० ।। या आपः सर्वभूतानां प्राणिनां स्थितिहेतवः ।। पावन सर्वभूतानां तेन त्वां स्नापयाम्यहम् ।। ॐ सत्यदुर्गायै नमः ।। अथ चूर्णम् ।। चूर्णम् हरिद्रा-जनितं सौभाग्य सुखदं प्रिये ।। गृहाण त्वं मया दत्त ससुगन्धं मनोहम् । चूर्णम् ॐ सत्यदुर्गायै नमः ।। अथ मधुपर्कम् ।। घृत-दधिमधुनि कांस्यपात्रे कृत्वा । मधुपर्कं महादेवी ब्रह्माद्यैः परिकल्पितम् ।। मया निवेदितं भक्त्या गृहाण परमेश्वरि ।। मधुपर्कम् समर्पयामि ।। ॐ सत्यदुर्गायै नमः ।। अथ पञ्चामृतस्नानम् ।। तस्माद्यज्ञात्सर्वहुतः० ।। मञ्चामृतं मयानीतं पयोदधिघृतं मधु ।। शर्करा सहितं दुर्गे स्नानार्थं प्रतिगृह्यताम् ।। पञ्चामृतस्नानं समर्पयामि ।। अथ गङ्गाजलम् ।। तस्माद-श्वाऽअजायन्त० ।। गंगा सरस्वति रेवा सिन्धु चैव च नर्मदा । एताभ्यस्त्वाहृतं तोयं स्नानार्थं प्रतिगृह्यताम् ।। गंगाजलम् । ॐ सत्यदुर्गायै नमः ।। अथ वस्त्रम् ।। तं यज्ञंबर्हिषिप्रौक्षन्० ।।

बहुतन्तुसमायुक्तं षट्सूत्रादि - विनिर्मितम् ॥ वासोदेवि सुशुक्लञ्च गृहाण वरवर्णिनि ॥ इति वस्त्रम् ॥ अथालङ्करणादिकम् ॥ यत्पुरुषं व्यदधुः० ॥ दिव्यरत्ने समायुक्ता वन्हिभानुसमप्रभा ॥ गात्राणि शोभयिष्यन्ति अलङ्काराः सुरेश्वरि ॥ इत्यलङ्करणानि ॥ अथ सिन्दूरादि-वलयादि सौभाग्यद्रव्यम् ॥ अथ गन्धम् ॥ चन्दनाऽगरुकर्पूरयुतं गन्धं गृहाण भो ॥ शरीरं ते न जानामि चेष्टां नैव च नैव च ॥ मया निवेदितं गन्धं प्रतिगृह्य विलिख्यताम् ॥ गन्धं समर्पयामि ॥ अथ अक्षताः—रञ्जिता कुंकुमेनैव अक्षताश्च सुशोभनाः ॥ गृहाण मङ्गले देवि सर्वाभीष्ट प्रदायिनी ॥ अक्षतान् समर्पयामि ॥ अथ पुष्पम् – नाना वृक्षसमुद्भूतं परमामोदशीतलम् ॥ शारदीयमिदं पुष्पं गृहाण च शिवप्रिये । मालतीचम्पकादीनि मल्लिका-कुसुमानि च ॥ केतकी वकुलं दिव्यं गृह्यतां रुद्रवल्लभे ॥ पुष्पं समर्पयामि ॥ अथ सिन्दूरम्—सीमन्त – शोभनं देवि भर्तुरायुर्विवर्धनम् ॥ सर्वरत्नाधिकं दिव्यं सिन्दूरं प्रतिगृह्यताम् ॥ सिन्दूरं समर्पयामि ॥ अथ पुष्पमाला—नाना सुगन्धसंयुक्तां नाना पुष्पविनिर्मिताम् । मया निवेदिता माला ग्राह्या तव महेश्वरि ॥ पुष्पमालां समर्पयामि ॥ अथ दूर्वा—नमस्ते सर्वदा देवि नमस्ते शुभमोक्षदे । दूर्वां गृहाण

वा. ३६

स;पूउ

देवेशि मां निस्तारय सर्वतः ॥ दूर्वां समर्पयामि ॥ अथ बिल्वपत्रम्—अमृतोद्भव श्रीवृक्ष महादेवप्रियं सदा । पवित्रं ते प्रयच्छामि श्रीफल ते सुरेश्वरि ॥ बिल्वपत्रं समर्पयामि श्रीसत्यदुर्गायै नमः ॥ अथ अंगपूजा—ॐ अजितायै नमः पादौ पूजयामि ॥ ब्राह्म्यै नमः जानुनी पूज० ॥ (सर्वत्र प्रणवं योजयेत् ।) माहेश्वर्यै नमः जंघे पू० । कौमार्यै नमः नाभिं पू० । वैष्णव्यै नमः हृदयं पू० । वाराह्यै नमः कण्ठं पूजयामि । सत्यधारिण्यै नमः बाहू पू० । सत्यव्रत्यै नमः मुखं पूजयामि ॥ चामुण्डायै नमः ललाटं पूजयामि ॥ सत्यदुर्गायै नमः सर्वांगं पूजयामि ॥ आग्नेये—ॐ सत्यदुर्गे हृदयाय नमः ॥ नैऋत्ये—ॐ सत्यदुर्गे शिरसे स्वाहा ॥ वायव्ये—ओं सत्यदुर्गायै वौषट् नमः । ईशाने—ओं भूतरक्षणी कवचाय हुँ नमः । दुर्गायै—ओं सत्यदुर्गे रक्षणि नेत्रत्रयाय वौषट् नमः । अथ धूपम्—वनस्पतिरसो दिव्यो गन्धाढ्योऽमरवल्लभः । मया निवेदितो भक्त्या धूपोऽयं प्रतिगृह्यताम् ॥ ओं धूरसिधूर्वधूर्वन्तम्० सत्यदुर्गायै नमः ॥ अथ दीपम्—ओं चन्द्रमामनसोजातः० ॥ चक्षुर्ज्योतिर्मनश्चन्द्रो विद्युदग्निसमप्रभः ॥ त्वमेव शरणं ज्योतिर्दीपोऽयं प्रतिगृह्यताम् ॥ दीपम् समर्पयामि । केशरनैवेद्यम्—ओं नाभ्याऽआसीदन्त० । गव्यसर्पिसमायुक्तं

नानामधुरसंयुतम् । मया निवेदितं भक्त्या पायसं प्रतिगृह्यताम् । केशराक्तनैवेद्यम् समर्पयामि ॥
अथ नैवेद्यानि—अन्नं चतुर्विध देवि रसैः षड्भिः समन्वितम् । उत्तमं प्राणदं चैव गृहाण
वा. मम भावतः ॥ सिद्धान्न नैवेद्यम् समर्पयामि ॥ अथ पिष्टक नैवेद्यम्—अमरैरर्चितं दिव्यं स पू.
३६९ नानारूपविनिर्मितम् । पिष्टकं विविधं देवि गृहाण मम भावतः ॥ पिष्टकनैवेद्यम् समर्पयामि ॥
अथ मोदकनैवेद्यम्—मोदकं स्वादुसंयुक्तं शर्करादि विमिश्रितम् । सुरम्यं मधुरं भोज्यं देव तत्
प्रतिगृह्यताम् । मोदकनैवेद्यम् समर्पयामि ॥ अथ फलम् फलानि फलमूलानि सर्वाणि ग्राम्यजानि
च ॥ नानाविध-सुगन्धीनि गृहाण देवि मा चिरम् । फल मूलं समर्पयामि ॥ अथ आचम-
नीयन्-गन्ध - कर्पूरसंयुक्तं कस्तूर्यादि - समन्वितम् ॥ मया निवेदितं धक्त्या पानीयं प्रति-
गृह्यताम् ॥ अथाचमनीयम् समर्पयामि ॥ अथ ताम्बूलम्-ताम्बूलं च वरं रम्यं कस्तूर्यादि
सुवासितम् ॥ मया निवेदितं भक्त्या ताम्बूलं प्रतिगृह्यताम् ॥ ताम्बूलम् समर्पयामि ॥ अथ
सुवर्णादि द्रव्यम्-ओं हिरण्यगर्भेति० । ततः यथाशक्ति जपं कुर्यात् । तत् जपं देव्यै समर्प्य ॥
अथ नीराजनम्-सूर्येन्दु तारकावन्हि तेजपुञ्जविराजितम् ॥ आर्तिक्यदीपं देवेशि प्रतिगृह्ण सुर-

श्वरि । अग्निर्देवता० । नीराजनं समर्पयामि सत्यदुर्गायै नमः ।। अथ प्रदक्षिणा—ज्ञाताऽज्ञातानि पापानि मम देहगतानि च । प्रदक्षिण क्रमेणैव निवारय महेश्वरि ।। यानि कानि च पापानि० ।। अथ पुष्पाञ्जलिः ।। स्तोत्रादिक पठेत् ।। पथि देवालये दुर्गे अरण्ये प्रान्तरे जले । सर्वत्रोपगते दुर्गे नारायणि नमोऽतु ते ।। शिरो मे सर्वदा पातु पातु कण्ठं महेश्वरि ।। हृदयं पातु चामुण्डा सर्वतः पातु कालिका ।। देवद्वारे नदातीरे राजद्वारे च संकटे ।। पर्वतारोहणे दुर्गे दुर्गे रक्ष नमोऽस्तु ते ।। सग्रामे विजयं देहि वरं देहि च सर्वदा ।। पुत्रान् देहि महामाये दारान् दारिद्र्यनाशिनि ।। अन्धं कुष्टं च दारिद्र्यं रोगं शोकं च दारुणम् ।। बन्धु-स्वजनवैराग्यं यत्सर्वं हर चण्डिके ।। रूपं देहि यशो भाग्यं भवति देहि मे ।। पुत्रान् देहि धनं देहि सर्वान् कामान् प्रदेहि मे ।। जयन्ती मङ्गला काली भद्र० ।। अथ नमस्कारः । नमोऽस्तु ते महादेवि तथा महिषमर्दिनि ।। नमस्तुभ्यं जगद्धात्रि भक्तानां हितकारिणि ।। इत्यनेन नमस्कारं कुर्यात् ।। अर्घ्यदानम् । पूर्णपात्रदानम् । ओं अद्येह मम इहजन्मनि सत्यदुर्गाप्रीति सर्वपापक्षयपूर्वकम् धर्म - अर्थ - काम - मोक्षादि - फल - प्राप्तये आदौ उपोषणपूर्वकं

दीप-कलश गणेश-पूजनपूर्वकं श्रीसत्यदुर्गापूजनकर्मणः सांगतासिद्ध्यर्थम् इमां दक्षिणां ताम्रं सूर्यदैवतं यथानामगोत्रायेत्यादि ॥ ततः आवाहनं न जानामीति विसर्जयेत् ॥ सत्यदुर्गे सत्यवति सत्यनारायणाष्टदे ॥ सत्यव्रते सत्यफले सत्ये सत्यार्थदे नमः ॥ सुवासिनीः कुमारीश्च यथाभक्ति प्रपूजये ॥ तव प्रसादात् मे भूयाद्वाञ्छितं वाञ्छितार्थदे ॥

॥ इति सत्यदुर्गा-पूजाविधिः समाप्तः ॥

*

* श्रीशीतलायै नमः *

३४—अथ शीतला-पूजाविधिः

कृतनित्यक्रियः शुचिराचान्तः पूजास्थाने गोमयोदकेन भूमिमुपलिप्य तत्र शुद्धासने प्राङ्मुख उपविश्य दीपं प्रज्वाल्य ॥ आचम्य प्राणानायम्य देशकालौ स्मृत्वाऽमुकस्य शीतलोपद्रवनिवृत्ति पूर्वकायुरारोग्यसिद्ध्यर्थं श्रीशीतलादेव्याः स्थापनं पूजनं चाऽहं करिष्ये ॥ इयि संकल्प्यः । दीप गणेशं सम्पूज्य धान्यराशौ निर्व्रणं तैजसं कलशं कलशस्थापनविधिना संस्थाप्य वक्षयाण-नवा-र्णमन्त्रेण द्वादशवारमभिमन्त्र्य तदुपरि ताम्रस्थाल्यां चन्दनादिना चतुर्द्वारयुतं त्रिकोणं यन्त्रम् लिखित्वा तन्मध्ये पञ्चगव्यप्रोक्षणादिसंस्कृतां प्रतिमां मूलमन्त्रेण स्थापयित्वा प्राणप्रतिष्ठां कुर्यात् ॥ कलशसमीपे मार्जनीं सूर्पं च स्थापयेत् ॥ अथार्चनविधिनाऽऽचम्य अर्घ्यम् संस्थाप्य ॥ ॐ ह्रीं श्रीशीतलायै नमः इति नवाक्षरमन्त्रेण प्राणायामत्रयं कृत्वा ॐ अस्य श्रीशीतलामन्त्रस्य उपमन्युऋषिः बृहतीछन्दः श्रीशीतलादेवता अमुकस्य श्रीशीतलोपद्रवनिवृत्तिपूर्वकायुरारोग्य-

सिद्ध्यर्थं श्रीशीतलार्चने विनियोगः ॥ शिरसि उपमण्युऋषये नमः ॥ मुखे बृहतीछन्दसे नमः ॥
हृदि श्रीशीतलादेवतायै नमः ॥ ह्रीं श्रीं अंगुष्ठाभ्यां नमः ॥ ह्रीं श्रीं तर्जनीभ्यां नमः ॥
वा. ह्रूं श्रीं मध्यमाभ्यां नमः ॥ ह्रैं श्रींअनामिकाभ्यां नमः ॥ ह्री श्रां कनिष्ठिकाभ्यां नमः ॥ शी.पू
३७३ ह्रूं श्रीं करतलकरपृष्ठाभ्यां नमः ॥ ह्राँ श्रीं हृदयाय नमः ॥ ह्रीं श्रीं शिरसे स्वाहा । ह्रूँ श्रीं
शिखायै वषट् ॥ ह्रैं श्रीं कवचाय हुँ ॥ ह्रौं श्रीं नेत्रत्रयाय वौषट् । ह्रः श्रीं अस्त्राय फट् ॥
इति विन्यस्य ॥ ध्यायेच्च शीतलां देवीं रासभस्थां दिगम्बराम् ॥ मार्जनीसूर्पहस्तां च
रक्तपुष्पहितार्चिताम् ॥ तैलादिमलसंयुक्तां वस्त्रपोटलिशीर्षकाम् ॥ इति ध्यात्वा मानसोपचारैः
सम्पूज्य ॥ पुष्पाञ्जलिं गृहित्वा वामनासाविवरात् निःसृत्य पुष्पाञ्जलिं स्थितां भ्रामयित्वा पुष्पांजलिं
प्रतिमायां स्थापयेत् ॥ ततो मूलमन्त्रेणाऽऽवाहनम् ॥ आसनम् ॥ पाद्यम् ॥ अर्घ्यम् । आचम -
नीयम् ॥ पुनराचमनीयम् । वस्त्रयुग्मम् ॥ सिन्दूरादि - शृङ्गारद्रव्यम् ॥ भूषणम् ॥ चन्दनम् ॥
३२ अक्षताः ॥ पुष्पाणि ॥ अर्पयित्वा पुष्पाञ्जलित्रयं देव्या आग्नेयादि– चतुष्कोणेषु मध्ये दिक्षु च
अङ्गानि सम्पूज्य पूर्वकोणे—— ॐ कोद्रवायै नमः ॥ दक्षिणकोणे ॐ मसूरिकायै नमः ॥

वायव्यकोणे ओं सराविकायै नमः ॥ भूपुरे ओं पूर्वाद्यष्टदिक्षु असितांगभैरवाय नमः ॥ रुरुभैरवाय नमः ॥ ओं चण्डभैरवाय नमः ॥ ओं क्रोधभैरवाय नमः ॥ ओं उन्मत्तभैरवाय नमः ॥ कपाली-भैरवाय नमः ॥ भीमभैरवाय नमः ॥ संहारभैरवाय नमः ॥ इत्यावरणपूजा ॥ पुष्पोदकं गृहीत्वा ॥ ओं अभीष्टसिद्धिर्मे देहि शरणागतवत्सले ॥ भक्त्या समर्पये तुभ्यं इदमावरणार्चनम् ॥ इति सम्पर्य ॥ धूपम् दीपम् नैवेद्यम् फलम् सुगन्धताम्बूलोपायनश्रीफलादि निवेद्य ॥ नीराजनं कृत्वा ॥ ओं शीतले त्वं जगद्धात्रि शीतलायै नमो नमः । इति पुष्पाञ्जलिं दत्त्वा ॥ अष्टोत्तर-सहस्र अष्टोत्तरशतं वा मूलमन्त्रम् जपेत् । गुह्यातीति० जपं निवेद्य ॥ ॐ शीतले देवदेवेशि सर्वोपद्रवनाशिनि ॥ त्राहि मां गिरिजे मातर्विस्फोटकभयादिते ॥ इति प्रणम्य ॥ शतकृत्वा दशकृत्वा वा स्कन्दपुराणोक्तं शीतलाष्टकं पठित्वा। शीतले त्व जगाद्धत्री शीतले भक्तवत्सले ॥ शीतले देवि देवेशि प्रसन्ना भव सर्वदा ॥ इति प्रार्थ्य माजन्यग्रेण कलशोदकं गृहीत्वा मूलमन्त्रम् पठेत् । शीतलार्चको ब्रह्मचर्येण तिष्ठेत्, दूरं न गच्छेत्, उच्छिष्टादिकं न प्रवेशयेत्। पूजन जपपाठः कर्तव्याः । अवसाने दिने शीतलिनं स्नापयित्वा पूजा कार्या ॥ इति शीतलार्चनविधिः समाप्तः ॥

३५-महादीपादि-दीपपूजाविधिः

ओं तत्सदिति पूर्वसङ्कल्पं कृत्वा । अमुकप्रवरायाः अमुकगोत्राया अमुकनाम्नीदेव्याः सपरिवाराय मम कायिक-वाचिक-मानसिक सकलपापक्षयपूर्वकं पूर्वजन्मेन्यतज्जन्मनि वा रजोवस्थायां ज्ञानतोऽज्ञानतो वा भ्रमात् कामात् लोभाद् वा बाल्ये यौवने वार्धक्ये स्वस्य पति-बन्धु परिवारान् वञ्चयित्वा भाण्डाद्युपस्करण-स्पर्शन-दैवपैतृक कर्मणि पाकक्रियालोपकृते तच्छरीरोत्पन्न बालवैधव्य-मृताऽपत्यापुत्रत्वादि-सकलकिल्विष-निरसनार्थम् अमुकदेवताप्रीतये घृताक्तान् तिल-तैलाक्तान् वा सपादलक्षसंख्याकदीपप्रज्वलनार्थम् लक्षसंख्याक तिल - यव - नखोद्धृताक्षतसहित यथामिलितोपचारेण अमुकदेवतापूजनमहं करिष्ये ॥ महादीप-वाक्यम्—तिलतैलाक्तमहादीपे सुवर्णप्रतिमां निधाय । प्रज्वाल्य सङ्कल्पं कुर्यात्—अद्येह पूर्वोक्तसङ्कल्पोच्चारणपूर्वकम् अमुक-प्रवरस्य अमुकगोत्रस्य सपरिवारस्ये अमुकशर्मणो मम कायिक-वाचिक-मानसिक-सकलकिल्विष-निरसनपूर्वकम् श्रुति स्मृति-निगमपुराणोक्त-फलावाप्तये अद्य सूर्यास्तमारभ्य पुनः सूर्योदय-पर्यन्तं तिल तैलाक्तं लोकाख्यमहाद्वीप संज्ञकं प्रज्वालितं दीप अग्निदैवताकं अमुकदेवता प्रीतये

समुत्सृजे । लक्षवर्तिसंख्याकं प्रज्वाल्य सुवर्णप्रतिमां निधाय—ओं तत्सदिति पूर्वसङ्कल्पसिद्धिरस्तु अमुकप्रवरायाः अमुकगोत्रायाः सपरिवारायाः अमुकनाम्नीदेव्या मम कायिक-वाचिक-मानसिक सकलपापक्षयपूर्वक पूर्वजन्मन्येतज्जन्मनि रजोवस्थायां ज्ञानतोऽज्ञानतो वा भ्रमात् कामाल्लोभाद् बाल्यौवने वार्धक्ये स्वकीय-पति-बन्धु-परिवारान् वञ्चयित्वा भाण्डाद्युपस्करण स्पर्शनदेवपैतृक कर्मणि पाकक्रिया-लोपकृतेन शरीरोत्पन्न - बालवैधव्यमृताऽपत्याऽपुत्रत्वादि – सकलकिल्विष निरसनार्थं घृताक्तान् तिलतैलाक्तान् वा प्रज्वलितान् लक्षसंख्याकवर्तिकान् वन्हिदैवताकान् सुपूजिताऽमुकदेवताप्रीतये समुत्सृजे विप्राय वेदविदुषे श्रोत्रियाय कुटुम्बिने ।। तारकोत्तारणार्थाय अच्युताय नमाम्यहम् ।। जीवदीपदानसंकल्पः—अद्य अमुकगोत्राया अमुकप्रवराया अमुकनाम्नीदेव्या मम कायिक वाचिक-मानसिक–सकलकिल्विषनिरसनपूर्वकं श्रुति-स्मृति निगम-पुराणोक्तफलावाप्तये यथामिलितोपचारैः अमुकदेवतापूजनपूर्वक त्रितन्तुनिर्मितान् षड्डुत्तरत्रिंशत् सख्याकान् तिलतैलाक्तानद्य सूर्यास्तमारभ्य पुनः सूर्य्योदयपर्यन्तं प्रज्वलितजीवदीपम् अमुकदेवता प्रीतये समुत्सृजे ।। पूर्वसंकल्पानन्तरम् अमुकप्रवरायाः सपरिवारायाः अमुकनाम्नी देव्या मम कायिक

वाचिक-मानसिक - सकल-किल्विष-निरसनपूर्वकं विष्णुलोकप्राप्त्यर्थं प्रातःकालपर्यन्तमाचरितशाकव्रतस्योद्यापनांगतया श्रीविष्णुपूजनानन्तरं हवनकरणार्थं तथा अमुकदेवताप्रीतये लक्षसख्याकतिलयवतण्डुलाक्षतैः पूजनपूर्वकं लक्षवर्तिप्रज्वालनकृतस्य तथा लोलाख्यमहाद्वीपप्रज्वालनकृतस्य च उद्यापनांगभूत श्रीसहितविष्णु-उमासहितशिव - सावित्रीसहित ब्रह्मपूजनान्तरं हवनकरणार्चम् एभिश्चन्दनपुष्पाक्षतैः गोब्राह्मणं सम्पूज्य पूर्वसंकल्पं कृत्वा नाम - गोत्रोच्चारण - पूर्वकं मम सकलकिल्विषनिरसनार्थं नारायणप्रीतये सपादलक्षदीपं प्रज्वालनाधिकारसिद्धये गोप्रत्याम्नायीभूतं द्रव्यं यथानामदैवताकं यथानाम गोत्रायेत्यादि ॥ प्रार्थना ॥ दानप्रतिष्ठा ॥

॥ इति महादीपादी-दीपप्रज्वालन-पूजाविधिः समाप्तः ॥

*

३६—अथ लक्षवर्तिकादीपदानविधिः

वा. कर्त्ता शुचिराचान्तः ॥ दीपं प्रज्वाल्य नमोऽस्त्वन्तायेति दीपं सम्पूज्य ॥ अर्घ्यस्थापनं कुर्यात् ॥ ल.पू.
गंगे च यमुनेत्यादिना । अथ संकल्पः ॥ अद्येत्यादि मम समस्तजन्म बाल्य यौवन वार्द्ध-
३७८ क्यावस्थोपार्जित-कायिक वाचिक मानसिक-सांसर्गिक-सकलपापक्षय पूर्वकैहिकानेकविध निर-
वधिक - भोगानुभवानन्तरं श्री परमेश्वरीप्रीतिद्वारा विष्णुसायुज्यपद- प्राप्तिकामो लक्षवर्त्तिका
प्रज्वलनाङ्गभूत दीप कलश गणेश पूजन पूर्वकं ब्रह्म - विष्णुमहेश्वरपूजनं प्रधानदेवतापूजनं
चाहं करिष्ये ॥ दीपं सम्पूज्य कलश - गणेश - पूजनं कुर्यात् ॥ अन्यकलशमध्ये इदं विष्णु -
रिति मन्त्रेण हैमं श्रिया सहितं विष्णुं पूजयेत् ॥ तद्दक्षिणे ब्रह्मयज्ञानमिति सावित्रीसहितं
ब्रह्माणं पूजयेत् ॥ तदुत्तरे नमः शंभवायेति मन्त्रेण उमासहितं शिवं पूजयेत् ॥ प्रधानदेवतां
गङ्गां च षोडशोपचारैः सम्पूज्य ॥ ततः मनोजूतिरिति मन्त्रेण प्राणं प्रतिष्ठाप्य ॥ ॐ सहस्र-
शीर्षेति आसनम् ॥ ॐ पुरुषऽएवेत्युपवेशनम् । ॐ एतावानस्येति पाद्यम् । ॐ त्रिपादूर्ध्वेति—
अर्घ्यम् ॥ ओं ततो विराडिति आचमनीयम् ॥ तस्माद्यज्ञादिति स्नानम् ॥ तस्माद्यज्ञादिति-

आच्छादनम् ॥ ॐ अस्मादश्वेति यज्ञोपवीतम् ॥ ॐ तं यज्ञमिति चन्दनम् ॥ ॐ यत्पुरुषेति पुष्पम् ॥ ॐ बृहस्पते इति वस्त्रम् ॥ ॐ यवोसीति यवान् ॥ ॐ ब्राह्मणोस्येति धूपम् ॥ चन्द्रमा मनसोजात० इति दीपम् । ॐ नाभ्याऽआसीदिति नैवेद्यम् । ॐ यत्पुरुषमिति अञ्जलिकरणम् ॥ ॐ सप्तास्यासन् इति प्रदक्षिणा ॥ इति सम्पूज्य गरुडं हंसं वृषभं च सम्पूज्य । ततः अङ्गपूजा—

ॐ कालाय नमः शिरं पूजयामि । ॐ विष्णवे नमः ललाटं पूजयामि । ॐ वन्हये नमः नेत्रम् पूजयामि । ॐ रवये नमः कर्णौ पूजयामि । ॐ दीप्ताय नमः नासिकां पूजयामि । ॐ निशाकराय नमः मुखं पूजयामि । ॐ रुद्राय नमः कण्ठं पूजयामि ॥ ॐ शेषाय नमः स्कन्धम् पूज० । ॐ जगद्व्यापिने नमः बाहू पूजयामि । ॐ तेजोरूपाय नमः स्तनौ पूजयामि । ॐ महेश्वराय नमः नाभिं पूजयामि । ॐ विश्वरूपाय नमः कटीं पूजयामि । ॐ जगतः प्रभवे नमः गुदम् पूजयामि । ॐ स्वप्रकाशाय नमः उरू पूजयामि । ॐ स्वयंज्योतिषे नमः जानुनी पूजयामि । ॐ चतुर्व्यूहाय नमः गुल्फौ पूजयामि । ॐ जनाधिपाय नमः पादौ पूजयामि । ॐ परब्रह्मणे

नमः सर्वांगं पूजयामि । ॐ धात्रे नमः पादौ पूजयामि । ॐ विधात्रे नमः जंघे० । ॐ स्रष्टे नमः उरू पूजयामि । ॐ प्रजापतये नमः मेढ्रं पूजयामि । ॐ परमेष्ठिने नमः कटीम्० । ॐ अग्निरूपाय नमः नाभिम्० । ॐ पद्मनाभाय नमः हृदयम्० । ॐ वेधसे नमः बाहू० । ॐ दामोदराय नमः कण्ठम्० । ॐ हिरण्यगर्भाय नमः मुखम् । ॐ ब्रह्मणे नमः शिरं पूजयामि । ॐ विष्णवे नमः सर्वाङ्गम् पूजयामि । विशेषोपहारादिकं समर्प्य ।

अथ दीपदानसंकल्पः—अद्येहेत्यादि देशकालादीन् सकीर्त्य अमुकगोत्रायाः अमुकनाम्न्या देव्या मम समस्तजन्म-बाल्य-यौवन-वार्द्धक्यावस्थोपार्जित-कायिक-वाचिक-मानसिक-सांसर्गिक सकलपापक्षयपूर्वकैहिकानेकविध निरवधिक — भोगानुभवानन्तरम् श्री परमेश्वर प्रीतये तिलतैलाक्तान् दीपान् घृताक्तान् वा सपादलक्षसंख्याकान् प्रज्वालितान् दीपान् श्रीविष्णवे समर्पयामि नमः। पृथक् देवताराधनपक्षे ब्रह्मणे, विष्णवे, ईश्वराय, देव्यै, गङ्गायै, तुलस्यै, सूर्याय, गणपतये समर्पयामीति विशेष वाक्यं नियोज्य समर्पयेत् । अथ कांस्यपात्र – रौप्यपात्रस्थ – हेमवर्तिका

दानमन्त्रः—रौप्यपात्रस्थितं दीपं हेमवर्त्तिसमन्वितम् । कांस्यपात्रेणसहितं ददामि व्रतपूर्त्तये ॥ ततो गोदानम् ॥ ततः पूर्णपात्रदानम् । ततो मूयसी दक्षिणादानम् । इदं व्रतम् मया देव कृतं प्रीत्यै तव प्रभो ॥ न्यूनं सम्पूर्णतां यातु प्रसादात्तव केशव ॥ गृहीतोऽस्मि व्रतं देव यद्य-ऽपूर्णोऽस्मि याम्यहम् । तन् मे भवतु सम्पूर्णं त्वत्प्रसादाज्जनार्दन ॥ यस्य स्मृत्या च नामोक्त्या० । कायेन वाचेत्यादिना परमेश्वरं समर्प्य विसर्जनं कुर्यात् ।

इति लक्षवर्त्तिका-दीपदानविधिः समाप्त ।

*

३७-अथ जन्मोत्सवविधिः

श्रीगणेशाय नमः ।

अष्टचिरञ्जीविनाम् पूजने कुण्डल्यां स्थानप्रकारः—

ईशान	पूर्व	आग्नेय
अश्वत्थामा	मार्कण्डेय	परशुराम
उ० बलि	श्रीः	कृपाचार्यः द०
व्यासः	हनुमानः	बिभीषणः
वायव्य	पश्चिम	नैऋत्य

अत्र जन्मतिथिरौदयिकी ग्राह्या ॥ युगाद्यावर्षवृद्धिश्च सप्तमी पार्वती प्रिया ॥ रवेरुदय-
मिच्छन्ति न तत्र तिथियुग्मता ॥ इति कृत्यतत्त्वाणव वचनात् ॥ वृद्धमनुः ॥ मृते जन्मनि
सक्रान्तौ श्राद्धे जन्मदिने तथा । अस्पृश्यस्पर्शने चैव न स्नायादुष्णवारिणा ॥ तिथितत्त्वे
स्कान्दे ॥ खण्डनं नखरोमाणां मैथुनाध्वगमौ तथा ॥ आमिषं कलहं हिंसां वर्षवृद्धौ विवर्ज-
येत् ॥ तत्रैव दीपिकायाम् ॥ कृतान्तकुजयोर्वारे यस्य जन्मतिथिर्भवेत् । अनृक्षयोगसम्प्राप्तौ
विघ्नस्तस्य पदे पदे ॥ कृतान्तः शनिः ॥ व्यवहारनिर्णये ॥ नवाम्बरधरो भूत्वा पूजयेच्च चिरा-
युषम् ॥ मार्कण्डेयं नरो भक्त्या पूजयेत् प्रयतस्तथा ॥ तथा दीर्घायुषं व्यासं रामं द्रौणिं कृपं
बलिम् । प्रह्लादं च हनूमन्तं विभीषणमथार्चयेत् ॥ स्वनक्षत्रं जन्मतिथिं सम्प्राप्य पजयेन्नरः ॥
षष्ठीं च दधिभक्तेन वर्षे वर्षे पुनः पुनः ॥ तिथितत्त्वे एतन्नामभिस्तिलहोमोप्युक्तः आदित्यपुराणे ।
सर्वैश्च जन्मदिवसे स्नात्वा मङ्गल-वारिभिः ॥ गुरु - देवाग्नि - विप्राश्च पूजनीयाः प्रयत्नतः ॥
स्वनक्षत्रं च पितरं तथा देवं प्रजापतिम् ॥ प्रतिसंवत्सरं यत्नात् कर्तव्यश्च महोत्सवः । कृत्यचिन्ता-
मणौ ॥ गुड़-दुग्ध-तिलानद्धं हस्ते ग्रन्थिञ्च बन्धयेत् । गुग्गुलं निम्बसिद्धार्थं दूर्वा गोरोचना-

दिकम् ।। सम्पूज्य भानुविघ्नेशौ महर्षिं प्रार्थयेदिदम् ।। चिरञ्जीवी यथा त्वं भो भविष्यामि तथा मुने । रूपवान् वित्तवाञ्चैव श्रियायुक्तश्च सर्वदा । मार्कण्डेय नमस्तेऽस्तु सप्तकल्पान्तजीवन । आयुरारोग्यसिद्ध्यर्थं प्रसीद भगवन् मुने ! चिरंजीवी यथा त्वं तु मुनीनां प्रवर द्विजः ।। कुरुष्व मुनिशार्दूल तथा मां चिरजीविनम् ।। मार्कण्डेय महाभाग सप्तकल्पान्तजीवन ।। अस्माकमायुरारोग्यसिद्ध्यर्थं वरदो भव ।। सतिलं गुडसम्मिश्रमञ्जल्यर्द्धमितं पयः । मार्कण्डेयाद्वरं लब्ध्वा पिबाम्यायुर्विवृद्धये ।। इति पयः पिबेत् ।। ततो मूलमन्त्रेण मार्कण्डेय—व्यासादीनां नाममन्त्रैश्च पुनः होममिच्छन्ति कुलाचार्याः ।। अथ प्रयोगः—तत्र कर्ता सर्वौषधिस्नानपूर्वकं स्नात्वा कृतनित्यक्रियः शुचिराचान्तः प्राङ्उदङ्मुखो वा उपविश्य संकल्पं कुर्यात् ।। अद्येत्यादि देशकालादीन् संकीर्त्य अमुकगोत्रस्य मम आयुरारोग्यैश्वर्योदयप्राप्तिकामो जन्मोत्सवकमनिर्विघ्नपरिसमाप्तयथम् दीप-कलश-गणेश-पूजनपूर्वकं मङ्गलाभिधानकशान्तिकलशस्थापनमहं करिष्ये ।। इति संकल्प्य ।। दीप-कलश-गणेशपूजां विधाय धूप-दीप-नैवेद्यादीनि कृत्वा प्रार्थयेत् ।। वक्रतुण्डेति० मन्त्रेण—ॐ वक्रतुण्ड महाकाय सूर्यकोटिसमप्रभ ।। निर्विघ्नं कुरु मे देव सर्वकामप्रसिद्धये ।।

अथ कलशस्थापनम् ॥ भूरसीति भूमिशोधनम् ॥ ॐ धान्यमसीति धान्यं संस्थाप्य—ॐ
आजिघ्रकलशमिति कलशं संस्थाप्य ॥ ॐ तत्त्वायामीति जलेनाऽऽपूर्य ॥ ॐ याः फलिनीर्या०
इति पूगीफलम् ॥ ॐ याऽओषधीरिति सर्वौषधीः । यवोसियवया० इति यवान् ॥ ॐ काण्डात्
काण्डात्प्ररो० इति दूर्वा ॥ ॐ स्योना पृथिवीति सप्तमृदः ॥ ॐ हिरण्यगर्भ० इति पञ्चरत्नानि ॥
यथा—सुवर्ण-रजत-मुक्ता-राजावर्त्त-प्रवालकम् ॥ सर्वौषधीः यथा— मुरामांसीवचाकुष्ठं शैलेयं
रजनीद्वयम् । शटीचम्पकमुस्तेति सर्वौषध्यो दश स्मृताः ॥ सप्तमृदः यथा—अश्वत्थरथवल्मीकसंग-
माद्ह्रदगोकुलात् ॥ पञ्चपल्लवः यथा—अश्वत्थोदुम्बर-प्लक्ष-चूत-न्यग्रोध- पल्लवाः ॥ ॐ अम्बेऽ
अम्बिकेम्बालिके० इति पञ्चपल्लवैस्तन्मुखमाच्छाद्य ॥ ॐ बृहस्पते० इति वस्त्रम् ॥ ॐ तत्त्वा-
यामीति वरुणमावाह्य पूजयेत् ॥ ततः कलशस्कन्धप्रदेशे-(सर्वत्र प्रणवं योजयेत्) ॐ गणपत्यादि
पाञ्चायतनान्, विनायकादि पञ्चलोकपालान्, आदित्यादि नवग्रहान्, ईश्वराद्यधिदेवान्,
अग्न्यादि प्रत्यधिदेवान्, इन्द्रादि दशदिक्पालान्, ध्रुवाद्यष्टवसून्, धात्रादि द्वादशादित्यान्,
वीरभद्राद्येकादशरुद्रान्, गौर्यादि षोडशमातॄन्, आवहादि सप्तमरुतः, विनायक-ब्रह्म-विष्णु-रुद्रा-

वा०
३८५
ज पू.

र्कवनस्पतीन् यथामिलितोपचारैः पूजयेत् ॥ तत्र कलशे गङ्गादींश्च । ॐ सर्वे समुद्राः सरित-
स्तीर्थानि जलदा नदाः ॥ आयान्तु यजमानस्य दुरितक्षयकारकाः ॥ ततः कलशाभिमन्त्रणम् - ॐ
वा कलशस्य मुखे विष्णुः कण्ठे रुद्रः समाश्रिताः । मूले तस्य स्थितो ब्रह्मा मध्ये मातृगणा स्मृताः॥ ग.पू.
कुक्षौ तु सागराः सप्त सप्त द्वीपा वसुन्धराः ॥ ऋग्वेदोऽथ यजुर्वेदः सामवेदोऽप्यथर्वणः ॥ अंगैश्च
सहिताः सर्वे कलशन्तु समाश्रिताः ॥ अथ ब्राह्मणवरणम् ॥ तद्यथा—आदौ प्राङ्मुखो भूत्वा ३८६
कुश-तिल-यव-जलयुत-गन्ध-पुष्पाक्षत-ताम्बूल-वस्त्रादीन्यादाय—ॐ अद्येत्यादि देशकाला-
दीन् सङ्कीर्तनान्ते अमुकगोत्रस्य मम जन्मोत्सव होमकर्मणि कृताऽकृतावेक्षणरूप ब्रह्मकर्म कर्तुम् ,
गणपति-ब्रह्मा-होत्राचार्यत्वेन नानानामगोत्रान् ब्राह्मणानेभिश्चन्दनपुष्पाक्षतताम्बूलवासोद्रव्या-
दिभिर्युष्मानहं बृणे ॥ ॐ बृताः स्मः ॥ ततो स्वगृह्योक्त विधिनाऽग्निम् स्थापयेत् ॥ अथ पुण्याह
वाचनम्—गन्धपुष्पाक्षतताम्बूलवस्त्रादिभिः त्रि-चतुर पञ्च वा ब्राह्मणान् सम्पूज्य । ॐ अद्येत्यादि
अमुकगोत्रस्याऽमुकप्रवरस्याऽमुकशर्मणो मम यजमानस्य गृहे भो ब्राह्मणाः—ॐ पुण्याहं भवन्तो
ब्रुवन्तु इति त्रिः श्रावयेत् । ॐ पुण्याहं ३ इति त्रिः प्रतिवचनम् ॥ ॐ पुनन्तु मा देवजनाः

पुनन्तु मनसाधियः । पुनन्तु विश्वा भूतानि जातवेदः पुनीहि मा । एवं पूर्वोक्त कारेण भो ब्राह्मणाःॐ स्वस्तिर्भवन्तो ब्रुवन्तु३ ॐ स्वस्ति३ ॐ स्वस्तिनऽइन्द्रो वृद्धश्रवाः स्वस्तिनः पूषा विश्व वेदाः । स्वतिनस्तार्क्ष्योंऽअरिष्टनेमिः स्वस्तिनी बृहस्पतिर्द्दधातु ॥ ॐ ऋद्धिर्भवन्तो ब्रुवन्तु ३ । ऋद्ध्यन्ताम् ३ ॥ ओं सत्रस्य ऋद्धिरस्यगन्मज्योतिरमृताऽअभूम ॥ दिव्यम्पृथिव्याऽअद्धया रुहामाविदामदेवान् स्वर्ज्योतिः ३ ॥ ओं कल्याणं भवन्तो ब्रुवन्तु ३ कल्याणं ३ ॥ ओं यथेमां वाचङ्ककल्यणीमावदानिजनेभ्यः ॥ ब्राह्मराजन्याभ्या ँ शूद्राय चर्याय च स्वाय चारणाय च ॥ प्रियो देवानां दक्षिणायैदातुरिह भूयासमयम्मेकामः समृद्ध्यतामुपमादो नमतु ॥ ॐ अद्येत्यादि ममायुरारोग्यैश्वर्योदय प्राप्तिकामनया गुरुम् नारायणं देवम् अग्निम् प्रजापतिम् पितृन् मार्कण्डेयम्, व्यासं रामं द्रौणिं कृपं, बलिं, प्रह्लाद, हनुमन्तं, षष्ठिकां, स्वनक्षत्रम् स्वतिथिम् अहं पूजयिष्ये इति सङ्कल्पः ॥ ततो मङ्गलाभिधानकलशे गुरुम् नारायणं देवं, अग्निं, प्रजापतिं, पितृन् स्व-स्वनाम-मन्त्रैश्चतुर्थ्यन्त पदैः पूजयेत् ॥ तत्कलशसमीपे पीठिकोपरि वस्त्रमास्तीर्य तदुपरि अष्टदलपद्मं विलिख्य तत्राष्टदलमध्ये मार्कण्डेयम् पूर्वदले व्यासम् ॥ आग्नेयदले रामम् ॥ दक्षिणदले

द्रौणिम् ॥ नैर्ऋत्यदले कृपं, पश्चिमदले बलिं, वायव्यदले प्रह्लादं, उत्तरदले हनूमन्तं, ईशान-
दले षष्ठिकाम् ॥ तत् समीपे स्वनक्षत्रम्, स्वतिथिम्, स्वस्वनामभिः चतुर्थ्यन्तपदैः अर्चयेत् ॥ वा
ततः प्रार्थयेत्—चिरजीवी यथा त्वं भो भविष्यामि तथा मुने ॥ रूपवान् वित्तवान् चैव ज.पू.
३८८ श्रियायुक्तश्च सर्वदा ॥ मार्कण्डेय नमस्तेऽस्तु सप्तकल्पान्त जीवन ॥ आयुरारोग्यसिद्ध्यर्थम्
अस्माकं वरदो भव ॥ ततः षष्ठिकायै दधिभक्तबलिम् दद्यात् ॥ तद्यथा—अद्येह मम आयु-
रारोग्यवृद्धये षष्ठिकायै एष दधिभक्तबलिस्तुभ्यं नमः ॥ ततः पीतवस्त्रे गुग्गुल-निम्बसिद्धार्थ
दूर्वा-गोरोचनादिकम् धृत्वा तत्र गणेशं भास्करं च पूजयित्वा महर्षिं मार्कण्डेयं प्रार्थयित्वा
दक्षिणभुजे धारयेत् अनेन मन्त्रेण—ॐ मार्कण्डेय महाभाग आयुरारोग्यदायक । शुभदौर्विघ्न-
हर्तारौ भानुर्विघ्नेश एव तु ॥ धारयामि भुजे दक्षे मम कल्याणहेतवे ॥ पूरयध्वं सदास्माकं
कामनाँश्च मनोरथान् ॥ ततः स्वगृह्योक्तविधिना अग्निम् स्थापयित्वा अस्मिन् कर्माण प्रतिष्ठित
देवताभ्यः प्रधानभूतेभ्यो यथासंख्याकतिल-यव-आज्यहोमम् कारयेत् ॥ ततः पूर्णाहुतिं हुत्वा
यथाशक्ति गो-भू-हिरण्यादि दक्षिणां दद्यात् ॥ ततः आयुरारोग्यवृद्ध्यर्थम् आज्यनिरीक्षणं

कुर्यात् ॥ ततः पयः पिबेत् अनेन मन्त्रेण—ॐ सलिलं गुडसम्मिश्रमञ्जल्यर्धमितं पयः ॥ मार्कण्डेयाद्वर लब्ध्वा पिबाम्यायुर्विवृद्धये ॥ ततः ईशानस्थित शान्तिकलशेन अभिषेकादिकम् कृत्वा ब्राह्मणान् भोजयेत् ॥

॥ इति जन्मोत्सवविधिः समाप्तः ॥

*

३८--अथ मैत्रीकरणविधिः

युधिष्ठिर उवाच—मित्राचारविधिं ब्रूहि महायत्नेन केशव ॥ केन साकं प्रकर्तव्यं विधानं किं समित्रकम् । श्रीकृष्ण उवाच—सवर्गिनं कुलीनं च सुरूपं शीलसंयुतम् ॥ धर्मज्ञं शास्त्रवेत्तारं राजलोकानुरंजनम् । सुभगं कीर्तिमन्तं च सर्वज्ञं मित्रवत्सलम् ॥ स्वकुलाचारनिपुणं मित्रम् कुर्यात् तु पाण्डव । अकुलीनं शठं मूर्खं कुरूपं क्रोधसंयुतम् ॥ पापं व्यसनिनं दुष्टं लोभिनं धर्मवर्जितम् ॥ वाचालमपवाचालं पिशुनं द्यूतकारकम् ॥ विरुद्धं सर्वलोकानां वर्जयेत् पाण्डु-नन्दन ॥ युधिष्ठिर उवाच—श्रुतं मया तव प्रोक्तं मित्राचारस्य लक्षणम् ॥ कृपया वद मे कृष्ण काल मित्रं विधानकम् ॥ श्रीकृष्ण उवाच—ग्रहणे चन्द्र-सूर्यस्य देवस्थल सरित्तटे । गङ्गा यमुनयोर्मध्ये सरस्वत्यादि संगमे ॥ उत्साहौ चोभयौ प्रीतौ देहरक्षणकारकौ ॥ पत्रार्थे देशकार्ये च वामार्थेन गरार्थिनः ॥ अथवा प्रार्थिताकारि मित्रत्वं यदि दीयते ॥ अथ क्रमः—पुण्यक्षेत्रे कृतनित्यक्रियौ पूर्वाभिमुखौ शुद्धासनस्थौ प्रतिज्ञासंकल्पं कुर्यास्ताम् ॥ ॐ अद्येत्यादि देशकालौ संकीर्त्य अद्य अमुकामुका गोत्रयोः अमुकाऽमुकशर्मणोरेकपिण्डित्वकरण मित्राचारकर्मणि

तदङ्गतया दीप-कलश-गणेशपूजनपूर्वकम् हरि-हरपूजनमावाम् करिष्यावहे तथा पुण्याहवाचनञ्च करिष्यावहे इति संकल्प्य । ततो मित्राभ्यां तौ हरि-हरौ पूजनीयौ ॥ अथ उत्तराभिमुखौ साञ्जलिस्थितौ भवतः ॥ तत्राञ्जलिं बध्वा आराधनमन्त्राः—ब्रह्मविष्णोर्यथा प्रीती राम लक्ष्मणयोर्यथा । तथैव आवयोः प्रीतिर्मित्रयोरनपायिनी ॥ ग्रन्थिनो बलबन्धेन लक्ष्मीः आयुश्च वर्धताम् ॥ ततः कलशपूजा ॥ तद्विशेषविधिना सम्पूज्य लोकविशेषशिष्टाचारात् ॥ दीप कलशयोर्मध्ये स्थाल्यादौ हरिहरयोः पूजा च कार्या । आवाहनादि उपायननैवेद्यान्तं कृत्वा प्रार्थनाम् कुर्याताम् ॥ रूपं देहि जयं देहि यशो देहि प्रविस्तरम् ॥ राज्यं च विपुल देहि सर्वदा मम केशव ॥ वरुणं देवदेवेश आधारं सर्वजीविनाम् ॥ त्वां पूजयावः कलशं सुप्रीतो भव कर्मणि ॥ यावज्जीवं सुख देहि मित्रकर्मणि सुप्रभ ॥ आवयोरचलां प्रीतिम् सर्वदा देह्यपाम्पते । ततो दूर्वावण्टनम् ॥ समूलां चतुर्दशसंख्याकां दूर्वां समानीय सप्त-सप्त दूर्वा साक्षता उभाभ्यां गृहीत्वेम मन्त्रम् पठेताम् ॥ आयुर्वृद्धिकरी दूर्वा वण्टनैर्मित्रबन्धनैः ॥ आयुरारोग्यमैश्वर्यं मित्रे भवतु सर्वदा ॥ इत्यन्न्योन्यं पठेताम् ॥ ततो प्रदक्षिणा ॥ पश्यन्तु देवताः सर्वे अस्माकं मित्रकर्मणि ॥

रूपं देहि जयं देहि सुखं देहि प्रतिक्षणम् ॥ ततो मित्राचारवशं यातौ मित्रौ मित्रो मित्रो देवताम्
एकपिण्डि द्विधा देहं अद्यप्रभृति भो द्विज ॥ ततः परस्परं आलिङ्गनं कुर्याताम् । नानावस्त्रम्
वा० भूषणादिकं परस्परं मित्राभ्यां दद्याताम् ॥ विप्रेभ्यो दक्षिणां दद्याताम् ॥ श्रेष्ठाचार्याय संकल्प्य
३९२ वस्त्र भूगोहिरण्यादिकं देयम् ॥ विप्राय माल्यं च वित्तशाठ्यम् विवर्जयेत् ॥ ततः पूर्ववत्संकल्पं
विधाय ॥ एतन्मित्रकर्माभिलषित प्राप्तिकाम इमां गां सवत्सां सालङ्कारां विष्णुदैवताम् अमुक-
गोत्रायाऽमुकशर्मणे आचार्याय तुभ्यमहं सम्प्रददे ॥ गोरभावे तन्मूल्योपकल्पितां गोनिष्क्रयीभूतां
दक्षिणां दद्याताम् ॥ गोचरादि दुष्टग्रहाणां च दानं दद्याताम् ॥ ततो ब्राह्मणानां मन्त्राशिषं
गृह्णीयाताम् । अभीष्टमित्रकार्येषु व्यासवाक्यं च कारयेताम् ॥ भक्ष्यभोज्यादिकं देयं कुटुम्बाय
परस्परम् ॥ अथाशीर्वचनम्-यावद् गङ्गा हरिहर धरा ब्योम्नि सोमार्कदेवौ यावद्गौरी दहन-
पवनाः सागरेष्वस्ति चाम्बु ॥ यावन्मेरुप्रभृतिगिरयो कूर्मशेषाधरित्री तावन्मैत्री भवतु भवतां
निश्चला दीर्घमायुः ॥ ॥ इति श्रीकृष्ण-युधिष्ठिरसंवादे मैत्रीकरणविधिः समाप्तः ॥

*

३९–अथ पुरुषोत्तम-दान-पूजाविधिः

कर्मपात्रं कृत्वा दीपं संपूज्य ॥ कलशं संपूज्य सुवर्णप्रतिमायां विष्णुपूजनं नामपूजनञ्च कर्तव्यम् ॥ ॐ विष्णवे नमः ॥ जिष्णवे नमः ॥ महाविष्णवे नमः ॥ हरये नमः ॥ कृष्णाय नमः ॥ अधोक्षजाय नमः ॥ केशवाय नमः ॥ माधवाय नमः ॥ रामाय नमः ॥ अच्युताय नमः ॥ पुरुषोत्तमाय नमः ॥ गोविन्दाय नमः ॥ वामनाय नमः ॥ श्री सङ्कर्षणाय नमः ॥ श्रीकण्ठाय नमः ॥ विश्वसाक्षिणे नमः ॥ नारायणाय नमः ॥ मधुरिपवे नमः ॥ अनिरुद्राय नमः ॥ त्रिविक्रमाय नमः ॥ वासुदेवाय नमः ॥ जगद्योनये नमः ॥ अनन्ताय नमः ॥ शेषशायिने नमः ॥ सङ्कर्षणाय नमः ॥ प्रद्युम्नाय नमः ॥ दैत्यारये नमः ॥ विश्वतोमुखाय नमः ॥ जनार्दनाय नमः ॥ धरावासाय नमः ॥ दामोदराय नमः ॥ मुरमर्दनाय नमः ॥ श्रीतपये नमः ॥ मम उत्तम फलावाप्ति – विष्ण्वादि – श्रीपत्यन्तास्त्रयस्त्रिंशत् देवता उद्दिश्य श्री पुरुषोत्तम भास्कर प्रसन्नकामनया धर्मार्थकाममोक्ष–चतुर्विध–पुरुषार्थ–सिद्ध्यर्थं पृथ्वीदानजन्यफलप्राप्त्यर्थम् इदम् आधारपात्रम् सोमदैवतं त्रयस्त्रिंशदपूपानि प्रजापतिदैवतानि घृतं समुद्रदैवतं सुवर्ण वन्हि

दैवतं वस्त्रम् बृहस्पतिदैवतं ताम्बूलं वनस्पतिदैवतं यथानामगोत्राय यथानामशर्मणे ब्राह्मणाय पुरुषोत्तमस्वरूपाय तुभ्यमहं सम्प्रददे ॥ प्रार्थना विष्णुरूप-सहस्रांसु-सर्वपापप्रणाशनः ॥ अपूपान्नप्रदानेन मम पापं व्यपोहतु ॥ नारायण जगद्दीप भास्करः प्रतिरूपकः ॥ दानेनाऽनेन पुत्राँश्च सम्पदश्चाभिवर्धय ॥ यस्य हस्ते गदाचक्रे गरुडो यस्य वाहनम् ॥ शंखं करतले यस्य स मे विष्णुः प्रसीदतु ॥ कलाकाष्ठादिरूपेण निमेषघटिकादिना ॥ यः संहरति भूतानि तस्मै कालात्मने नमः ॥ कुरुक्षेत्रमयं देशः सूर्यपर्वद्विजो हरिः । पृथ्वीसममिदं दानं गृहाण पुरुषोत्तम ॥ मखानां च विशुद्ध्यर्थं पापप्रशमनाय च ॥ पुत्र-पौत्राभिवृद्ध्यर्थं प्रदत्तं तव भास्कर ! ॥ पुरुषाय नमः इति प्रार्थना ॥ भूयसी-दक्षिणा—अद्य श्रीपुरुषोत्तम-प्रीत्यर्थं कृतस्य त्रयस्त्रिंशदपूप-पूरितकांस्यपात्र घृत-सुवर्ण-ताम्बूलवस्त्रदानकर्मणः साङ्गतासिद्ध्यर्थम् अमुकगोत्राय अमुकशर्मणे ब्राह्मणाय भूयसीत्वेन तुभ्यमहं सम्प्रददे । इति दक्षिणां दत्वा समापयेत् ॥

इति पुरुषोत्तम-दानविधिः समाप्तः ।

*

* श्रीगणेशाय नमः *

४०-अथोद्यापनविधिः

सर्वेषां देवानां व्रतप्रतिष्ठाविधिः

ततः शुभदिने संभृतसकलसामग्रिको यथास्वं मण्डपादिकां निर्माय ॥ मण्डपाभ्यन्तरे ईशानप्रदेशे ग्रहवेदीं नैर्ऋत्ये वास्तुवेदीं मध्यवेद्युत्तरतोऽग्निवेदीं च निर्माय सपत्नीको यजमानो भद्रङ्कर्णेभिरिति मन्त्रं पठेत् ॥ मंडपं प्रदाक्षिणीकृत्य पश्चिमद्वारेण प्रविश्य यदत्र संस्थितमिति, अपसर्पन्त्विति मन्त्रौ पठन् सर्षपादि विकिरणेन भूतानुत्सार्य मृगचर्माद्यन्यतमे शुभासन उपविश्याऽऽचम्य प्रायश्चित्तगोदानम् ॥ अद्येत्यादि तिथ्याद्युल्लेखनान्ते अमुकप्रवरः सपत्नीकोऽमुकशर्माऽहं मम सकलपापक्षयपूर्वकम् श्रुति – स्मृति – पुराणोक्तफलावाप्तये विशेषतः श्रीमल्लक्ष्मीनारायण – उमामहेश्वरादि – देवताप्रीतये एतावत्कालपर्यन्तं कृतानामेकादश्यादि व्रतानाम् यथासादितसामग्रिकः कर्तव्य-उद्यापनकर्मणि पूर्वसंकल्पितकर्माऽधिकारित्वसिद्धिपूर्वक

एतत् स्थूलशरीरस्य विशुद्ध्यर्थं प्राजापत्याप्रत्याम्नायिभूतामिमां गां रुद्रदैवत्यां तन्निष्क्रयीभूतम् रौप्यखण्डं चन्द्रदैवतं यथानामगोत्रायेत्यादि । प्रार्थना ॥ कपिले सर्वदेवानामित्यादि ॥ दानप्रतिष्ठा ॥ अद्येत्यादि कृतैतत् गोनिष्क्रयीभूत रौप्य-खंडदान-कर्मण. प्रतिष्ठासांगतासिद्धये दीयमानमिदं ताम्रखण्डं सूर्यदैवतं यथानामगोत्रायेत्यादि । ततः प्रतिज्ञासंकल्पः—अद्येत्यादि देशकालाद्युल्लेखनान्ते अमुकगोत्रोऽमुकशर्मा सपत्नीकोऽहं मम ज्ञाताज्ञात—मनोवाक्काय - संभूतमहापातकोपपातक — नाशनपूर्वकं—भय—रोग-शोक-दारिद्र्य दौर्भाग्य दुःख प्रोद्भूतोत्पातैः कृत्वाल्पमृत्युनाशन पूर्वकाक्षयविष्णुपुरवासकामो विशेषतःश्रुतिस्मृति-पुराणोक्त—फलवाप्तिपूर्वकं श्रीमल्लक्ष्मीनारायण—श्रीउमामहेश्वरप्रीतये एतावत्कालपर्यन्तानामेकादश्यादि समस्तव्रतानां यथोक्तफलावाप्तये यथासादित —सामग्रिभिरुद्यापनमहं करिष्ये, तदङ्गत्वेन दीप — कलश-गणेश-पूजनपूर्वकं पुण्याहवचनं मातृकापूजनं नान्दीश्राद्ध ग्रहपूजन वास्तुपूजनं सर्वतोभद्रपूजनं हवनं च ब्राह्मणद्वाराऽहं कारयिष्ये इति संकल्पः । ततो ब्राह्मणवरणम् ॥ अद्येत्यादि देशेकालोल्लेखनान्ते,अमुकगोत्रोऽमुकशर्मा सपत्नीकोऽहं मम ज्ञाताज्ञात मनोवाक्काय

संभूत महापातकोपपातकनाशनपूर्वकंभय–रोग–शोक-दारिद्र्य–दौर्भाग्य-दुःख–प्रोद्भूतोत्पातवै–
वा० कृत्यवाधाल्पमृत्यु–नाशनपूर्वकाक्षयविष्णुपुरवासकामो विशेषतः श्रुतिस्मृतिपुराणोक्त– फलावाप्ति– उ.वि
पूर्वक श्रीमल्लक्ष्मीनारायण-श्रीउमामहेश्वर–प्रीतये एतावत्कालपर्यन्तं कृतानामेकादश्यादिव्रतानां
३९७ यथोक्तफलावाप्तये यथासामाग्रिभिरुद्यापनमहं करिष्ये, तत्कर्मकरणाय नानानामशर्मणो ब्राह्मणा-
नेभिश्चन्दनपुष्पाक्षतधौतोत्तरीयस्वर्णाङ्गुलीयासनजलपात्रादिभिराचार्यत्वेन ऋत्विक्त्वेन द्वार-
पालत्वेन गणपतित्वेन ब्रह्मत्वेन च युष्मानहं वृणे ॥ 'ॐ वृताः स्म' इति प्रतिवचनम् । तत आचा-
र्यादिभ्यास्तिकलम् ॥ अथ पुण्याहवाचनम् ॥ वस्त्र गन्धपुष्पाक्षतं दूर्वा पूगीफलाछिभिश्चतुरः
पञ्च वा ब्राह्मणान् वृत्वा अद्येत्यादि तिथ्याद्युल्लेखनान्ते अमुकप्रवरोऽमुकशर्मा सपत्नीकोऽहं
परमेश्वरप्रीतये एतावत्कालपर्यन्त कृतानामेकादश्यादिव्रतानामुद्यापनकर्म मम गृहे भो ब्राह्मणाः
'ॐपुण्याऽहं भवन्तोब्रुवन्तु ३' ॐ पुण्याहमिति त्रिः प्रतिवचनम् । पुनन्तुमेत्यादिकां कण्डिकां
३४ पठेत् ॥ अद्य ···'ॐ कल्याण भवन्तो ब्रुवन्तु ३' ॐकल्याणमिति त्रिः प्र० ॥ यथेमांवाचं पठेत् ।
अद्य···'ॐ श्रियं भवन्तो ब्रुवन्तु ३' ॐ श्रीः इति त्रिः प्र० ॥ मनसः काममिति पठेत् ॥

अद्य ..... 'ॐ स्वस्ति भवन्तो ब्रुवन्तु इति ३' 'ॐ स्वस्ति' इति त्रिः प्रतिब्रूयुः ॥
स्वस्तिनऽइन्द्रेति पठेत् । अद्य 'ॐ शान्तिर्भवन्तो ब्रुवन्तु ३' 'ॐ शान्तिः ३' इति प्रतिब्रूयुः ॥ उ,वि.
वा. ॐ द्यौः शान्तिरन्तरिक्षः इति पठेत् । ॐ पुण्याहवाचनं शुभमस्तु इति ब्राह्मणा ब्रूयुः ॥ ततः
३९८ आचार्यो दीप – कलशगणेशान्स्वमन्त्रेण संपूज्य ॥ मण्डपपूजां ग्रहपूजां वास्तुपूजाञ्च
स्वस्वविधिना निर्वत्य ग्रहवास्त्वादीनां होमञ्च विधाय मध्यवेद्यां सर्वतोभद्रमण्डलं विलिखेत् ॥
तत्प्रकारश्च यथा ॥ प्रागुदीच्यां गतारेखा कुर्यात् एकोनविंशतिः ॥ खण्डेन्दुस्त्रिपदः कोणे
शृङ्खलापञ्चभिः पदैः ॥ एकादशपदावल्ली भद्रं वा नवभिः पदैः ॥ चतुर्विंशत्पदावापी
परिधिर्विंशकैः पदैः ॥ मध्ये षोडशभिः कोष्ठैः पद्ममष्टदलं स्मृतम् । श्वेतेन्दुः शृङ्खलां
कृष्णावल्लीं नीलेन पूरयेत् ॥ भद्रारुणासितावापी परिधिः पीतवर्णकः ॥ ब्राह्मान्तरदला स्वेता
कर्णिका पीतवर्णिका ॥ परिधावेष्टितं पद्मबाह्ये सत्त्वं रजस्तमः ॥ इत्थं सर्वतोभद्रमण्डलं विलि-
ख्य ॥ ततः पूजामारभेत ॥ तन्मध्ये ब्रह्मयज्ञानमिति ब्रह्माणम् उत्तरे आप्यायस्वेति सोमम्
ईशाने, पूर्वे त्रातारमिन्द्रमिति इन्द्राय नमः ॥ आग्नेये अग्निन्दूतमित्यग्निम् ॥ दक्षिणे

यमायत्वेति यमम् ॥ नैऋत्ये असुन्वन्तममिति निऋतिम् । पश्चिमे वरुणस्योत्तम्भनमसीति वरुणम् ॥ वायव्यां वायोयेते इति वायुम् ॥ वायुसोमयोर्मध्ये सुगावो देवा इति ध्रुवाद्यष्टवसून् ॥ सोमेशानयोर्मध्ये यऽएतावन्तश्चेति एकादशरुद्रान् ॥ ईशानेन्द्रयोर्मध्ये यज्ञोदेवानामिति द्वादशादित्यान् ॥ इन्द्राग्न्योर्मध्ये अश्विनोर्भैषज्येनेति अश्विनिकुमारौ ॥ अग्नियमयोर्मध्ये ओमासश्चेति विश्वेदेवम् । यम-निऋत्योर्मध्ये अभित्यन्देवसवितेति सप्तयक्षान् । निऋतिवरुणयोर्मध्ये आयङ्गौरिति सर्पान् ॥ वरुणवायोर्मध्ये अप्सरसामित्यप्सरसः ॥ ब्रह्म-सोमयोर्मध्ये यदक्रन्दः इति स्कन्दम् ॥ तत्रैव ऋषभमिति नन्दीश्वरम् । तत्रैव कद्रुद्रायेति शूलम् ॥ तत्रैव कुमारमिति महाकालम् । ब्रह्मेशानयोर्मध्ये अदितिरिति दक्षादिसप्तगणान् ॥ ब्रह्मा-इन्द्रयोर्मध्ये तामग्निवर्णमिति दुर्गाम् । तत्रैव इदं विष्णुरिति विष्णुम् ॥ ब्रह्माग्न्योर्मध्ये उदीरतामिति स्वधाम् ॥ ब्रह्म-यमयोर्मध्ये परमृत्योरिति मृत्युरोगौ । ब्रह्म निऋत्योर्मध्ये गणानान्त्वेति गणपतिम् । ब्रह्म-वरुणयोर्मध्ये शन्नोदेवीरित्यपः ॥ ब्रह्म-वाय्योर्मध्ये मरुतोयस्यहिक्षयेपाथा० इति मरुतः ॥ ब्रह्मणः पादमूले कर्णिकायाः अधः प्रदेशे स्योना पृथिवीरितिम् ॥ तत्रैव नदीभ्य इति इष्टम् ॥ तत्रैव धान्योराजमिति सप्तसागरान् ॥

तदुपरि मेरुम् नाममन्त्रेण पूजयेत् ।। ईशानसमीपे त्रिशूलम् ।। इन्द्रसमीपे वज्रम् ।। अग्निसमीपे शक्तिम् ।। यमसमीपे दण्डम् ।। निऋतिसमीपे खड्गम् ।। वरुणसमीपे पाशम् ।। वायुसमीपे अंकुशम् ।। तद्बाह्ये ।। उत्तरे गौतमम् । ईशाने भरद्वाजम् ।। पूर्वे विश्वामित्रम् ।। आग्नेये कश्यपम् ।। दक्षिणे जमदग्निम् ।। नैऋत्ये वसिष्ठम् ।। पश्चिमे अत्रिम् ।। वायव्ये अरुन्धतीम् ।। तद्बाह्ये पूर्वादिक्रमेण ऐन्द्रीं, कौमारीं, ब्राह्मीं, वाराहीम् चामुण्डां, वैष्णवीं, माहेश्वरीं, वैनायकीं इत्यष्टौ शक्तीः पूजयेत् ।। इत्थं मण्डलदेवताः सम्पूज्य सायङ्काले कर्त्ता सुप्रक्षालितपाणिपादः सर्वतोभद्रसमीपस्थाने उपविश्याऽऽचम्य पूर्वाभिमुखोपविश्य दीप कलश-गणेशादीन् तत्तन्मन्त्रेण पुष्पाञ्जलिं समर्प्य पूजामारभेत ।।

४१—रामनवमीव्रतोद्यापनविधिः

सर्वतोभद्रमण्डलैकदेशे कलशं सम्पूज्य तदुपरि ताम्रस्थालीं निधाय स्थाल्युपरि सुवर्ण-निर्मित जानकीसहित श्रीरामप्रतिमां तत्पूजाविधिना सम्पूज्य रात्रौ जागरणं कुर्यात् ।। प्रातर्देवस्यो त्तराङ्गपूजां विधाय पायससमिच्चरुतिलैः पुरुषसूक्तेन मूलमन्त्रेण वा १०८ होमं समाप्य श्रीरामं प्रार्थयेत् ।। नतोऽस्मि देवदेवेश श्रीराम त्वत्पदाम्बुजम् ।। यच्चिन्त्यये कर्मपाशाद् हृदि नित्यं मुमुक्षुभिः । मायया गुणमय्या त्वं सृजस्यसि विलुंपसि ।। अतस्त्वत्पादकमले भक्तिरेव सदाऽस्तु मे ।। संसारभयतप्तानां भैषज्यं भक्तिरेव ते ।। ।। इति संप्रार्थ्य ।। वटु - ब्राह्मणेभ्यः फल वस्त्र—सहितान् नववंशदंडदानम् ।। षोडशब्राह्मणेभ्यः सहिरण्य-घृत-तिल ताम्र पात्रदानम् ।। कन्या कुमार-पूजा ।। पूर्णपात्रदानं, प्रतिमादानम् ।। अद्येत्यादि । अमुकगोत्राऽहं मम श्रीरामप्रीतये कृतस्य रामनवमी - व्रतस्योद्यापनाङ्गत्वेन सुपूजितां सोपस्करां सौवर्णीं रामप्रतिमां श्रीरामप्रीतये अमुकगोत्रायेत्यादि ।। प्रार्थना—।। इमां स्वर्णमयीं रामप्रतिमां समलंकृताम् । चित्रवस्त्रयुगच्छन्नां रामाय राघवाय वै ।। श्रीरामप्रीतये दास्ये दुष्टो भवतु राघवः । दानप्रतिष्ठा—।। अद्य कृतैतत्सुपूजित-

स्वर्णनिर्मित-सोपस्कर-रामप्रतिमादानकर्मणः प्रतिष्ठासाङ्गतासिद्धये यद्देयंतद्दैवतमित्यादि ॥ गोदानम् अद्येत्यादि मम कृतस्यरामनवमीव्रतस्योद्यापनकर्मणः प्रतिष्ठासाङ्गतासिद्धये न्यूनातिरिक्त-परिपूर्णर्थम् इमां गां रुद्रदैवत्यां तन्निष्क्रयीभूतं द्रव्य तद्दैवत अमुकगोत्रायेत्यादि ॥ कपिलेति प्रार्थना ॥ दानप्रतिष्ठा ॥ अद्य कृतैतदित्यादि ॥

वा० ४०२

गा उ.

॥ इति रामनवमीव्रतप्रतिष्ठा ॥

*

४२—एकादश्युद्यापनम्

तत्र प्रथमं सर्वतोभद्रमध्ये कलशविधिना कलशं सम्पूज्य तदुपरि ताम्रस्थालीं निधाय तदुपरि शंख--चक्र - गदा—पद्म—युत—लक्ष्मीसहित-नारायण- प्रतिमां तत्पूजाविधिनासम्पूज्य ।। तत्र विशेषविहितानि लड्डूगुड घेवर—मूत्रिका सेल कसार-सक्तु-बारा-दुग्धभक्त-दधि-फीनी-स्वारी-पूवा-तिलौरा, वर्फि शर्करा रोटी रसभरी केरा ध्यू मुगदाल गुड भात ।। एतानी समर्प्य रात्रौ जागरणादिकं कुर्यात् ।। प्रातः पूजापद्धत्युक्तदेवान् प्रत्येकं पायस-तिलाज्यैः हुत्वा देवम् इदं विष्णुरिति मन्त्रेण पुरुषसूक्तेन वाऽष्टोतरशतं हुत्वा ।। देवस्योत्तरपूजां विधाय प्रार्थयेत् ।। कृष्णाय वासुदेवाय जगतः परमात्मने । शरण्याय प्रमेयाय गोविन्दय नमो नमः ।। नमः स्थूलाय सूक्ष्माय नमो व्यापकरूपिणे । अनन्ताय जगद्धात्रे ब्रह्मणेऽनन्तमूर्तये ।। अव्यक्तायाऽखिलेशाय चिद्रूपाय गुणात्मने ।। नमो मूर्त्ताय सिद्धाय पराय परमात्मने ।। देवदेवाय वन्द्याय पराय परमेष्ठिने ।। कर्त्रे विश्वस्य गोप्त्रे च तत्संहर्त्रे च ते नमः ।। मयाऽद्यास्मिन् व्रते देव यदपूर्णं कृतं विभो । सर्वं भवतु पूर्णत्वं

त्वत्प्रसादाज्जनार्दन ॥ इति सम्प्रार्थ्य ॥ द्वादश ब्राह्मणेभ्यः पक्वान्नसहितद्वादशपूर्णघटान् दत्त्वा शय्यादानमारभेत ॥ शय्यादानम् ॥ कर्ता आचम्य ॐ अद्येत्यादि देशकालाद्युल्लेखनान्ते अमुक गोत्रोऽमुकशर्मा सपत्नीकोहं मम श्रुतिस्मृतिपुराणोक्तफलावाप्तये एतावत्कालपर्यन्तं कृतस्याऽमुक व्रतस्योद्यापनकर्मणः प्रतिष्ठासाङ्गतासिद्धये श्रीपरमेश्वरोऽमुकदेवताप्रीतये अमुकगोत्रो अमुकनामानौ द्विजदम्पत्यौ यथामिलितोपचारैरहं पूजयिष्ये ॥ ततः पादप्रक्षालनम् ॥ अर्घ्यम् ॥ भूमिदेवाग्रजन्मासी केशवस्य प्रियः सदा ॥ प्रत्यक्षदेवस्त्वं गृह्ण मत्तोऽर्घ्यं द्विजसत्तम ॥ इति मन्त्रेणाऽर्घ्यं दत्त्वा ॥ आचमनीयम् ॥ यज्ञोपवीतम् ॥ आभूषणम् ॥ तिलकम् ॥ अक्षतान् ॥ पुष्पम् ॥ मालाम् । धूपम् । दीपम् । भागद्वयं नैवेद्यम् ॥ ताम्बूलम् ॥ द्रव्यम् ॥ नीराजनम् ॥ दक्षिणां दत्त्वा ॥ प्रार्थयेत् ॥ पूजितस्त्वं यथाशक्त्या पूजितः परमेश्वरः । ऐहिकामुष्मिकीं देव कार्यसिद्धिं ददस्व मे ॥ नमस्कारः । ततः सोपस्करणशय्यायै नमः इति ॥ गन्धादिना शय्यां सम्पूज्य वारिणाऽभिषिच्य कुश - तिल - जलान्यादाय ॥ अद्येत्यादि अमुकगोत्रोऽमुकशर्मा सपत्नीकोऽहं मम श्रीपरमेश्वरोऽमुकदेवताप्रीतये कृतस्याऽमुकव्रतस्योद्यापनकर्मणः प्रतिष्ठासाङ्गतासिद्धिपूर्वकं

सपत्नीकाय तुभ्यमहं सम्प्रददे ॥ प्रार्थना ॥ यथा च—कृष्णस्य शयनं नैव शून्यं सागरजातया ॥
शय्या ममाप्यशून्याऽस्तु तथा जन्मनि जन्मनि ॥ यस्मादशून्यं शयनं केशवस्य शिवस्य च ।
शय्या ममाप्यशून्याऽस्तु तस्माज्जन्मनि जन्मनि ॥ ततो दक्षिणाद्रव्यमादाय—ॐ मम अद्यकृतै-
तत् सोपस्करणशय्यादानप्रतिष्ठार्थम् इदम् हिरण्यम् अग्निदैवतममुकगोत्रायऽमुकशर्मणे ब्राह्मणाय
तुभ्यमहं सम्प्रददे ॥ अथ गोदानम् गां सम्पूज्य अद्येत्यादि अमुकगोत्रोऽमुकशर्मा सपत्नीकोऽहं
मम आचरितस्याऽमुकव्रतोद्यापनकर्मणः प्रतिष्ठा साङ्गतासिद्धिपूर्वक अमुकदेवताप्रीतये इमाम्
स्वर्णशृङ्गीं रौप्यखुरां ताम्रपृष्ठीं कांस्यपात्रदोहां मुक्तालङ्कारभूषितां सुवर्णतिलकसंयुतां वस्त्रयुगच्छन्नां
सवत्सामिमां गां रुद्रदैवताकाममुकगोत्रायाऽमुकशर्मणे ब्राह्मणाय तुभ्यमहं सम्प्रददे ॥ प्रार्थना—
कपिले सर्वदेवानां पूजनीयाऽसि रोहिणी ॥ तीर्थदे मयी यस्मात्ततः शान्तिं प्रयच्छ मे ॥ दान-
प्रतिष्ठा—अद्य कृतैतत् सालङ्कार गोदानप्रतिष्ठासाङ्गतासिद्धये इदं रजतं सोमदैवतं अमुकगोत्राय
इत्यादि ॥ ततो देयानि परिधानीयवस्त्राण्यग्रे कृत्वा सम्पूज्य परिधानीयवस्त्रेभ्यो नमः कुश-
जलेन सम्प्रोक्ष्य सङ्कल्पं कुर्यात् । अद्येत्यादि अमुकदेवताप्रीतये एतावत्कालपर्यन्त कृतस्याऽमुक-

व्रतस्योद्यापनकर्मणः साङ्गतासिद्धये एतद्वस्त्रम् तन्तुसंमितावच्छिन्नवैराजलोकं प्राप्तिपूर्वकसनका-
द्यवच्छिन्न - वैकुण्ठ - भवनप्राप्तिकामः श्रीपरमेश्वरीप्रीतये इमानि श्वेत - रक्त - पीत - हरितादि
वा. रंगयुतानि परिधानीयवस्त्राणि बृहस्पतिदैवतानि यथानामगोत्रायेत्यादि ॥ प्रार्थना ॥ श्वेतस्य—
४०६ शरण्यं सर्वलोकानां लज्जाया रक्षणं परम् । सुवेशधारी त्वं यस्मादतः शान्तिं प्रयच्छ मे ॥ रक्तस्य—
रक्तवस्त्रं शुभं यस्मादादित्यस्य प्रियं सदा ॥ प्रदानादस्य मे सूर्यः प्रीतः शान्तिं प्रयच्छतु ॥
कृष्णस्य—धर्मराजेन विधृतं कृष्णवस्त्रं सुशोभनम् ॥ सर्वपापप्रणाशोऽस्तु कृष्णवस्त्रप्रदानतः ॥
दानप्रतिष्ठा—अद्य कृतैतत् परिधानीयवस्त्रदानकर्मण. प्रतिष्ठासाङ्गतासिद्ध्यर्थम् यद्द्रव्यं तद्दैवतं
यथानामगोत्रायेत्यादि । अथ भूषणदानम्—कुशजलेनाऽऽभरणेभ्यो नमः इति सम्प्रोक्ष्य सम्पूज्य
सङ्कल्पं कुर्यात् — अद्येत्यादि मम सार्वदिक-विरहकालावस्थितोत्तम-रूप - सौभाग्ययुत - सुस्थित-
सप्तकुलाधिक-सर्वगुणात्मीय-विष्णुकुलजन्मकामः श्रीपरमेश्वरप्रीतये इमानि हेमरौप्य मुक्ताभर-
ण्यादिमयान्याभरणानि विष्णुदैवतानि यथानामगोत्राय इत्यादि ॥ सुवर्णस्य प्रार्थना—हिरण्यगर्भ-
गर्भस्थ हेमबीजं विभावसोः ॥ अनन्तपुण्यफलदमतः शान्तिं प्रयच्छ मे ॥ रौप्यस्य—शिवनेत्रोद्भवं

पुण्यं रजतं पितृवस्त्रभम् ॥ तस्मात् अस्य प्रदानेन रुद्रः सम्प्रीयतां मम ॥ अंगुलीयस्य—
हिरण्यगर्भसम्भूतं सौवर्णं चाङ्गुलीयकम् ॥ धर्मप्रद प्रयच्छामि प्रीयतां कमलापतिः ॥ वलयस्य—
वा काञ्चनं हस्तबलयं रूपकान्तिसुखप्रदम् । विभूषणं प्रयच्छामि प्रीयतां कमलापतिः ॥ कुण्डलस्य— ए.उ.
४०७ क्षीरोदमथने पूर्वमुद्धृतं कुण्डलद्वयम् ॥ श्रिया सह समुद्भूतं ददे श्रीः प्रीयतामिति ॥ मुक्तायाः—
ताम्रवर्णासमाभासा रत्नेष्वधिक उत्तमा ॥ मुक्ताः समुद्भवाः सन्तु भुक्ति - मुक्तिप्रदा मम ॥
रत्नेषु मणिषु चैव सर्वे देवा व्यवस्थिता ॥ तथा शान्ति प्रयच्छन्तु मणिरत्नं ददाम्यहम् ॥ ॐ
अद्यकृतैतत् हेमरौप्यमुक्तामयाऽऽभरणदानप्रतिष्ठार्थं यद्देयं तद्दैवतं यथानामगोत्रायेत्यादि ॥ हेम
रौप्य–ताम्र–पित्तल–कांस्यादिपानभोजन-पाकभाण्डादिदानम् ॥ कुशवारिणा पाकभोजनपान-
पात्रेभ्यो नमः इति सम्प्रोक्ष्य सम्पूज्य च संस्पृश्य—ॐ अद्येत्यादि सौभाग्याऽवैधव्य सर्वगुणोपेत-
भृत्यमित्रादिजन्ययुतत्वसुखानुत्तमरूपाव प्तिकाम इमानि हेम-रौप्य–ताम्र–पित्तल–कांस्याऽय-
सादिघटतानि पानादि–पात्राणि विष्णुदैवतानि यथानामगोत्रायेत्यादि ॥ प्रार्थना–आपाक-
ब्रह्मरूपाणि भाण्डानीमानि जन्तवः ॥ प्रदानात्ते प्रजापुष्टिः—सर्वत्राऽस्तु ममाऽक्षया ॥ भाण्डरूपाणि

यान्यत्र कल्पितानि मया किल ॥ भूत्वा सत्त्वानुरूपाणि उपतिष्ठन्तु तानि वै ॥ स्वर्णपात्रस्य—
जन्मान्तरसहस्रेषु यत्कृतं दुरितं मया ॥ स्वर्णपात्र प्रदानेन शान्तिरस्तु सदा मम ॥ वा. ए.उ.
पित्तलस्य—पापानि यान्यनेकानि कामाऽकाम कृतानि च ॥ पित्तलस्य प्रदानेन तानि नश्यन्तु
४०८ मे सदा ॥ लौहस्य- -याति पापान्यनेकानि भयकानि कृतानि च ॥ लोहपात्र प्रदानेन तानि
नश्यन्तु मे सदा ॥ दानप्रतिष्ठा—अद्य कृतैतत् हेम-रौप्य-ताम्र-पित्तलाऽयस=कांस्यादिभोजन-
पाकादिपात्रदानप्रतिष्ठार्थं यद्देयं तद्दैवतं यथानामगोत्राय यथा० इत्यादि ॥ अथान्नदानम्—
कुशजलेन सव्यञ्जनकृण्डुलेभ्यो नमः ॥ इति सप्रोक्ष्य ॥ सम्पूज्य ॥ संस्पृश्य ॥ ॐ अद्येत्यादि
मम सर्वकामसमृद्धि-श्रीमत्सूर्यसंकाश — विमानारोहण — बहुगन्धर्वोपगीतमान — बह्वप्सरोगणः
सेव्यमान – तण्डुलसमसंख्यासहस्रवर्षावच्छिन्न – स्वर्गवासकामः तदुत्तर सवगुणोपेतान् पुरुषाहार-
परिमितान् ससूपतण्डुलान् प्रजापतिदैवतान् यथानामगोत्रायेत्यादि ॥ प्रार्थना—॥ पावनाः
सर्वयज्ञेषु प्रशस्ता होमकर्मणि ॥ तस्मात्तण्डुलदानेन प्रीयतां विश्वदेवताः ॥ दानप्रतिष्ठा — ॥
ॐ कृतैतत्सव्यंजन तण्डुलदानप्रतिष्ठार्थं यद्देयं तद्दैवतं यथानामगोत्रायेत्यादि ॥ अथ

छत्रदानम् ।। कुशजलेन छत्राय नमः ।। इति संप्रोक्ष्य सम्पूज्य ॐ अद्येत्यादि यमपथाधिकरणक-
वा. तीक्ष्णभयक्षुराधारसिमार्ग - संतरणधोरातपवारणार्थम् इमं छत्रं इन्द्रदैवतं यथानामगोत्रा- ए.उ.
येत्यादि ।। प्रार्थना –।। अद्य सर्वेषामेव दानानां छत्रमातपवारणम । सुखदं मोक्षदं यस्मात्तस्माच्छान्तिं
प्रयच्छ मे ।। दानप्रतिष्ठा– ।। अद्य कृतैतदित्यादि । अथोपानद्दानम्– ।। कुशजलेन उपानद्भ्यां ४०९
नमः इति संप्रोक्ष्य सम्पूज्य अद्य यमपथाधिकरणकदुर्गभूसंतरणार्थं तप्तबालुकासिकण्टकितसंतर-
णोपन्न - सुखित्वकाम इमे उपानहौ उत्तानाङ्गिरो दैवते यथानामगोत्रायेत्यादि ।। प्रार्थना –।।
उपानहौ प्रदास्यामि कंटकादि - निवारणे ।। सर्वस्थानेषु सुखदमतः शान्तिं प्रयच्छताम् ।।
दानप्रतिष्ठा–।। अद्य कृतैतदित्यादि ।। अथ यष्टिदानम् ।। कुशजलेन यष्ट्यै नमः इति
संप्रोक्ष्य सम्पूज्य च ।। अद्य नेत्रहीन - दुर्बलानां सुखेन मार्गगमनार्थं दुष्टसत्त्वभय- निवारणाथ
इमां यष्टिं वनस्पतिदैवताकां यथानामगोत्रायेत्यादि ।। प्रार्थना – ।। यतिभ्यो वैष्णवं दण्डम्
द्विजेभ्यो हि खनित्रकम् । प्रदाय परलोकेऽसौ यमदण्डं न गच्छति ।। दानप्रतिष्ठा – ।। ३५
अद्य कृतैतदित्यादि ।। व्यजनदानम् ।। कुशजलेन व्यजनाय नमः इति संप्रोक्ष्य संपूज्य अद्य मम

धर्मकाले जनिष्यमाण-शरीरसुखार्थम् इदं व्यजनं समीरदैवतं यथानामगोत्रयेत्यादि ॥
प्रार्थना — ॥ दुःखोपहा सुखप्राप्तिर्दाहशान्तिकरं परम् ॥ तस्माद् व्यजनदानाच्च तापाच्छान्ति
प्रयच्छतु ॥ दानप्रतिष्ठा — ॥ अद्य कृतैतदित्यादि ॥ ततः पूर्णपात्रदानम् ॥ ॐ अद्येत्यादि
मया कृतस्यैकादशीव्रतस्य यथोक्तफलावाप्तये श्रीमल्लक्ष्मीनारायण -- प्रतिमापूजन - हवन -
शय्यादानादिकर्मणः परिपूर्णतासिद्धये इदं तण्डुलपूर्ण सफलं सद्रव्यं वंशपात्रं प्रजापतिदैवतं
यथानामगोत्रायेत्यादि । अथ प्रतिमादानम् ॥ अद्येत्यादि श्रुतिस्मृति- पुराणोक्तफलावाप्ति -
पूर्वकं श्रीलक्ष्मीनारायणप्रीतये कृतस्यैकादशीव्रतस्योद्यापनाङ्गत्वेन सुपूजितां सोपस्कर -
सौवर्णीमिमां लक्ष्मीनारायणप्रतिमां लक्ष्मीनारायणप्रीतये अकुकगोत्रायेत्यादि ॥ प्रार्थना — ॥
हर प्रसीद देवेश सर्वलोकवरप्रद ॥ तव मूर्त्तिप्रदानेन व्रतं संपूर्णमस्तु मे ॥ दानप्रतिष्ठा —॥
अद्य कृतैतत् सुपूजितस्वननिर्मित– सोपस्कर – लक्ष्मीनारायण–प्रतिमा – दानकर्मणः प्रतिष्ठा –
साङ्गतासिद्धये यद्देयं तद्दैवतं यथानाम गोत्रायेत्यादि ॥ ॐ अद्येत्यादि मत्कृतस्यै –
कादशी व्रतस्योद्यापनकर्मणः साङ्गतासिद्धये न्यूनातिरिक्तपरिपूर्णार्थम् इमां गां रुद्रदैवत्यां

वा. ४१० ए.उ.

तन्निष्क्रयीभूतममुकद्रव्यममुकदैवतं यथानामगोत्रायेत्यादि ॥ प्राथना – ॥ नमस्ते कपिले देवि संसारार्णवतारिणि ॥ मया दत्ता द्विजेन्द्राय प्रियतां च जनार्द्दनः ॥ दानप्रतिष्ठा – अद्य कृतैतदित्यादि ॥ ॥ इत्येकादम्युद्यापनविधिः ॥

❀

४६–अथ पौर्णमासीव्रतप्रतिष्ठाविधिः

सर्वतोभद्रमण्डलैकदेशे कलशं सम्पूज्य ॥ तदुपरिताम्रस्थालीं स्थाल्युपरि रौप्यनिर्मित - चन्द्रपतिमां तत्पूजाविधिना सम्पूज्य ॥ रात्रौ जागरणम् ॥ प्रातश्च चन्द्रस्योत्तराङ्गपूजां निर्वर्त्य इमन्देवेति मन्त्रेण १०८ होमः ॥ ततः प्रार्थना ॥ नमस्तेऽस्तु निशानाथ रोहिण्याः प्रियवल्लभ। नमस्ते हरभूषाय कलाषोडशधारिणे । रोगमृत्युमहोत्पातं ग्रहदोषसमुद्भवम् । तत् सर्वं कुरु मे शान्तिं ताराधिप नमोऽस्तु ते । इति संप्रार्थ्य । षोडशब्राह्मणेभ्यः क्षीरपूर्णम् षोडश—

रौप्यपात्रद्वानम् ॥ कांस्यपात्रदानम् ॥ सवस्त्रं १६ ऊदककुम्भदानम् ॥ ततः पूर्णपादानं प्रतिमाहीनाङ्गगोदानम् — अद्येत्यादि मम श्रुतिस्मृतिपुराणोक्तफलावाप्तिपूर्वक — चन्द्रप्रीतये कृतस्य पौर्णमासीव्रतस्योद्यापनाङ्गत्वेन सुपूजितां सोपस्करां रौप्यनिर्मितां चन्द्रप्रतिमां चन्द्रप्रीतये यथानामगोत्रायेत्यादि०। प्रार्थना — चन्द्र प्रसीद देवेश सर्वलोकवरप्रद । तव बिम्बप्रदानेन व्रतसम्पूर्णमस्तु मे ॥ दानप्रतिष्ठा – अद्य कृतैतत् सुपूजितरौप्यनिर्मिय – सोपस्कर – चन्द्र – बिम्बदानकर्मणः प्रतिष्ठासाङ्गतासिद्धये यद्देयं तद्दैवतं यथानामगोत्रायेत्यादि ॥ गोदानम् — अद्येत्यादि मम एतावत्कालपर्यन्तं कृतस्य पौर्णमासीव्रतस्य यथोक्तफलावाप्तये कृतैतदुद्यापन – कर्मणः प्रतिष्ठासाङ्गतासिद्धये न्यूनातिरिक्तपरिपूर्णार्थमिमां गां रुद्रदैवत्यां तन्निष्क्रयं द्रव्यं अमुकदैवत यथानामगोत्रायेत्यादि०॥ प्रार्थना–कपिलेसर्वदेवानामिति । दानप्रतिष्ठा —अद्य कृतैतत् इत्यादि ॥

इति पौर्णमासीव्रतप्रतिष्ठाविधिः ॥

❀

४४—कृष्णाऽष्टम्युद्यापनविधिः

सर्वतोभद्रैकदेशे कलशं संस्थाप्य सम्पूज्य च तदुपरि ताम्रस्थालीं स्थाल्युपरि लक्ष्मीयुक्त चतुर्भुज - कौस्तुभादिसंयुक्त सुवर्णप्रतिमां संस्थाप्य। तत् पूजाविधिना पूजां समाप्य रात्रौ जागरणं कुर्यात्। प्रातः देवस्योत्तराङ्गपूजां विधाय तिलाज्ययुक्त पायसेन मूलमन्त्रेण वा १०८ पुरुषसूक्तेन च हुत्वा देवं प्रार्थयेत्— नमस्तुभ्यं जगन्नाथ देवकीतनय प्रभो। वसुदेवात्मजानन्त यशोनन्दवर्द्धन॥ गोविन्द गोकुलानन्द गोपीकान्त नमोऽस्तु ते। त्राहि मां सर्वपापघ्न दुःखशोकार्णवात् प्रभो॥ सर्वलोकेश्वर त्राहि पतितं मां भवार्णवात्॥ इति सम्प्रार्थ्य॥ अष्ट-ब्राह्मणेभ्यो अन्नपूर्णकलशाष्टकदानम् सति सम्भवे शय्यां दत्त्वा पूर्णपात्रम् दद्यात्॥ अथ प्रति-मादानम्—ॐ अद्येत्यादि अमुकशर्माऽहं मम सकुटुम्बस्य कृष्णाष्टमीव्रतस्य यथोक्तफलावाप्तये उद्यापनाङ्गत्वेन सुपूजितां सौवर्णसोपस्करां श्रीकृष्णप्रतिमां श्रीकृष्णप्रीतये यथानामगोत्रायेति॥ प्रार्थना—ॐ अवतारसहस्राणि करोषि मधुसूदन। अस्य दानेन देवेश व्रतं सम्पूर्णमस्तु मे॥ दानप्रतिष्ठा—ॐ अद्यकृतैतत् सुपूजितस्वर्णनिर्मितसोपस्कर श्रीकृष्ण-प्रतिमादानकर्मणः सांगता

सिद्धये यद्देयं तद्दैवतं यथानामगोत्राय० इत्यादि । गोदानम्-ॐ अद्येत्यादि अमुकशर्माऽहं मम कृतस्य कृष्णाष्टमीव्रतस्योद्यापनकर्मणः साङ्गतासिद्धये न्यूनातिरिक्तपरिपूर्णार्थम् इमां गां रुद्रदैवत्यां तन्निष्क्रयीभूतं द्रव्यं अमुकदैवतं यथानामगोत्राय० इत्यादि । प्रार्थना-कपिले० इति । दानप्रतिष्ठा-अद्यकृतैतत् गोदानकर्मण प्रतिष्ठासाङ्गतासिद्धये इदं द्रव्यममुकदैवतं यथेत्यादि ॥

इति कृष्णाष्टमीव्रतोद्यापनविधिः ।

*

४५—अथ हरितालिकाव्रतोद्यापनविधिः

सर्वतोभद्रमण्डलैकदेशे कलशं संस्थाप्य सम्पूज्य च तदुपरि ताम्रस्थालीं निधाय स्थाल्युपरि रजतनिर्मितां वृषारूढां महादेवप्रतिमां सुवर्णनिर्मितां गौरीप्रतिमां च तत् पूजनविधिना सम्पूज्य रात्रौ जागरणं कुर्यात् । प्रातर्देव्या उत्तरांगपूजां विधाय । ॐ नमः शिवाय शान्ताय

पञ्चवक्त्राय शूलिने ॥ नन्दि-भृङ्गि-महाकाल-गणयुक्ताय शम्भवे ॥ शिवायै हरकान्तायै प्रकृत्यै सृष्टिहेतवे । शिवायै सर्वमाङ्गल्यै शिवरूप्यै जगन्मये ॥ संसारभयसन्तापात् त्राहि मां सिंह-वाहिनि ॥ येस कामेन देवेशि पूजिताऽसि महेश्वरि ॥ राज्यसौभाग्य - सम्पत्तिं देहि मामम्ब पार्वति । इति प्रार्थयेत् ॥ ततः षोडशब्राह्मणेभ्यः सौभाग्यद्रव्य - वस्त्र - सहित-षोडश-वंशपात्र-दानम् ॥ शय्यादानदिने च तान् दत्त्वा पूर्णपात्रदानम् ॥ अथ प्रतिमादानम् ॥ अद्येत्यादि अमुकगोत्रोऽहं मम श्रुतिस्मृतिपुराणोक्तफलावासिपूर्वक श्रीउमामहेश्वरप्रीतये कृतस्य हरितालिकाव्रतस्योद्यापनांगत्वेन सुपूजितां सोपस्करां रौप्यनिर्मितमहेश्वरप्रतिमां सुवर्णनिर्मित-गौरीप्रतिमामुमामहेश्वरदेवतामुमामहेश्वप्रीतये यथानामगोत्रायेत्यादि ॥ प्रार्थना— । शम्भो ! प्रसीद देवेश ! सर्वलोकवरप्रद ॥ तव मूर्तिप्रदानेन व्रतं सम्पूर्णमस्तु मे ॥ दानप्रतिष्ठा—॥ अद्य कृतैतदुमामहेश्वरप्रतिमादानकर्मणः साङ्गतासिद्धये यद्देयं तद्दैवतं यथानामगोत्रयेत्यादि ॥ गोदानम् ॥ ॐ अद्येत्यादि मया कृतस्य हरितालिकाव्रतस्मोद्यापनकर्मणः प्रतिष्ठासाङ्गतासिद्धये न्यूनातिरिक्तपूर्णार्थम् इमां गां रुद्रदैवत्यां तन्निष्क्रयीभूतं द्रव्यममुकदैवतं यथानामगोत्रायेत्यादि ॥

प्रार्थना–॥ कपिलेति ॥ दानप्रतिष्ठा ॥ अद्य कृतैतत्सालंकारगोदानकर्मणः प्रतिष्ठासगितासिद्धये यद्द्रव्यंतद्दैवताकममुकेत्यादि ॥ ॥ इति हरितालिकोद्यापनविधिः ॥

*

४६–अथ ऋषिपञ्चम्युद्यापनविधिः

सर्वतोभद्रमण्डलैकदेशे कलशं संस्थाप्य सम्पूज्य च तदुपरि ताम्रस्थाल्युपरि सौवर्णीः ऋषिप्रतिमास्संस्थाप्य तत्पूजाविधिना पूजां निर्वर्त्य रात्रौ जागरणं कुर्यात् ॥ प्रातर्ऋषीणा-मुत्तराङ्गपूजां विधाय तिलसर्पिषा १०८ सप्तऋषय इति मन्त्रेण होमं समाप्य ऋषीन् प्रार्थयेत् । नमोऽस्तु ऋषिवृन्देभ्यो दे र्षिभ्यो नमो नमः ॥ सर्वपापहरेभ्यो हि वेदविद्भ्यो नमो नमः ॥ एते सप्तर्षयः सर्वे भक्त्या सम्पूजिता मया ॥ सवपापं व्यपोहन्तु ज्ञानतोऽज्ञानतः कृतम् ॥ न्यूनातिरिक्त-कर्माणि मया यानि कृतानि च ॥ क्षमध्वं तानि सर्वाणि यूयं सर्वे तपोधनाः ॥ इति संप्रार्थ्य ।

सप्तब्राह्मणेभ्यो वस्त्रालंकारदक्षिणादानम् । शय्यां तेभ्यो दत्त्वापूर्णपात्रम् दद्यात् ।। अथ प्रतिमा-दानम् ।। अद्येत्यादि अमुकदेव्यहं मम रजस्वलावस्थाय ज्ञाताज्ञातकृतसंपर्कजनित-दोषनिवृत्तये सप्तर्षिप्रीत्यर्थम् कृतस्य ऋषिपञ्चमीव्रतस्य यथोक्तफलावाप्तये उद्यापनाङ्गत्वेन सुपूजिताः सौवर्ण्याः सारुन्धतिकाः सप्तर्षिप्रतिमाः सप्तर्षिप्रीतये अमुकगोत्रायामुकशर्मणे ब्राह्मणायेत्यादि ।। प्रार्थना ।। तपोधना ज्योतिरूपा ऋषयो मे प्रसीदतः ।। भवतां मूर्तिदानने व्रतं सपूर्णमस्तु मे ।। दानप्रतिष्ठा-ॐ अद्य कृतैतत् सुपूजितसारुन्धतिकसप्तर्षि-प्रतिमादानकर्मणः प्रतिष्ठासाङ्गतासिद्धये इदं द्रव्यममुकदैवतं यथानामगोत्रायेत्यादि ।। गोदानम् ।। अद्य कृतैतदृषिपञ्चमीव्रतोद्यापनकर्मणः प्रतिष्ठासाङ्गतासिद्धये न्यूनातिरिक्तपरिपूर्णार्थम् इमां गां रुद्रदैवत्यां तन्निष्क्रयं द्रव्यं वा तद्दैवतं यथानामगोत्रायेत्यादि ।। प्राथना — ।। कपिले० इति ।। दानप्रतिष्ठा ।। अद्य कृतैतत् गोदान - प्रतिष्ठा - साङ्गतासिद्धये यद्दैवतं यथानामगोत्रा-येत्यादि इति ।। ।। इति ऋषिपञ्चमीव्रतोद्यापनविधिः ।।

*

४७—अथ अनन्तचतुर्दशी उद्यापनविधिः

वा. सर्वतोभद्रैशे कलसं सम्पूज्य तदुपरि ताम्रस्थाल्युपरि ग्रन्थिवत्सुवर्णानन्तदोरकं सलक्ष्मीकं चतुर्भुजं वासुदेवप्रतीमां तत्पूजाविधिना सम्पूज्य ॥ रात्रौ जागरणम् ॥ प्रातर्देवस्योत्थाराङ्गपूजा विधाय ॥ नधिमध्वाज्यदुग्धाक्ततिलैर्वा पायसेनाश्वत्थशमीपल्लवैश्च अतो देवेति मन्त्रैश्च प्रत्येकं १०८ होमं कृत्वा प्रार्थयेत् ॥ अनन्तकामान् मे देहि सर्वकाम-फलप्रद । अन्नताय नमस्तुभ्यं पुत्रपौत्रायुवर्द्धन ॥ अनन्तः सर्वकामानामधिपः सर्वकामदः ॥ व्रतेनानेन सुप्रीतो भव त्वं हि सदा मम ॥ इति संप्रार्थ्य चतुर्दशब्राह्मणेभ्यः पक्वान्नपूरितवस्त्रोपवीतसहीत-चतुर्दशकुम्भदानम् ॥ सति संभवे शय्यां दत्त्वा ॥ पूर्णपात्रदानम् ॥ ततः प्रतिमादानम् ॥ अद्येत्यादि अमुकशर्माऽहं मम क्षेमस्थैर्यायुरारोग्यचातुर्विधपुरुषार्थसिद्धिपूर्वकाऽनन्तप्रीतये कृतस्यानन्तचतुर्दशीव्रतस्य यथोक्तफलावाप्तये उद्यापनाङ्गत्वेन, सुपूजितां सौवर्णिम् सोपस्कारां अनन्तप्रतिमां अनन्तदैवताकां यथानामगोत्रायेत्यादि ॥ तत्प्रार्थना ॥ अनन्त देवदेवेश सर्वलोकवरप्रद । तव मूर्तिप्रदानेन व्रतं सम्पूर्णमस्तु मे ॥ दानप्रतिष्ठा—॥ अद्य कृतैतत्सुपूजितस्वर्ण-

अ च.

४१८

निर्मितानन्तप्रतिमादानकर्मणः प्रतिष्ठासाङ्गतासिद्धये यद्देयं तद्दैवतमित्यादि ॥ गोदानम् ॥ अद्येत्यादि अमुकशर्माऽहं मम कृतस्यानन्तचतुर्दशीव्रतस्योद्यापनकर्मणः साङ्गतासिद्धये न्यूनातिरिक्तपरिपूर्णार्थमिमां गामित्यादि ॥ कपिलेति प्रार्थना ॥ दानप्रतिष्ठा ॥ अद्य कृतैतदित्यादि ॥ ॥ इति अनन्तचतुर्दश्युद्यापनविधिः ॥

❋

४८–अथ कोजाग्रतव्रतप्रतिष्ठाविधिः

सुवर्णनिर्मितलक्ष्मीप्रतिमा ऐरावतारूढ-सुवर्णेन्द्रप्रतिमापूजनम् ॥ इदं विष्णुरिति, त्रातारमिन्द्रमिति, श्रीश्चते लक्ष्मीश्चेति मन्त्रेण १०८ होमः ॥ प्रतिमादानम् ॥ गोदानम् ॥ पूर्णपात्रदानम् ॥

॥ इति कोजाग्रतप्रतिष्ठाविधिः समाप्तः ॥

❀

४९–अथ कार्तिकव्रतप्रतिष्ठाविधिः

सर्वतोभद्रमण्डलैकदेशे कलशं सम्पूज्य ।। तदुपरि ताम्रस्थालीं स्थाल्युपरि स्वर्णनिर्मित-राधादामोदरप्रतिमां तत्पूजाविधिना सम्पूज्य रात्रौ जागरणम् ।। प्रातस्तथोत्तराङ्गपूजां विधाय नाममन्त्रेण पायसतिलैः १०८ होमः ।। ततः प्रार्थना ।। दामोदर नमस्तेऽस्तु राधया सहित प्रभो । व्रतादस्माच्च यत्पापं सप्तजन्मकृतं मया ।। तत्सर्वं नाशमायातु स्थिरा मे चाऽस्तु संततिः ।। मनोरथाश्च सफला सन्तु नित्यं तवार्चया ।। देहान्ते वैष्णवं स्थानं प्राप्नुयामतदुर्लभम् ।। मातस्तुलसि कल्याणि देवि दामोदरप्रिये ।। प्रसीद मम देवेशि कृपया परया सदा ।। अभीष्टफलदां सिद्धिं कुरु मे माधवप्रिये ।। व्रतं सम्पूर्णतां यातु त्वत्प्रसादात् सुरेश्वरि ।। इति सम्प्रार्थ्य पूर्णपात्रं, प्रतिमादानम् ।। अद्येत्यादि मम श्रुति- स्मृति-पुराणोक्त-फलवाप्तये कृतस्य कार्तिकव्रतस्य यथोक्तफलावाप्तये उद्यापनांगत्वेन सुपूजितां सोपस्करां स्वर्णनिर्मित-प्रतिमां राधादामोदरप्रीतये अमुकगोत्रायेत्यादि ।। प्रार्थना—।। हरे प्रसीद देवेश सर्वलोक-वरप्रद । तव मूर्तिप्रदानेन व्रतं सम्पूर्णमस्तु मे ।। दानप्रतिष्ठा ।। अद्य कृतैतत्सुपूजितस्वर्णनिर्मित-

राधादामोदरप्रतिमादानकर्मणां प्रतिमासाङ्गतासिद्धये यद्देयं तद्दैवतमित्यादि ॥ गोदानम्—
ॐ अद्येत्यादि अमुकशर्माऽहं मम कार्तिकव्रत - दीपदान - तुलसीपूजनादेयथोक्तफलप्राप्तये
कृतस्योद्यापनकर्मणः प्रतिष्ठासाङ्गतासिद्धये इमां गां रुद्रदैवत्याम् तन्निष्क्रयं द्रव्यं तद्दैवतम्
यथानामगोत्राय० इत्यादि । प्राथना—कपिलेति ॥ दानप्रतिष्ठा—अद्य कृतैतत् इत्यादि ॥ स्वर्ण-
निर्मिततुलसीवृक्षदानम् अद्येत्यादि मम एतावत् कालपर्यन्त कृतस्य तुलसीव्रतस्योद्यापनकर्मणः
प्रतिष्ठासाङ्गता सिद्धये इमां सुपूजितां सोपस्करां सुवर्ण-निर्मित-तुलसी-वृक्षरूपां श्री तुलसीदेवी
प्रीतये अमुकगोत्रायेत्यादि ॥ प्रार्थना—नमस्तुलसि कल्याणि गोविन्दप्रियवल्लभे ॥ तव मूर्ति-
प्रदानेन व्रतं सम्पूर्णमस्तु मे ॥ दानप्रतिष्ठा—ॐ अद्येत्यादि कृतैतत् सुपूजित-स्वर्णनिर्मित
तुलसीवृक्षदानकर्मणः प्रतिष्ठा साङ्गतासिद्धये यद् देयं तद् दैवतमित्यादि ॥ ततो रौप्यादिनिर्मितं
दीपपात्राणाम् यथाशक्तिदानम् ॥ पूर्णपात्रदानम् ॥ (५८)

इति कार्तिकव्रतोद्यापनविधिः समाप्तः ॥

५०–अथ पौषार्कव्रतप्रतिष्ठाविधिः

सर्वतोभद्रमण्डलैकदेशे कलशं सम्पूज्य, तदुपरिताम्रस्थालीं स्थाल्युपरि स्वर्णनिर्मितरविप्रतिमां संस्थाप्य, सम्पूज्य रात्रौ जागरणम्, प्रातः उत्तरपूजां विधाय प्रार्थयेत्–सूर्याय वै पापविनाशनाय विश्वात्मने सप्ततुरंगमाय। सामर्ग्यजुर्वामनिधं विधातर्भवाब्धिपोताय नमः सवित्रे ॥ भानो भास्कर मार्तण्ड चाद्ररश्मे दिवाकर। आरोग्यमायुर्विजयं विद्यां देहि नमोऽस्तु ते ॥ धान्य-गोधूम-गुड-लवणादिदानम्। पूर्णपात्रम्। प्रतिमादानम्–अद्येत्यादि मम एतावत्कृतस्य पौषार्कव्रतस्य यथोक्त-फलावाप्तये उद्यापनाङ्गत्वेन सुपूजितां सोपस्करां सूर्यप्रतिमां श्रीसूर्यप्रीतये यथानाम० ॥ प्रार्थना–भानो प्रसीद देवेश सर्वलोकनमस्कृत। तव मूर्तिप्रदानेन व्रतं सम्पूर्णमस्तु मे ॥ दानप्रतिष्ठा अद्य कृतैतत् सुपूजित-सोपस्कर सुवर्णनिर्मित प्रतिमादानकर्मणः साङ्गतासिद्ध्यर्थं यथानामगोत्रायेत्यादि। गोदानम्–अद्येत्यादि मम एतावत्कालकृतस्य पौषार्कव्रतस्य उद्यापनकर्मणः प्रतिष्ठासाङ्गतासिद्ध्ये इमां गां रुद्रदैवत्यामित्यादि। प्रार्थना-कपिले०। दानप्रतिष्ठा–अद्य कृतैतत्० (५९) ॥ इति ॥

❀

५१-अथ स्वस्थानीव्रतप्रतिष्ठाविधिः

सुवर्णप्रतिमापूजनम् ।। देवीर्द्वारेति मन्त्रेण होमः १०८ ।। शष्कुली-ताम्बूल-पूगीफल नाना-पुष्पाणां दानम् । प्रतिमादानम् । गोदानम् (५८) ।। इति स्वस्थानीव्रतप्रतिष्ठाविधिः ।।

५२-अथ शिवरात्रिव्रतप्रतिष्ठाविधिः

सर्वतोभद्रमण्डलैकदेशे कलशं सम्पूज्य ।। तदुपरि ताम्रस्थालीं स्थाल्युपरि वृषभस्थितामुमा-महेश्वरमूर्तिं तद्विधिना सम्पूज्य। रात्रौ जागरणम् ।। प्रातर्देवस्योत्तराङ्गपूजां विधाय । पायस-तिलैः ॐ नमः शम्भवाय० ।। गौरी शिवायेति मन्त्राभ्याम् प्रत्येकं १०८ होमः । बिल्वपत्रतिलव्रीह्यादि-भिरजैकपदादि १४ नाममन्त्रैर्होमः । ततो देवं प्रार्थयेत् । मन्त्रः । (शनिप्रदोषे ५७ द्रष्टव्यः) । सर्वत्र यज्ञोपवीतजलपूर्णम् १४ घटदानम् । प्रतिमादानादिकं सर्वं शनिप्रदोषोक्तमेव द्रष्टव्यम् ।। तत्र शनिप्रदोषपदस्थाने शिवरात्रिव्रतस्येति विशेषः (५८) ।।

।। इति शिवरात्रिव्रतप्रतिष्ठाविधिः समाप्तः ।।

५३-अथ सोमवतीव्रतप्रतिष्ठाविधिः

सर्वतोभद्रमण्डलैकदेशे कलशं सम्पूज्य ॥ तदुपरि ताम्रस्थालीं स्थाल्युपरि स्वर्णनिर्मित- सो.व्र
वा. लक्ष्मी-नारायणप्रतिमां संस्थाप्य तत् पूजाविधिना सम्पूज्य ॥ रात्रौ जागरणम् कृत्वा ॥ प्रातः देव
२४ स्योत्तराङ्गपूजां विधाय ॥ इदं विष्णुरिति मन्त्रेण अश्वत्थसमिद्भिः पायस-तिलैश्च १०८ हुत्वा
प्रार्थयेत्-ॐ नारायणाय देवाय हरये परमात्मने ॥ शरण्यायाऽप्रमेयाय गोविन्दाय नमो नमः ॥
देवदेवाय वन्द्याय पराय परमेष्ठिने ॥ कर्त्रे विश्वस्य गोप्त्रे च तत् संहर्त्रे च ते नमः ॥ इति
सम्प्रार्थ्य द्वादशब्राह्मणेभ्यो यज्ञोपवीत - वस्त्र - पायस - भोजन - दानम् ॥ ततो पूर्णपात्रप्रतिमा
दानम्- ॐ अद्येत्यादि अमुकदेव्यहं मम सकलपापक्षयपूर्वक-पुत्र-पौत्राद्यभिवृद्धये जन्मजन्मन्य-
वैधव्य-अखण्ड सौभाग्य - प्राप्तिकामनया कृतस्य सोमवतीव्रतस्य यथोक्तफलावाप्तये उद्यापनाङ्गत्वेन
सुपूजिताम् सोपस्कराम् स्वर्णनिर्मित लक्ष्मी-नारायणप्रतिमाम् लक्ष्मी-नारायणप्रीतये अमुक-
गोत्रायेत्यादि ॥ प्रार्थना—हरे प्रसीद देवेश सर्वलोकवरप्रद ॥ तव मूर्तिप्रदानेन पूर्णा सन्तु

मनोरथाः ॥ दानप्रतिष्ठा–अद्य कृतैतत् सोपस्कर सुपूजित स्वर्णनिर्मित-लक्ष्मीनारायणप्रतिमादान-प्रतिष्ठा साङ्गतासिद्धये यद्देयं तद्दैवतमित्यादि ॥ गोदानम्—अद्येत्यादि अमुकदेव्यहं मम मया कृतस्य सोमवतीव्रतस्य यथोक्तफलावाप्तये उद्यापनकर्मणः प्रतिष्ठासाङ्गतासिद्धये न्यूनातिरिक्त परिपूर्णार्थम् इमां गां रुद्रदैवत्याम् तन्निष्क्रयद्रव्यं तद्दैवतं यथानामगोत्रायेत्यादि ॥ कपिलेति प्रार्थना ॥ दानप्रतिष्ठा–अद्य कृतैतत् इत्यादि ॥ (५८) ॥ इति सोमवती व्रतप्रतिष्ठाविधिः ॥

वा ४२५ रा.उ.

*

५४–अथ सामान्याष्टमी–चैत्राष्टमी–महाष्टमीव्रतप्रतिष्ठा

सर्वतोभद्रमण्डलैकदेशे कलशं सम्पूज्य तदुपरि सुवर्णप्रतिमां तत्पूजाविधिना सम्पूज्य ॥ रात्रौ जागरणम् कृत्वा ॥ प्रातर्देव्या उत्तरपूजां विधाय–ॐ अम्बेऽअम्बिकेमिति मत्रेण १०८ होमं समाप्य प्रार्थयेत्–ॐ महिषघ्नि महामाये चामुण्डे मुण्डमालिनि ॥ द्रव्यमारोग्यविजयं देहि देवि

नमोऽस्तु ते ।। भूत-प्रेत-पिशाचेभ्यो रक्षोभ्यश्च महेश्वरि ।। देवेभ्यो मानुषेभ्यश्च भयेभ्यो रक्ष मां सदा ।। सर्वमंगलमाङ्गल्ये शिवे सर्वार्थसाधिके ।। उमे ब्रह्माणि कौमारि विश्वरूपे प्रसीद मे ।। इति सम्प्रार्थ्य नव ब्राह्मणेभ्यो यथाशक्तिरक्तवस्त्रदक्षिणादिदानन् ।। अथ कुमार-कुमारी पूजनम् सुलिप्तभूमौ स्थापितासनेषु प्राङ्मुखीः कुमारीः संस्थाप्य सङ्कल्पं कुर्यात्—ॐ अद्येत्यादि मम कृतस्य अमुकाष्टमी-व्रतस्य उद्यापनकर्मणः प्रतिष्ठा साङ्गतासिद्धये देवीप्रीत्यर्थं यथावत्-संख्याक कुमारीणाम् यथासादितसामग्रिभिः पूजनपूर्वकम् भोजनं चाऽहं करिष्ये । तासाम् पाद-प्रक्षालनम्—ॐ जगत्पूज्ये जगद्वन्द्ये सर्वशत्रुविनाशिनि ।। पूजां गृहाण कौमारी जगन्मातर्न-मोऽस्तु ते ।। इति मन्त्रेण पाद्यादि नैवेद्यान्तं समभ्यर्च्य विभवानुसारेण सौभाग्यद्रव्य - वस्त्र-भूषणादीनि दद्यात् ।। खण्डमोदकं घृतं दुग्धं मधूनि यथासुखं शनैः शनैः भोजयेत् ।। तासां दत्ताचमनीयानाम् करेणाक्षतपुष्पादिकं दत्वा शिरसा प्रतिगृह्य विसजयेत् ।। प्रतिमादानम्—ॐ अद्येत्यादि अमुकशर्माऽहं मम देवीप्रसादविधिनाभीष्टावाप्तिराज्यादिसुखभोगोत्तरं देवीलोक-गमनकामनया कृतस्य अमुक अष्टमी व्रतस्य यथोक्तफलावाप्तये उद्यापनाङ्गत्वेन सुपूजितां

स्वर्णनिर्मितां सोपस्करां देवीप्रतीमां श्रीदेवीप्रीतये यथानामगोत्रायेत्यादि ॥ प्राथना – ॥ दुर्गे शिवे भये माये नारायणि सनातने ॥ चामुण्डे मंगलं थेहि तव रूपप्रदानतः ॥ ॐ अद्य कृतैतत् प्रतिमादानप्रतिष्ठासाङ्गतासिद्धयेयद्देयं तददैवतम् ॥ गोदानम् – ॥ अद्येत्यादि ममैतत्काल – पर्यन्तकृताऽमुकाष्टमी – व्रतस्यीद्यापतकर्मणः प्रतिष्ठासिद्धये न्यूनातिरिक्तपरिपूर्णार्थमिमां ग्रां रुद्रदैवत्यां तन्निष्क्रयीभूतं द्रव्यं तद्दैवतम् अमुकगोत्रायेत्यादि ॥ कपिलेति प्रार्थना – ॥ दाम प्रतिष्ठा – अद्य कृतैतत्इत्यादि ॥ ५८ ॥ इत्यष्टमीव्रतोद्यापनम् ॥

*

५५—अथ मङ्गलचतुर्थीव्रतप्रतिष्ठाविधिः

सुवर्णनिर्मितगणेशप्रतिमापूजनम् ॥ एकविंशतिब्राह्मणानां वस्त्रादिभिः पूजनम् ॥ लड्डुक-दानम् ॥ गणनान्त्वेति होमः १०८ ॥ प्रतिमादानम् ॥ गोदानम् ॥ पूणपात्रदानम् (५९) ॥

॥ इति मंगलचतुर्थीव्रतप्रतिष्ठाविधिः ॥

❀

५६—अथ सामान्यचतुर्दशीव्रतप्रतिष्ठाविधिः

सुवर्णप्रतिमा पूजनम् ॥ त्र्यम्बकमिति मन्त्रेण विल्वपत्रैर्होमः १०८ प्रतिमादानम् ॥ यज्ञोपवीतसवस्त्रजलपूर्णम् चतुर्दशघटदानम् ॥ ५८

॥ इति सामान्यचतुर्दशीव्रतप्रतिष्ठाविधिः ॥

*

५७-अथ शनिप्रदोषव्रतप्रतिष्ठाविधिः

सर्वतोभद्रमण्डलैकदेशे कलशं सम्पूज्य तदुपरि ताम्रस्थालीं सस्थाप्य स्थाल्युपरि सुवर्णनिर्मितसगौरीकां रुद्रप्रतिमां तत्पूजाविधिना सम्पूज्य ॥ रात्रौ जागरणं कुर्यात् ॥ प्रातर्देवस्योत्तराङ्गपूजां विधाय ॥ गौरीमिमां, त्र्यंबकमिति मन्त्राभ्यां प्रत्येकं १०८ हुत्वा देवं प्रार्थयेत् ॥ जय देव जगन्नाथ जय शंकर शाश्वत । जय सर्वसुराध्यक्ष जय सर्वसुरार्चित ॥ जय

सर्वगुणातीत जय सर्ववरप्रद ॥ प्रसीद मे महादेव संसारात् अद्यखेदतः ॥ सर्वपापक्षयं कृत्वा रक्ष मां परमेश्वर ॥ इति सम्प्रार्थ्य चतुर्दशब्राह्मणेभ्यो यज्ञोपवीत-वस्त्र-जलपूर्णघटदानम् ॥ पूर्णपात्रदानम् ॥ प्रतिमादानम् ॥ ॐ अद्येत्यादि मम श्रुति - स्मृति - पुराणोक्त-फलावाप्तिपूर्वक त्र्यम्बकप्रीतये एतावत्कालकृतस्य शनिप्रदोषव्रतस्योद्यापनाङ्गत्वेन सुपूजितां स्वर्णनिर्मितां सोपस्करां शिवप्रतिमाम् शिवप्रीतये अमुकगोत्रायेत्यादि ॥ प्रार्थना—शम्भो ! प्रसीद देवेश ! शर्व ! लोकेश्वर ! प्रभो ॥ तव रूपप्रदानेन प्रसन्नाः स्युः मनोरथाः । दानप्रतिष्ठा—अद्य कृतैतत् सोपस्कर सुपूजित शिव प्रतिमादानकर्मणः प्रतिष्ठासाङ्गतासिद्धये यत् देयं तद् दैवतम्० ॥ गोदानम्—ॐ अद्येत्यादि मम एतावत्काल कृतस्य शनिप्रदोषव्रतस्योद्यापनकर्म्मणः प्रतिष्ठासाङ्गतासिद्धये न्यूनातिरिक्त परिपूर्णार्थं श्रीसदाशिवप्रीतये इमां गां रुद्रदैवत्याम् तन्निष्क्रयं यद् द्रव्यं तद्दैवतं अमुकगोत्राय इत्यादि ॥ कपिलेति प्रार्थना ॥ दानप्रतिष्ठा—ॐ अद्य कृतैतदित्यादि ॥ (५८)

॥ इति शनिप्रदोषव्रतोद्यापनविधिः ॥

*

५८—अथ पक्षप्रदोषव्रतप्रतिष्ठाविधिः

सर्वतोभद्रमण्डलैकदेशे कलशं सम्पूज्य । तदुपरि ताम्रस्थालीं स्थाल्युपरि त्रिनेत्रम् जटा-
र्द्धचन्द्राऽनेकालङ्कारनागहारं दक्षिणाधः करतले वरम् ऊर्ध्वे परशुं वामार्द्धे मृगम् अधरे अभयम्
दधानाम् व्याघ्रचर्मपरीधानाम् स्वर्णसिंहासनस्थिताम् महादेवस्य रौप्यप्रतिमाम् तद्वामाङ्गस्थिताम्
दक्षिणाधः करतले पाशम् ऊर्ध्वे वरमधोऽङ्कुशं दधतीं ईषद्हास्ययुक्त मुखारविन्दाम् रक्तवर्णं
अनेकालंकारां रत्नसिंहासनस्थां पार्वतीसुवर्णप्रतिमां तद्विधिना सम्पूज्य रात्रौ जागरणं कुर्यात् ॥
प्रातर्देवस्योत्तरपूजा विधाय—ॐ नमः शम्भवाय० अम्बेऽअम्बिकेति मन्त्राभ्याम् प्रत्येकं पायसतिलैः
१००० होमः ॥ तिलवृषगोदानम् ॥ प्रार्थना ॥ प्रतिमादानादिकं शनिप्रदोषोक्तं ज्ञेयम् ॥५॥

॥ इति पक्षप्रदोषविधिः ॥

५८–अथ सर्वव्रतप्रतिष्ठाविधिः

वा. एवं सर्वं प्रतिमादानादिकं निवर्त्य अग्निसमीपं गत्वा मेधाकरणम् ॥ पूर्णपात्रदानम् ॥ स.वि.
प्रणीताविमोकादिकर्मशेषं समाप्य यज्ञान्तगोदानं कुर्यात् ॥ अद्येत्यादि पूर्वसंकल्पसिद्धिरस्तु मय
४३१ एतावत्कालपर्यन्तं कृतानामेकादश्यादिव्रतानाम् यथोक्तफलावाप्तये उद्यापनाङ्गत्वेन तत्तद्देवता-
नावाहनस्थापनपूजनपूर्वकम् तत्तद्देवतानां तत्तद्वस्तुभिर्हवनकर्मणः तत्तद्देवताप्रतिमादानकर्मणः
द्विजदम्पती-पूजनकर्मणः शय्यादानादिकर्मणश्च यथोक्तफलावाप्तये न्यूनातिरिक्तपरिपूर्णार्थमिमाम्
गां रुद्रदैवत्यां यथानामगोत्रायेत्यादि ॥ प्रार्थना–कपिलेति ॥ दक्षिणादानम् ॥ दक्षिणाद्रव्य
सम्पूज्याऽऽदाय, तिथ्याद्युल्लेखनान्ते अमुकगोत्रोऽमुकप्रवरोऽमुकशर्मा (वर्मा) सपत्नीकोऽहं मया
एतावत्कालपर्यन्तानामेकादश्यादि व्रतानाम् यथासादितसामग्रिणा तत्तद्देवतानाम् आवाहन
पूजन हवनादि कर्मणः तथा तत्तद्देवताप्रीतये तत्तद्वस्तूनाम् दानकर्मणः शय्यादानादिकर्मणः
करिष्यमाणब्राह्मणभोजनस्य च यथोक्तफलावाप्तये न्यूनातिरिक्तपरिपूर्णार्थम् श्रुतिस्मृति –
पुराणोक्तफलवाप्त्यर्थमिमां दक्षिणां रजतखण्डं चन्द्रदैवतं, ताम्रखण्डम् श्रीसूर्य दैवतं नानानाम –

गोत्रेभ्यो नाना नामशर्मभ्यो ब्राह्मणेभ्यः कन्याकुमारेभ्यो दीनानाथेभ्यश्च यथाभागं विभज्य यथाकालेन दातुमहमुत्सृजे, ॐ तत्सन्न मम ॥ इति ॥

तत आचार्यादयो ब्राह्मणा देवादीनामुत्तराङ्गपूजां निर्वर्त्य, यान्तु देवेति विसर्ज्य, देवस्य त्वेत्याभिमन्त्रैर्यजमानस्याऽभिषेक कुर्युः ॥ ततो यजमानो ब्राह्मणान् भोजयित्वा स्वयमपि सुहृद्युतो भुञ्जीत ॥

॥ इति सर्वव्रतप्रतिष्ठान्तविधिः ॥

इति वार्षिक-व्रतरत्नावली समाप्ता

*